

उदाहरणचन्द्रिकायाः समीक्षात्मकमध्ययनम्

प्रणेता सम्पादकश्च
डॉ. रविकान्तमणिः
राष्ट्रियसंस्कृतसंस्थानम्
जयपुर-परिसरः
त्रिवेणीनगरम्
जयपुरम् (राज.)

हंसाप्रकाशनम्, जयपुरम्

Published With The Financial Assistance From The Rashtriya Sanskrit Sansthan, New Delhi

राष्ट्रिय-संस्कृत-संस्थानस्य वित्तीय-साहाय्येन प्रकाशितोऽयं ग्रन्थः।
राष्ट्रिय संस्कृत संस्थान, नई दिल्ली द्वारा प्रदत्त आर्थिक सहायता से प्रकाशित यह ग्रन्थ।

प्रकाशक : **हंसा प्रकाशन**
57, नाटाणी भवन, मिश्रराजाजी का रास्ता,
चाँदपोल बाजार, जयपुर - 302 001

प्रथम संस्करण : 2003

मूल्य :

टाईप सेटिंग : टास्क ग्राफिक्स, जयपुर

मुद्रक : शीतल ऑफसेट प्रिन्टर्स, जयपुर

समर्पणम्

कृतिरियं समर्प्यते गुरुपादानां
पण्डितप्रवरवायुनन्दनपाण्डेयमहाभागानां
करकमलयोः सादरं सप्रश्रयं च

अनुक्रमः

मूल पाठात्मकः
प्रथमः खण्डः

समीक्षात्मको -द्वितीयः खण्डः

प्राक्कथनम्

अकारणकरुणावरुणालयभूतायाः भगवत्याः असीमकृपया प्राणिमात्रं संजीवति। तस्या एव परमया कृपया कार्येऽस्मिन् प्रवृत्तोऽहम्। अस्माकं गृहेऽपि संस्कृताऽध्ययनपरम्परा वर्त्तते। तस्यामेव परम्परायाम् अहमपि संस्कृतभाषाऽध्ययने संलग्नोऽभूवम्। अध्ययनकाले साहित्यशास्त्रस्यानेके ग्रन्थाः समधीताः, परन्तु तेषु ग्रन्थेषु मध्ये मम्मटविरचिते काव्यप्रकाशे अधिका रुचिरासीत्। तस्मिन्नेव समये मनसि विचारोऽयं आयातः, यत् काव्यप्रकाशमधिकृत्यैव शोधकार्यमहं करिष्यामीति। यद्यपि विघ्नबाहुल्यमत्र संजातम्। तथापि भगवत्याः कृपया शनैःशनैः सर्वं विनष्टम्। तस्मिन्नेव क्रमे वैद्यनाथकृता काव्यमालायां प्रकाशिता संक्षिप्ता चोदाहरणचन्द्रिका दृष्टिपथमायाता। सा चातीव मनोग्राहिणी वर्त्तते। तत्र काव्यप्रकाशीयोदाहरणानि समुपस्थापितानि सन्ति। तत्र च विभिन्नानां व्याख्यातृणां मतानि निरूपितानि सन्ति। तत्रौचित्यविचारोऽपि वर्त्तते। तत्र शोधकार्यमहं कर्तुम् इच्छामीति निवेदितं मया गुरुचरणानां प्रथितविदुषां व्याकरणाऽलङ्कारशास्त्रादिषु कृतभूरिपरिश्रमाणां पण्डितप्रवरवायुनन्दनपाण्डेयमहोदयानां सविधे। ते च परमकृपालवः स्वकीयाम् आज्ञां प्रदाय अनुगृहीतवन्तः समुत्साहितवन्तश्च माम्। तत्फलस्वरूपं कार्येऽस्मिन् अहं प्रववृत्ते। तेषां कृपयैव कार्यमिदं सुसम्पन्नमिति तेषां श्रीचरणयोर्भूयोभूयः नतिततयो निवेद्यन्ते। अत्र कार्ये यत् किमपि सौष्ठवं वर्त्तते तत्तेषाम्। याश्च त्रुटयः सन्ति ता अस्माकमिति गुणग्राहिणो विद्वांसोऽनुगृहणन्त्विति प्रार्थये।

ग्रन्थस्याऽस्य उपयोगित्वाभिवृद्धयेऽस्माभिः प्राकृतपद्यानामपि संस्कृतच्छायैव अत्र अङ्गीकृता। एवं काव्यप्रकाशगतसर्वाण्यप्युदाहरणानीह सन्निवेशितानीति स्यादेवैतद् ग्रन्थपिपठिषूणामुपकारायेति नो विश्वासः। ग्रन्थान्तरे दृष्टाः पाठभेदा अपीह पुष्पिकायां पदे पदे प्रदर्शिताः इत्युदाहरणचन्द्रिकायाः संस्करणेऽस्मिन् पूर्वापेक्षया कश्चन विशेषो लप्स्यत एव सुधीभिर्विद्वद्भिः। अन्ते च परिशिष्टरुपेण श्लोकानुक्रमणिकापि दत्ता। ग्रन्थस्य समीक्षाखण्डात्मके द्वितीये भागे तत्तद्विषयाणां ग्रन्थे प्रतिपादितानां यथामति समीक्षणं व्यधायि इति तत्सर्वमपि ग्रन्थरहस्यावगतौ साहाय्यं विधास्यत्येव पाठकानामिति।

ग्रन्थस्याऽस्य प्रकाशनाय आर्थिकसाहाय्यं दत्त्वा नवदेहलीस्थराष्ट्रियसंस्कृत-संस्थानेन यो ह्युपकारो विहितोऽथ च मातृकाणामध्ययनकाले समापतितानां विप्रतिपत्तीनां निरासपुरस्सरं ग्रन्थग्रन्थिस्फोरणे जयपुरस्थकेन्द्रीयसंस्कृतविद्यापीठीय-धर्मशास्त्रविभागाध्यक्षैः डॉ. कमलनयनशर्ममहोदयैः व्याकरणप्राध्यापकैः डॉ. प्रकाशचन्द्रमहोदयैश्च यद्धि साहाय्यम् आचरितं तत्कृते कार्तज्ञ्यं विनिवेद्यते। किञ्च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसरस्वतीभवनकर्मचारिणां जयपुरस्थप्राच्यविद्या-प्रतिष्ठानस्य कर्मचारिणाञ्च साहाय्यं विना कृतेरस्या अध्ययनं समीक्षणादिकं च नैव स्यादिति तेषां समेषां कृते धन्यवादविज्ञापनपूर्वकं वैद्यनाथकृतिरियमुपस्थाप्यते विदुषामन्वक्षं सहर्षमिति शम्।

जयपुरम् **-रविकान्तमणिः**

गुरुपूर्णिमा २०६० विक्रमी

भूमिका

अथेदं प्रस्तूयते उदाहरणचन्द्रिकायाः समीक्षात्मकमध्ययनम् इति प्रबन्धः तत्र भवतां भवतां विद्वद्धुरीणानां करकञ्जयोरिति। उदाहरणचन्द्रिका नामा ग्रन्थः काव्यप्रकाशीयोदाहरणान्याश्रित्य वर्त्तते विरचितः। तत्र मूलाधारभूतं काव्यप्रकाशमधिकृत्याऽपि किञ्चिल्लेखनमावश्यकं प्रतीयते। तत्र कवेः गद्यपद्यादिभेदभिन्नं शब्दव्यापारजन्यं यत्कर्म तत्काव्यशब्देन व्यपदिश्यते। तस्य काव्यस्य प्रकाशः काव्यप्रकाशः। ननु प्रकाशः किरणादिरूपः चन्द्रसूर्यादौ प्रसिद्धः, दीपादौ च दीपशिखारूपेण प्रसिद्धः, लोके न तथा दृश्यते तर्हि कथं प्रकाशशब्देन व्यवहार इति चेत्, न। किरणादिरूपत्वाभावेऽपि काव्यशास्त्रीयभेदोपभेदानां बोधकत्वात्, तद्विषयकज्ञानाभावेनाऽन्धकारमयत्वात्। तस्य चान्धकारस्य दूरीकरणत्वेनास्यापि प्रकाशस्वरूपत्वात् प्रकाश इव प्रकाश इति वक्तुं शक्यत्वात्। अतोऽयं काव्यप्रकाश इति नाम समुचितमेव। काव्यस्य प्रकाशः इत्यत्र काव्यप्रकाशघटकीभूतषष्ठ्याः विषयत्वमर्थः। अतः काव्यविषयकप्रकाशः। प्रकाश्यते बोध्यते अनेनेति प्रकाश इति ज्ञानसाधनमर्थः। अर्थात् काव्यविषयकज्ञानसाधनभूतो ग्रन्थः काव्यप्रकाशः। अस्य ग्रन्थस्यावान्तरविभागः उल्लासशब्देन वर्त्तते सम्पादितः। स च दशसंख्यायुक्तः। ग्रन्थेऽस्मिन् भागद्वयं वर्त्तते। प्रथमश्च कारिकारूपो वा सूत्ररूपो वा। अपरश्च वृत्तिरूपो विवरणात्मकः। उदाहरणानां च सङ्ग्रहः संस्कृतग्रन्थेभ्यः प्राकृतग्रन्थेभ्यश्च कृतो वर्त्तते। प्राकृतग्रन्थेभ्यः सङ्गृहीतानामुदाहरणानां वैपुल्यं दरीदृश्यते। काव्यस्वरूपं यथा गद्यपद्यनिरपेक्षं तथैव भाषानिरपेक्षमपि इति उदाहरणदर्शनेन सम्यक् अवलोक्यते। अतएवोक्तं राजशेखरेण कर्पूरमञ्जर्याम्–[1]

अर्थविशेषास्त एव शब्दास्त एव परिणमन्तोऽपि।
उक्तिविशेषः काव्यं भाषाया भवति सा भवतु॥

प्राकृतोदाहरणानां सङ्ग्रहः साहित्यशास्त्रे आनन्दवर्धनकालत एव प्रारब्ध इति प्रतीयते। तथापि पूर्ववर्त्तिनः काव्यविवेचका अपि प्राकृतग्रन्थानां काव्यशब्देन सम्बोधनं कुर्वन्ति स्म। यथाह दण्डी–[2]

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्॥

---

१. कपूर्रमंजरी–१।८

२. काव्यादर्शे–१।३४

यद्यपि शब्दार्थद्वारा चमत्कृतिप्रतिपादककाव्यकला काव्यशास्त्रशब्देनोच्यते तथाप्यन्यान्यपि नामानि मिलन्ति। अस्य शास्त्रस्य अत्यन्तं प्राचीनं नाम क्रियाकल्पं काव्यक्रियाकल्पं वा वर्त्तते। वात्स्यायनेनापि शब्दोऽयं प्रयुक्तः कामसूत्रे[३]। एवमेव वाल्मीकीये रामायणे[४] क्रियाकल्पविदश्चैव इत्युक्तं वर्त्तते। काव्यालङ्कारसूत्रे भामहेनापि[५] काव्यक्रियाशब्देनास्य शब्दस्य व्यवहारः कृतः। दण्डिनापि[६] क्रियाविधिशब्दस्य प्रयोगः कृतः। तथा तत्रैव काव्यशास्त्रमुद्दिश्य काव्यलक्षणमित्यपि वर्त्तते प्रयोगः।

तदनन्तरं भामहः किञ्चिन्मात्रं परिवर्त्य काव्यलक्ष्म इति शब्दस्य करोति प्रयोगम्। एवमेव काव्यालङ्कारशास्त्रम् अथवा अलङ्कारशास्त्रमिति प्रयुञ्जते आचार्याः। काव्यशोभानिष्पत्त्यनुकूल पदार्थानुरोधेनालङ्कारशब्दस्य प्रयोगो भवति स्म। ततः प्रभृति एव काव्यालङ्कारः, काव्यालङ्कारसारसंङ्ग्रहः, काव्यालङ्कारसूत्रवृत्तिरित्यादीनि नामानि प्रयुक्तानि दृश्यन्ते। यद्यपि शास्त्रशब्देन सर्वदर्शनानामेव व्यपदेशपरम्परा वर्त्तते तथापि काव्यलक्षणालङ्कारप्रभृतीनां विषयाणां शासनकर्तृत्वेनास्यापि शास्त्रत्वं सुप्रतिष्ठितं भवति।

सहितयोरिति जिज्ञासायां शब्दार्थयोः सहितयोः भावः साहित्यमित्यनेन शब्दार्थयुगलयोः काव्यमिति समानार्थकत्वात् काव्यमेव साहित्यशब्देन व्यपदेशभाक्। तथा चोक्तं सर्वप्रथमं काव्यलक्षणं भामहेन-'शब्दार्थौ सहितौ काव्यम्' इति। इदमेव काव्यलक्षणस्य बीजभूतम्। शब्दार्थयोः परस्परानुरूपसौन्दर्यशालित्वप्रतिपादकं शास्त्रं साहित्यशास्त्रम्। राजशेखरः काव्यमीमांसायां विद्यानिरूपणप्रसङ्गे साहित्यशास्त्रस्यापि विद्यात्वेन प्रयोगं कृत्वा अन्यासु विद्यासु अस्या अपि विद्यायाः प्रतिष्ठां कृतवान्। काव्यशास्त्रीयलक्षणानाम् अङ्गप्रत्यङ्गानां च परिशीलनेन शास्त्रस्यास्य सर्वव्यापकत्वं सुप्रतिष्ठितं भवति। साहित्यशास्त्रप्रथमाचार्यः भरतमुनिः वर्त्तते। स च स्वस्मिन् नाट्यशास्त्रे षट्त्रिंशदध्यायेषु नृत्य-गीत-वाद्य-शिल्पादिविषयाणां प्रतिपादनं कृतवान्। अभिनवगुप्तपादेन व्याख्यातमिदं नाट्यशास्त्रम्। पाठ्यनामकमङ्गं नाट्यशरीररूपेण विशेषेण प्रतिपादितम्। तदेवोद्दिश्य काव्यशब्दस्यापि प्रयोगो वर्त्तते। तत्रैव रसस्यापि वर्त्तते वर्णनम्। विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः। रस इति कः पदार्थः आस्वाद्यत्वात् इत्यादिवचनैः रसस्य निष्पत्तिप्रकारः निर्दिष्टो वर्त्तते। पूर्वोक्तस्य पाठ्यस्य काव्यबन्धस्य भूषणम् अक्षरसङ्घातादिकं च वर्णितं वर्त्तते। भूषणलक्षणेषु उपमारूपकदीपकयमकालङ्काराणां तथा श्लेषप्रसादसमताप्रभृतीनां दशसंख्याकानां गुणानां समावेशः कृतः। तदनन्तरं च गुणानुसङ्गात् गुणविपर्ययात्मकदोषाणामपि निरूपणं कृतम्। एतेन प्रकारेण काव्यप्रकाशप्रतिपादितकाव्यलक्षणमारभ्यालङ्कारपर्यन्तानां समेषां विषयाणां

---

३. कामसूत्र-१।१३।१६

४. वा. रा.- ९४।७

५.काव्यालङ्कारसूत्र- १।१०

६. काव्यादर्श- १।९

मूलरूपेण तत्रैव प्रतिपादनं वर्त्तते। न[७] ह्यङ्गाऽभिनयात् किञ्चित् ऋते नाट्यं प्रवर्त्तत इति भरतमुनीनां सिद्धान्तः। यद्यपि नहि सर्वेषां काव्यानां निर्माणं अभिनयसम्पादनायैव भवति। तथापि आस्वाद्यत्वन्तु तत्रापि भवत्येव। यथा–

रामायणस्य महाकाव्यत्वं नाभिनेयतात्वेन भवति। अपितु छन्दोबद्धत्वात् गेयत्वेन भवति। गेयत्वेन आस्वाद्यतापि भवति। यथा– काव्यप्रकाशे काव्यलक्षणप्रसङ्गे भामहकृत–काव्यलक्षणस्य प्रभावः काव्यप्रकाशीयलक्षणेऽनुभूयते तथैव वाच्यलक्ष्यादिप्रतिपादने आनन्दवर्धनकृतस्य ध्वन्यालोकस्य प्रभावः काव्यप्रकाशे वर्तत एव। ध्वनिसम्प्रदायस्य प्रतिष्ठाता आनन्दवर्धनो वर्त्तते। तस्यैव समुपबृंहणं काव्यप्रकाशे मम्मटेन कृतमिति न तिरोहितं साहित्यविद्याविद्योतितान्तःकरणानां तत्परिशीलनस्वभावानां विद्वत्प्रकाण्डानाम्। अत एव विद्वद्वरेण्यैः सहृदयैरुक्तम्–

ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना।
आनन्दवर्धनः कस्य नासीदानन्दवर्धनः॥ इति।

अपरञ्च यथा– ध्वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वात् एभिर्वचनैः आनन्दवर्धनस्य मूल्याङ्कनं कर्तुं शक्यते। अतः ध्वन्यालोकेन प्रभावितोऽयं काव्यप्रकाशग्रन्थ इति सुस्पष्टं वक्तुं शक्यते।

काव्यप्रकाशीयसूत्राणां कारिकाणां वा तथा वृत्तीनामेकर्तृत्वमनेककर्तत्वं वेति किञ्चिद् विचार्यते। तथाहि–अत्र रुय्यकमाणिक्यचन्द्रयोः सङ्केतटीका वर्त्तते। तथा अर्जुनवर्मदेवस्य रसिकसञ्जीवनीटीका, आनन्दस्य च निदर्शना टीका वर्त्तते। एतेषां व्याख्याकाराणां मते काव्यप्रकाशग्रन्थस्य द्विकर्तृकत्वं सिद्ध्यति। अल्लट नामा कश्चिद् विद्वान् परिकरालङ्कारादग्रिमग्रन्थानां मम्मटशेषभूतानां निर्माणं कृतमिति। केषाञ्चिच्च मतमिदं वर्तते यद् काव्यप्रकाशमम्मटाल्लटयोः सम्मिलितयोः कृतिः वर्तते। एवमेव सङ्केतटीकायाः प्रथमोल्लासस्य अन्तिमा पुष्पिका दृश्यते– इति श्रीमद्राजानकमल्लटमम्मटरुचकविरचिते निजग्रन्थकाव्यप्रकाशसङ्केते प्रथमोल्लासः। अत्र मल्लमम्मटरुचकानां नामानि निर्दिष्टानि सन्ति। अतः त्रयाणां सम्मिलितं कार्यमिदमिति प्रतिभाति। एवमेव दशमोल्लासस्य पुष्पिका दृश्यते यथा– राजानकमम्मटाल्लटरुचकानां विरचिते इत्यादि। अनेनापि प्रतिभाति यत् त्रयाणामेतेषां सम्मिलितं कार्यमिदमिति। कतिपयबङ्गीयव्याख्याकाराणां मते– द्विकर्तृकत्वमस्य ग्रन्थस्य। यथा– काव्यप्रकाशीयकारिकाभागस्य निर्माता भरतमुनिर्वर्तते। वृत्तिग्रन्थस्य च निर्माता मम्मट इति महेश्वरबलदेवौ वदतः। तथा च महेशोक्तिः– सुकुमारान् राजकुमारान् स्वादु–काव्यप्रवृत्तिद्वारा गहने शास्त्रान्तरे प्रवर्तयितुं अग्निपुराणादिभ्यः उद्धृत्य काव्यरसास्वाद–कारणमलङ्कारशास्त्रं कारिकाभिः संक्षिप्य भरतमुनिः प्रणीतवान्। मम्मटभट्टस्तु ताः कारिकाः सोदाहरणं व्याख्यातुं कारिकादिग्रन्थभूतां नियतिकृत इत्यादि कारिकामुत्थापयति–'ग्रन्थारम्भे'

---

७. भरतनाट्यशास्त्र– १४।८० !

इत्यादि। एवमेव बलदेवेनापि साहित्यकौमुद्यां स्वकीयायां टीकायामुक्तम्- सूत्राणां भरतमुनीश-वर्णितानां वृत्तीनां कृतवपुषां कृतौ ममास्यामित्यादि। तथा च तस्योक्तिः-

मम्मटाद्युक्तिमाश्रित्य मितां साहित्यकौमुदीम्।
वृत्तिं भरतसूत्राणां श्रीविद्याभूषणो व्यधात्।।

अस्यैव व्याख्यातुः कृष्णानन्दिनी नाम्नी काचिद् टिप्पणी साहित्यकौमुद्यां वर्तते। यथा- काव्यरसास्वादनाय वह्निपुराणादिदृष्टां साहित्यप्रक्रियां भरतः संक्षिप्ताभिः कारिकाभिः निबबन्ध। कारिकास्ताः व्याचिख्यासुः वृत्तिकृत् मङ्गलमाचरति इति। अनेनापि प्रकारेण काव्यप्रकाशस्य द्विकर्त्तृकत्वं सिद्धयति।

अपि च काव्यप्रकाशीयाः काश्चिद्कारिकाः भरतमुनिविरचिते नाट्यशास्त्रे मिलन्ति। अतोऽपि द्विकर्त्तृकत्वं सिद्धयति।

अपि च ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति इत्यस्यां अवतरणिकायां प्रथमपुरुषस्य क्रियानिर्देशादपि कारिकाकारस्य वृत्तिकाराद् भेदः प्रतीयते।

अपि च- समस्तवस्तुविषयं श्रोता आरोपिता यदा इति कारिकाव्याख्याने स्वयमेव मम्मटः लिखति- बहुवचनमविवक्षितमिति। अर्थात् बहुवचनस्थाने द्विवचनस्यापि प्रयोगं कर्त्तुमुचितमासीत्। यद्येककर्त्तृकत्वं भवेत् तर्हि कथनमिदं नोचितं प्रतिभाति। तस्मात् सूत्राणि भरतनिर्मितानि वृत्तिश्च मम्मटविरचिता प्रतिभाति।

परन्तु नैते पक्षाः सहृदयहृदयाह्लादजनकीभूता इति सिद्धान्तः। तथाहि- अल्लटः रुय्यकविरचितस्य अलङ्कारसर्वस्यस्य व्याख्याता वर्तते। रुय्यकश्च मम्मटपरवर्ती वर्तते। तस्मात् अल्लटमम्मटयोः समकालिकत्वं केनापि प्रमाणेन साधयितुं न शक्यते। तस्मान्न सहकारित्वं सम्पत्स्यते।

अपि च- काव्यप्रकाशग्रन्थः वर्षशतं यावत् अपूर्ण एव आसीत्। तदनन्तरं अल्लटः पूर्णतां सम्पादितवानित्यपि न समीचीनः पन्थाः। एतस्मात् पूर्वमेव काव्यप्रकाशस्य माणिक्यचन्द्रप्रभृतिभिः व्याख्यातृभिः व्याख्यातत्वात्।

अपि च- यथा कादम्बर्याः द्विकर्त्तृकत्वेन भाषाशैलीभेदः मङ्गलाचरणभेदश्च समवलोक्यते। न तथा काव्यप्रकाशे दरीदृश्यते। तस्मान्न द्विकर्त्तृकत्वं काव्यप्रकाशस्य अपितु तदानीन्तनानां परगुणासहिष्णूनां विदुषां द्वेषमात्रमेव।

अपि च- वृत्तिकारिकयोरप्येककर्त्तृकत्वमेव। यथा- कारिकायां मङ्गलाचरणमुपलभ्यते न तथा वृत्तिग्रन्थस्यादौ पृथक् मङ्गलाचरणं दृश्यते। यदि कर्त्तृभेदोऽभविष्यत् तदा मङ्गलाचरणभेदोप्यभविष्यत्। यस्मान्न मङ्गलाचरणभेदः तस्मान्न कर्त्तृभेदः। अतः कारिकायाः वृत्तेश्च कर्त्ता मम्मट एव।

अपि च- वृत्तौ रसप्रकरणे मम्मटेनोक्तं तदुक्तं भरतेन इति। यदि सर्वाः कारिकाः भरतनिर्मिताः स्युस्तर्हि कथनमेतदसङ्गतं स्याद्। एवमेव रूपकालङ्कारप्रसङ्गे साङ्गं

एतन्न निरङ्गन्तुं शुद्धं माला तु पूर्ववत् इति। यदि कारिका भरतनिर्मिता स्यात् तर्हि कारिकायामपि मालोपमा निर्देशः अवश्यमेव स्यात्। परन्तु केवलं वृत्तावेव तस्य नामनिर्देशः। तस्मादपि सम्पूर्णस्य काव्यप्रकाशग्रन्थस्यैककर्तृकत्वमेव मन्तव्यमिति निश्चप्रचम्।

यद्यपि ध्वनिसिद्धान्तानां प्रतिपादनं आनन्दवर्धनेन सम्पूर्णतया कृतम्। रसविषयकसिद्धान्तानां च भरतमारभ्य अभिनवगुप्तं यावत् आचार्याः विशदतया सुस्पष्टं प्रतिपादनं कृतवन्तः। गुणदोषालङ्कारप्रभृतीनां निरूपणं भामहप्रभृतयः आचार्याः कृतवन्तः। तर्हि- काव्यप्रकाशस्य किं वैशिष्ट्यमिति जायते जिज्ञासा। तत्र न किमपि इति वक्तुं न शक्यते। अस्यापि ग्रन्थस्य विशिष्टत्वात्। सर्वेषां ग्रन्थानामालोडनं कृत्वा काव्यशास्त्रीयाणां समेषां विषयाणां तथा तदतिरिक्तानां व्याकरणादिशास्त्रप्रतिपादितसिद्धान्तानां विवेचनं कृतम्। ग्रन्थस्य विषयप्रतिपादनसौष्ठवं सर्वतोऽधिकं दृश्यते। यदि ध्वन्यालोकः मूलग्रन्थः तर्हि तदुपरि काव्यप्रकाशःवार्त्तिक ग्रन्थ इव सुशोभते। अन्यापेक्षया वैशिष्ट्यसम्पादकत्वादेव साहित्यशास्त्राकाशे सूर्य इव प्रतिभाति। यथा- सूर्यं विना न लोकः प्रवर्त्तते तथा काव्यप्रकाशं विनापि न साहित्यशास्त्रे प्रवर्तते कश्चित्। अत एव काव्यप्रकाशः मूर्धन्यं स्थानं प्राप्तवान्। वैदुष्यस्य निकषोऽयम्। अतएवोक्तं केनचित्-

मम्मटभट्टविरचितः सहृदयसर्वस्वतां यातः
काव्यप्रकाशनामा विराजते ग्रन्थराजोऽयम्।
काव्यप्रकाशगौरवमेतेनैव स्फुटीभवति
यत्तत्रैव विरचिताः शतशष्टीकाः प्रटीकाश्च॥
वाग्देवतावतारश्चानेनैवैकमात्रग्रन्थेन
मम्मटभट्टो जातः सा सुषमा तावदस्ति रचनायाः।
काव्यविषयका ये ये ज्ञातव्याः सन्ति सद्विषयाः
परिहृत्य विस्तरं ते संक्षेपेणात्र राजन्ते॥
अन्येषु ग्रन्थेषु च विस्तृतानां सुबहुलत्वम्
अतिसंक्षेपे वाप्यथ विक्षेपं नूनमाधत्ते।
व्याकरणे यत् स्थानं काचित् सिद्धान्तकौमुदी धत्ते
साहित्ये तत्स्थानं मम्मटरचनेयमाधत्ते॥

अस्मिन् विषये महेश्वरेणोक्तम्-

"काव्यप्रकाशस्य कृता गृहे गृहे टीकास्तथाप्येष तथैव दुर्गमः॥"

अनेन च काव्यप्रकाशस्य महत्त्वं स्फुटीभवति। विश्वनाथरुय्यकप्रभृतयः आलङ्कारिकाऽपि टीकाकाराः विराजन्ते तथैवापरपक्षे नैयायिकेषु जगदीशनरसिंहौ, वैयाकरणेषु नागेश भट्टः, मीमांसकेषु कमलाकरभट्टः, वैष्णवो बलदेवविद्याभूषणश्च, तान्त्रिकेषु गोकुलनाथो विराजते। अस्मात् प्रतीयते यत् तत्र टीकाकरणं स्वकीयपाण्डित्यपरीक्षणमासीत्।

माणिक्यचन्द्रस्य संकेतनाम्नी टीका अतिप्राचीना वर्तते। तत्र मुकुलभट्टप्रभृतीनामाचार्याणां नामोल्लेखः वर्तते। टीकायाः महत्त्वं ख्यापनाय उक्तम्-

सशब्दार्थशरीरस्य काव्यालङ्कारव्यवस्थितिः
यावत् कल्याणमाणिक्यप्रबन्धो न निरीक्ष्यते।
लोकोत्तरोऽयं सङ्केतः कोऽपि कोविदसम्मतः
शब्दस्याऽम्बरो यत्र भूषणत्वेन निश्चितः॥

इति रुय्यकस्यापि संकेतनाम्नी टीका वर्तते। रुय्यकरुचक इति न भिन्नः, अपितु एकएव। अतएवोक्तं जयरथेन राजानकरुय्यकस्य राजानकरुचकाऽपर नाम्नोऽलङ्कारसर्वस्वकृत इति। नरहरिसरस्वतीतीर्थस्य बालचित्तानुरञ्जिनी टीका वर्तते। अस्यां टीकायां न कस्यापि नाम उल्लिखति ग्रन्थकारः। सोमेश्वरस्यापि टीकायाः नाम सङ्केत आसीत्। काव्यादर्शश्च तस्यैवाऽपरं नाम। कुत्रचित् च काव्यादर्शसङ्केत इति नाम मिलति। जयन्तभट्टस्य जयन्ती टीका वर्तते। अस्या एव च दीपिकेत्यऽपरं नाम। श्रीधरस्य विवेकटीका सुप्रसिद्धा वर्तते। चण्डीदासस्यापि दीपिका नाम्नी टीका वर्तते। स्वयमेवोक्तं तेन टीकायाःअन्ते इति कापिञ्जल-कुलतिलक-षड्दर्शनीय-चक्रवर्ति-महाकवि-चक्रचूड़ामणि-सहृदयगोष्ठी-गरिष्ठ-महापहोपाध्याय-महापात्र-श्री-चण्डीदासकृतकाव्यप्रकाशदीपिकायामिति। कविराज-विश्वनाथस्यापि काव्यप्रकाशदर्पण नाम्नी टीका वर्तते। साहित्यदर्पणग्रन्थनिर्माणानन्तरं काव्यप्रकाशस्य टीका विरचितेति प्रतीयते। यथोक्तम्-येषां च षोडशानां लक्षणाभेदानां दर्शितानि उदाहरणानि मम साहित्यदर्पणेऽवगन्तव्यानि। तथा च दशमोल्लासे तदुक्तं मम कृते साहित्यदर्पणे इति। भास्करस्य साहित्यदीपिका विद्याचक्रवर्तिनः सम्प्रदायप्रकाशिनी, परमानन्द-चक्रवर्तिनः विस्तारिका टीका महत्त्वपूर्णा वर्तते। आनन्दकवेः निदर्शना, श्रीवत्सलाञ्छनभट्टाचार्यस्य सारबोधिनी टीका अतीव समीचीना वर्तते। तदनन्तरं गोविन्दठक्कुरविरचितः काव्यप्रदीपोऽतीव महत्त्वपूर्णं स्थानमाबिभर्त्ति। काव्यप्रकाशीयां कारिकामाश्रित्य प्रवर्तते प्रदीपः। कारिकाऽर्थ प्रकाशकत्वात् प्रदीप इव वर्तते। इमं प्रदीपमधिकृत्य वैद्यनाथेन प्रभाटीका विरचिता। काव्यप्रकाशीयोदाहरणान्यधिकृत्य उदाहरणचन्द्रिका विरचिता। उदाहरणचन्द्रिकायाञ्च चण्डिदाससुबुद्धिमिश्र दीपिकाकारचक्रवर्तिमहेशप्रभृतीनां नामानि मिलन्ति। एतेषां मतानि समुपस्थाप्य समीक्षितानि सन्ति। प्रभोदाहरणचन्द्रिकयोः पौर्वापर्यविचारणायां उदाहरणचन्द्रिकायाः पूर्वभावित्वं निश्चीयते। तदुक्तं वैद्यनाथेन प्रभायाम्- उदाहरण-श्लोकाऽर्थस्तु विस्तरेणास्मत्कृतोदाहरणचन्द्रिकायां द्रष्टव्य इति। वैद्यनाथस्य समयः सप्तदश शताब्दी वर्तते। वैद्यनाथोऽयं मैथिलवैयाकरणाद् भिन्नः। वैयाकरणो वैद्यनाथः महादेव पुत्रः नागेशभट्टशिष्यश्चासीत्। अयं प्रभाकारो वैद्यनाथः रामचन्द्रभट्टात्मजः विट्ठलभट्टस्य पौत्रः। वैद्यनाथस्य कालविषये श्लोकोऽयं प्रमाणभूतः।

वियद वेदमुनिक्ष्माभिर्मितेऽब्दे कार्तिके सिते।
बुधाऽष्टम्यामिमं ग्रन्थं वैद्यनाथोभ्यपूरयत्॥

तथा– उदाहरणचन्द्रिका पुष्पिकायां– इति श्रीमत्पद–वाक्य–प्रमाणाभिज्ञ–धर्मशास्त्र–पारावार–पारीण–तत्सद्विट्ठलभट्टात्मज श्रीरामभट्टसूरिसूनुना वैद्यनाथेन रचितायां काव्य–प्रकाशोदाहरणविवृतावुदाहरणचन्द्रिकायां दशमउल्लासः सम्पूर्ण इति।

अस्याः उदाहरणचन्द्रिकायाः प्रतिपाद्यविषयाः नाम्नैव स्फुटीभवति। अस्याः विवेचनमतीव रुचिकरम्। अस्याः सम्पादने समीक्षणे च मातृकात्रयाणां समुपयोगः कृतो वर्तते। तत्र प्रथमा मातृका तदानीन्तनवाराणसेय संस्कृतविश्वविद्यालयस्य इदानीन्तन–सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वती भवनात् समुपलब्धा। सा एव मूलमातृकारुपेण समुपयुक्ता। अस्य ग्रन्थांकः ४३०२८ वर्तते। पत्र संख्या १३६, आकारश्च ११ गुणा ३८ वर्तते। प्रतिपृष्ठे नवपङ्क्तयः सन्ति। प्रतिपङ्क्ति ४४ अक्षराणि सन्ति। आधारश्च कर्गजपत्राणि सन्ति। एवं देवनागरी लिपिर्वर्तते। इयं मातृका सम्पूर्णा अस्ति।

द्वितीया च मातृका राजस्थानप्राच्यविद्याप्रतिष्ठानस्य, जयपुरशाखातः समुपलब्धा। तत्र पत्र संख्या १२० वर्तते। ग्रन्थ संख्या २२३२, प्रतिपृष्ठं १३ पङ्क्तिर्वर्तते। प्रतिपङ्क्ति च ४० अक्षराणि सन्ति। आकारश्च ३० गुणा १४ वर्तते। लिपिर्देवनागरी। आधारश्च कर्गजपत्राणि सन्ति। हस्तलेखोऽयं अतीव शुद्धः। लिपिकारश्च १९ तमा शताब्दि वर्तते।

तृतीया च मातृका पूर्वोक्तस्यैव प्रतिष्ठानस्य अलवरशाखातः सम्प्राप्ता। ग्रन्थसंख्या २३७७ वर्तते। तत्र १३१ पत्राणि सन्ति। प्रतिपृष्ठं पङ्क्तिनां संख्या १३ वर्तते। प्रतिपङ्क्ति अक्षराणां च संख्या ४० अस्ति। लिपिर्देवनागरी। आधारश्च कर्गजम्। मातृकेऽयं त्रुटिता वर्तते। ३०, ३७–३८, ४०–४२, पत्राणि न सन्ति। तत्र काव्यप्रकाशोदाहरणचन्द्रिकासौ टीका। श्रीमन्महाराजाधिराज महारावराजा श्री सवाईविनयसिंहवर्मणां पुस्तकमिदमिति लिखितमस्ति।

मूलपाठात्मकः
प्रथमखण्डः

मूलपाठस्य प्रयोजनम्-

महामाहेश्वरप्रणीतस्य काव्यप्रकाशस्य महत्त्वं न तिरोहितं काव्यरसरसज्ञानां विद्वदपश्चिमानाम्। ग्रन्थरत्नमिदं साकल्याधायकं वर्त्तते। न काव्यप्रकाशस्याध्ययनं विना साहित्यशास्त्रस्याध्ययनं सम्पूर्णतां प्राप्नोति। यद्यपीदं पुस्तकं साहित्यशास्त्रीयविषयविवेचनाय प्रवृत्तम्, तथाप्यत्र प्रसङ्गानुरूपमनेकेषां न्यायव्याकरणमीमांसाप्रभृतीनां शास्त्राणां विषयाणामपि विवेचनं वर्त्तत एव। सम्पूर्णस्य ग्रन्थस्यावलोकनेन संस्कृतशास्त्रीयकोश इव प्रतिभाति। अत्र प्रवर्त्तमानाः शतशष्टीकोपटीका एव प्रमाणभूताः सन्ति। मूलतो वैयाकरणा वा भवेयुर्नैयायिका वा, तत्राध्ययनमध्यापनं टीकादिनिर्माणं स्वकीयवैदुष्यस्य प्रमापकत्वेन स्वीकुर्वन्ति। अतएवास्य ग्रन्थस्य महत्त्वं सुस्पष्टीभवति। काव्यप्रकाशीयसिद्धान्तानां खण्डनाय प्रवृत्ता अपि महत्त्वं ख्यापयन्त एव साहाय्यमाचरन्ति।

टीकोपटीकानां वैपुल्यादेव व्याख्याकाराणां परस्परं मतभेदाऽपि दरीदृश्यन्ते। यथा मूललक्षणादिकमधिकृत्य मतभेदाः सन्ति, तथैवोदाहरणव्याख्यानेऽपि नास्ति मतैक्यमिति सर्वे विद्वांसो जानन्त्येव। तमेव मतभेदमादाय ग्रन्थकारेण तद्दोषपरिजिहीर्षया "उदाहरणचन्द्रिका" नाम्नो ग्रन्थस्य निर्माणं कृतम्। तत्रानेकेषामाचार्याणां व्याख्यानं प्रस्तुत्य समीक्ष्य च सप्रमाणं समुचितार्थं निर्धारितवान्। तस्य चोदाहरणचन्द्रिकानामकस्य ग्रन्थस्य समीक्षात्मकमध्ययनं प्रस्तूयते मया। "असत्यां भित्तौ कुत्र चित्रलेखः" इत्यनेन न्यायेन समीक्षणाय च मूलग्रन्थस्यातीवोपयोग इति सर्वे विज्ञाः जानन्ति। अतएव सर्वप्रथमतया मूलग्रन्थस्य समायोजनं मया कृतम्। यद्यपीयमुदाहरणचन्द्रिका महापहोपाध्याय श्रीगोविन्दभट्टप्रणीतकाव्यप्रदीपतत्सदुपाख्यश्रीवैद्यनाथविरचितप्रभासहितकाव्यप्रकाशेन सह काव्यमालायां वर्त्तते प्रकाशिता तथापि न तत्र साकल्येनोपलभ्यते, अपि तु संक्षेपेणैव प्रकाशिता वर्त्तते। केषाञ्चिच्छ्लोकानां समीक्षणं नोपलभ्यते। तस्मादपि कारणादत्र मूलपाठसंयोजनमावश्यकमिति मया अन्वभावि। अतोऽत्र संयोजितमिति शम्।

"श्रीगणपतये नमः[१]"

(अथ प्रथमोल्लासः)[२]

निजभक्तधुरीणस्य गिरं कर्त्तुं गरीयसीम्।
स्तम्भादाविः कृताकारं नमामि कुलदैवतम्।।१ ॥
गङ्गोद्भासितमौलिश्चन्द्रकलाललितशेखरः सततम्।
अङ्गीकृतगलगरलो जयति जयन्तीपतिर्जगति ॥२ ॥
यत्पदाम्बुरुहद्वन्द्वमिलिन्दीकृतमानसाः।
भक्ता भवन्ति सिद्धीनां सदनं तामुमां भजे।।३ ॥
उत्तुङ्गकुम्भयुगसान्द्रविलिप्तचारुसिन्दूरपूररुचिराय गजाननाय।
दूरानताखिलसपर्वकिरीटरत्ननीराजितांघ्रियुगलाय सदा नतोऽस्मि ॥४ ॥
आधाय हृदि वाग्देवीचरणाम्बुजमादरात्।
कुर्वे प्रकाशसम्बद्धामुदाहरणचन्द्रिकाम्।।५ ॥
चिरन्तनकृता व्याख्याः समालोच्य यथामति।
रचिता वैद्यनाथेन रामचन्द्रात्मजन्मना ॥६ ॥
कृतिरेषा कृपावद्भिः साधुभिर्ध्वनिपण्डितैः।
गुणदोषविभागज्ञैर्निपुणं परिशोध्यताम्।।७ ॥
स्वाधीनपतिका काचिदसकृदुपभुक्तेष्वपि।
वरोपकरणादिषु उत्कण्ठोत्पत्त्या तेषामत्यन्तोपादेयताम् ॥८ ॥

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालती सुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।।

सूचयन्ती सखीमाह।

यः कौमारेति। अत्र हिशब्दस्य यद्यपीत्यर्थकतया अस्तिक्रियाध्याहारेण च यः कौमारहरो वरः स एव यद्यप्यस्ति, चैत्रक्षपास्ता एव यद्यपि सन्ति उन्मीलितमालती सुरभयः प्रौढ़ाः कदम्बानिलास्त एव च यद्यपि सन्ति। अस्मि चैव यद्यप्यस्मि, तथापि तत्र रेवारोधसि तत्र वेतसी तरुतले तत्र सुरतव्यापारलीलाविधौ चेतः समुत्कण्ठत इत्यन्वयः। कौमारं बाल्यं परमरसिकतया तदवस्थायामपि सम्भोगेच्छोत्पादनेन हृतवान् चोरितवानिति कौमारहरः। ततश्चाकृत्रिमप्रेमपात्रताप्रकटेनेनानुरागदार्ढ्यध्वननम्। व्रियते प्रियत्वेन स्वयमङ्गीक्रियत इति वरः। तेनोभयानुरागलाभः। कौमारं नवयौवनमिति व्याख्याने तु स्वयमालोच्य वृतो न तु

१. श्रीगणपतये नमः 'स्थाने' श्रीगणेशाय नमः 'क' मातृकायाम्।
२. मया योजितम्।

पित्रादिपारतन्त्र्यात्कञ्चिदाश्रित इत्यर्थः। निषिद्धलक्षणापत्त्या तु तथा व्याख्यानं न मनोरमम्। उपभुक्तान्यो नेत्यर्थः। हि शब्दोऽयोगव्यवच्छेदार्थ इत्यन्ये। तदा[3] च यद्यपीत्यध्याहार्यम्। चैत्रस्य क्षपाः रात्रयः ता एवेति पूर्ववत्। उन्मीलिता विकसिता या मालती तस्या सुरभयः शोभनगन्धाः। मालती च वासन्तीलता, न तु जातिः, चैत्रे तस्या असम्भवात्। प्रौढाः रत्युद्दीपनादिप्रागल्भ्यशालिनः। अतो मन्दत्वेऽप्यविरोधः। कदम्बस्य धूली कदम्बाख्यस्य पुष्पविशेषस्य सम्बन्धिनः। सर्वदिक्सञ्चारित्वेन कदम्बाकारा वा अनिलाः वायवः। वसन्ते कदम्बान्तरस्यासम्भवात्। वसन्ते सकलकुसुमवर्णनस्य कविसम्प्रदायसिद्धत्वादविरोध इति कश्चित्। वसन्तघनसमयोर्द्वयोरप्यर्तुराजयोर्ग्रहणमिति तु सम्प्रदाय इति चण्डीदासः। यत्तु दर्शितविरोधे समाधिमपश्यतां चैत्रेत्यत्र भाद्रेति पाठकल्पनम्। तदुक्तरीत्या गतिसम्भवादन्याय्यमेव। यच्च तत्र दोषोद्भावनम्, वर्षर्तौ नदीतीरनिकुञ्जे सुरतावर्णनादिति, तदयुक्तम्। कच्छनिकुञ्जे तदनौचित्येऽपि तीरनिकुञ्जेऽनौचित्याभावात्। मेघैर्मेदुरमित्यादौ दृष्टत्वादिति दीपिकाकारः। चोऽवधारणे, त[4] एवेत्यर्थः। अत्र च प्रौढा इति श्लिष्टविशेषणबलान्मालत्यनिलयोर्नायकनायिकात्वप्रतीतिः[5]। चकारोप्यर्थो भिन्नक्रमः। अस्मीत्यहमर्थकमव्ययम्। अन्यथा सैवेत्यस्योद्देश्यालाभात्। सैवेत्यस्योत्कण्ठाहेत्ववस्थान्तरं न प्राप्तेत्यर्थः। तथाप्येतेषामसकृदुपभोगेऽपि। तत्रेत्युपभुक्ते इत्यर्थकम्। सप्तम्यन्तत्रयेऽप्यन्वेति। तेन सुरतलीलाविधिरपि[6] नान्यादृशो येन क्रीडास्थानैक्येऽप्युत्कण्ठा स्यादिति व्यज्यते। रेवाया नर्मदाया रोधसि तीरे वेतसी वेतसलता विशालतया लतान्तराश्रयत्वेन च सैव तरुः। (च तरुः)। तद्वेष्टितो वाऽन्यस्तरुस्तस्य तलमधोदेशस्तस्मिन् सुरतानुकूलव्यापाररूपा या लीला कुसुमाभरणादिप्रसाधनादिरूपा स्मिताश्लेषा चुम्बनादिरूपा वा तस्या विधौ सम्पादने चेतोऽन्तःकरणं समुत्कण्ठते उत्सुकं भवतीत्यर्थः। अत्र च वरोपकरणादीनामनुपभुक्तत्वस्य प्रसिद्धस्य कारणस्याभावेऽपि तत्कार्यस्योत्कण्ठारूपस्योत्पत्तिकथनरूपा विभावनालङ्कारः। वरोपकरणादीनामत्यन्तोपादेयत्वस्याप्रसिद्धस्य कारणस्य विभावनात्। आत्मनः प्रकृतिविशेषो बहुकालव्यवधानं वा रत्युत्कण्ठया विभावनीयमिति दीपिका। तत्र प्रकृतिविशेष इत्युक्तम्। सा चैवास्मीत्यनेन परिहृतत्वादित्यवधातव्यम्। अस्फुटत्वं चानुपभुक्तत्वाभावत्वेनाकथनात्। एवमुपभुक्तत्वरूपकारणसत्त्वेऽप्यनुत्कण्ठारूपस्य कार्यस्याभावकथनाद्विशेषोक्तिरप्यनुत्कण्ठाभावत्वेनाकथनादस्फुटेत्यूह्यम्। पार्यन्तिकास्वादहेतुश्चात्र विप्रलम्भः। स्वाधीनपतिकाया अपि क्रीडास्थानाप्राप्त्यादिना सुरतप्रतिबन्धे तत्सम्भवात्। सविसर्गगुरुरेफानुप्रासो विप्रलम्भीयमाधुर्याननुगुणत्वादचमत्कारित्वेनास्फुटः। एवं चैत्रक्षपाः प्रौढा इत्येतन्मध्यगतत्वादुन्मीलितमालतीत्यस्याप्यस्फुटतेति। केचित्तु तत्रेत्यस्य स्थान (स्नान)

३. 'तदा' स्थाने 'तथा' 'क' मातृकायाम्।

४. 'तत्र' क मातृकायाम।

५. 'नायिका नायकत्व' इति 'क' मातृकायां पाठः।

६. सुरतलीला 'स्थाने' सुरतला 'क' मातृकायाम्।

समयानुभूत इत्यर्थः। तथा चानुपभुक्तरेवातीरस्यात्यन्तोपादेयत्वसूचिकोत्कण्ठैवाऽत्रास्वाद्यत इत्याहुः। यत्तु[७] काचिद् रेवातीरे परपुंसा कृतसङ्केतात् दूतिं गोपयन्ती सखीमाहेति तात्पर्य वर्णनम्। तदत्यन्तायुक्तम्। उक्तयुक्त्या वरोपकरणादीनामत्यन्तोपादेयत्वपरिपोषित-विप्रलम्भास्वादतात्पर्यस्य स्वारसिकस्योल्लङ्घनेन तथा तात्पर्यकल्पने प्रमाणाभावात्। विधीतिविशेषाभावाच्चेति दिक्॥१॥

नायकानयनाय प्रेषितां तं सम्भुज्यागतां दूतीं प्रति विदग्धोत्तमनायिका स्नानकार्यत्वप्रतिपादनमुखेन सम्भोगचिह्नान्युद्घाटयितुमाह-

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे!
वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम्॥

निःशेषेति- अयि मिथ्यावादिनि बान्धवजनस्याज्ञातपीडागमे, दूती वापीं स्नातुं गतासि, न पुनस्तस्याधमस्यान्तिकम्? यतस्तव स्तनतटं निःशेषच्युतचन्दनमित्याद्यन्वयः। मिथ्यावादिनि, मया गत्वा बहुधा प्रसादितोऽपि नागत इति मिथ्याभाषणशीले। बान्धवजनस्य मद्रूपस्याज्ञातः स्वार्थपरायणतयानाकलितः पीडाया आगमः आगमनं तथा। तथाविधे। दूति, न तु सखि। तेन मिथ्याभाषणशीलत्वस्य योग्यता व्यज्यते। इतो ममान्तिकात्। वापीं प्रति स्नानाय गतासि। स्नानकालानतिक्रमलोभात्। न पुनरिति, पुनरेवार्थे। नैवेत्यर्थः बहुधा कृतापराधस्य। अत एवाधमस्य। परवेदनानभिज्ञतया दुःखप्रयोजककर्मशीलस्य। अन्तिकं समीपं गतासीत्यनुषङ्गः। उक्तार्थे साधकमाह-निःशेषेत्यादि। तवेत्यस्य स्तनतटादिभिः सर्वैरन्वयः। यतस्तव स्तनयोस्तटं प्रान्तसमदेशः। निःशेषं[८] च्युतं स्खलितं चन्दनं यस्मात्तथाभूतम्। न तु स्तनसन्ध्यादि। वापीगतबहुलयुवजनत्रपापारवश्यादंसद्वय-लग्नाग्रस्वस्तिकाकृतिभुजलता युगलेन तटस्यैवोन्नततया मुहुःपरामर्शात्।

अतएव च्युतमित्युक्तं, न तु क्षालितमिति, युवजनसम्मर्देन तत्राप्यनवकाशात्। व्यङ्ग्यपक्षे तु मर्दनाधिक्यात्तटमेव तथाभूतमिति व्यक्तमेव। एवमधरो निर्मृष्टरागः। निःशेषः मृष्टो रागो यस्य स तथा। उत्तानत्वेन बहलजलसम्बन्धात्, न तूत्तरोष्ठः न्युब्जतया तत्सम्बन्धमान्द्यात्। व्यङ्ग्यपक्षे तु चुम्बनकृतं तथात्वमिति। किञ्च, नेत्रे दूरमुपरिभाग एवानञ्जनेऽञ्जनरहिते। स्नानकाले मुद्रणान् मध्ये जलसंसर्गाभावात्। व्यङ्ग्यपक्षेऽपि प्रान्त एव चुम्बनविधानादनञ्जनत्वम्। दूरं अत्यर्थमिति त्वसम्भवदुक्तिकमेव। नेत्रमध्ये चुम्बननिषेधात्। तथा इयं तव तनुः तन्वी कृशा अतएव शीतवशात्पुलकिता। पुलकारोमोद्गमाः सञ्जाता अस्याः सा तथाभूता। व्यङ्ग्यपक्षे तु सुरतरसस्मरणात्पुलकोद्गमः।

---

७. 'यत्तु' 'ख' मातृकायां नास्ति।
८. 'निःशेषं च्युतं स्खलितं चन्दनं यस्मात्तथाभूतम्' 'क' मातृकायां नास्ति।

असम्पूर्णरतत्वादित्येके। एवं विदग्धाया गूढतात्पर्या वाचोयुक्त्या साधारणेष्वेतेषु वाक्यार्थेष्वगतेषु विदग्धोत्तमनायिकात्वदु:शीलत्वादिरूपवक्तृबोद्धव्यवैशिष्ट्यबलादधमपदार्थो दु:खप्रयोजककर्मशीलत्वरूप: साधारणो वाच्यतादशायां तादृशकर्मान्तरशीलत्वरूपेणावस्थितो व्यञ्जनया दूतीसम्भोगरूपतादृशकर्मान्तरशीलत्वाकारेण पर्यवस्यति। अत एव झटिति व्यङ्ग्यबोधकत्वादधमपदस्य प्राधान्यम्। वक्तृबोद्धव्यादिवैशिष्ट्यबलेन विशेषाकारेण पर्यवसाने विलम्बाभावात्। चन्दनच्यवनादीनां तु स्नानकार्यतया निबद्धानां योग्यतया सम्भोगाङ्गभूताश्लेषचुम्बनादिकार्यताप्रतिसंधाने सति तद्व्यञ्जनद्वारा सम्भोगगमकत्वमिति विशेष:। अत्र च त्वय्यकृतज्ञायां यद्बान्धवबुध्या विश्वसिमि, यच्च तत्रैवंविधे दृढमनुरक्तास्मि तद्युक्तमेव। ममैवंविधविविधवञ्चनाजनितपरितापपात्रत्वमितीर्ष्याहेतुकविविप्रलम्भ-सञ्चारिनिर्वेदध्वनि:। तदनुगुणश्च दूतीसम्भोग: चन्दनच्यवनादीनां वाच्यानां व्यङ्ग्यानाञ्च परिरम्भचुम्बनानुभावानां सम्भोगोत्कर्षद्वारेणेर्ष्योत्तेजकानां निर्वेदोत्कर्षकत्वमिति। दीक्षितास्तु अधमत्वमपकृष्टत्वम्। तच्च जात्या कर्मणा वा भवति। तत्र जात्यापकर्षनोत्तमनायिका नायकस्य वक्त्रितापि स्वापराधपर्यवसायिदूतीसम्भोगादिहीनकर्मातिरिक्तेन कर्मणा। तादृशं च दूतीसम्प्रेषणात् प्राचीनं सर्वं सोढमेवेति नोद्घाटनार्हमितीतर[९]-व्यावृत्त्या सम्भोगरूपमेव पर्यवस्यतीत्यधमपदस्य प्राधान्यम्। नि:शेषेत्यादिवाक्यानि सम्भोगचिह्नोद्घाटनेन तस्य साहाय्यमाचरन्ति। तथाहि-उक्तरीत्याकर्षणेन चन्दनच्युतिरित्यन्यथासिद्धिपरिहाराय नि:शेषेति। ततश्चन्दनच्युते: स्नानसाधारण्यव्यावर्त्तनेन सम्भोगचिह्नोद्घाटनाय तटग्रहणम्।

स्नाने हि सर्वत्र चन्दनच्युति: स्यात्तव तु स्तनयोस्तटे उपरिभाग एव दृश्यते इयमाश्लेषकृते वेति। तथा ताम्बूलग्रहणविलम्बात्प्राचीनरागस्य किञ्चित्मृष्टतेत्यन्यथासिद्धिपरिहाराय निर्मृष्टेति। रागस्य नि:शेषमृष्टोक्ता। पुन: स्नानसाधारण्यव्यावर्तनेन सम्भोगचिह्नोद्घाटनायाधर इति। उत्तरोष्ठे सरागेऽधरमात्रस्य निर्मृष्टरागता चुम्बनकृतैवेति। एवं प्रातर्दन्तमञ्जनं कालविलम्बेन। किञ्चिद्विलुप्तमित्यन्यथासिद्धिपरिहाराय दूरमित्युक्तम्। दूरमित्यर्थमित्यापाततोऽर्थ:। कालत: स्नानेन वा सर्वतोऽञ्जनलोप: स्यात्तव तु लोचनयो: क्वचित्प्रान्त एवानञ्जनत्वमिदं चुम्बनकृतमेवेति। पुलकिता तन्वी तवेयं तनुरित्यत्रापाततस्तन्वीति। सहजतानवकीर्तनेन पुलकितेति। स्नानचिह्नोपन्यास:। पुलकितापि तन्वी वर्तत इति हृदि स्थितोऽन्वय:। तेन च स्नानेन पुलकिता तनु: किञ्चिदुल्लसिता भवति। इयं तु न तथेति रतिक्लेशजनितावेव ता नवपुलकोद्गमाविति मर्मोद्घाटनम्। एवं मिथ्यावादिनीति सम्बोधनमपि[१०] व्यङ्ग्यानुगुण एव नायकमानेतुं गच्छामीति मिथ्याभाषणरूपेऽर्थे पर्यवस्यतीति व्याचक्रतु:।

अत्र वदन्ति- यदिदं नि:शेषेत्याद्यवान्तरवाक्यार्थानां स्नानव्यावृत्तिद्वारेण व्यङ्ग्यासाधारण्यसम्पादनम्। तन्न। व्यञ्जनानुकूलव्याप्त्यपरपर्यायस्यासाधारण्यस्यानु-

---

९. ''द्घाटनार्हमितीतर व्यावृत्या सम्भोग रूपमेव पर्यवस्यतीत्यधमपदस्य प्राधान्यम्। नि:शेषेत्यादि वाक्यानि सम्भोग'' इति 'ख' मातृकायां नास्ति।

१०. 'सम्बोधन मपि' 'ख' मातृकायां नास्ति।

मानानुकूलतया व्यक्तिप्रतिकूलत्वात्। ओष्णिछन्दोद्गलं चिन्तेत्यादौ साधारणानामेवौत्रि इत्यादीनां वक्त्रादिवैशिष्ट्यवशादर्थविशेषव्यञ्जकत्वस्वीकारात्। किञ्चैवं निःशेषेत्यादि-विशेषणवाक्यार्थानां वापीस्नाने बाधावतारात्सा गतासीत्यत्र विरोधिलक्षणया न गतासीतिनिषेधस्य तस्यान्तिकं न गतासीत्यत्र च गतासीति विधेश्च प्रतीत्यापत्तौ गतासीत्यंशस्य व्यङ्ग्यत्वानुपपत्तिः। न[११] च भवन्मतेऽपि निःशेषेत्यादिवाक्यार्थानां स्नानसाधारण्याद् बाधानवतारेऽपि तात्पर्यविषयतदन्तिकगमनान्वयानुपपत्तया लक्षणैवेति वाच्यम्। विदग्धायाः स्नानकार्यत्वप्रकाशनमुखेनैव तत्प्रकाशने तात्पर्यात्। अथ तदंशस्य लक्षणाविषयत्वेऽपि रन्तुमिति फलांश एव व्यङ्ग्यत्वमिति चेन्न। अधमत्वमपकृष्टत्वम्, तच्च जात्या कर्मणा वेत्यादिसन्दर्भेणाधमत्वान्यथानुपपत्तिवेद्यताया उक्तत्वात्। व्यञ्जनागम्यत्वेऽपि वाच्यानां निःशेषेत्यादिवाक्यार्थानामधमत्वस्य च भवदुक्तरीत्या प्रकारान्तरेणानुपपद्यमानतया वाच्यार्थव्यङ्ग्यत्वेन रमणरूपव्यङ्ग्यस्य गुणीभूतव्यङ्ग्यत्वप्रसंगात्। तस्माद् वाच्यार्थसाधारण्यमेवोचितं विदग्धनायिकाप्रयुक्तनिःशेषेत्यादिवाक्यार्थानाम्। अधमत्वोक्तिरपि प्राचीनानामेव सोढानामप्यपराधा नामसह्यतां दूतीं प्रतिपादितम् न तु सम्भोगम्। विदग्धोत्तम नायिकायाः सखीसमक्षं स्फुटतया तत्प्रकाशनानौचित्यादिति। तदेतदापातरमणीय-दूषणोद्भावनम्। आशयानवबोधात्। तथाहि व्यङ्ग्यतदितरकोटिसाधारणस्य वाक्यार्थस्य व्यङ्ग्यकोटिभूयः सहचारग्रहो व्यञ्जनायामुपयुज्यते। प्रकृते च तटादिमात्रे चन्दनच्यवनादिकं सम्भोगेन भूयः सहचरितमिति। तेन तद्व्यञ्जनमिति तात्पर्यम्। सामान्यतश्चन्दनच्यवनादिस्नानसाधारणम्। तदादिघटितं न स्नानेन भूयः सहचरितम्, किन्तु सम्भोगेनेत्येवं साधारण्यव्यावृत्तिरभिप्रेता, न तु सर्वथा स्नानव्यावृत्तिः, सम्भोगैकान्तिकता वा। येन प्रकाशादिविरोधः स्यात्। इयं श्लेषकृतैवेत्याद्येवकारोऽपि। सम्भावनाप्राचुर्यबोधको बहुधा देवदत्त एवायमित्यादिवत्। अस्तु वा स्नानव्यावृत्तिरभिप्रेता, न त्वेतावता सम्भोगैकान्तिकत्वम्। आर्द्रवसनप्रोच्छनेनापि तथाविधचन्दनच्यवनादेः सम्भवादिति नानुमानेन गतार्थता। तथा सति वापीस्नानव्यावर्त्तने कः पुरुषार्थ इति चेत्, व्यङ्ग्यबोध एवेति ब्रूमः। द्वयोः सम्भावितयोरेकव्यावृत्तिबोधस्यापरोन्मेषहेतुत्वस्यानुभवसिद्धत्वात्। अतएवोक्तं सुबुद्धिमिश्रैः तस्माद् वाच्यव्यङ्ग्योभयसाधारणो हेतुरेकत्र बाधितोऽन्यत्र पर्यवस्यतीत्येव ज्याय इति। यत्तु स्नानव्यावृत्तत्वे विरुद्धलक्षणापत्त्या तदन्तिकं गतासीत्यंशस्य व्यङ्ग्यता हानिरित्युक्तम्, तत्रोच्यते, स्यादेवं यदि स्नानव्यावृत्तिर्वाच्यार्थदशायामवगम्येत। वाक्यार्थप्रतीत्यनन्तरन्तु प्रतीतया तया व्यङ्ग्योन्मेष इति न लक्षणावकाशः। न हि तटमेव तथाविधमिति प्राथमिकबोधः। तस्य व्यर्थं सत्किञ्चित् ज्ञापयतीति न्यायादालोचनोत्तरभावित्वादिति न तत्प्रयुक्तः स्नानव्यावृत्तिबोधः। अतएव दीपिकाकृता

---

११. 'च' स्थाने 'व' 'क' मातृकायाम्।

१२. 'सम्भोग' स्थाने 'भोग' 'ख' मातृकाया।

यदान्तराणि त्वन्यार्थतयाप्युपपद्यमानानि तत्साहित्ये नैव तदनुकूलार्थव्यञ्जकानीत्युक्त्वा तद्यथा च च्युतचन्दनम्, न तु क्षालितचन्दनम्। स्तनस्योस्तटं न तु निम्नोन्नतभागोऽपि।

निःशेषतो मृष्टरागो न त्वीषत्। तादृशश्चाधरो न पुनरुत्तरोष्ठोपीत्यादिनाऽनुकूलार्थप्रदर्शनं कृतम्। अस्तु वा तदंशे लक्षणा। रन्तुमिति फलांशस्यैव व्यङ्ग्यतया ध्वनित्वाक्षतेः। यत्तु फलांशस्यापि न व्यङ्ग्यत्वासम्भवः। अधमत्वमपकृष्टत्वमित्यादिना सन्दर्भेण भवतैवार्थापत्ति-वेद्यताया उक्तत्वादित्युक्तम्। तदयुक्तम्। न ह्यधमत्वमपकृष्टत्वमित्यादिना ग्रन्थेन सम्भोगं विनाऽधमत्वस्यानुपपत्तिरुच्यते, किन्तु नोत्तमनायिका वदति नोद्घाटनार्हमित्यादिना वक्तृवैशिष्ट्यप्रतिपादनेन व्यङ्ग्यपर्यवसानमात्रम्। एतेन सम्भोगरूपव्यङ्ग्यस्य वाच्यसिद्ध्यङ्गव्यङ्ग्यत्वेन गुणीभूतव्यङ्ग्यत्वापत्तिरिति निरस्तमिति कृतं पल्लवितेन। यत्तु उपनायकमानेतुं प्रेषितां तदुपभोगलुप्तचन्दनादीन्वापीस्नानव्याजेन गोपयन्ती दूतीं[१३] प्रति नायिकाया इयमुक्तिरिति भूमिकारचनम्। तन्न मनोहरम्। तथा सति स्नानस्य दूत्या अभ्युपगतत्वेन तदुपपादकनिःशेषेत्यादिवाक्यस्यासङ्गतत्वापत्तेः। सम्भोगप्रकाशनस्यापि स्नानकार्यप्रकाशनमुखेनैव कर्त्तव्यत्वात्। किञ्च स्नानतदन्तिकगमनयोर्द्वयोरपि दूत्या निवेदितयोरेकस्य सत्यत्वेऽपरस्यापि सत्यत्वमेव सम्भाव्यते, न तु मिथ्यात्वमिति तदन्तिकगमनस्य मिथ्यात्वोपन्यासो निर्बीज एव स्यात्। दूत्यनभ्युगतस्नानसाधने तु प्रतारकतया तदन्तिकगमनस्य मिथ्यात्वोपन्यासो युक्त इति सहृदयैराकलनीयमिति ॥२॥

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥

ग्रामतरुणमिति। ग्रामतरुणं मुहुःपश्यन्त्यास्तरुण्या मुखच्छाया नितरां मलिना भवतीत्यन्वयः। ग्रामे एकं तरुणम्। तेन दुर्लभत्वसूचनम्। ग्रामेति विशेषणेन निरन्तर-सन्निधानात्सङ्केतदानयोग्यतास्नेहातिशयो[१४] वा ध्वन्यत इति दीपिकाकारः। एवं सति दिनान्तरेऽपि सम्भोगप्रत्याशानुवृत्तो विप्रलम्भस्य लघुत्वापत्तेः पूर्वोक्तमेव ज्याय इति नव्याः। ग्रामस्य स्त्रीसमूहस्य सम्बन्धी तरुण इत्यर्थः। तेनानेकनारी प्रार्थ्यत्वं[१५] सूच्यत इति केचित्। परिचितत्वेन मुहुर्दर्शनेऽपि शङ्कानुदयाय ग्रामेति विशेषणमित्यन्ये। मुहुः बारम्बारम्। जनताभयेन दर्शने सातत्यासम्भवात् पश्यन्त्या भवतीति वर्त्तमाननिर्देशाभ्यां दर्शनमलिनीभावयोरविरामः सूच्यते। जनकीभूतदर्शनसमकालतया कार्यस्य मुखच्छायामालिन्यस्य कथनादतिशयोक्तिरलङ्कारः। तरुण्या इति द्वयोस्तरुणत्वोक्त्या परस्परानुरागोत्कर्षो व्यज्यते। छाया कान्तिः, नितराम्, अतिशयेन, केचित्तु मुहुरित्यस्य मलिना भवतीत्यनेनान्वयः। तेन यदा यदा तदनुसन्धानं तदा तदानुतापोत्कर्षान्मुखमालिन्यप्रकर्ष

---

१३. 'दूती' 'ख' मातृकायां नास्ति।

१४. 'स्नेहा' स्थाने 'प्रेमा' 'क' मातृकायाम्।

१५. प्रार्थ्यत्वं 'स्थाने' प्रार्थ्मानत्वं 'क' एवं 'ख' मातृकायाम्।

इति स्वरस इत्याहु:। नवेत्यादि मलिनीभावोपपादकं तरुणविशेषणम्। नवा नूतना वञ्जुलस्याशोकस्य मञ्जरीतया सनाथो युक्त: करो यस्य तथाभूतमत्र नवेत्यनेन नूतनवस्तुग्रहणस्यौचित्येनावितर्कणीयता सूच्यत इत्याहु:। नूतनस्य दर्शनौचित्येन शङ्कानुदयाय नवेति विशेषणमिति केचित्। उद्दीपनप्रकर्षायेति तु स्वरस:। एवञ्च सङ्केतनिकेतन-चिह्नहस्तनायकदर्शनकृतमालिन्यं[१६] विषादरूपव्यभिचारीभावोत्कर्षणव्यञ्जनमुखेन विप्रलम्भाभासं पुष्यतीति ॥३॥

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय व:।
भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥

स्वच्छन्देति। मन्दाकिनी व: मन्दतामह्नाय भिन्द्यादिति योजना। मन्दाकिनी स्वर्गङ्गा। व: युष्माकम्, मन्दताम्, मन्दस्य, मूढस्य भावो मन्दता। अज्ञानेन पटु निर्भाग्या[१७] मन्दा इत्यमर:। पापेनापकृष्टतामित्यपरे। आह्नाय झटिति, भिन्द्यात् नाशयत्वित्याशी:। सजातीयान्तरादुत्कर्षप्रतिपादकं मन्दाकिनीविशेषणमाह-स्वच्छन्देत्यादि। स्वच्छन्दमुच्छलदच्छं कच्छकुहरे छातेतरद्यदम्बु तस्य च्छटया मूर्च्छन्मोहो येषान्तैर्महर्षिभिर्हर्षेण[१८] विहिते स्नानाह्निके यस्यामिति समासयोजना। स्वच्छन्दं स्ववशम्, न तु वातादिपरतन्त्रम्। तेन जलबाहुल्याद्-गाम्भीर्याभिव्यक्ति:। स्वस्य छन्दोऽभिप्राय इच्छा यत्र तथोच्छलदिति क्रियाविशेषणं वा। स्वस्य छन्देनोच्छलदिति वा। अच्छं निर्मलम्। कच्छस्य जलप्रायदेशस्य कुहरे तरङ्गकृते बिले। छाताद्दुर्बलादितरत् वेगातिशयेन बलवदित्यर्थ:। छातमल्पमिति न सम्यक्। स्वच्छन्दोच्छलदित्यनेनैव बाहुल्यलाभात्। इतरान्तमम्बुच्छटाविशेषणम्। छातं ह्रस्वं तदितरा दीर्घा इत्यर्थ इति तु कश्चित्। अम्बुन: जलस्य, च्छटा परम्परा। मूर्छन्नश्यन्मोहोऽज्ञानम्। अत एव हर्ष:। स्नातस्य प्राधान्यात्पृथगुपन्यास:। यद्वह्निकबहिर्भूतस्यापि स्नानस्य लाभाय स:। छटा परम्परा कान्तिर्वातया मूर्छन् प्रादुर्भवन्मोहो वैचित्र्यं विस्मयो येषामिति व्याख्यानं तु न शब्दस्वरसानुसारि। एवं महर्षिसेवितत्वेन तीर्थान्तरात् व्यतिरेकं प्रतिपाद्य नद्यन्तरादुत्कर्षं स्वभावकृतं प्रतिपादयितुं पुनर्विशिनष्टि-उद्यदित्यादिना।

उद्यन्त:[१९] प्रकाशमाना उदारा महान्तो दर्दुरा भेका यासु एवंविधा दर्प: कन्दरा यस्यां सा तथाभूता। तरङ्गाभिघातैरुपरिभागाङ्गेन तासां प्रकाशनात्। तथा दीर्घा आयता: अदरिद्रा: शाखादिबाहुल्येनाकृशा ये द्रुमास्तेषां मदन्यो दीर्घ इति द्वेषाद्द्रोह: पातनं तेनोद्रेक आधिक्यं तन्मयास्तद्युक्ता उर्मयस्तरङ्गास्त एव मेदुरो निविडो मदो गर्वो यस्या: सा तथा। महोर्मय

१६. 'कृत' स्थाने 'जनित' 'ख' मातृकायाम्।
१७. पटु निर्भाग्या मदा इत्यमर: 'क' एवं 'ख' मातृकायां नास्ति।
१८. 'हर्षेण' 'स्थाने' 'पार्षेण' 'क' मातृकायाम्।
१९. 'उद्यन्त:' स्थाने उत्पत्य: 'क' मातृकायाम्।

इति पाठे। तेनोद्रेको येषामेवंविधा ये महोर्मय यस्याः सा तथा। महोर्मय इति पाठे। तेनोद्रेको येषामेवंविधा ये महोर्मय इति पाठे। तेनाद्रेको येषामेवंविधा ये महोर्मय इति व्याख्येयम्। दीपिकाकारस्तु दीर्घ इति भावप्रधानम्। तेन दीर्घत्वेनादरिद्रा इति लभ्यते। यद्वा दीर्घेत्यन्तमेकं मन्दाकिनीविशेषणम्। तदा च दरीषु दीर्घा विस्तृतेत्यर्थः। अदरिद्रेत्यादिद्वितीयम्। यद्वा तत्रापि नाकारप्रश्लेषः। दरिद्रत्वञ्च प्रवाहसम्बन्धातुच्छमूलतया ग्लानत्वमित्याहुः। दर्दुरः पर्वत-विशेषः। अन्यथा अच्छकुहरेति पौनरुक्त्यापत्तेः। मन्दाकिनी च न गङ्गा। किन्तु नद्यन्तरमेव। तत्रैव दुर्दरगिरीसम्बन्धसम्भवादिति कश्चित्। इदन्तु प्रसिद्धिविरोधादुपेक्ष्यम्।

अनुप्रासोऽत्र शब्दालङ्कारः काव्यजीवातुः। अभिप्रायवशौ छन्दावित्यमरः। अमांसो दुर्बलश्छात इति च। मोहमिच्छन्ति मूर्छायामविद्यायाञ्च सूरय इति विश्वः। मूढास्यापटुनिर्भाग्या मन्दा इत्यमरः ॥ ४॥

विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयाऽपि यम्।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती ॥

विनिर्गतमिति। हयग्रीवनामा दैत्यो विष्णुना हत[२०] इति पुराणकथाश्रिते हयग्रीववधाख्ये नाटके हयग्रीववर्णनप्रस्तावे पद्यमेतत्। यं प्रकृतं हयग्रीवं शत्रूणां मानं द्यति खण्डयति। मित्राणां ददाति इति वा मानदस्तथाभूतमात्मनो मन्दिरात् गृहात् न तु नगरात्। यदृच्छयापि स्वेच्छयापि न युयुत्सया। विनिर्गतं निःसृतम्, न तु प्रस्थितम्। उपश्रुत्य कर्णाकर्णिकया श्रुत्वा, न तु दूतमुखात्। ससम्भ्रमेण समयेनेन्द्रेण, अव्याहतैश्वर्येण दौवारिकाह्वानविलम्बासहतया स्वयमेव। द्रुतं शीघ्रं पातिता यथाकथञ्चित्तु निक्षिप्ता, न तु विस्रब्धं निहिता। अर्गला द्वारपिधानकाष्ठं यस्या सा तथाविधा। अमरावती नगरी भिया निमीलिते सङ्कुचिते अक्षिणी यया सा तथाभूतेव भवतीत्यन्वयः। उपश्रुत्येति। पातनक्रियया समानकर्तृकतमाश्रित्य बोध्यम्। अत्रामरावतीति स्त्रीप्रत्ययकृतस्त्रीत्वाध्यवसान-मूलोत्प्रेक्षार्थालङ्कारश्चमत्कारविश्रामभूमिरिति नीरसत्वमित्याहुः ॥५॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सद्रामभट्टात्मज
वैद्यनाथकृतायामुदाहरणचन्द्रिकायां प्रथमः उल्लासः ॥

---

२०. 'हत' स्थाने 'हन' 'क' मातृकायाम्।

(अथ द्वितीयोल्लासः)[२१]

काचिदुपनायकसङ्गमार्थिनी शाकेन्धनाद्यानयनव्याजेन बहिर्गन्तुं मातरं प्रत्याह–

मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।

तद् भण किं करणीयमेवमेव न वासरः स्थायीति संस्कृतम्॥

मातर्गृहोपेति। भो मातः! गृहसम्बन्ध्युपकरणम्। उपक्रियतेऽनेनेत्युपकरणम्। अन्नेन्धनशाकादिसामग्री। अद्य खलु निश्चितं नास्तीति त्वया साधितं प्रतिपादितम्, तस्मात्किं करणीयं कर्त्तव्यं भण वद आज्ञापयेति यावत्। यतो वासरो दिवसः एवमेव। अधुना दृश्यमानावस्थ एव स्थायी स्थिरो नेति वाक्यार्थः। अत्र मातरित्यनेनालंघनीयाज्ञत्वम्। गृहेत्यनेनावश्यकत्वम्। उपकरणमित्यनेनान्यथासिद्धिपरिहारः। सकलस्य प्रतिवेशिगृहादपि लाभासम्भवात्।

अद्येत्यनेनाद्यैव सम्पाद्यत्वम्। साधितमित्यनेन। सत्त्वशङ्काराहित्यम्। त्वयेत्यनेन स्वकल्पनाविरहः। तच्छब्देन हेत्वर्थेनावश्यवक्तव्यत्वम्। भणेत्यनेन स्वप्रेरणम्। एवमेवेत्यनेन दिनावसाने त्वत्प्रेरणयापि कुलाङ्गनया मया न गन्तव्यमिति, त्वरया प्रेरयेति वा द्योत्यते। वाक्यार्थे न तु वक्तृवैशिष्ट्यादुपपतिसमागार्थित्वमिति। अन्ये तु प्रत्यहं गृहकार्यव्यावृत्ततया स्वैरविहारं कर्त्तुमक्षमा काचिन्मातरं प्रत्याह–माए इति। गृहोपकरणं गृहकार्यम्, अद्य नास्ति नत्वन्यदा तद्व्यावृताया मम कदाप्यवसर इत्यतिप्रसङ्गशङ्कानिवारणम्। एवमेव व्यासङ्गं विना। तथा च व्यासङ्गं विना स्थातुमशक्यत्वात्। गृहे च कार्याभावात् किञ्चित् कार्यार्थं बहिः प्रेषयेति तात्पर्यार्थं इत्याहुः। इदन्तु तदा सङ्गच्छेत यदि वासरो न गच्छतीति पाठः स्यात्। न च तादृशः प्रागेव भवद्भिरपि स्वीकृतः। किञ्च कार्यस्यावश्यकर्त्तव्यज्ञापनं विना न तथा शङ्कराहित्यम्, प्रत्युतानावश्यकतया शङ्कैव सम्भावितेति पूर्वव्याख्यैव ज्यायसीति॥६॥

प्रियानुनयार्थं प्रहितां तमुपभुज्यागतां सखीं प्रति नायिकाया इयमुक्तिः।

साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते।

सद्भावस्नेहकरणीयं सदृशं तावद् विरचितं त्वयेति संस्कृतम्॥

साहेन्तीति। हे सखि! मत्कृते मदर्थं सुभगं सुन्दरं नायकं साधयन्ती आत्मवशं कुर्वती अनुनयन्ती वा। साहेयन्ती शासती इति चण्डीदासः। साहयन्ती इति पाठेऽपि साधयतीत्येवार्थः। क्षणे क्षणे दूनासि खिन्नासि। त्वया तावत् त्वया तु सद्भावः। साधुत्वं विश्वासो वा। स्नेहः प्रसिद्धः। ताभ्यां करणीयं कार्यं तत्सदृशं ताभ्यां यादृशं कार्यं तादृशं विरचितम्। फलं तु दैवायत्तमिति मुख्यार्थः। केचित्तु सद्भावस्य करणीयं स्नेहस्य सदृशमुचितमिति योजयन्ति।

२१. मया योजितम्।

अत्र च ज्ञातापकारायां मुख्यार्थबाधप्रतिसंधानात्सदृशपदेन विसदृशं लक्ष्यते। तच्च मत्प्रियरमणेन शत्रुत्वाचरणरूपम्। एवं मत्कृते इत्यस्य लक्षणया स्वकृत इति। दूनासीत्यस्य च हृष्टासीत्यर्थः। अथवा मत्कृते क्षणमपि न दूनासीत्यर्थः। तेन च नायकः सापराध इति रोषमूलं नायिकाया ज्ञानं सामाजिकान्प्रति व्यज्यत इति ॥७॥

पश्य निश्चल निष्पन्दा विसिनीपत्रे राजते बलाका।

निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिवेति। संस्कृतम्।

उञ्जणिञ्चलेति। – उ अ इत्यव्ययं पश्येत्यर्थे।

काचिदुपनायकं प्रति वदति। विसिनी कमलिनी तस्याः पत्रे बलाका पक्षिभेदः राजते शोभते त्वं पश्येति वाक्यार्थस्य कर्मत्वेनान्वयः। समीहितसूचनाय विशिनष्टि–निश्चलेत्यादि। निश्चला चासौ निःस्पन्देति कर्मधारयः। चलनं शरीरक्रिया स्थानान्तरप्रापिका। स्पन्दस्त्ववयवक्रिया तदप्रापिका। स्पदि किञ्चिच्चलने इति धात्वनुसारात्। यद्वा निश्चलजनशङ्कया निरुद्योगेति कामुकसम्बोधनमिति दीपिकाकारः। अत्र द्वितीयकल्पे सङ्केतस्थानरूपव्यङ्ग्यस्य वाच्यसिध्यङ्गतापत्तिः। एतत्सङ्केतस्थानं त्वया नानुसंहितं मयैवोन्नीतमिति ज्ञानेनैव निरुद्यमत्वसिद्धेरिति केचित्। निश्चलत्वं स्वप्रयत्नाधीनक्रिया-शून्यत्वम्। निस्पन्दत्वं स्वाधीनक्रियाशून्यत्वमित्यपौनरुक्त्यम्। एवञ्च वातादिसञ्चार-शून्यत्वमपि सूच्यत इत्याहुः। निश्चलो अचलः पर्वतः तच्छन्ति स्पन्देत्यर्थः। अथवा निश्चला पृथिवीव निस्पन्देत्यर्थ इत्यन्ये। तदयुक्तम् , उभयत्राचलपदस्य परिवृत्त्यसहत्वात्। पृथिवीवाचकत्वेनाभिमतस्य निश्चलपदस्य स्त्रीलिङ्गनियमितत्वेन भाषितपुंस्कत्वाभावात्पुंवद्भावानुपपत्तौ निश्चलेति ह्रस्वानुपपत्तेश्चेति। निर्मलेत्यादि। निर्मले स्वच्छे मरकतस्य नीलमणेर्भाजने पात्रे परिस्थिता शङ्खशुक्तिः। शङ्खघटितं शुक्तिसदृशं चन्दनादिनिधानपात्रम्, न तु मुक्ता शुक्तिः। तस्या बलाकावर्णत्वाभावात्।

शङ्खशुक्तिपदस्य तत्रासामर्थ्याच्च। एवञ्चाचेतनोपमयात्यन्तिकक्षोभाभावः सूच्यते। पार्यन्तिकचमत्कारस्थानं तु संयोगवियोग[२२]भेदेन व्यङ्ग्यद्वयं प्रकाशव्यक्तम्। केचित्तु नायिका-विरहवेदनां कामुकं प्रति निगूढं निवेदयन्त्या सख्या इयमुक्तिः। हे निश्चल! अलस ,निष्पन्दा, निश्चेष्टा, बलाका पाण्डुतातिशयो तत्त्वेनाध्यवसिता सखी विसिनीपत्रे तापातिशयाच्छयिता राजते। त्वमेवागत्य पश्येति शङ्खशुक्तिरिवेत्यनेन निश्चेष्टत्वातिशयस्तेन च विप्रलम्भातिशयो व्यङ्ग्य इत्याहुः ॥८॥

मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते॥

---

२२. 'वियोग' 'स्थाने' विप्रंलम्भ 'क' मातृकायाम्।

मुखमिति- इन्दुवदनायास्तनौ शरीरे तरुणिम्नः उद्‌गमः आविर्भावः मोदते। स्वकार्यजननेऽनियन्त्रितोऽस्तीत्यर्थः। प्रकृत्यैवेयमिन्दुवदना तत्राप्येवंविध[२३]विजृम्भणमिति कष्टमापतितम्। विदग्धयुवजनस्येत्येवं खेदो वतेत्यनेन प्रतिपाद्यते। अहो! रमणीयतातिशय इति विस्मयो वा। भाग्येन परमोत्सवस्थानमुपसम्पन्नं युवजननयनानामिति हर्षो वा। बतायन्त्रणसन्तोषखेदानुक्रोशो विस्मय इति कोशात्। कथमित्यपेक्षायामाह- मुखमिति। यतो मुखं विकसितं प्रसृतं स्मितं ईषदविकाशिनयनं स्मितं स्यात्। स्पन्दिताधरम्, इत्युक्तलक्षणहास्यविशेषरूपं यत्र तथाभूतम्। एवं प्रेक्षितं प्रेक्षणम्। भावे क्तः। वशित : वशीकृतः स्वायत्तीकृत इति यावत्। वक्रिमा, वक्रत्वं येन तथाभूतम्। तथा गतिः गमनं समुच्छलिता धारारूपेण प्रादुर्भूता विभ्रमा विलासाय यस्यां तथाभूता। मतिः बुद्धिः अपास्ता युक्ता संस्था परिमितविषयस्थत्वं यया। अनेकविषयसञ्चारिणीति यावत्। उरः मुकुलितौ[२४] उद्‌भिन्नौ स्तनौ यत्र तादृशम्। एवं जघनं अंशस्य बन्धोविभक्तता। तेनोद्धुरं[२५] पीनं एवं प्रकारस्तारुण्योद्‌गम इति भावः। अत्र च विकासस्य पुष्पधर्मस्य स्मिते।

वशीकरणस्य चेतो न धर्मस्य वक्रिमणि मर्यादायास्त्यागस्य चेतनधर्मस्य मतौ। मुकुलितत्वस्य पुष्पधर्मस्य[२६] स्तनयोः। उद्धुरत्वस्योन्मुखत्वस्य चेतनधर्मस्य जघने। मोदस्य हर्षस्याचेतने यौवनोद्‌गमे बाधितत्वाद् विकसितादिपदे स्ववाच्यसम्बन्धाश्रयणेनोपदर्शित-पदार्थाः लक्ष्यन्ते। तत्र[२७] विकासस्य पुष्पोपसृतत्व[२८]मात्रेण सामान्यविशेषभावः सम्बन्धः। मनोहारित्वं व्यङ्‌ग्यम्। एवं वशत्वस्य सम्बद्धत्वेन सामानाधिकरण्यं सम्बन्धः। पूर्वं मौग्ध्यात्सर्वत्र वक्तृता प्रेक्षितस्यासीदिदानीं त्वभिमत एवेति युक्तानुरागित्वं व्यङ्‌ग्यम्। समुच्छलनस्य प्रादुर्भूतत्वेन सामानाधिकरण्यं सम्बन्धः। सकलवशीकारित्वं व्यङ्‌ग्यम्। तथा मर्यादात्यागस्याप्यपरिमितविषयत्वेनैकाधिकरण्यं सम्बन्धः। अनुरागातिशयो व्यङ्‌ग्यः। तस्य तादृशमतिप्रयोजकत्वात्। मुकुलितत्वस्य पुष्पसंस्थानस्य तादृशत्वेनैकाधिकरण्यं सम्बन्धः, संस्थानमात्रेण सामान्यविशेषभावः सम्बन्धः। उद्‌भिन्नत्वेन तु सामानाधिकरण्यम्। आलिङ्गनयोग्यत्वं व्यङ्‌ग्यम्। एवमुन्मुखत्वरूपस्योद्धुरत्वस्योत्कृष्टत्वेन कार्यकारणभावः सम्बन्धः। उत्कर्षस्योन्मुखत्वहेतुत्वात्। रमणीयत्वं व्यङ्‌ग्यम्। एवं मोदस्यानियन्त्रितत्वेन समं हेतुहेतुमद्‌भावः सम्बन्धः। मोदस्य नियन्त्रितत्वे हेतुत्वात्। स्पृहणीयत्वञ्च व्यङ्‌ग्यमिति। एतानि च काव्यभावनापरिपक्वबुद्धेः सहृदयस्यैव प्रकाशन्ते। दीपिकाकृतस्तु विकासेना-सङ्कुचितत्वसम्बन्धेन सातिशयत्वं लक्ष्यते। सौरभादि व्यङ्‌ग्यम्। वशीकरणेन स्वाधीनत्वं

---

२३. 'यौवन' 'क' मातृकायामित्यधिकम्।

२४. 'स्थलं' 'क' मातृकायामित्यधिकम्।

२५. ''तथा चा साधारण स्मितावुन्मेषः स्फुटमेव यौवनमवगमयतीतिभावः'' इति 'क' मातृकायामधिकम्।

२६. पुष्प 'स्थाने ' 'चेतन' 'ख' मातृकायाम्।

२७. ''तत्र विकासस्य ''इत्यारभ्य'' अनायासो व्यङ्गयः। प्रयोजनं'' 'इत्यन्तं' 'ख' मातृकायां नास्ति।

२८. ''प्रसृतत्व'' 'इति' 'क' मातृकायां नास्ति।

लक्ष्यते। अभिमतविषयप्रवृत्तिः सम्बन्धः। समुच्छलनेन बाहुल्यं लक्ष्यते। प्रयोज्यप्रयोजकभावः सम्बन्धः। बहुलं हि समुच्छलति। संस्थायासनेनाधीरत्वं लक्ष्यते। हेतुहेतुमद्भावः सम्बन्धः। पूर्वं मुग्धतया गुरुजनसन्निधौ। प्रियतमेप्यंगीकृतमर्यादामतिरासीत्। इदानीन्तु मौग्ध्यत्यागान्न तथेत्यनुरागातिशयो व्यङ्ग्यः। मुकुलितत्वेन काठिन्यं लक्ष्यते। निबिडावयवत्वं संबन्धकठिनं हि तद्भवतीत्याहुः ॥९ ॥

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्।
उपदिशति कामिनीनां यौवनमद एव ललितानि॥

श्रीपरिचयादिति- जडा अनभिज्ञा अपि जनाः श्रियो लक्ष्म्याः परिचयात् सम्बन्धात् विदग्धानां चतुराणां यानि चरितानि[२९] तेषामभिज्ञातारो भवन्तीत्यन्वयः। अत्र दृष्टान्तमाह- उपदिशतीत्यादि। यथा यौवनस्य मदो हर्षभर इति यावत्। स एव कामिनीनां स्त्रीणां ललितानि। सुकुमारतयाङ्गानां विन्यासो ललितं भवेदित्युक्तलक्षणललितप्रभृतीन्। विलासविलोकनादीन्हावान्। बहुवचनस्याप्यर्थवत्त्वात्। सञ्चरणदर्शनवचनहसितादि तदाभंगविशेषानिति केचित्। यत्तु ललितानि विभ्रमानिति व्याख्यानम्। तत्र च विभ्रमाललितं तथेत्यमर इति। प्रमाणोपन्यस्तं तं कान्तिविलसितम्। स्त्रीणां विलासविध्येकविभ्रमाललितं तथा। हेलालीलेत्यमी हावाः क्रियाः शृङ्गारभावजा इति कोशवाक्यस्य विलासादिषु हावपदशक्तिप्रतिपादनार्थत्वादिति। उपदिशति। अज्ञातानि ज्ञापयति। अत्र शब्दकरणका-ज्ञातज्ञापकस्योपदेशपदार्थस्य वक्तृधर्मत्वेन यौवनमदे बाधात्सामान्यविशेषभावसम्बन्धेना-ज्ञातज्ञापनमात्रं लक्ष्यते। ललितज्ञानेऽनायासो व्यङ्ग्यः। प्रयोजनं सहृदयासहृदयवेद्यम्। उपदेशादनायासेन ज्ञानमित्यस्य प्रसिद्धत्वात्।[३०] यत्तु ज्ञानेऽन्यनिरपेक्षत्वं व्यङ्ग्यमिति तन्न, तस्या मद एवेत्येवकारवाच्यत्वादिति। मदो रेतसि कस्तूर्यां गर्वे हर्षे मदानयोरिति विश्वः ॥१० ॥

सौन्दर्यातिशयशालिन्या नयनगोचरमगताया गुणश्रवणमात्रजनितानुरागेण नायकेनावस्थायां पृष्टायां दूत्या इयमुक्तिः।

एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैरिति ॥ संस्कृतम्॥

एद्दहमेत्तेति[३१]- परिमाणे दहप्रत्ययः। एतावत्परिमाणौ आमलकादिपरिमाणौ स्तनौ यस्याः सा तथाभूता। एवमेतावत्यपरिमाणं ययोस्ते एतावन्मात्रे विवक्षितकमलदलादिपरिमाणे ताभ्यामक्षिपत्राभ्यां नयनदलाभ्यामुपलक्षितेत्यर्थः। उपलक्षणे तृतीयानुशासनात्। तथा एतावद् विवक्षितं परिमाणं दैर्ध्यादि यस्याः सा तथाभूतावस्था स्वरूपं यस्याः सा तथा। एवमेतावत् बुद्धिस्थं परिमाणं संख्या येषां तथाविधैर्दिवसैर्लक्षणया सम्वत्सरैरुपलक्षिता परिच्छिन्नेति

---

२९. 'चेष्टितानि' 'इति' 'क' मातृकायामधिकम्।
३०. 'मदोरेतसि' इत्यनन्तरं यत्तु ज्ञानेऽन्यनिरपेक्षत्वं......वाच्यत्वाद्। 'इति' विपरीतक्रमः 'ख' मातृकायाम्।
३१. 'एद्दहमेत्तेति सौन्दर्या' इति 'ख' मातृकायां नास्ति।

यावत्। वर्षकथनस्यैव प्रायशो लोकव्यवहारसिद्धत्वात्। दिवसैरिति करणे वा तृतीया। अत्र मुकुलाकारहस्ताभिनयेन स्तनपरिमाणविशेषे पद्मदलाकृतिना तेन नेत्रपरिमाणविशेषे। उच्चता पुष्टिप्रदर्शकेन तद्विशेषे। अङ्गुल्यङ्कधारणादिरूपेण च दिवससंख्या विशेषे। बुद्धिस्थमात्र-शक्त्या एतावच्छब्दानियमितशक्तयः। यत्तु प्रेषितं प्रति तत्कलत्रावस्थाकथनमिदमिति। तन्नातिसमीचनीनम्। दिवससंख्याकथनासामञ्जस्यादिति ॥११॥

भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य।

यस्यानुनुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्॥

भद्रात्मन इति- यस्य प्रकृतस्य राज्ञः करो हस्तः सततं निरन्तरं दानस्य वितरणस्य सम्बन्धि यदम्बु तस्य सेकेन सुभगः शोभनोऽभूदित्यन्वयः। कीदृशस्य यस्य भद्रः शोभन आत्मा स्वरूपमन्तःकरणं वा यस्य तथाभूतस्य। तथा दूरधिरोहानाधृष्या तनुः शरीरं यस्य तथाभूतस्य। एवं विशाले महति वंशे कुले उन्नतिर्महत्त्वं यस्य तथाविधस्य विशालस्य वंशस्योन्नतिर्यस्मादिति वा तथाकृतः। शिलीमुखानां बाणानां सङ्ग्रहः समीचीनां ग्रहोऽभ्यासदार्ढ्यं येन तस्य। तथा अनुपप्लुता अबाधिता गतिर्ज्ञानं यस्य तादृशस्य अनुपप्लुतानां निर्दुष्टानां गतिहितकर्त्तेति दीपिकायाम्। परान् शत्रून् वारयतीति परवारणस्तस्येति राजपक्षे। गजपक्षे तु यस्य परवारणस्य श्रेष्ठगजस्य करः शुण्डादण्डः। दानाम्बु मदजलम्। भद्रात्मनो भद्रजातीयस्य भद्रो मन्द्रो मृगश्चैवेत्युक्ता। एतेऽष्टौ गजयोनयः इत्युक्तेः। तथा दुःखेनाधिरोह आरोहणं यस्यास्तादृशी तनुर्यस्येति। अत्युच्चत्वात्। विशालवंशवत्। दीर्घवेणुवत्। उन्नतिरुच्चता यस्य। यद्वा विशाला वंशस्य पृष्ठदण्डस्योन्नतिर्यस्येति। शिलीमुखा भ्रमराः। सङ्ग्रहः आकर्षणम्। अनुपप्लुतगतेः, अस्खलितगमनस्य धीरमतेर्वेत्यर्थः। अत्र प्रकरणाद्राजवृत्तान्तो वाच्यो गजवृत्तान्तस्तु व्यङ्ग्य इति॥१२॥

॥ इति श्रीमत्तत्सदुपाख्यवैद्यनाथकृतायां चन्द्रिकायां द्वितीय उल्लासः॥

(अथ तृतीयोल्लासः)[१]

एकाकिन्या नदीं गत्वा आगताया अद्यास्याः कुतोऽयमीदृशः श्रम इति वितर्कयन्तीं समानशीलां प्रतिवेशिनीं प्रति काचिदाह– अदिपिपहुलमिमि।

अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि! त्वरितम्।
श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम्॥

अतिपृथुलमिति। विऽलमिति पाठे विपुलमित्यर्थः। सखीत्यप्रतार्यताध्वननम्। अतिशयेन पृथुलं महान्तं जलपूर्णं कुम्भं तेन दुर्वहत्वम्। गृहीत्वा समागतास्मि न तु मध्ये विश्रामः। त्वरितमिति। स्वेदातिशययोग्यता ध्वन्यते। श्रमाद्यौ स्वेदसलिलनिःश्वासौ ताभ्यां निःसहा निर्बला। चलितुमक्षमेति यावत्। सलिलत्वोक्तया स्वेदबाहुल्यं व्यज्यते। अतः क्षणं विश्राम्यामि विश्रामं करोमि। तथा चैवंविधकुम्भवहनजन्योऽयं श्रमः नान्यथा शङ्किष्ठा इति रतिसङ्गोपनं गम्यते॥ १३॥

औन्निद्रयं दौर्बल्यं चिन्ताऽलसत्वं सनिःश्वसितम्।
मम मन्दभागिन्याः कृते सखि त्वामप्यहह परिभवन्ति॥

ओण्णिद्दमिति। कृतकामुकोपभोगां दूतीं प्रतीयमुक्तिः। महकेरं मदीयमिति वा। तुहेति कर्मणि षष्ठी। परिभवतीत्यस्य हिंसार्थकत्वादित्याहुः। तु हेति द्वितीयान्तमेव तथानुशासनादिति दीपिका। तदा तु त्वामिति संस्कृतम्। तुहवीत्यनन्तरं अहह इति क्वचित्पाठः। स न युक्तः। वृत्तहानिदोषादिति केचित्। तन्न। गाथाभङ्गेऽपि छन्दोऽन्तराभङ्गादिति चण्डीदासः। हे सखि! सनिःश्वसितं औन्निद्रयादिकं कर्तृ मन्दभागिन्या मम कृते मदर्थं त्वामपि परिभवति पीडयतीत्यन्वयः। निःश्वसितं निःश्वासस्तत्संहितमुन्निद्रस्य गतनिद्रस्य भाव औन्निद्रयम्। मन्दोऽल्पो भागो भागधेयं विद्यतेऽस्याः सा तथा। मां तावत्परिभवत्येव। मत्कार्यार्थं गमनागमनादिना कामुकप्रसादनव्यापारेण त्वामपीत्यपेरर्थः। मदीयमित्यर्थे तु मदीयमेतत्त्वामपि स्नेहवशात् परिभवतीत्यर्थः। अतएव सखीति सम्बोधनम्। एतेन स्वीयस्यौन्निद्रयादेरन्यपरिभावकत्वायोगास्वीयसजातीयलक्षणेत्यपास्तम्। एकेनोभय-परिभवाभावेऽप्यर्थसमुच्चयानुपपत्तेश्च। अत्र बोद्धव्यवैशिष्ट्येन कामुकोपभोगव्यक्तिः। भागो रूपार्द्धके प्रोक्तौ भागधेयैकदेशयोरिति विश्वः॥ १४॥

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु॥

---

१. मया योजितम्।

तथाभूतामिति । वेणीसम्वरणे आर्य एवं युष्मासु प्रतीयमानेषु कदाचित् खिद्यते गुरुरिति सहदेवोक्त्यनन्तरं गुरुः किं खेदमपि जानातीत्युपक्रम्य भीमसेनोक्तिरियम्। अत्रेत्थमित्यध्याहृत्य गुरुर्गौरवेण साक्षादनभियोज्यो युधिष्ठिरः। इत्थं खिन्ने मयि खिद्यतेऽनेनेति खेदो मात्सर्यम्। भजति कुरुषु अद्यापि एवं दुरवस्थायामपि न भजतीति सोपहासकाकुः। खेदे हेतुमाह नृपैरेव सदः सभा तस्यां पाञ्चालदेशाधिपस्य राज्ञस्तनयां जन्मप्रभृत्यपरिभूतामस्मत्परिग्रहेणैव तभाभूतां स्त्रीधर्मिणीं दुःशासनाकृष्टकेशपाशां विशिष्य भवत्सन्निधावप्यवाच्यावस्थां दृष्ट्वा खेदं भजतीत्यन्वयः। उषितं स्थितमिति भावे क्तप्रत्यये द्वितीयान्तं दृष्ट्वेत्यस्य कर्म। तथा च वल्कलधरैरस्माभिर्वने व्याधैः सार्द्धम्, न तु वानप्रस्थनृपादिभिर्यदुषितम्। विराटस्यावासे गृहे अनुचितस्य सूदादिवेषस्य आरम्भेण निभृतं गुप्तं यथा स्यात्तथा स्थितं च दृष्ट्वेत्यर्थः। दीपिकाकृतस्तु दृष्ट्वेत्येतदुषितमित्यनेन समानकर्तृकम्, सन्निधानात्। तेन पञ्चानामपि दर्शनं लभ्यत इत्याहुः। अर्वाञ्चस्तु वल्कलधरैर्व्याधैः सहोषितं मां दृष्ट्वा विराटस्यावासे स्थितं च मां दृष्टेत्यर्थमाहुः। अत्र काकुवैशिष्ट्यान्मात्सर्यस्यात्यन्तानौचित्यं ध्वन्यते।।१५॥

तदा मम गण्डस्थलनिमग्नां दृष्टिं नानैषीरन्यत्र।
इदानीं सैवाहं तावेव कपोलौ न सा दृष्टिरिति संस्कृतम्।।

तइ आ इति। नायिकाभयेन निकटवर्त्तिनीमन्यां साक्षादपहाय नायिकाकपोलगतं तत्प्रतिबिम्बं नायिकामुखावलोकनमिषेण पश्यन्तं नायकं प्रति प्रतिबिम्बापगमे दृष्टिविकारेण ज्ञातरहस्याया नायिकाया इयमुक्तिस्तदा यदा सा कामिनी मत्सन्निधावासीत्। निमग्नां अनिमेषतया तथाभूतामिव। णमिअं' इतिपाठे नमितां निहितामित्यर्थः। सैवाहमिति। तदवस्थैवेत्यर्थः। सा स्निग्धाः निमेषा। तथा च सखीसान्निध्यातिरिक्तसकलसत्त्वे तादृग्दृष्टिविरहः। तदेदानीं पदात्मकवाक्यगम्यः सखीसान्निध्याभावस्य स्वप्रयोजकत्वम-वगमयतीति वाक्यवैशिष्ट्योदाहरणम्।।१६॥

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी,
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः।
किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाताः
येषामग्रेसरति कलिताऽकाण्डकोपो मनोभूः।।

उद्देशोऽयमिति। नायिकां प्रति रमणार्थिनः कामुकस्योक्तिरियम्। दूत्या वा। हे तन्वि! कन्दर्पवेदनया तुनतायोगिनि, अयं नर्मदायाः नर्म ददातीति नर्मदा, न तु यथाकथञ्चिन्नदी[२] तस्या उद्देश ऊर्ध्वो देशः स्खलनभयेन सञ्चरतामनवलोकनीयस्तिष्ठतीत्यन्वयः। उद्दिश्यते दूरादेव जनैः, न पुनर्गम्यत इति निर्जनत्वं सूच्यते इति दीपिकायाम्। कीदृशस्तत्राह-सरसेत्यादि। सरसानां स्निग्धानां कदलीनां श्रेण्या पङ्क्त्या या शोभा तयातिशय्यतिशयितः। अत्र सरसत्वेन

---

२. 'चिन्नदी' 'स्थाने' वित्सरी 'क' मातृकायाम्।

शुष्कपर्णध्वनिराहित्यम्। श्रेणीत्वेन च वेष्टनं गम्यते। तथा कुजानामुत्कर्षेण गुञ्जनमधुकर-करम्बितकुसुमसमृध्यादिरूपेणाङ्कुरितोऽभूतप्रादुर्भूतो रमणीनां विभ्रमो विलासो यत्र सः। तथा चानुत्पन्नविलासानामपि नवनवोन्मेषशालिविलासोदयात्। भवत्याः कामुकवैमुख्ये दुरुत्तरं व्यसनं स्यादिति भावः। न केवलमेतावदेव वैमुख्ये बाधकम्, किं त्वन्यदपि बलवदस्तीत्याह किं चेति। एतस्मिन्प्रदेशे ते शैत्यमान्द्यसौगन्ध्यवत्तया प्रसिद्धा वाता वान्ति। कीदृशाः? सुरतस्य सुहृदः श्रमधर्माद्यपनोदनेन निरतिशयानन्दमयत्वरूप-सुरतोत्कर्षहेतवः। श्रमापनयनेन पुनः पुनः प्रवर्तनया सुहृदः इत्यन्ये। येषां वातानामग्रे मनोभूः सरति चलति मनोभूत्वेन समचेतसां दुःपरिहर इति ध्वन्यते। मर्मज्ञतेति केचित्। कलितो धृतोऽकाण्डेऽनवसरे निमित्ताभाव इति यावत्। कोपो येन सः। सुरतवैमुख्ये तु दृढं कुपितः किमिव न करिष्यतीति व्यज्यते। अत्र वाच्यस्य देशादेरुक्तविशेषणवैशिष्ट्यात्कामुकाभिप्राय-व्यक्तिः ॥१७॥

काचित्सङ्केतार्थिनं तटस्थतयेव सन्निहितमुपपतिं प्रति सङ्केतकालसूचनाय प्रतिवेशिनीं प्रत्याह।

नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभारे सकले।
क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्राम ॥ इति संस्कृतम्॥

णोल्ले इति। अणण्णमणा इति पाठे त्वनन्यमना इति। होईत्यनन्तरं णवरं इत्यधिकपाठे केवलमिति बोध्यम्। नुदति प्रेरयति। अनार्द्रमकरूणम्। तेन श्रमादिव्याजालम्बनेनापि नावकाश इति ध्वन्यते। गृहभारो गृहकार्यनिर्वाहः। सकल इत्यनेन सार्वकालिकी व्यग्रता सूच्यते। यदि क्षणमात्रं विश्रामो भवति तर्हि संध्यायां अथवा न भवतीति योजना। अत्र कामुक-सन्निधित्वरूपादन्यसन्निधिवैशिष्ट्यात्सङ्केतकालसूचनाभिव्यक्तिः ।।१ ॥

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण।
एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम्॥

सुव्व इति। उपपतिं प्रत्यभिसर्तुं प्रस्थितां नायिकां निवारयितुं सख्या इयमुक्तिः। अद्य, न तु दिनान्तरे, प्रहरमात्रेण न तु विलम्बेन। एवमेव तदीयभोजनाद्युपयोगिव्यापार-राहित्येन। करणीयं रन्धनादिकं सज्जय साधयेत्यर्थः। अत्र विदितरहस्याया सख्या कृतस्य प्रियागमनप्रस्तावस्याभिसरणप्रकरणकृतत्वरूपाद्वैशिष्ट्यात् प्रस्तावपदवाच्यस्य प्रकरणस्याभिसारसम्बन्धित्वरूपाद्वा वैशिष्ट्यान्निवारणं व्यज्यते॥१९॥

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः॥

अन्यत्र यूयमिति। हे सख्यः! यूयमन्यत्र इतो दूरम्। कुसुमानामवचायं हस्तेनादानम्। हस्तादाने चेरस्तेय इति घञो विधानात्। तथा चान्यत्र हस्तग्राह्यकुसुमबाहुल्यमितिप्रलोभनम्। अस्मीत्यहमर्थकमव्ययम्[३]। अत्राहमवचायं करोमि।

---

३. 'व्ययम्' 'क' मातृकायां नास्ति।

हेतुमाह-नाहमिति। हि यस्मात् दूरं भ्रमितुं सञ्चरितुं न समर्था। प्रसीदत प्रसन्ना भवत। अयं वो युष्मभ्यमञ्जली: प्रणामांजलि रचित: कृत:। सर्वाभ्य एकोऽञ्जलिरप्य-सामर्थ्यादेव। अत्र देशस्य निर्जनत्वादिवैशिष्टट्यात्प्रच्छन्नकामुकप्रेषणमाश्वस्तां प्रति व्यज्यते ॥२० ॥

गुरुजनपरवश प्रिय! किं भणामि तव मन्दभागिन्यहम्।

अद्य प्रवासं व्रजसि व्रज स्वयमेव श्रोष्यसि करणीयम्॥

गुरुअणेति। तुहेति द्वितीयान्तं पूर्ववत्। सम्बन्धसामान्यविवक्षया वा षष्ठी। गुरुजनो[४] जनमात्रम्, न तु विदग्ध:। स एव वसन्ते प्रवासप्रेषणात्पर: शत्रुस्तस्य वश अधीनेति सम्बोध्य-विशेषणम्। तेन अनिवार्यत्वम्। प्रियेत्यनेन गमने दु:खौत्कण्ठ्यम्। किं भणामि वदामि? परायत्ते निरर्थकत्वात्। मन्दभागिनी अल्पभाग्या। यतस्तवेयं मति: किं मया क्रियते, तत्राह-अद्येत्यादि। अद्य प्रकरणाद्वसन्ते। यत्र प्रवासिनोऽपि गृहमायान्ति। व्रजेति रोषोक्ति:। स्वयमेव करणीयं कर्त्तुमर्हम् जानासि। तेन स्वधैर्यं बुद्ध्वैव प्रायो गच्छसीत्यभिप्राय:। अत्राद्यशब्द-प्रतीतात्प्रतिदिनोपचीयमानत्वादिरुपाद्वसन्तकालवैशिष्ट्यादिदानीं त्वद्गमने न जीविष्यामीति व्यज्यते ॥२१ ॥

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया,

प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।

आनीतं पुरत: शिरोंशुकमध: क्षिप्ते चले लोचने,

वाचस्तत्र निवारितप्रसरणं सङ्कोचिते दोर्लते॥

द्वारोपान्तेति। मित्रं प्रति नायकस्योक्तिरियम्। मयि द्वारस्योपान्ते समीपे निरन्तरे निर्व्यवधाने अत्यन्तसन्निहिते सति तया प्रकृतया नायिकया सौन्दर्यस्य[५] साराणां श्री: सम्पत्तिर्यत्र। सौन्दर्येण साराणां श्रेष्ठानामिव श्री: शोभा वा यत्र तथाभूतया। उरुयुगं प्रोल्लास्य प्रसार्य परस्परेण समासक्तं सम्बद्धं समासादितं स्थापितम्। अथवा भावे क्तप्रत्यय:। तथा च समासङ्गं प्रापितमित्यर्थ:। तथा शिर:सम्बन्ध्यंशुकं पुरत: मुखोपर्यानीतम्। चले चपले लोचनेऽध: क्षिप्ते सञ्चारिते। वाच: वचनस्य तत्रानाविधं प्रसरणं सखीषु प्रवर्तनं निवारितम्। दोर्लते, भुजलते, सङ्कोचितं आकुञ्च्य मिथ: संयोजिते इत्यर्थ:। अत्र पञ्चभिर्वाक्यैरुल्लासनादिचेष्टावैशिष्ट्यात् क्रमेण स्पृष्टकालिङ्गनगूढागमनसूर्यास्त-समयकोलाहलराहित्यपारितोषिकालिङ्गनानि व्यज्यन्ते। अद्य इत्यनेन त्वत्कृते शरीरकार्श्यमिति केचित्। तैश्चानुरक्तास्मीति रहस्यं द्योत्यते। तत्र स्पृष्टकालिङ्गनस्वरूपम्। असमागतयो: प्रीतिलिङ्गद्योतनार्थमालिङ्गनचुतष्टयं स्पृष्टकं विद्धकं उत्कृष्टकं[६]

---

४. ''जन:'' 'मूल' मातृकायां नास्ति।

५. सौन्दर्यस्य साराणां श्री: सम्पत्तिर्यत्र। सौन्दर्येण साराणां श्रेष्ठानामिव श्री: शोभा वा यत्र तथा भूतया इति 'क' मातृकायां नास्ति।

६. उत्कृष्टकं इति पदं 'ख' भातृकायां नास्ति।

पीडितकमित्युपक्रम्य सम्मुखागतायां प्रयोज्यायामन्यापदेशेन गच्छतो गात्रेण गात्रस्य स्पर्शनं स्पृष्टकमिति वात्स्यायनसूत्रे दर्शितम्। दूरस्थस्यैव प्रियस्य दूरात् स्वाङ्गैः स्वाङ्गान्येव मेलयित्वा स्पृष्टकमालिङ्गनमित्यन्ये ॥२२ ॥

श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।

मा पथिक रात्र्यन्ध शय्याया मम निमङ्क्ष्यसी इति संस्कृतम्।

अत्ता एत्थेति। स्वयं दूत्या इयमुक्तिः। अज्जेति पाठे आर्या साध्वी न विदग्धा। निमज्जति वार्धक्यान्निःस्पन्दं शेते, न तु जाग्रद्रूपा। तेन शङ्काराहित्यम्। अत्र ततो भिन्नस्थले अहमेव नान्यसहिता। अत्र स्वापबोधकपदानुक्त्या निद्राराहित्यं स्वस्य व्यज्यते। दिवसकमिति निन्दायां कप्रत्ययः। तस्य समागमप्रतिकूलत्वात्। द्वितीया चात्यन्तसंयोगे। दिवसकं व्याप्येत्यर्थः। दि अह ए इति पाठे दिवसके प्रलोकय सम्यगवलोकय। पथिक! रात्र्यन्धेति च रहस्यगोपनाय। पथिकत्वेन श्रमाद्विस्मरणयोग्यताया रात्र्यन्धत्वेन च स्वशय्यापतनप्रसक्तेर्द्योतनात्। अन्यथा प्रसक्तनिषेधे रहस्यभङ्गापत्तेः। महेत्यावयोरित्यर्थे निपातः। स्वमात्रोपादाने च स्वशय्यापतनप्रसक्तेः[७] रहस्यस्य प्रकाशापत्तेः। तरुणतया स्वशय्यापतनस्यात्यन्तानुचित्वाद्वा स्वमात्रोट्टङ्कनेऽपि[८] न दोषः। निमङ्क्ष्यसि शयिष्ठाः। णिसज्जइ णिसज्जहिसीति पाठे निषीदसि निषेत्स्यसीति संस्कृतम्। अत्र विद्यमानायाः श्वश्र्वा अतिवृद्धतया बधिरनिश्चेष्टत्वादियोगादन्यस्य चासत्त्वान्निःशङ्कं व्यवहरेति। वक्तृप्रतिपाद्यवैशिष्ट्यात्प्रतीयत इति दिक् ॥२३ ॥

॥ इति श्रीमत्तत्सदुपाख्यवैद्यनाथकृतायां चन्द्रिकायां[९] तृतीय उल्लासः ॥

---

७. 'स्वशय्यापतन प्रसक्तेः 'क' एवं 'ख' मातृकायां नास्ति।

८. स्वमात्रोट्टङ्कने 'स्थाने' स्वमात्रोऽङ्कने 'क' मातृकायाम्।

९. 'क' मातृकायां 'सदाहरणं चन्द्रिकायां' इति पाठः।

(अथ चतुर्थोल्लासः)[१]

तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।

रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि इति संस्कृतम्॥

तालेति। यदा ते प्रसिद्धगुणाः सहृदयैर्गृह्यन्ते, तदा गुणा उत्कर्ष हेतवो जायन्ते भवन्तीत्यन्वयः। दृष्टान्तमाह रवीत्यादि। अनुगृहीतानि स्पृष्टानि कमलानि कमलानि सुरभीणि आह्लादकानि वा भवन्ति। अत्रातथाभूतेषु[२] कमलत्वजात्यभावो व्यङ्ग्यः कमलपद-लक्षणालभ्यः। इदं च काव्यप्रदीपगतं पद्यम्।।२४॥

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।

आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥

त्वामस्मीति। अस्मीत्यहमर्थे। एवं च यत इत्यध्याहृत्य यतोऽत्र विदुषामसाधारणज्ञानवतां समवाय एकवाक्यतापन्नः समुदायस्तिष्ठति। तत् तस्मात् आत्मीयाम-प्रतार्याम्मतिमास्थाय अवलम्ब्यात्र स्थितिं विधेहीति वाक्यार्थस्य त्वामुपदेशार्हमहमाप्तो वच्म्युपदिशामीत्युपदेशक्रियाकर्मत्वेनान्वयः। आदायेति पाठे गृहीत्वा अवलम्ब्येति यावत्। विद्वत्समवायात्मीयशब्दानामाशुपरपराभवपरानभिभवनीयत्वाबाध्यत्वानि दर्शितलक्षणामूलानि व्यङ्ग्यानि। एवं त्वामहमित्यनयोरवश्योपदेश्यहिताहितत्वालङ्घनीयाज्ञत्वे। वच्मीत्यस्य चादरणीयत्वमिति। केचित्तु-स्थितिशब्देनापि सावधाना स्थितिर्लक्ष्या। विपक्षच्छिद्रापेक्षित्वं व्यङ्ग्यमित्याहुः॥२५॥

उपकृतं बहु नाम किमुच्यते सुजनता प्रथिता भवता परम्।

विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम्॥

उपकृतमिति। त्वया यद्बहूपकृतं तत्र तद्विषये किमुच्यते किं वाच्यम्। बहुत्वाद् वक्तुं न शक्यत इत्यर्थः। भवता परं केवलं सुजनता प्रथिता[३] प्रकटिता। तथा[४] च सौजन्यप्रयुक्त एवैतावानुपकारो, न तु प्रत्युपकारलाभाद्युपाधिप्रयुक्त इति भावः। हे सखे! ततः यस्मात्सुजनता प्रथिता तस्मात् ईदृशमेव सदा विदधत्कुर्वन् शरदां वर्षाणां शतं व्याप्य सुखितं सुखयुक्तं यथा स्यात्तथा आस्व तिष्ठेति मुख्योऽर्थः। स च प्रकरणादिना बुद्धापकारभावं प्रति बोधितो विपरीतं लक्षयति। तद्यथा उपकृतमपकृतम्, सुजनता दुर्जजता, सखे! सुखितं

---

१. मया योजितम्।

२. 'कमलेषु' इति मातृकायामधिकम्।

३. 'प्रथिता' 'ख' मातृकायां नास्ति।

४. तथा समवाहुल्यमिति प्रलोभनम् स्मीम्यहृयर्थकं अवाहमवचायं करोमि हेतु माह 'इति' पदं 'ख' मातृकायामधिकम्'

दुःखितमित्यपकाराद्यतिशयो व्यङ्ग्यः। एवंविधापकारेऽपि प्रियवादित्वात्स्वस्य साधुत्वं वा। तवोपकारापकारविवेको नास्तीति वा तदीयं कौटिल्यं व्यङ्ग्यमिति केचित्।।२६॥

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता।।

सेयमिति। सेयं प्राणेश्वरी मम मनसा सकाशाल्लोचनगोचरं गतेति सम्बन्धः। सा यदनुध्यानसन्तानेनैतावत्कालो गमितः। गोचरमिति भावप्रधान[५]निर्देशाद्गोचरत्वमित्यर्थः। पूर्वं मनस्येवासीदधुना बहिरपि दृष्टेत्यर्थः।

कीदृशी अङ्गेषु नैकत्राङ्गे सुधारसस्य अमृतरसस्य[६] च्छटा वृष्टिः। परीरम्भेण सर्वाङ्गीणसन्तापशान्त्या सौहित्योत्पादनात्। दृशोरिति सप्तमीद्विवचनम्। शोभनः पूरो द्रवो यस्य तथाभूतस्य कर्पूरस्य शलाकिका अञ्जनतूलिका। अतिशयितानन्दहेतुत्वात्। सुदूरं शोभनसमूहमिति दीपिका। शरीरिणी मूर्तिमती। मनोरथस्य श्रीः सम्पत्तिः। केचित्तु मनसः शरीरिणी। मनोनिर्मितशरीरेत्याहुः। परीरम्भस्य चरमत्वेऽपि प्राधान्यात्प्रागुपादानम्॥२७॥

दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च।
अविरलविलोलजलदः कालः समुपागतश्चायम्॥

दैवादिति। इत्थं सम्भोगमुक्त्वा विप्रलम्भमाह। अद्याहन्तया अनुभवैकवेद्यसमागमसुखया चपले आयते दीर्घे नेत्रे यस्यास्तथाभूतया। आगमनसमये कातरदृष्टिदर्शनात्पुरःस्फूर्तिकत्वेन तन्मात्रप्रकर्षोक्तिः वियुक्तश्च। अभूवमिति शेषः। अविरला निबिडा विलोलाः सर्वदिक्संचारिणो जलदा यत्र एवम्भूतः। अयं दृश्यमानप्रकर्षः कालः समयः स एव कालोऽयमिति श्लेषमूलाभेदाध्यवसानम्। सम्यक् प्रतिदिनोपचीयमानतया उपागतश्चेति चकाराभ्यां तुल्यकालता व्यज्यते। अविरलं निरन्तरं विलोलं द्रुतं यथा स्यात्तथा जलं ददाति स तथेत्यर्थ इति कश्चित्।२८।।

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे॥

वियदिति। मानवतीं प्रति सख्या इयमुक्तिः। हे मुग्धे! मानभङ्गावश्यम्भावेऽपि दयितप्रणामोपेक्षणाद्विवेकरहिते। प्रणतिपरे मुहुःप्रणामशालिनि दयित इति विषयसप्तमी। प्रेमपात्रे न स्वामिमात्रे। प्रसीदतद्विषयं प्रसादं कुर्वित्यन्वयः। मानभङ्गसामग्रीमाह–वियदित्यादि। वियत् आकाशं अलयः भ्रमरा इव मलिना शेते। अम्बुगर्भे येषां ते तथाभूता मेघा यत्रेति कर्मधारयोत्तरं बहुव्रीहिः। अस्तीति शेषः। सर्वत्र बोध्यः। अम्बुगर्भत्वेनावृष्टत्वात्स्थैर्यं व्यज्यते। मधुकरकोकिलयोः सहितयोः कूजितैर्दिशां श्रीः शोभाम्। वर्षासु कोकिलकूजिताभावेऽपि मुग्धाया भयप्रदर्शनार्थं सख्याः प्रतारणोक्तिरियमिति केचित्।

---

५. प्रधान प्रधान 'इति' 'क' मातृकायां पाठः।

६. 'अमृत रसस्य' इति 'क' मातृकायां नास्ति।।

मधुकरा एव कोकिला इति रूपकम्। तथा च यथा वसन्ते कोकिलाः कान्तिहेतवस्तेऽपीदानीं मधुकरा इति भावः। यद्वा क्वचन केचन[७] कोकिलाः प्रावृष्यपि माद्यन्तीति यथाश्रुतमेव सम्यगिति चण्डीदासादयः। धरणिः भूमिः अभिनवा नूतना अङ्कुरा[८] एवाङ्के उत्सङ्गे टङ्काः पाषाणविदारकाः मर्मभेदित्वात्पाषाणप्रायकठिनमाभञ्जकत्वाद्वा यस्यां सा तादृशी। अङ्कनार्थक इति वा। अभिनवा अङ्कुरा यत्र एवंविधो अङ्को मध्यो यस्य तथाभूतपाषाणप्रायकठिनस्थानं यस्या सेति चक्रवर्त्तिनः, अभिनवाङ्कुरा अङ्कश्चिह्नं यत्र तथाविधष्टङ्के पाषाणप्रायदेशो यत्रेति दीपिकायाम्। एवं चोर्ध्वमधस्तिर्यक् योद्दीपनप्रवृत्त्या तद्रहितदृष्टिसञ्चारस्थलाभान्मानभङ्गस्यावश्यभाव्यत्वं सूचितम्। टङ्कः पाषाणदारण इति कोशः।२९।।

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः, कथमपि परिवारप्रार्थनाभिः क्रियासु।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदकान्तःकपोलः।।

परिमृदितेति। मालतीमाधवे तथा ह्यवस्थेत्युपक्रम्य माधवस्य मकरन्दं प्रति मालत्यवस्थावर्णनोक्तिरियम्। अस्या मालत्या अङ्गं परिमृदिता करतलद्वयमर्दनेन शिथिलीकृता या मृणाली बालमृणालं तद्वन्म्लानम्। अङ्गमिति जात्यभिप्रायमेकवचनम्। तथा क्रियासु शरीरधारणमात्रोपयोगिनीषु वह्वीषूपन्यस्तासु परिवारस्य सखी सार्थस्य प्रार्थनाभिरनेकोक्तिभिः[९] कथमपि अनिच्छन्त्या अपि बलात्कारेण प्रवृत्तिः सकृत्क्वचिदुपक्रममात्रमस्या इत्यनुषज्यते। एवमग्रेऽपि चकारोऽप्यर्थे, कपोलोऽपि निष्कलङ्कस्य कलामात्रावशिष्टस्य हिमांशोश्चन्द्रस्य लक्ष्मीं शोभां कलयति धारयति, पाण्डुक्षामत्वात्। शोभामित्यनेन एवमपि न शोभाच्युतिरिति गम्यते। कपोल इत्येकवचनादेक एव पाण्डुः। सौकुमार्येणाशु सर्वतः पाण्डिमानुदयात्। अपरस्तु अभिनवस्य करिणो यो दन्तच्छेदः छिद्यते इति छेदः कर्मणि घञ्। छिन्नोभागस्तद्वत् कान्तः। अलक्तकमिश्रदुग्धवर्णः। नूतनकरिदन्तस्य कोमलत्वेनाशुरक्तसम्बन्धेन तल्लाभादिति चक्रवर्त्तिनः। जात्यभिप्रायमेकवचनमित्यन्ये। केचित्तु अभिनवो यः करिदन्तच्छेदः इत्यन्वयस्तेन शौक्ल्याधिक्यात्पाण्डुताधिकेन विप्रलम्भोत्कर्षः। तथा च कालिदासः–सद्यः कृत्तद्विरद-दशनच्छेदगौरस्य तस्येत्यत्र कर्त्तनस्य सद्यस्त्वमाहेत्याहुः।।३०।।

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे वाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि।।

दूरादिति। जातं आगः अपराधो यस्मात्प्रमादतस्तथाभूते, न तु कृतागसि। अतएव

---

७. 'केचन' इति 'ख' मातृकायां नास्ति।

८. 'अङ्कुरा' एव इति 'ख' मातृकायां नास्ति।

९. 'प्रार्थनाभिरनेकोक्तिभिः' स्थाने प्रार्थनाभि रेकाभिः: 'ख' मातृकायाम्।

प्रेयसि प्रीतिप्रात्रे। मानिन्याश्चक्षुः। अहो इत्याश्चर्ये। प्रपञ्चे विचित्रव्यापारसन्ताने चतुरं जातमित्यन्वयः। प्रपञ्चचातुर्यमेव प्रपञ्चयति-दूरादित्यादि। दूरात् दृष्टे इति शेषः।

सप्तम्यर्थे पञ्चमी दूरस्थ इत्यर्थ इति महेशः। सर्वेषु सप्तम्यन्तेषु प्रेयसीति सम्बध्यते उत्सुकम्। इतोऽन्यत्र वा यातीति शङ्कयोत्कण्ठासूचकचेष्टाविशेषशालि। आगते समीपं प्राप्ते विवलितं दूरतः पश्यन्त्या ममौत्सुक्यमनेन ज्ञातमिति लज्जया तिर्यक्कृतम्। सम्भाषिणि सम्यक् भाषिणि स्फारितं विकसितम्। प्रियालापेन हर्षोदयात्। संश्लिष्यति सम्यगतिशयेन सान्निध्यं प्राप्नुवति अरुणमारक्तम्। अप्रसाद्यैव स्पर्शमिच्छतीति क्रोधात्। अतएवापसरन्त्या गृहीतवसने किंचेति समुच्चये। अञ्चिता भ्रूलतं च अञ्चिता कुटिलीकृता भ्रूलता न येन तथाभूतम्। कोपाधिक्येनासूयोदयात्। किञ्चिदित्यर्थे किंचेतीति केचित्। चरणयोरानतिः प्रणामस्तस्य व्यतिकरः सम्बन्धः यस्येति दयितविशेषणम्। व्यतिकरः समूह इति कश्चित्। वाष्पाम्बुनाश्रुजलेन पूर्णमीक्षणं यस्य तथाभूतम्। मानभङ्गेन प्रसादोदयात्। अम्बुपदं बाहुल्यसूचनाय। ईक्षणपदं गोलकाधिष्ठातृतेजःपरम्। गोलकस्याश्रुपूर्णतयैव तत्पूर्णत्वोपचारः। चक्षुर्जातमित्यत्र चक्षुः पदं गोलकपरम्। अतो भेदाद्बहुव्रीहिसङ्गतिः। महेशस्तु ईक्षणपदं गोलकपरं चक्षुः पदञ्च तेजः परमित्याह, तदयुक्तम्। औत्सुक्यविवलितत्वविकसितत्वादीनां तेजस्यसम्भवात्। वस्तुतस्तु वाष्पाम्बुना पूर्णं समासमीक्षणं दर्शनं यस्येत्यर्थं वयमालोचयामः। वाष्पाम्बुपूर्णं क्षणादिति पाठस्तु क्वाचित्कः समञ्जसयैवेति॥३१॥

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥

शून्यमिति। नवोढाया अभिनवसमागमवर्णनमिदम्। अत्र लज्जत इति। लज्जेति पृथक् पदम्। मत्वर्थीयाच् प्रत्ययात्। तेन लज्जयैककर्तृकत्वेनालोक्येति त्वाप्रत्ययोपपत्तिः। तथा च शून्यं निर्जनं वासगृहं शयनागारं विलोक्य सखी निभृतसत्त्वशङ्कया विशेषेण दृष्ट्वा शयनात्किञ्चित् न तु सर्वतः। निद्राभङ्गे पार्श्वपरिवर्त्तनेन समाधातुम्। शनैः, वलयादिक्वाणशङ्कया मन्दं उत्थाय। अनुरागजिज्ञासया निद्राव्याजं मिषमुपागतस्य प्राप्तस्य, न तु व्याजेन निद्राम्। सर्वथा तदसम्बन्धात्। पत्युः, न तु प्रियस्य। अपूर्वसमागमे-नानुद्भिन्नरहस्यत्वात्। तथा निर्वर्णनेऽपि निद्राव्याजसहिष्णुत्वादित्यन्ये। मुखं सुचिरं यावद्बुद्धिवैभवं निर्वर्ण्य। अनुरागातिशयात्। निद्रानिर्णयार्थं च निःशेषं वर्णयित्वा सुचिरं व्याजमुपागतस्येति वान्वयः। विस्रब्धं विश्वासयुक्तं यथा स्यात्तथा। निद्रायास्तात्त्विकत्वभ्रमात्। परिचुम्ब्य परितः कपोलयोर्भाले नयनयोश्च चुम्बयित्वा गण्डस्थलीं जातपुलकामालोक्य लज्जा लज्जावती। अतएव नम्रमुखी बाला नवोढात्वेनाप्रौढा। तव सर्वं रहस्यमवगतमिति हसता। अतएवोद्भिन्नरहस्यत्वाद् अथवा कालाक्षेपकत्वात्प्रियेण चिरं लज्जापगमपर्यन्तं

चुम्बितेत्यन्वयः। सवृद्धिकमूलधनग्रहणाय चिरमिति चक्रवर्तिनः। अत्र शून्यमित्यनेनोद्दीपनातिशयचुम्बनप्रवृत्तियोग्यता च ध्वन्यते। वासगृहमिति स्रक्चन्दनादिसम्पत्तिः। पत्युरिति युक्तानुरागित्वम्। विस्रब्धमित्यनेन च रागातिशयादविमृश्यकारित्वं ध्वन्यते। नम्रेत्युक्तम्, न तु नामितेति। तेन लज्जया तथा विह्वलत्वं यथा नामनेऽप्यशक्तिरिति व्यज्यते। चण्डीदासस्तु नमिरन्तर्भूतकारितार्थः। एवंच नामनेन समानकर्तृकत्वात्। त्वाप्रत्ययोपपत्तिरित्याह-लज्जाया अनुभावगम्यत्वेऽपि शृंङ्गाराङ्गत्वलाभाय लज्जापदोपादानम्। तेन व्यङ्ग्यत्वकृतप्रकर्षापहारात्। अन्यथा व्यङ्ग्यत्वपुष्ट्या भावध्वनित्वापत्तेरिति। अत्र यद्यपि परस्परालम्बने उभयोरपि रती प्रतीयेते। शून्यगृहशयनमुभयोरुद्दीपनम्। बालाया रत्युद्दीपनं नायकनिद्रा। अनुभावौ मुखनिर्वर्णनचुम्बने। लज्जा व्यभिचारिभावः। नायकरतेरुद्दीपनं नायिकाचुम्बनम्। हासादिरनुभावः। हासव्यङ्ग्यो हर्षः सञ्चारी। तथापि नायकविषयिण्या नायिकानिष्ठाया रतेरुद्रेकश्चर्वणाविषय इति चिन्तनीयम्। भोगावासो वासगृहमिति हारावली ॥३२॥

नायिकारब्धं सम्भोगमुदाहृत्य नायकारब्धमुदाहरति।

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः॥

त्वमिति। यत्तु पूर्वं रक्ता भवेन्नारी पुमान्पश्चादिङ्गितेरिति क्रमप्रदर्शनायोदाहरणान्तरमिति। तन्न। पूर्वोदाहरणेनैव तादृशक्रमावगतिसिद्धेः। तत्र नायिकोत्कण्ठाया एव प्रथमं वर्णनात्, प्रकृतानुपयोगाच्च। न च वैपरीत्ये रसाभासत्वद्योतनाय क्रम[१०] प्रदर्शनमिति वाच्यम्। राकेत्युदाहरणे स्वयमेव वक्ष्यमाणत्वादिति। अत्र प्रियतमे अतिशयितप्रीतिपात्रे। हे मुग्धाक्षि! सुन्दरनयने कञ्चुलिकया विनैव मनोहारिणीं मनोहरणशीलाम्। ताच्छील्ये णिनिः। लक्ष्मीं शोभां धत्से धारयसि। अक्ष्णैव सकलमनोहरणात्। न केवलं कञ्चुलिकया शोभानुत्पत्तिरपि तु विद्यमानायास्तिरोधानमयीत्येवकारार्थः। इत्यभिधायिनि भाषमाणे एव तस्याः कञ्चुलिकायाः या वीटिका ग्रन्थिः मोचनाय तत्संस्पृशति सति सखी सार्थात् लज्जया शय्याया उपान्ते समीपे निविष्टा निबिडसंलग्ना। भवतीषु स्थितास्वयमेवं विचेष्टते इति लज्जया स्मितसहिता सखी आलीजनस्य नायिकैव तस्या नेत्रयोरुत्सवः उत्फुल्लता सैव वा नायकप्रियतमत्वेन आलीजनस्य नेत्रोत्सवः तां दृष्ट्वा हर्षोदयात्। तेन आनन्दितः सञ्जाता आनन्दः आलीजनः सखीजनः। अलीकानां मिथ्याभूतानां शुको मया भोजनीयः सारिका पाठनीया इत्यादि वचनानामुपन्यासो यथा स्यात्तथा शनकैर्मन्दं निर्यातः निर्गत इत्यन्वयः शनैस्त्वमलीककथा च नायिकाया लज्जातिशयपरिहाराय। चक्रवर्त्तिनस्तु शनैस्त्वमुत्सवत्यागे दुःखोत्पादात्। अतएव वालीजनोऽविदग्धः समयाज्ञानादित्याहुः। प्रियतम इत्यनेनानिवार्यत्वम्।

१०. तथा क्रम इति 'क' मातृकायां पाठः।

सस्मितेत्यनेन कञ्चुलिकायाः सारणे स्वरसश्च व्यज्यते। अत्र मुग्धाक्षी प्रियतमश्च परस्पररत्यालम्बनविभावौ। नायकरतेरुद्दीपनं नयनसौन्दर्याङ्गशोभादि। आभाषणवीटिकास्पर्शावनुभावौ। तयोरभिधायिनि वीटिकासंस्पृशीति तुल्यकालतावगत्या प्रतीयमान उत्कण्ठाख्यः सञ्चारी। नायिकारतेस्तु नायकानुभावोद्दीपनम्। स्मितादिरनुभावः। तद्व्यङ्ग्यो हर्षः सञ्चारी। प्राधान्येन त्वास्वादविषयत्वं नायिकालम्बनाया नायकनिष्ठरतेरिति पूर्वस्माद्भेदः ॥३३॥

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः॥

प्रेमार्द्र इति। मालत्यर्थं श्मशानसाधने प्रवृत्तस्य माधवस्याभिलाषोऽयम्। मुग्धदृशो मालत्यास्तास्तामनुभूतविशेषाश्चेष्टाः दृग्व्यापाररूपामपि भवेयुरित्यन्वयः। आशंसायां लिङ्। कीदृश्यः? प्रेम्णा स्नेहेनार्द्राः स्निग्धाः। प्रेमव्यञ्जकत्वात्। प्रेम्णैवावलोकनादिना प्रकर्षं नीतं प्रणयः तं स्पृशन्तीति प्रणयस्पृशः। प्रेमदर्शनादिगतो भावव्यञ्जकः कश्चन विशेषः, तत्पूर्वको वशीकारः प्रणय[११] इति चण्डीदासः। प्रश्रयः स च गुर्वादिभयलाघवमिति चक्रवर्त्तिनः। व्यवहारकौशलमित्यन्ये। वत्सलतेत्यपरे। परिचयात् दृढा सती वशात् उद्गाढः स्थिरतया निःशेषमुत्सारितगुर्वादिपारतन्त्र्यः। रागस्योदयो यासु तथाभूताः। परिचयातिशयेन रञ्जनक्षमः प्रणय एव रागः। परिचयो रहस्यादेरावेदनमिति चण्डीदासः। निसर्गेण स्वभावेन मधुराः मनोहरा यासु। आशंसया मनोरथेन कल्पितास्वपि किं पुनरनुभूतासु। क्षणादन्तःकरणस्य मनसः आनन्देन सान्द्रो घनः लवस्तन्मयीभावः[१२]। बाह्यकरणस्य चक्षुरादेर्व्यापारविषयग्राहित्वं रुणद्धीति तथाभूतो भवतीति वाक्यार्थः। अत्र मुग्धदृश इति दृक् प्रकर्षोऽपि क्रमात्प्रेमार्द्रा इत्यादिविशेषणस्वारस्याच्चेष्टापदेन दृग्व्यापारलाभः।॥३४॥

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद्
यो मां नेच्छति नागतश्च हहहा कोऽयं विधेः प्रक्रमः।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि॥

अन्यत्रेति। इत्युक्तप्रकारेणाल्पेतराभिर्बहुभिः कल्पनाभिर्वितर्कणैः कवलितं ग्रस्तम्। व्याप्तमिति यावत्। स्वान्तं मनो यस्यास्तथाभूता बाला निशान्तस्य गृहस्यान्तरे मध्ये निशि निद्रां नाप्नोतीति सम्बन्धः। किम्भूता। वृत्तः सञ्जातो विवर्तनस्य पार्श्वपरिवर्त्तनस्य व्यतिकरः समूहो यस्यास्तथाभूता। वृत्तविवर्तनं पार्श्वं परिवर्तनं तस्य व्यतिकरः सम्बन्धो यस्या इति

---

११. 'प्रणयः' स्थाने' प्रश्रयः इति 'क' एवं 'ख' मातृकायाम्।
१२. 'भावः' स्थाने "भुवः' इति 'ख' मातृकायाम्।

चक्रवर्ती। कल्पनाप्रकारमाह- अन्यत्रेति। अन्यत्र नायिकान्तरगृहे व्रजति गच्छतीति कथापि का। न कापि अलीका किमुत गमनमित्यपिशब्दलभ्योऽर्थः[१३]।

खलु निश्चितम्[१४]। अस्य नायकस्य तादृक् सुहृदपि नास्ति यो मां नेच्छति द्वेष्टि। तथा च तत्कृतनिवारणमप्यसम्भाव्यमित्यर्थः। तर्हि हेत्वभावेनागमनमप्यसम्भाव्यम्, तत्राह नागतश्चेति। चस्त्वर्थे। आगतस्तु नेत्यर्थः। कारणाभावेऽपि कार्यमिति विस्मये हहहेति। विधेर्दैवस्य कोऽयमननुभूतपूर्वः प्रक्रमः आरम्भः। अहेतुककार्योत्पादरूपः। हहहेति दैन्ये प्रक्रमः विप्रलम्भस्यारम्भ इति चक्रवर्ती। सहसेति पाठे ननु दैववशान्नागतस्तत्राह- सहसेति। सहसा अकस्मात्। तथा च विधेर्मया किमपराद्धमिति भाव इति सङ्गमनीयम्।

एषा च आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः तदनागमदुःखार्ता विरहोत्कण्ठिता यतेत युक्तलक्षणा नायिकेत्यवश्यं विरहस्य प्रवासादितः पृथक्भावः स्वीकार्यः। अन्यथा प्रोषितभर्तृकादितोऽस्याभेदान्तरत्वानापत्तेरिति ॥३५॥

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम्।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः॥

सा पत्युरिति। काचित्सखीवृत्तान्तं सखीं प्रति कथयति। सा बाला मुग्धा पत्युः, न तु प्रियस्य अपराधकारित्वात्। प्रथमापराधस्यान्याङ्गनासंगमरूपस्य समये। प्रथमत्वेनासह्यत्वम्। द्वितीयादौ चातुर्यसम्भवात्तदुक्तिरित्यन्ये। सख्येन सौहार्देन य उपदेशस्तं विना तदभावात्। सख्येत्यसमस्तं तृतीयान्तम्। तथा च सखीकर्तृकोपदेशं विनेत्यर्थ इत्यन्ये। सविभ्रममङ्गस्य भ्रुकुट्यादेर्या वलनाचालनावक्रोक्तयश्च। ताभिः संसूचनमर्थान्मानस्य प्रकाशनं नो जानातीत्यन्वयः। तर्हि किं करोतीत्यत्राह- स्वच्छैरित्यादि। अश्रुभिरित्युपलक्षणे तृतीया। रोदनं चोपलक्ष्यम्। तथा चाश्रुभिरुपलक्षितंकेवलमेव रोदनं करोतीत्यर्थः। लोकोक्त्या औपचारिकी वा तृतीयेति दीपिका। केवलमेवेति समुदितो निपात इति चण्डीदासः। केवलं रोदित्येवेत्युभाभ्यां रोदनायोगरोदनान्ययोगव्यच्छेदादीलभ्याविति चक्रवर्ती। अयोगश्चात्र विरामः। अन्यत्, हेतुत्रयं गलनादिरुदिअश्रुविमोचन इति धात्वनुसारादेव गतार्थस्याश्रुपदस्य विशेषणदानायोपादानन्तरमाह-स्वच्छैरिति। निर्मलैः अच्छयोर्निर्मलयोः कपालयोर्मूले गलितैः अञ्जनपत्ररचनयोस्त्यागादश्रुकपोलयोः स्वच्छतेति चक्रवर्त्ती। अश्रुवादुल्पेन तयोरपगमात्सेति दीपिकाकारः। उत्तानशयनान्मूले गलनम्। लुठल्लोलाकैरिति रूपकम्। लुण्ठतो विप्रकीर्णा लोलाश्चञ्चला येऽलकाः केशास्तद्रूपैः। सूक्ष्मत्वात्। लुठल्लोलोदकैरिति पाठे लुठत् भूमौ

---

१३. मित्यपिशब्दलभ्योऽर्थः। खलु निश्चितम्। अस्य नायकस्य तादृक् सुहृदपि नास्ति यो मा नेच्छति द्वेष्टि। तथा च तत्कृतनिवारणमप्यसम्भाव्यमित्यर्थः। इति 'क' मातृकायां नास्ति।
१४. खलु 'इत्यारभ्य' 'सम्भाव्यमित्यर्थः' इत्यन्तं इति 'ख' मातृकायां नास्ति।

पतत् लोलोदकं स्रोतो येषां तैरित्यर्थः। कीदृशी बाला? परदर्शने लज्जया परितः अस्ते क्षिप्ते नेत्रोत्पले यया तथाभूता। आरूण्यादुत्पलारोपः। केचित्तु अश्रुभिरलकैश्च पर्यस्ते व्याप्ते म्लाने वा नेत्रोत्पले यस्या इत्यर्थमाहुः। तत्र शब्दस्वारस्य भङ्गान्न पदे दोष इति ॥३६॥

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित! प्रियसुहृत्सार्थः किमु त्यज्यते॥

प्रस्थानमिति। प्रोष्यतपतिका स्वजीवितं सम्बोध्य सोपालम्भं वदति। हे प्रिय! प्रीतिपात्रजीवितप्रियतमे। यातुं गन्तुं निश्चितं जातनिश्चयं चेतो यस्य तथाभूते सति न तु गन्तुमुद्यते। सर्वे अर्थास्तव सुहृदः। समं सह प्रस्थिताः प्रचलिताः। तथा च तवापि गन्तव्ये सति। गमनावश्यम्भावे सति। कृत्यल्युटो बहुलमिति अवश्यार्थे तव्यप्रत्ययः। सुहृदां सार्थः समूहः किमु कुतस्त्यज्यते। त्वयापि गन्तव्यमिति भावः। के के प्रस्थितास्तत्राह–प्रस्थानमिति। वलयैः कङ्कणैः प्रस्थानं कृतम्। प्रियगमनश्रवणजनितकार्श्येन स्वस्थानच्युतेः प्रीतिपात्रैर्मित्रैः। प्रियस्य नायकस्य वा मित्रभूतैरिति वचनादिविपरिणामेन सर्वेषु तृतीयान्तेषु योज्यम्। तत्त्वञ्च प्रियसन्निधानान्वयव्यतिरेकानुविधायितया अस्राणामपि हृदयस्थत्वेन प्रियसखत्वमिति चक्रवर्ती। अस्रैरश्रुभिरजस्रं निरन्तरम्। असंख्यत्वात्। गतं स्थानान्निर्गतम्। धृत्या धैर्येण क्षणमपि नासितं न स्थितम्। चित्तेन गन्तुं पुरः पूर्वमेव व्यवसितमुद्युक्तं न तु गतम्। तेन सममित्यनेनाविरोधः। प्रियेति सम्बोधनेन प्रियतमेनेव त्वयापि त्यक्तुमुचितमिति व्यज्यते। प्रियाणां सुहृदां सार्थः। प्रियस्य वा सुहृदां सार्थः इत्यर्थकमेकं पदमिति केचित्। प्रियसखैरिति विशिष्यास्रविशेषणमत्यन्तप्रियत्वप्रतिपादनाय। तच्च जीवितनाशकदुः- खोपस्थिता- वप्यस्रोद्गमात्। किञ्चित् दुःखोपशमेन जीवितरक्षकत्वात्। दुःखातिशयोऽप्य-त्यागाद् वेत्याहुः। सार्थशब्दश्च यद्यपि सङ्घसार्थौ तु जन्तुभिः इत्यमरोक्तेर्जन्तुसमूह एव प्रयुज्यमानो दृष्टेनाचेतनसमूहे तथापि प्रकृते चैतन्या- रोपात्सङ्गमनीयः॥३७॥

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥

त्वामिति। मेघदूते कुबेरशापप्रतिबद्धप्रियासविधगमनस्य यक्षस्य मेघद्वारा प्रियां प्रति सन्देशोक्तिरियम्। प्रणयेन कुपितां मानवतीं त्वां धातुरागैः गैरिकादिभी रक्तधातुभिः शिलायामालिख्यात्मानं ते तव चरणयोः पतितं प्रणतं कर्तुं यावदिच्छामि तावन्मुहुरुपचितैः प्रवृद्धैरस्रैर्वाष्पैर्मे दृष्टिर्दर्शनं आलुप्यते लुप्ता भवतीत्यन्वयः। अर्थान्तरं न्यस्यति क्रूर इति।

अतस्तस्मिन्नप्यालेख्येऽपि नौ आवयोः संगमं क्रूरः श्रेयो विघटने जागरूकः कृतान्तो दैवमेव कृतान्तो यमः न सहते किमुत साक्षादित्यर्थः। अत्र कोपे रक्तिमोदयाद्धातुरागैरित्युक्तम्। भूमिशयनाच्च शिलायामिति। यक्षजातीयमेचकवर्णलाभायेति केचित्। कठिनचित्तत्वादित्यन्ये। अत्र कथञ्चिल्लिखितायामाकृतौ आपादयितुमनारम्भे तत्कालीनतदीय-विलासविशेषानुस्मरणसमुद्दीपितशोकावेशवशप्रवृत्तैरश्रुभिदर्शनविघातद्वारा विघ्नः क्रियत इति सर्वतन्त्रविदो वाचस्पतिमिश्राः। आधुनिकास्तु लिखनमपीच्छाविषय एव न तु निर्व्यूढमिति मन्यन्ते। यद्यप्यत्र प्रबन्धालोचनयोन्माद एव प्राधान्येन प्रतीयते तथापि तदनालोचनेनोन्मा-दावभास इत्यभिप्रेत्य रसध्वनित्वेनोदाहृतम्। कृतान्तो यमसिद्धान्तदैवाकुशलकर्मस्थिति-कोशः।।३८॥

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।
तारस्वरं प्रथितथूत्कमदात्प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा॥

आकुञ्च्येति। विष्णुशर्माणमुपहसतः कस्यचिदुक्तिरियम्। इतीत्युपलक्षणार्थक-तृतीयान्तम्। विष्णुशर्मा कश्चिद्विप्रः। आकुञ्च्येत्यादि हतोऽहमित्यन्तेन वाक्येनोपलक्षितं रोदितीत्यन्वयः। वाक्यार्थस्तु वेश्या अशुचिमुच्छिष्टादिनोपहतं पाणिमाकुञ्चय सङ्कुचिताग्रं कृत्वा[१५] मुष्टीकृत्येति यावत्। मन्त्रपूतानामम्भसां पृषतैः बिन्दुभिः प्रतिपदं प्रतिक्षणं पवित्रे मम मूर्ध्नि तारो दीर्घः स्वरो यत्र, प्रथितः विस्तारितः थूदिति शब्दश्च यत्र तथा प्रहारमदात् दत्तवती। हाहेति खेदे। हतो नष्टोऽहमिति। प्रतिपदं प्रत्यवयवमिति केचित्। प्रतिपदं प्रतिमन्त्रपदं तथा चैकैकेन मन्त्रपदेन संस्कृतैः पृषतैः पवित्रैरित्यर्थ इति चण्डीदासः। प्रहितथूत्कमिति पाठे प्रहितं प्रक्षिप्तं थूत्कं लाला यत्रेति व्याचक्षते। यत्तु तारस्वरं यथा स्यात्तथा रोदिति इति व्याख्यानम्। तदयुक्तम्, हतोऽहमित्यन्तस्य वक्तृकवाक्यार्थे रोदने विशेषणसमर्पकत्वासम्भवादिति।।३९॥

हा मातस्त्वरिताऽसि कुत्र किमिदं हा देवताः क्वाऽऽशिषः
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि॥

हा मातरिति। राजपत्न्यां मृतायां तत्परिजनविलापवर्णनमिदम्। इत्थमेतत्प्रकाराः। पुरे भवानामङ्गनानां गिरः। चित्रस्थानपि आलेख्यगतानपि रोदयन्ति। भित्तीरपि शतखण्डाः[१६] कुर्वन्ति। किं पुनः सचेतनामित्यन्वयः। किम्भूताः उच्चैः क्रन्दात् घर्घरस्वराश्च ताः

---

१५. 'कृत्वा' इति 'ख' मातृकायां नास्ति।

१६. 'शतधा' इति कं मातृकायां अधिकम्।

श्रमाद्वाष्पबाहुल्याच्च मध्येऽन्तराले रुद्धा विच्छिन्नाश्चेति कर्मधारयोत्तरं पुनः करुणा इत्यनेन कर्मधारयः। करुणाः सस्नेहाः कातर्यसूचिका वा। नातो रसस्य शब्दवाच्यता दोषः। किंरूपा गिर इत्यपेक्षायां तत्स्वरूपानुकरणं पूर्वार्द्धम्। तदर्थस्तु हा इति विषादे। भो मातः! कुत्र गन्तव्ये त्वरितासि संजातत्वरासि। येनास्मानपि नापेक्षितवती। त्वमितासी इति पाठे इतासि गतासीत्यर्थः। किमिदमाकस्मिकोत्पातरूपम्। हा इति धिगर्थे। देवता धिक्। नानोपचारपूजास्तुतिनुतिभिरप्यरक्षणात्। आशिषः। अर्थाद्धनादितर्पितद्विजानां क्व कुत्र गता इति शेषः। ता अपि विफला इति भावः। प्राणान् धिक्। त्वदभावेऽपि स्थिरत्वात्। ते तवाङ्गेषु सुकुमारेषु अशनिवज्रं तद्रूपो हुताशनः य एवाहुतिभिस्तर्पितः स पतितः स्वयमेव। सचेतनैरेतेष्वङ्गेषु पातयितुमशक्यत्वात्। यद्वा पतितोऽशनिरिति भिन्नं वाक्यम्। वज्रपात एवायं यत्तव विपत्तिरिति। दृशौ नेत्रे दग्धे इति विशिष्योपादानम्। रमणीयतातिशयेन तद्दाहे दुःखाधिक्यात्। यद्वास्माकं दृशौ दग्धे इति अशुभदर्शित्वात् लोकोक्त्या द्रष्टव्यम्।।४०॥

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्।।

कृतमिति। वेणीसम्वरणे द्रोणवधानन्तरमर्जुनादीन्प्रति अश्वत्थाम्न उक्तिरियम्। इदं गुरोर्द्रोणस्य वधरूपं पातकमेव गुरुपातकम्। महापातकामविवेकान्मनुजरूपैः पशुभिरुदायुधैः उद्यतास्त्रैरत एवं निर्मर्यादिभिः मर्यादाशून्यैः यैर्भवद्भिरर्जुननादयः कृतमनुमतं अनुज्ञातं दृष्टं वा तेषां सभीमकिरीटिनां भीमसेनार्जुनसहितानां भवतां नरकस्य दैत्यविशेषस्य रिपुणा श्रीकृष्णेन सार्धमसृङ्गमेदोमांसैः रुधिरवसामांसैरयमेतत्क्षणवर्त्ती अहमनन्यसहायः दिशां लक्षणया तद्देवतानां बलिं पूजोपहारं करोमीत्यन्वयः। पूर्वं दण्डक्रमेण कृतमित्याद्यभिधायानन्तरं क्रोधात्क्रमविस्मृत्यानुमन्तुः प्रागुपादानम्। पशुभिरित्यनेन बलिदानयोग्यता ध्वन्यते। सार्धमिति सम्बन्धिनि साहित्यं, न तु कर्त्तरीति बोध्यम्।।४१॥

क्षुद्राः संत्रासमेते विजहितहरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।
सौमित्रे! तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः
किंचित्संरम्भलीलानियमितजलधिं राममन्वेषयामि।।

क्षुद्रा इति। हनुमन्नाटके रावणपुत्रस्येन्द्रजित इयमुक्तिः। भो जात्या पराक्रमेण च क्षुद्रा नीचा हरयो वानराः, एते दृश्यमानदुरवस्थाः यूयमिति शेषः। संत्रासं विजहित त्यजतेति सम्बन्धः। एते आगते अर्थान्मयीति वार्थः। एते क्षुद्रा इति स्वज्ञानोल्लेख इति चक्रवर्त्ती। एते इत्यन्त इति कश्चित्। भयत्यागे हेतुमाह-क्षुण्णेत्यादि। यतः क्षुण्णश्चूर्णितः शक्रारुढार्हस्ये-

१७. 'रुधिरवसामांसेर' इति 'ख' मातृकायां नास्ति।

भस्यैरावतस्य कुम्भो यैस्तादृशा अमी सायका बाणा युष्मद्देहेषु निपतन्तः पतमाना न तु पात्यमानाः परं केवलं लज्जां दधति धारयन्ति। तनूत्कर्षम्। क्षुद्रकार्यकरणात् लज्जिता इव न मामानन्दयन्तीत्यर्थः। स्वलज्जाया बाणेषु समारोपात्। लज्जामर्थान्मदीयां दधति पुष्णन्तीत्यर्थ इति दीपिका। तथा च दैवात् बाणतापेऽपि अनुद्देश्यत्वाद्रूपं त्यजतेत्यर्थः। केचित्तु निष्पतन्तो मच्चापान्निर्गच्छन्तो युष्मद्देहेषु अर्थात्पतितुं परमलज्जां दधति। न तु पाताभिमुख्यं पौरुषं वेत्यर्थः। न तु निष्पतन्त इत्यस्य पतन्त इत्यर्थः। निष्पतनस्य पतनरूपत्वाभावादित्याहुः। अन्ये तु सामीप्याभिप्रायेण[१८] पतन्तमिति वर्तमाननिर्देशः। एवञ्च पतिष्यमाणा इत्यर्थ इत्याहुः। अपरे तु हे हरय इति विशिष्य हनुमदादिकं सम्बोध्य युष्मदित्यादिवाक्यम् क्षुद्रपात्रसम्बोधने। न च पूर्ववाक्यमिति योजयन्ति। लक्ष्मणं प्रत्याह-सौमित्र इति। सुमित्रायाः पुत्र त्वं तिष्ठ। युद्धोद्यमाद्विरमेत्यर्थः। हेतुमाह-पात्रमित्यादि। हि यस्मात् त्वं रूषाम्। क्रोधानां पात्रं विषयो नासि न भवसि। तर्हि किमर्थमुद्यमस्तत्राह-नन्वहमित्यादि। अहं मेघनादः प्रसिद्धनामा। न तु इन्द्रजित्। तत्त्वस्याप्यनुत्कर्षकत्वात्। राममन्वेषयामि। कीदृक् पराक्रमशील इति मार्गयामि। हेतुगर्भं विशेषणमाह-किञ्चिदिति। किञ्चित्संरम्भ ईषत्कोपः स एव लीलाक्रीडातया नियमितो बद्धो वशीकृतो वा जलधिर्येन तथाभूतम्। क्वचिद् भूभङ्गेति पाठः स सम्यगेव। किञ्चिदित्यन्वेषणक्रियाविशेषणम्। तेन सोऽपि न तादृगन्वेषणपात्रमितिभाव इति केचित्। अन्ये तु सेनाग्रवर्त्तिनो रामस्यान्वेषणानुपपत्तेः। राममनुलक्ष्यीकृत्य एषोऽहं यामीत्यर्थमाहुः। गर्वातिशयाद्विकत्थनमेतदित्यन्त्ये। अत्र सौमित्र इति मातृसम्बन्धोत्कीर्तनान्निर्वीर्यत्वम्। रुषामिति बहुवचनेन तदतिशय इति बोध्यम्।।४२।।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति।।

ग्रीवाभंगेति। शाकुन्तले मृगहननाय धावितरथस्य दुष्यन्तस्य राज्ञः सूतं प्रति अयं पुनरिदानीमपि इत्युपक्रम्योक्तिरियम्। पश्येत्यस्य वाक्यार्थः कर्म। स च इदानीमप्ययं पुरो दृश्यमानो मृगः पुनः उदग्रप्लुतत्वादुत्कटोत्फलत्वात् वियति आकाशे बहुतरमधिकं प्रयाति। उर्व्यां[१९] भूमौ स्तोकमल्पं प्रयाति। किम्भूतः ? अनु पश्चात्पतति धावति स्यन्दने रथे ग्रीवाया भङ्गेन वक्रीभावेनाभिरामं यथा स्यात्तथा मुहुर्बारम्बारं गम्यदेशदर्शनेन विच्छेदात् बद्धदृष्टिः[२०]। शरपतनभयाद्भूयसा स्थूलेन पश्चार्धेन अपरार्धेन अपरस्यार्द्धे पश्चभावो वक्तव्य इति वार्त्तिकानुसारात्।

---

१८. 'प्राये' इति पदं 'ख' मातृकायां बार द्वयं पठितम्।
१९. 'यदभि' इति 'क' मातृकायां अधिकम्।
२०. 'कृत्य' इति 'क' मातृकायां नास्ति।

पूर्वकायं प्रविष्टः प्रवेष्टुमारब्धः। आदिकर्मणि क्तः। स्थूलस्य कृशे कथं प्रवेश इत्यप्रतिसन्धानात् भयातिशयसूचनम्। तथा अर्द्धावलीढैरर्द्धभक्षितैः श्रमेण विवृतात्प्रसारितात् मुखात् भ्रंशिभिः दैवात्, न तु पातितैः। कीर्णं व्याप्तं वर्त्म मार्गो यस्य तथाभूत इति। वियति राज्ञः स्वाम्याभावात् बहुतरम्। भूमौ तत्सत्त्वात् स्तोकमिति केचित् कल्पयन्ति। अत्र नृपरथाद्भयमेवस्थायिभाव इति, न शब्दवाच्यता दोषः ॥४३॥

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥

उत्कृत्येति। मालतीमाधवे श्मशानवर्णनम्। प्रेतेषु रङ्कः कृपणो दरिद्र इति यावत्। अव्यग्रमनाकुलं यथा स्यात्तथा भोजनसमाप्तिभयात् शनैरिति यावत्। कृत्तिं चर्म उत्कृत्योत्कृत्य प्रथममत्ति भक्षयति। अथानन्तरं पृथुना महता उच्छोफेन उच्छूनतया भूयांसि मांसानि जग्ध्वा भक्षयित्वा अङ्कस्थात् करङ्कात् मस्तकात् अस्थिसंस्थं स्थपुटगतमपि गम्भीरविषमभागगतमपि क्रव्यं मांसमत्तीति सम्बन्धः। तेन क्त्वाप्रथमाथशब्दानां नासंगतिः। पृथूत्सेध इति पाठेऽपि स एवार्थः। करङ्कः शवशरीरमिति केचित्। कीदृशानि मांसानि अंसौ स्कन्धौ स्फिक् उरुमूलकटिसन्धिपृष्ठभागः। पिण्डी जङ्घोर्द्धवभागः। पिण्डेति पाठे तदाकारत्वात्स एव। एवमादिष्ववयवेषु सुलभानि तथा उग्रस्तीव्रः पूतिर्दुर्गन्धो येषां ये तानि। कीदृशः प्रेतरङ्कः? आर्त्तः। क्षुत्पीडितः। मीत इति चक्रवर्त्ती। परितः अस्ते क्षिप्ते नेत्रे येन सः। बलवत्पिशाचान्तरेणापहरणशङ्कया दैन्यात्स्थपुटगतमांसापकर्षणाय वा प्रकटिता दशना दन्ता येन सः। अत्रोत्कृत्योत्कृत्येति वीप्सया कालक्षेपाक्षम एकदा सर्वं चर्म त्याजयितुं न शक्नोति किन्तु किंचित् किंचित्तथा विधाय। तद्भुक्त्वापरभागमुत्कृत्यात्तीति लभ्यते। एवं यावत्कृत्तिसवं तावदुत्कर्तनमित्यपि। आत्तस्नाढवन्त्रनेत्रः इति पाठे स्नायुः शिरा आत्तानि गृहीतानि स्नाय्वन्त्रनेत्राणि येनेत्यर्थः। रङ्कः कृपणमल्लयोरिति मेदिनी। करङ्को मस्तक इति च॥४४॥

चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः॥

चित्रमिति। दूयं किल वामनमुद्दिश्य बलेरुक्तिः। अत्र[२१] चित्रादिशब्दाः स्वसमभिव्याहृतपदार्थस्य[२२] लोकोत्तरताप्रतिपादकाः, न तु विस्मयार्थाः। तस्यान्रस्थायित्वेन वाच्यतादोषापत्तेः। तथा च महान्माहात्म्यशील एष पुरुषः चित्रलोकोत्तरं वस्त्विति सम्बन्धः। महात्म्ये विशिष्टेऽन्वितस्यापि लोकोत्तरत्वस्य विशेषणे माहात्म्ये पर्यवसानम्। उत्कटः पण्डितः

२१. 'चित्र' 'क' मातृकायां इत्यधिकम्।
२२. 'भंगिभेदेन' इति 'क' मातृकायां अधिकम्।

इत्यादिवत्। बतावतार इति। अत्राप्येष इति मध्यमणिन्यायेन सम्बध्यते। अवतारः सदाचार-प्रवर्तकः। अत्रापि बतशब्दार्थस्य पूर्ववदन्वयः। बतेति हर्षे श्लाघायां चेति दीपिकायाम्। अविकारः इति पाठे विकाराभाव इत्यर्थः। एषा दृश्यमाना कान्तिः। क्व न क्वापीति भङ्ग्यन्तरेण लोकोत्तर इत्युक्तं भवति। भंगिः गमनोपवेशनदर्शनादिगतः प्रकारविशेषः। अभिनवैव अपूर्वैव वैलक्षण्यं गतमात्यन्तिकत्वमेवकारार्थः। धैर्यं विरोधिसहस्रसंतापेऽप्यचल-चित्तत्वम्। अहो अलौकिकः प्रभावः सामर्थ्यं सकलवशीकाररूपम्। कापि अनिर्वाच्या आकृतिः। अवयवसंस्थानम् एव सर्गः। निर्माणं नूतनः प्रसिद्धब्रह्मनिर्मितिर्विलक्षण इत्यर्थः ॥४५॥

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्यारण्ये शिव: शिवशिवेति प्रलपतः॥

अहौ वेति। अहिः सर्पः। दृषत् शिला लोष्ठं मृत्खण्डः। स्त्रैणं स्त्रीसमूहः। द्वयोर्द्वयोः प्रत्येकं वा शब्दस्तुल्यतासूचनार्थः। अहिहारादयोः समा। इदमुपादेयमिदमनुपादेयमिति वैषम्यरहिता दृक् दृष्टिर्यस्यैवम्भूतस्येत्यर्थः। जगतो मिथ्यात्वेन रागद्वेषयोरभावात्। एवं च यथा अहिनिष्ठापादकत्वेनानुपादेयस्तथा हारोऽपीति साम्यदृष्टिरिति व्याख्यानमनादेयम्। क्वचिद्मध्ये पुण्ये वा अरण्ये मम दिवसा यान्त्विति वा शब्दानुषङ्गेण बोध्यम्। अन्यथा समदृष्टित्वासङ्गतेः। प्रलपतः अनर्थकं वदतः। शब्दमात्रस्य ब्रह्मप्रतिपादकत्वात्प्रयोजना-भावाच्च शिवेति शब्दोच्चारणस्य प्रलापरूपत्वम्। यान्ति इति पाठे क्वचिदित्यत्र कदेति पाठः। तेन कदा कर्ह्योर्विभाषेति भविष्यदर्थे लट्प्रत्यय इति चण्डीदासः[२३]। वस्तुतस्तु तथा पाठेऽपि कदेति पाठकल्पनमनर्थकम्। जीवन्मुक्तेन विद्यमानायाः सर्वावस्थायाः परामर्शोपपत्तेरिति बोध्यम्॥४६॥

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महाभृतम्।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते॥

कण्ठकोणेति। हे ईश! ते तव कण्ठस्य कोणे एकदेशे निविष्टं संलग्नं कालकूटं विषमपि मे मम महामृतम्, उत्तमममृतम्, अतिप्रियत्वात्। उपात्तमपि मूर्ध्ना धृतमपि, अमृतं चन्द्रकलारूपं यदि भवद्वपुषः भेदेन वृत्तिरवस्थितिर्यस्य तथाभूतम्। भेदेनावभासमानमिति यावत्। तदा मे मह्यं न रोचते। अन्यस्य यथा तथास्तु, मम तु न रुचिविषय इत्यर्थः। भवद्वपुषो भेदो यत्र वपुर्भिन्नं तद्वृत्तीति वा। तथा चानन्यगामित्वेन कालकूटस्य प्रियत्वम्। अतथाभूतत्वेन चामृतस्याप्रियत्वमिति भावः। उपात्तं पीतमिति कश्चित्। वृत्तिपदं व्याप्यपरम्।

---

२३. 'चण्डीदासादयः' इति 'ख' मातृकायां पाठः।

२४. 'वस्तुतस्तु' इत्यारम्भ्य स्वास्थायाः 'इत्यन्तं इति 'ख' मातृकायां नास्ति।

एवञ्च भवद्वपुर्भेदव्याप्तमित्यर्थः। ईश वपुः[२५] सम्बद्धस्यान्यत्र सतोऽपि प्रीतिपात्रतौचित्यादिति केचित्।।४७।।

हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्।।

हरत्यघमिति। माघे नारदं प्रति श्रीकृष्णस्योक्तिरियम्। भवदीयस्य भवत्सम्बन्धिनो यस्य कस्यापि किं पुनर्भवतः दर्शनं कर्तृशरीरभाजां शरीरधारिणां मादृशां कालत्रितयेऽपि वर्तमानादिकालत्रयेऽपि योग्यतामर्थादिष्टलाभस्य तत्सम्पादकगुणवत्त्वरूपां व्यनक्ति। सूचयतीत्यर्थः। कथमित्याकांक्षायामाह-हरतीत्यादि। यतः सम्प्रति वर्तमानकाले अघं पापं हरति नाशयति एष्यतः आगमिष्यतः शुभस्य श्रेयःसाधनस्य हेतुः सम्पादकं दर्शनस्यादृष्टद्वारा श्रेयःसाधनत्वाददृष्टस्य च दृष्टसामग्रीसम्पादकत्वेनैव हेतुत्वात्। पूर्वमाचरितैः पूर्वजन्मार्जितैः शुभैः सुकृतैः कृतं जनितं तथा च वर्तमानकाले[२६] पापनाशरूपा योग्यता, प्रतिबन्धकाभावत्वेन श्रेयःसाधनत्वम्। भाविनि तु श्रेयः साधकादृष्टसम्पत्तिः। भूते तु तथाविधं सुकृतमिति। सूचनं चाद्ययोर्जनकतया अन्त्यायास्तु जन्यतयेति बोध्यम्। चक्रवर्त्तिनस्तु न योग्यतां पुण्यवतामिति व्याचक्रुः। तन्नातिसमीचीनम्। वर्तमानकाले तदसम्भवात्। पापनाशस्य पुण्यरूपत्वात्। दर्शनस्य साक्षादेव पापनाशकत्वेन तज्जनकस्य दर्शनजन्यादृष्टस्याप्यभावात्। भाविशुभहेतुभूतदर्शनजन्यादृष्टदृष्टवत्तया प्रकारान्तरेण वा तदङ्गीकारे च हरत्यघं सम्प्रतीत्यस्य तदप्रतिपादकत्वेनासङ्गतत्वापत्तेरिति[२७]।।४८।।

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मा संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।
नो यावत्परिरभ्य चाटुकशतैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः।।

जाने इति। वियुक्तस्य सखायं प्रतीयमुक्तिः। हे भ्रातः! अद्य मया स्वप्ने प्रियतमा कोपेन पराङ्गमुखी सती पाणिना हस्तेन मा मा संस्पृशेत्युक्त्वा रुदती रोदनं कुर्वती गन्तुं प्रवृत्ता दृष्टा। ततः तादृग्दर्शनोत्तरमहं यावत् प्रिया परिरभ्यालिंग्य चाटुकानां प्रियवाक्यानां[२८] शतैर्नाश्वासयामि। अनुनयामि तावत् जाने निश्चिनोमि। शठेन वञ्चकेन विधिना दैवेन निद्रया दरिद्रः रहितः निद्रादरिद्रः, अतएवातथाभूतोऽपि तथा कृतः। अत एव विधिः दुर्घटविधायकः। जाने शठेनेत्यनेन निर्णीतापकारित्वेनासूयाप्रकर्षः। नो यावदिति लोकोक्तिः। नोऽस्माकं प्रियेति वा सम्बन्धः। अन्ये तु जाने स्मरामि। स्मृत्वैव कथयामि। तत्त्वाहार्यम्। मा मा संस्पृशेति पणिना सूचयित्वेति शेषः। कोपेन भाषणत्यागात्। रुदती दृष्टा ततो गन्तुं

२५. 'श्री चक्रधरौ विजयते तमाम्' इति 'क' मातृकायां अधिकम्।
२६. 'काले' स्थाने 'कलि' 'क' मातृकायाम्।
२७. 'प्रतिपाद' इति 'क' मातृकायां नास्ति।
२८. 'प्रियवाक्यानाम्' इति 'क' मातृकायां नास्ति।

प्रवृत्ता दृष्टेत्यनुषङ्ग इति व्याचक्रुः ।।४९ ।।

स्तुमः कं वामाक्षि, क्षणमपि विना यं न रमसे
विलेभे कः प्राणान्रणमखमुखे यं मृगयसे।
सुलग्ने को जातः शशिमुखि, यमालिङ्गसि बलात्
तपःश्रीः कस्यैषा मदननगरि, ध्यायसि तु यम्॥

स्तुम इति। वारयोषितं प्रति कस्यचित्कामुकस्य चाटूक्तिरियम्। हे वामाक्षि! वामं सुन्दरं जितेन्द्रियाणामपि[२९] वशीकरणाद्विरुद्धं चाक्षि यस्यास्तथाविधे। तं कं पुरुषं स्तुमो यं विना क्षणमपि न रमसे क्रीडसि हृष्यसीति यावत्। तथा यं मृगयसे। अन्विष्यसि कोऽसौ रणः सङ्ग्राम एव मखो यज्ञः त्वत्कर्तृकान्वेषणरूपस्वर्गफलकत्वात्। तस्य मुखे पुरतः प्राणान् विलेभे दत्तवान्। अर्थात् जन्मान्तरे। हे शशिमुखि! चन्द्रानने ! यं बलादालिङ्गसि स कः सुलग्ने शोभनग्रहाधिष्ठिते लग्ने जातः उत्पन्नः। हे मदनस्य नगरि! राजधानि! अत्रैव मदनस्य वैभवात्। यं तु ध्यायसि तस्य कस्यैषा त्वत्कर्तृकध्यानरूपा श्रीस्तपः[३०] सम्पत्तिरित्यर्थः। अत्र शशिमुखीत्यनेन बलादालिङ्गनस्य युक्तता व्यज्यते। शशिनाप्यङ्गीकृतशापपरित्यागात्। नगरीत्वारोपेणानेकविषयकमदनाश्रयत्वसूचनम्। तस्यानेकाश्रयस्वभावत्वात् ।।५० ।।

राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी।
तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः॥

राकेति। सीतामुद्दिश्य रावणस्योक्तिरियम्। सा सीता राकायामखण्डचन्द्रायां पूर्णिमायां[३१] यः सुधाकरश्चन्द्रस्तद्वन्मुखं यस्यास्तथाविधा। एवं तरले चञ्चले आयते दीर्घे अक्षिणी यस्यास्तथाभूता। स्मरमीषत्प्रकाशं यौवनम्। नवयौवनमिति, यावत्। तेन तरङ्गितास्तरङ्गवदुत्तरोत्तराम्भशीला विभ्रमा येषु तथाविधान्यङ्गानि यस्याः सा तथा भूतो निदर्शनक्रमेण मुखादिगतप्रकर्षविभावनम्। तत् तस्मादुक्तसौन्दर्यातिशयेनानुपेक्ष्यत्वात्। किं करोमि तल्लाभायेति शेषः। तया सह मैत्री क्रियतां तत्राह-विदध इति। अत्र यस्यां सीतायां मैत्री कथं केनोपायेन विदधे करोमि। तदुपायोऽपि न प्रतिभातीत्यर्थः। ननु सैव त्वां स्वीकुर्यात्तत्राह-तदिति। तया स्वीकृतिर्ममायमिति बुद्धिविषयीकरणम्। तस्य व्यतिकरे सम्बन्धे उपायो हेतुः क इव। कः सम्भाव्य इत्यर्थः। स्वीकृतिः स्वाधीनीकरणं तस्य व्यतिकरः सदातनत्वरूपं पौनः पुन्यमिति चण्डीदासः। विशिष्टोऽतिकरः अभावस्तस्मिन्सति क उपायः। तथा च तत्स्वीकृतिरेवोपायः नान्य इत्यन्ये। विभ्रमस्येति पाठे तथा विधमास्यं यस्या इत्यर्थः। स्यादिति पाठे क उपायः स्यादित्यन्वयः ।।५१ ।।

---

२९. 'णामपि' इति 'क' मातृकायां नास्ति।

३०. 'श्री' 'क' मातृकायां नास्ति।

३१. 'चन्द्र' स्थाने 'चन्द्रिका' 'क' मातृकायाम्।

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणाऽऽनतिव्यतिकरव्याजेन गोपाय्यते।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साऽऽश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम्॥

तस्या इति। खण्डितायाः स्वनायिकायाः कोपतच्छान्तिवृतान्तं वयस्यं प्रति कथयतो धृष्टनायकस्येमुक्तिः। तस्याः सपत्न्याः असूयातिशयात् नामानिर्देशः। सान्द्रं घनं श्रीखण्डादिविलेपनं यत्र तथाभूतस्य स्तनतटस्य समीपे समस्थानस्य तत्पर्यन्तगामी, अत एव प्रकृष्टो यः श्लेषः परीरम्भस्तेन या मुद्रा स्तनाकारं विलेपनमयं चिन्हं तेनाङ्कितं चिह्नितं तदीयत्वेन ज्ञापितमित्यर्थः। वक्षश्चरणयोरानते प्रणामस्य यो व्यतिकरः सम्बन्धः पौनःपुन्यं वा तद्व्याजेन च्छलेन किं किमिति गोपाय्यते आच्छाद्यते इत्यर्थान्नायिकयोक्ते सति मया क्व तन्मुद्राङ्कनमित्युदार्योक्त्वा तन्मुद्राङ्कनं संप्रमार्तुं विलोपयितुं सा सहसा अप्रसाद्यैव रभसेन त्वरया आश्लिष्टा आलिङ्गिता। तत्सुखवशात् आलिङ्गनानन्दपारवश्यात्तन्व्या तन्मुद्राङ्कितत्वं विस्मृतं चेत्यन्वयः। चकारेणालिङ्गनविस्मृत्योरेककालता द्योत्यते॥५२॥

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत्सुप्त इवेत्यमन्दवलितं ग्रीवं पुनर्वीक्षितः॥

एकस्मिन्निति। अमरूककवेरूक्तिः। एकस्मिन् शयने शय्यायां विपक्षभूता रमणी सपत्नी तस्या नाममात्रस्य ग्रहे ग्रहणे अर्थान्नायकेन कृते सति सद्यस्तत्कालमेव कोपेन पराङ्मुखं यथा स्यात्तथा ग्लपितया खिन्नया मुग्धया स्वस्याधैर्यमजानन्त्या कयाचित् चाटूक्ति प्रियभाषणानि कुर्वन्नपि प्रियतम आवेगात्। कोपसम्भ्रमादवधीरितः अवज्ञातस्तूष्णीमालापरहितः स्थितः प्रसादज्ञानायावहितो न तु निद्रितः। तत्क्षणं तूष्णीं स्थितिसमये सुप्त इव प्रार्थनापराङ्मुखो मा भूदित्यौत्सुक्येनामन्दमतिशयितं वलिता वक्रीकृता ग्रीवा यत्र तद्यथा स्यात्तथा[३२] पुनर्वीक्षितः। वीक्षणानानन्तरं वीक्षितः[३३] बारम्बारमित्यर्थः। आवेशादिति पाठे कोपावेशादित्यर्थः। तत्क्षणादिति पाठे तुष्णींभावक्षणानन्तरमेवेत्यर्थः। ल्यब्लोपे[३४] पञ्चमी। तत्क्षणं प्राप्येति तदतर्थः॥५३॥

उत्सिक्तस्य तपः पराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः।

---

३२. 'स्यात्तथा' इति 'क' मातृकायां बार द्वयम्।

३३. 'वीक्षितः बारम्बारमित्यर्थः। आवेशादितिपाठे कोपावशादित्यर्थः। तत्क्षणादितिपाठे तुष्णीभावक्षणानन्तर' इति 'मूल' मातृकायां अधिकम्।

३४. 'ल्य व्योपे वा' इति मातृकायां पाठः।

वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलयन्

आनन्दी हरिचन्दनेन्दुशिशिरः स्निग्धो रुणद्ध्यन्यतः॥

उत्सिक्तस्येति। सीतामालिङ्गतस्तद्भावयतो वा रामस्य भार्गवागमे परामर्शोऽयम्। तपश्च पराक्रमश्च तयोर्निधेः स्थानभूतस्य। धर्मयुद्धोभयवीरस्येत्यर्थः। अतएवोत्सिक्तस्य ख्यातस्य दृप्तस्य वा। अर्थात्परशुरामस्य सङ्गे प्रियता प्रेम च वीरस्य रभसो हर्षस्तस्योत्फाल उद्रेकः। वीरोचितकौतुकोद्रेक इत्यर्थः। स च एतौ द्वावपि मां कर्षतः आकर्षतः[३५]। अत्र चकारद्वयं द्वयोस्तुल्यप्राधान्यसूचनाय। अन्यतः, अन्यस्यां दिशि। एषोऽनुभूयमानो भावनोपनीतो वा वैदेहीपरिरम्भश्च। विदेहो जनकः स एव विगतदेहः कामस्तस्य पुत्री विजये सहायत्वात्तस्याः परिरम्भ आश्लेषश्च मां रुणद्धि। मुनिपार्श्वगमने प्रतिबध्नातीत्यर्थः। चकारः पूर्वोक्ताभ्यां तुल्यत्वस्य तुल्यकालत्वस्य च सन्धिरूपस्य सूचनाय। एकस्य परिरम्भस्य सत्सङ्गप्रेमोत्साहाभ्यां तुल्यत्वसम्पादकं विशेषणमाह-मुहुरित्यादि। मुहुर्बारम्बारं चैतन्यं वा ज्ञानमामीलयन्विषयान्तराद्या वर्तयन्। हरिचन्दनं चन्दनभेदः इन्दुश्च तद्वत्। शिशिरः शीतलश्चासौ स्निग्धः प्रेमसम्बलितः। अतएव रुणद्धीति युक्तम्। स्निग्धेनयुद्धनिवर्तनात्। स्पर्शः इति पाठे तथाविधः स्पर्शो यत्रेत्यर्थः। अत एवानन्दी, आनन्दजनकः। अत्र मुनावत्यादरणीयत्वज्ञानजन्यत्वराविशेषः। पूर्वार्द्धगम्यः, हर्षस्तूत्तरार्धगम्य इति॥५४॥

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा

दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम्।

किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा

चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति॥

क्वाकार्यमिति। शुक्रकन्यां देवायानीं दृष्टवतो राज्ञो ययातेरियमुक्तिः। अकार्यं ब्राह्मणकन्यायामासक्तिरूपं क्व, शशो लक्ष्म चिह्नं यस्य चन्द्रस्य कुलं च क्व। क्वद्वयेन सहानवस्थानप्रतिपादनेनात्यन्तानौचित्यं प्रकाश्यते। भूयोऽपीत्युक्तवितर्कोपमर्देनौत्सुक्यम्। अपिना असम्भावनोत्कटता सूच्यते। नोऽस्माकं श्रुतं शास्त्रश्रवणं दोषाणां प्रमादावेशादीनां[३६] प्रशमायात्यन्तिकनाशायेति मत्यौत्सुक्यबाधः। अहो! आश्चर्यं कोपेऽपि कान्तं मुखं अर्थात्तस्याः कान्तं[३७] कमनीयमिति मतिबाधेन स्मरणम् अपगतं कल्मषं दुश्चरितं येभ्यस्तादृशाः कृते महात्मभिराचरिते सुचरिते धीर्येषां ते तथाभूताः सत्पुरुषाः किं वक्ष्यन्तीति निन्दाशङ्कया पूर्वोपमर्दः। स्वप्नेऽप्यश्रुतादृष्टघटकेऽपि सा दुर्लभेत्यनेनाभि मताप्राप्तिप्रयुक्तदैन्येना-शङ्कातिरस्कारः। हे चेतः! स्वास्थ्यमुपैहि उपगच्छेत्यनेन धैर्यं पूर्वस्माद्बलवत्। कः खलु धन्यः नाहमिव मन्दभाग्यो युवा तरुणोऽधरं धास्यति पास्यतीति चिन्ता सर्वोपमर्दिकेति

---

३५. 'आकर्षत' इति 'क' मातृकायां नास्ति।

३६. 'प्रमादा वेशादीनां' इति मातृकायां नास्ति।

३७. 'कान्तं' इति मातृकायां नास्ति।

शृङ्गारे विश्रान्तिरित्यवधेयम् ॥५५॥

उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जठरोर्जितगर्जितेन।
निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥

उल्लास्येति। अत्र वाच्यपक्षे येन प्रकृतेन देवेन नृपतिना जरठं कठोरं उर्जितं बलवत् गर्जितं सिंहनादो यस्य तथाविधेन। कालो वैरिसंहर्त्ता करवालः खड्गः तत्र यन्महदम्बुधाराजलं तस्य वाहः प्रवाहः प्रसरणमुल्लास्यं तीक्ष्णीकृत्य धाराजलैः खड्गधाराकान्त्या खड्गरत्नादि-कान्तौपानीयादिपदप्रयोगात्। रिपूणां शत्रूणां त्रिजगति त्रिभुवने ज्वलित : विख्यात : सकल एव प्रतापः शौर्यख्यातिरूपो रणे सङ्ग्रामे निर्वापितः विलोपित इत्यर्थः। महदम्बु धाराजलम्। मह उत्सव एवाम्बु वा वहतीति तथा कालकरवालः कृष्णायसखड्गश्चासौ स चेति कर्मधारयः। तमुल्लास्य निपातनायोद्यम्येति वार्थः। सकल इति सप्तम्यन्तं रणविशेषणमिति केचित्। व्यङ्ग्यपक्षे तु येन देवेन मेघाधिपतिना इन्द्रेण कालकरं कृष्णारश्मिं बालं नवीनम्। वरयोरभेदात्। महाम्बुवाहं मेघमुल्लास्य प्रकाश्य रणे तेजो विषयजलकोलाहले सति। धारा कृतिभिर्जलैस्त्रिभुवने रिपूणां अर्थाज्जलशत्रूणां तेजसां सकलः प्रकृष्टः तापः औष्ण्यं निर्वापितः शमितः। कीदृशेन देवेन जरठोर्जितगर्जितेन। तत्प्रयोज्यमेघगर्जितस्यैव तदीयत्वात्। उपलक्षणार्थकतृतीयाङ्गीकारेण गर्जितेनोपलक्षितं मेघमुल्लास्येति वार्थः। चक्रवर्त्तिनस्तु महाम्बुवाहमिव कालं करवालमिव च महाम्बुवाहमिति पक्षद्वये क्रमेण एवमिति समासाङ्गीकारेणार्थः। एवं 'धाराजलैरित्यत्रापि[३८] जलैरिव धाराभिरिति राजपक्षे। तथा व्यङ्ग्यपक्षे ज्वलित उर्ध्वशिखः प्रकृष्टस्तापो यस्यार्थात् शत्रूणामस्त्राग्निरिति विशेषमाहुः। तत्र कालकरवालेत्यादेः परिवृत्तिसहत्वे न तदंशे शब्दशक्तिमूलत्वानुपपत्तिः। कालकरवाल एव महाम्बुवाहो मेघ इति रूपकं त्वसङ्गतमेव। तथा सत्युत्तरपदार्थस्य मेघस्य प्राधान्यप्रत्ययात्तदुदल्लासकत्वस्य राज्ञीं द्वारोपमं विना सङ्गतत्वापत्तेः। एतदर्थं तदव्यङ्ग्यत्वाङ्गीकारे तस्य वाच्यसिध्यङ्गत्वेन ध्वनित्वानुपपत्तेः। उपमायास्तु नान्तरोपमासाधकत्वम्[३९]। नृपे इन्द्र साम्यावगतावपि खड्गे मेघसादृश्यस्य समान-धर्मसाकाङ्क्षत्वादिन्द्रसदृशोल्लास्यत्वस्य मेघावृत्तित्वेन समानधर्मत्वाभावादिति विशेषः। किञ्च नानार्थशब्दोपनिबन्धेन प्रतीयमानेऽर्थे[४०] तात्पर्यग्रहात्। वाक्यभेदपरिहाराय तेनैकवाक्यताकल्पनेऽपि वर्णनीयस्य राज्ञः प्राधान्यमितरस्य गुणीभाव इत्युचितं[४१] न तु वर्णनीयस्य गुणत्वम्। एवं च रूपके राजैव महेन्द्र इत्युत्तरपदार्थस्याप्रकृतस्य प्राधान्ये तद्गतरतेरेव व्यङ्ग्यत्वापत्त्याऽसम्बद्धार्थाभिधायकत्वप्रसङ्गः। उपमायां प्रकृतप्राधान्यलाभान्न तथेति तस्या एव व्यङ्ग्यत्वं युक्तम्। तदेतदुक्तम्असम्बद्धार्थाभिधायकत्वं मा

---

३८. 'धराजलैरित्यत्रापि इति 'क' मातृकायां नास्ति।

३९. 'नन्तरोपमा' स्थाने 'क' 'नेतरोपमा' मातृकायां नास्ति।

४०. 'प्रतीयमानेऽर्थे' स्थाने प्रतीयवमानार्थो 'ख' मातृकायाम्।

४१. 'गुणीभाव' स्थाने 'गुणभाव' 'ख' मातृकायाम्।

प्रसांक्षीदित्यादीति दिक् ।।५६ ।।

तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो, मधुरलीलः।

मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान्।।

तिग्मेति। हे विभो! प्रभो भवान् विभाति शोभते इत्यन्वयः। कीदृशः। तिग्मस्तीक्ष्णश्चासौ रुचिरः मनोज्ञः शत्रुमित्रपक्षयोः प्रतापो यस्य सः। खलसुजनयोस्तिग्मरुचिरः प्रतापो दण्डादिजनितं तेजो यस्येति दीपिकायाम्। विधुराणां शत्रूणां निशेव निशा मरणं करोतीति। तथा मधुरा मनोज्ञा लीला चेष्टा यस्य सः। मतिः शास्त्रतत्त्वज्ञानम्। मानसचित्तसमुन्न-तिस्तयोस्तत्त्वेन सारेण वृत्तिर्वर्त्तनं यस्य सः। तयोस्तत्त्वेन[४२] यथार्थ्येन वृत्तिर्यत्रेति चक्रवर्ती। प्रतिपदं पक्षाणां सहायानामग्रणीरग्रेसरः[४३]। अत्र तिग्मरुचिः सूर्योऽप्रतापः अनुष्णः। विधुः चन्द्रो न निशाकृत्, रात्रिकृत् मधुर्वसन्तोऽलीलः। क्रीडाशून्यः। मतिमान् प्रशस्तबुद्धिः। अतत्त्वे अवस्तुभूते वृत्तिर्व्यवसायो यस्य तादृशः। प्रतिपत्तिथिः अपक्षाग्रणीः। पक्षादिभूता नेति। विरोधाभासो व्यङ्ग्यः। द्वितीयार्थस्या[४४]प्रकृतत्वात् ।।५७ ।।

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद, प्रभो।

अहितः सहितः साधुयशोभिरसतामसि।।

अमित इति। हर्षं शत्रुमित्रयोर्द्यति खण्डयति ददाति चेति तथा भूतः हे प्रभो! त्वं समितः सङ्ग्रामात्प्राप्तैरुत्कर्षैरमितोऽपरिच्छिन्नः। असतां खलानां हितः दण्डकृत्। अतएव साधुभिरुत्कृष्टैर्यशोभिः सहितो युक्तोऽसीत्यन्वयः। साध्विति क्रियाविशेषणं वा। यद्वा अमित इति पञ्चम्यन्तं सङ्ग्रामविशेषणम्। उत्कर्षैर्हर्षदेति चान्वयः। अत्र मितं मानं तद्रहितस्तत्सहितश्च। तथा हितशून्यो, हितसहितश्चेति विरोधो व्यङ्ग्यः अप्रकृतत्वादिति ।।५८ ।।

निरुपादानसम्भारमभित्तावेव तन्वते।

जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने।।

निरुपादानेति। तस्मै शूलिने महादेवाय नम इत्यन्वयः। कीदृशाय निर्गत उपादानसम्भार उपकरणसम्पत्तिर्यत्र तद्यथा स्यात्तथा। अभित्तौ अनाधारे शून्य इति यावत्। चित्रं नानाकारं जगत् तन्वते विस्तारयते। यद्यपि उपादानसम्भारं विना न सृष्टिसम्भवस्तथाप्युपकरणसम्पत्तेरपि भगवदिच्छायतत्वेन तत्पारवश्याभावे तन्निरपेक्षत्वमुपचरितं बोध्यम्। एवं कलया चन्द्रषोडशांशरूपया श्लाघ्यायेति प्रकृतोऽर्थः। व्यञ्जनया तु चित्रकलाशब्दाभ्यामा-लेख्यतत्प्रावीण्योपस्थित्या मसीतूलिकाद्युपादानैर्भित्तावालेख्यकारादिभ्यः कलावद्भ्यः उत्कर्षः प्रतीयते ।।५९ ।।

---

४२. 'तत्वेन' स्थाने 'तत्वेन' क ' मातृकायाम्।

४३. 'अग्रेसरः' स्थाने 'अग्रसरः' 'ख' मातृकायाम्।

४४. 'द्वितीयार्थस्या' स्थाने द्वितीयार्थस्य 'ख' मातृकायाम्।

स्वयं दूती। द्वयर्थैः पदैः पिशुनयेच्च रहस्यवस्तु इति कामशास्त्रस्थितिमनुसृत्य पथिकं प्रत्याह।

पथिक, नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे।
उन्नतपयोधरं प्रेक्ष्य यदि वससि तदा बस ॥ इति संस्कृतम्॥

पन्थि अणेति। हे पथिक! प्रस्तराणां पाषाणानां स्थलेऽत्रास्मिन् ग्रामे मनाक् अल्पमपि स्रस्तरं कटाद्यास्तरणं नास्तीत्यन्वयः। पाषाणबाहुल्येन तृणदुर्लभतासूचनम्। तत्तस्माच्छयन-सामग्र्यभावात्कारणात् उन्नतं पयोधरं मेघं प्रेक्ष्य तत्प्रतिबन्धाद्यदि वससि तदा वसेत्यापाततोऽभिप्रायः। व्यङ्ग्यार्थस्तु-प्रस्तराणां मूर्खाणां स्थानेऽत्र ग्रामे सत्थरं कामशास्त्रं मनागपि नास्ति। ततश्चेङ्गिताभिज्ञविरहात् उन्नतं स्तनं प्रेक्ष्यं मेघं चोद्दीपकम्। यद्युपभोगक्षमोऽसि ददास्व तदास्वेति प्रस्तरस्थले इत्यनेन शय्यापेक्षापि नास्तीति ध्वन्यते। अत्र सर्वत्र शब्दशक्तिमूलत्वं परिवृत्त्यसहनानार्थशब्दप्रयोगादवसेयम्॥६०॥

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र, यस्मै त्वम्।
यस्मै प्रसीदसि पुनः स भात्युदारोऽनुदारश्च॥

शनिरिति। हे नरेन्द्र! यस्मै त्वं कुप्यसि तं शनिः ग्रह अशनिर्वज्रं चोच्चैरतिशयेन निहन्ति। यत्र पुनः प्रसीदसि। पुनः शब्दस्त्वर्थे। यत्पुरुषविषयेत्वित्यर्थः। स पुरुष उदारो दाता महान्वा अनुगता दारा यस्य प्रवासाद्यभावात्। स तथाभूतश्च भातीत्यर्थः। अत्र पूर्वार्द्धेऽशनिपदाद्विरुद्धार्थकथन[४५] समभिव्याहारेणाप्रकृतस्य शनिविरुद्धरुपस्यावगतौ[४६] विरुद्धौ द्वावपीत्याद्युक्तवस्तुध्वनिः। न तूत्तरार्द्धेऽपि। तत्रैककार्यकरणाप्रतीतेः। किं तूदारोऽनुदारस्तु। तद्भिन्नः इत्येवं विरोधालङ्कारध्वनिरेव। चकारस्य समुच्चयार्थत्वात्। अप्यर्थत्वे[४७] तु विरोधस्य वाच्यतैवेति। न च पूर्वार्द्धेऽपि विरोधस्य व्यङ्ग्यत्ववाच्यत्वयोरूयतराशङ्का। एकधर्मिगतत्वेन विरुद्धनिर्देश एव तत्स्वीकारात्। अत एव विरोधालङ्कारद्वारा व्यङ्ग्यवस्तूदाहरतीत्यवतारणमनादेयम्। यत्तु शनिरशनिश्चेत्यत्र समानाधिकरण्याभावे न विरोधस्यावाच्यत्वेऽपि व्यञ्जनया विरोधलाभात्तत्र उदारोनुदारश्चेत्यत्र च सालङ्कार-वस्तुध्वनिः। न चैवं वस्त्वेवेति कारिकाविरोधः। राजोत्कर्षकतया वस्तुन एव प्रधानत्वेनाविरोधादिति कैश्चिदुक्तम्, तदयुक्तम्, भिन्नविषयत्वे विरोधाप्रतीतेः। एक विषयत्वे एव तिग्मरुचिरप्रताप इत्यादौ विरोधवाचकाप्यादिसत्त्वासत्त्वाभ्यां विरोधस्य वाच्यत्वव्यङ्ग्यत्वयोर्व्यवस्थितेः। एतदेव प्रदीपकृतोक्तं वस्तु ध्वन्यते न तु विरोधालङ्कार इत्यादिना। उदारोऽनुदार इत्यत्र तु नोक्तवस्तुरूपव्यङ्ग्यप्रतीतिरित्युक्तमेव। तस्मात्पूर्वोदाहरणे रहस्यगोपनमात्रार्थं वाच्यार्थोपादानम्, न तु तत्र विश्रान्तिः। इह तु वाच्यार्थे विश्रान्तिरित्यादेरुदाहरणवैलक्षण्यस्य सम्भवात् तदर्थं कुसृष्टिकल्पना युक्तेति ध्येयम्॥६१॥

---

४५. 'पदाद' इति 'क' मातृकायां नास्ति।
४६. 'रुपस्यर्थस्या' इति 'ख' मातृकायां पाठः।
४७. 'प्यर्थत्वेतु' इत्यारभ्य तथा व्यंगस्य इति यावत् 'ख' मातृकायां नास्ति।

अलसशिरोमणिर्धूर्त्तानामग्रणी:[४८] पुत्रिधनसमृद्धिमय:।

इति भणितेन नताङ्गी प्रोत्फुल्लविलोचना जातेति संस्कृतम्।

अलसेति। जम्पि ए इति पाठे जल्पिते इति। पतिवरां प्रति धात्र्या: प्ररोचनोक्ति: पूर्वार्द्धम्। उत्तरार्द्धं तु कवे:। प्रकरणाच्चायमित्यध्याहार:। हे पुत्रि! अयं वर:। अलसानां निरुद्योगानां शिरोमणि: श्रेष्ठ:। धूर्तानामग्रिम:। अग्रगण्य:। धनसमृद्धिप्रचुर:। इति भणितेन भाषणेन नताङ्गी काचित् कुमारी प्रफुल्ले हर्षविकसिते विलोचने यस्यास्तादृशी जातेत्यन्वय:। अत्रालसत्वेन नायिकान्तरागमनम्। धूर्त्तत्वेन रतेष्वनादृतगुणत्वं धनिकत्वेन कृपणतया अदातृत्वं स सूचितं सत् अन्यासामनाकर्षणीयो ममैवोपभोग्य इति नायिकायां व्यनक्ति। तादृशं च कुमार्या ज्ञानं प्रफुल्लनयनत्वेन वस्तुना स्वहेतुहर्षव्यञ्जनद्वारेण तत्कारणीभूतं सामाजिकेषु व्यज्यते। अन्ये तु अलसत्वेनाप्रवासित्वं धूर्त्तत्वेन विदग्धत्वं, धनिकत्वेन सुखित्वं नताङ्गित्वेन नमस्कार:। प्रफुल्लनयनत्वेन हर्षश्च व्यज्यते। ततश्च ममैवोपभोग्यो नाविदग्धाया इति वस्तुव्यञ्जनमित्याहु: ॥६२॥

धन्याऽसि या कथयसि प्रियसङ्गमेपि
विस्रब्धचाटुकशतानि रतान्तरेषु।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्य:, शपामि यदि किञ्चिदपि स्मरामि।।

धन्यासीति। रसकथापरासु सखीषु मध्ये रतिकालीनं स्वप्रियालापं कथितवतीं काञ्चित् प्रहसन्त्या: कस्याश्चिदुक्तिरियम्। हे सखि! या त्वं रतान्तरेषु रतमध्येषु प्रियेण संगमेऽपि सुरतयोगेऽपि विस्रब्धं विश्वासयुक्तं नि:शङ्कमिति यावत्। चाटुकानां प्रियवचनानां शतानि कथयसि, सा त्वं धन्यासीति सोल्लुण्ठम्। हे सख्य:! प्रियेण नीवीं वस्त्रग्रन्थिं प्रति करे प्रणिहिते नीव्यां करोऽर्पयितव्य इति प्रणिधानस्य संकल्पस्य विषयीकृते सति न त्वर्पिते। अवाचकत्वापत्ते:। यदि किञ्चिदपि स्मरामि तदा शपामि शपथं करोमीत्यन्वय:। यद्यपि 'शपथे शपे:' इत्यनुशासनादात्मनेपदमुचितम्। तथाप्यङ्गस्पर्शपूर्वकमिथ्यात्वनिरासस्य मुख्यशपथस्यात्राविवक्षितत्वान्न दोष:। प्रियसङ्गमेष्वालापादिषु। तत्रापि रतमध्येषु न पुनरादावन्ते वेति वार्थ:। यदि किञ्चिदपि स्मरामीति वाक्यमध्ये सख्य: शपामीत्यस्य[४९] प्रवेशात्। गर्भितत्वं[५०] प्रकृते गुण एव। विवक्षितार्थस्य सत्यत्वप्रत्यायनात्। सोल्लुण्ठोक्तावेकस्या एव सौभाग्यगर्विताया: सम्बोध्यत्वाद्धन्यासीत्येकवचनम्। स्वोत्कर्षसूचने तु बह्वीनां तथात्वात्सख्य इति बहुवचनमिति नासङ्गति:। अत्र च सुरतकालेऽपि[५१] विषयान्तरवेदनेन

---

४८. 'अग्रणी' स्थाने अग्रिम: 'क' मातृकायाम्।

४९. 'शर्मित्वं' स्थाने 'उर्मित्वं' क मातृकायाम्

५०. ''शमित्वं तू'' इति 'ख' मातृकायां पाठ:।

५१. 'सुरत' स्थान रते इति 'क' मातृकायाम्।

रागस्य कृत्रिमतामावेदयता चाटुकथनेन त्वमधन्येति ध्वन्यते। अपिशब्दाभ्यामत्यन्तानौचित्य[५२] प्रकाशनद्वारा तदतिशयः। एवं च बहुवचनस्य प्रतिरतिसमयं तथा भावसूचनद्वारा तद्व्यञ्जकत्वम्। एवं शतानीति प्रातिपदिकवचनयोश्चेति। तथोत्तरार्द्धे स्मरणाभावेन प्रियकरस्पर्शमात्रेण सम्मोहानन्दमन्थरतया अकृतिमरागातिशयं सूचयताहं धन्येति व्यज्यते। इत्थञ्चोभयसम्बलनेन व्यतिरेकालङ्कारलाभ इति बोध्यम्॥६३॥

दर्पान्धगन्धगजकुम्भकपाटकूट-
संक्रान्तिनिघ्नघनशोणितशोणशोचिः।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपाणः॥

दर्पान्धेति। यस्य राज्ञः करे कृपाणः खड्गो युधि युद्धे वीरैः कालीकटाक्ष इव व्यलोकि दृष्टः। कीदृशः। दर्पेण मदेनान्धस्य गन्धगजस्य यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः[५३]। तं गन्धहस्तिनं विद्यान्नृपतेर्विजयावहमित्युक्तलक्षणस्य कुम्भ एव विशालतया तन्मध्यभाग एव कपाटं तस्य कूटेऽग्रभागे या संक्रान्तिः प्रवेशस्तस्य निघ्नमधीनं, तेन वा निघ्नं दृढसम्बद्धं घनं निबिडं यच्छोणितम्, तेन शोणा रक्ता शोचिर्दीप्तिर्यस्य तादृशः कटाक्षः। कोपेन कषाया लोहिता कान्तिर्यस्य तथाभूतः। अत्र साम्यावगमानन्तरं[५४] सकलेत्यादि वस्तु व्यक्तीभवति। तेन स्वतः[५५] सम्भविनोपमालङ्कारेण वस्तुध्वनिः॥६४॥

गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधि रुषा निजाधरम्॥

गाढेति। यो राजा युधि युद्धे रुषा क्रोधेन निजाधरं स्वाधरोष्ठं निर्दशन्। अरीणां शत्रूणां वधूजनस्य स्त्रीजनस्यौष्ठरूपाणि विद्रुमदलानि विद्रुमस्य नवपल्लवस्य पत्राणि प्रवालपत्राणि वा। गाढस्य कान्तदशनक्षतस्य कान्तदन्तव्रणस्य[५६] व्यथा पीडा तद्रूपात् संकटादमोचयत्। मोचितवान्। क्रोधाद्वैरीवधे तद्वधूनां रतिक्रीडाविरहाद्दन्तक्षतं न भवतीत्यर्थः। अत्र निर्दशन्निति वर्तमाननिर्देशादधरदशनमोचनयोः[५७] कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिः। इयमेव वृत्तौ विरोधपदेनोक्ता, तन्मूलत्वादिति॥६५॥

कैलासस्य प्रथमशिखरे वेणुसम्मूर्च्छनाभिः
श्रुत्वा कीर्तिं विबुधरमणीगीयमानां यदीयाम्।

---

५२. 'अपि' स्थाने 'अन्तरापि' इति 'ख' मातृकायाम्।
५३. 'प्रतिद्विपाः' स्थाने' द्विपाः' 'क' मातृकायाम्।
५४. 'उपगतं' इति 'क' मातृकायां पाठः।
५५. 'तेन स्वतः सम्भविनोपमालङ्कारेण वस्तु ध्वनिः' इति 'क' एवं 'ख' मातृकायां नास्ति।
५६. 'जणस्य' इति 'क' मातृकायां पाठः।
५७. 'दशनमोचनयोः कार्यकारणयोः' पौर्वा पर्यविपर्ययरुपातिशयोक्तिः। इयमेव वृत्तौविरोध इति 'क' मातृकायां नास्ति।

स्रस्तापाङ्गाः सरसबिसिनीकाण्डसञ्जातशङ्काः

दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्त्तयन्ति ॥

कैलासेति। कैलासस्य प्रथमशिखरे[५८] वेणुसम्मूर्च्छनाभिर्वेणूत्थापितरागैः[५९]।

स्वरः सम्मूर्च्छितो यत्र रागतां प्रतिपद्यते।

मूर्च्छनामिति तां प्राहुर्गीततत्त्वविदो जनाः॥

इत्युक्तेः। विबुधानां देवानां रमणीभिरप्सरोभिर्गीयमानां यदीयां यस्य प्रकृतस्य राज्ञः सम्बन्धिनीं कीर्तिं श्रुत्वा सरसस्य स्निग्धस्य विसिन्याः कमलिन्याः काण्डस्य मृणालस्य संजाता शङ्का सन्देहो भ्रान्तिर्वा येषामेवम्भूताः[६०] तथा स्रस्तास्तिर्यग्भूता अपाङ्गा नेत्रस्य प्रान्ता येषां तथाभूताश्च दिङ्मातङ्गा दिग्गजाः श्रवणयोः कर्णयोः[६१] सरोरूपयोः[६२] पुलिन इव समीपदेशे हस्तं शुण्डा दण्डमावर्तयन्ति चालयन्ति आहर्तुमिति शेषः। प्रथमे मुख्ये सर्वोच्च इत्यर्थः इति केचित्, धवलत्वस्य श्रोत्राग्राह्यत्वात्स्रस्तापाङ्गा इति। पुलिन इत्यनेन श्रवणयोः सरस्त्वाध्यासान्मृणालत्वभ्रमौचित्यं व्यज्यते। केचित्तु श्रवणपुलिने इति रूपकम्। पुलिनेऽपि विससम्भवादित्याहुः। अत्र कविप्रौढोक्तिसिद्धेन[६४] वस्तुना जडानामप्येवंविध-बुद्धिजननेन चमत्करोति भवत्कीर्त्तिरिति वस्तु ध्वन्यते। कीर्तिश्चैत्यादेर्लोकसिद्धत्वाभावात्क-विप्रौढोक्तिसिद्धत्वं बोध्यम्, एवमग्रेऽपि। ॥६६॥

केशेषु बलात्कारेण तेन समरे जयश्रीर्गृहीता।

यथा कन्दराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिताः॥ इति संस्कृतम्।

केशेष्विति। बलामोडिशब्दो बलात्कारे देशी। जयश्रीरित्यनन्तरं तथेति पूरणीयम्। तेन राज्ञा समरे युद्धे जयश्रीर्जयलक्ष्मीर्बलात्कारेण[६५] केशेषु तथा गृहीता। यथा कन्दराभिर्गुहाभिस्तस्य राज्ञो विधुराः शत्रवो दृढं कण्ठे स्वसन्निवेशे संस्थापिता इत्यन्वयः। तेन पराजिताः शत्रवः पलाय्य[६६] गुहास्वेव तिष्ठन्तीति तात्पर्यार्थः। अत्र[६७]

---

५८. 'मूलशिखरे' इति पदं 'क' 'ख' मातृकायामधिकम्।

५९. त्थापितरागेः 'स्थाने' त्थापितरो 'क' मातृकायाम्।

६०. 'येषामेवम्भूताः तथा स्रस्तास्तिर्यक्भूता अपाङ्गानेत्रस्य प्रान्ता' इति 'क' मातृकायां नास्ति।

६१. 'कर्णयोः' इति पदं 'क' मातृकायां बार द्वयं पठितम्।

६२. 'सरोरुपयोः' इति 'क' मातृकायां नास्ति।

६३. 'दण्डं इति' 'क' मातृकायां नास्ति।

६४. 'अत्र कविप्रौढोक्तिसिद्धेन वस्तुना जड़ानामप्येवंविध बुद्धिजननेन चमत्करोतिभवत्कीर्ति रिति वस्तु ध्वन्यते। कीर्तिश्चैत्यादेर्लोकसिद्धत्वाभावात्कवि प्रौढोक्ति सिद्धत्वं बोध्यम्, एवमग्रेऽपि' इति 'क' मातृकायां नास्ति।

६५. 'जयश्री' इति 'क' मातृकायां बार द्वयं पठितम्।

६६. 'पलाय्य' स्थाने 'यत्राप्य' 'क' मातृकयाम्।

६७. "अत्र कविप्रौढ़ोक्तिसिद्धेनोक्तवाक्यार्थरूपवस्तुना केश ग्रहणावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान्कण्ठे गृह्णन्तीत्युत्प्रेक्षाध्वनिः" इति 'क' एवं 'ख' मातृकायां नास्ति।

कविप्रौढोक्तिसिद्धेनोक्तवाक्यार्थरूपवस्तुना केशग्रहणावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान्कण्ठे गृह्णन्तीत्युत्प्रेक्षाध्वनिः ॥६७॥

गाढालिङ्गनाय[६८] रभसोद्यते दयिते[६९] लघु समपसरति।

मनस्विन्या मानः पीडनभीरूरिव[७०] हृदयादिति ॥संस्कृतम्॥

गोढेति। गाढालिङ्गनाय रभसेन हर्षेण वेगेन वा दयिते प्रिये उद्यते[७१] सति मनस्विन्या मानः पीडनाद्भीरुर्भयशील इव हृदयाल्लघु शीघ्रं सम्यक् निःशेषतोऽपसरतीत्यन्वयः। मनस्विन्या हृदयादिति वा सम्बन्धः। भीदाद्येति पाठे भीत इवेत्यर्थः। अत्रोभयोत्प्रेक्षयैव प्रत्यालिङ्गनहसितादिसम्भोगविजृम्भणाभिव्यक्तिभिर्न तु गाढालिङ्गनोद्यते मानोऽपसृत इत्येतावतेति सहृदयसाक्षिकम्। रभसोहर्षवेगयोरिति विश्वः ॥६८॥

या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा।

दर्शयति भुवनमण्डलमन्यदिव जयति सा वाणी॥

जाठेरमिति। वाणी वाग्देवता तदभिन्नत्वेनाध्यवसिता काव्यरूपा वा[७२] कवि वाक् स्थविरं वृद्धम्। अर्थाद् ब्रह्मणं तदीयभुवनान्यत्वप्रदर्शनेन तस्यैवोपहसनीयत्वात्। हसन्तीव। अवैदग्ध्यात्। कवेर्वदनमेवाम्बुरुहं पद्मं तत्र बद्धो रचितो विनिवेशः स्थितिर्यया तादृशी भूत्वा भुवनमण्डलमन्यदिव विलक्षणमिव दर्शयति सा जयति सर्वोत्कर्षेण वर्तत इत्यन्वयः। अत्र वदनेऽम्बुजत्वारोपो ब्रह्मणः पद्मासनत्वेन वाण्या अपि तत्सम्पादनार्थः। अत एव वाणी चात्र कवित्वरूपैव। तस्या एव कविवदनस्थितेरिति महेशोक्तमयुक्तम्। काव्यरूपाया वाचः पद्मासनत्वाप्रसिद्ध्या वदनाम्बुरुहेत्यादेरसङ्गत्यापत्तेः। अधिष्ठात्रधिष्ठानयोरभेदाश्रयणे तु देवता परत्वेऽपि नानुपपत्तिः। प्रत्युत भावध्वनित्वसङ्गतिरेव। प्रयुज्यते च तथोपचारे वा शतशः कवयो वाग्देवीवदनाम्बुजे वसति चेत्को नाम दीनो जन इत्यादीत्यलमसारचिन्तयेति। अत्र च हसन्ती वेत्युत्प्रेक्षया चमत्कारैककारणत्वांशलाभः। कविवदनेत्यादिना अजलजेत्यंशलाभ इति बोध्यम्। वृत्तावुत्प्रेक्षया व्यतिरेक इति[७३] जात्यभिप्रायमेकवचनम्। हसन्तीवान्यदिवेति द्वाभ्यामुत्प्रेक्षाभ्यां ब्रह्मतन्निर्मितिव्यतिरेकयोर्भारतीतन्निर्माणयो-र्व्यञ्जनादिति ॥६९॥

ये लङ्कागिरिमेखलासु स्खलिताः सम्भोगखिन्नोरगी-

स्फारोत्फुल्लफणावली कवलने प्राप्ता दरिद्रत्वम्।

---

६८. 'लिङ्गनाय' 'स्थाने' 'लिङ्गन' 'ख' मातृकायाम्।

६९. 'दयिते' 'ख' मातृकाया नास्ति।

७०. 'रिव' 'ख' मातृकायां नास्ति।

७१. 'उद्यते' स्थाने 'अनुद्यते' 'ख' मातृकायाम्।

७२. 'वा कवि' इति 'क' मातृकायां नास्ति।

७३. "इति जात्यभिप्रायकैकवचनम्। हसन्तीवान्यदिवेति द्वाभ्यामुत्प्रेक्षाभ्यां ब्रह्मतन्निर्मिति" इति 'क' मातृकायां नास्ति।

ते इदानीं मलयानिला विरहिणीनिःश्वाससम्पर्किणो-

जाता झटिति शिशुत्वेऽपि बहलास्तारुण्य पूर्णा इवेति संस्कृतम्।

जे लङ्केति। कर्पूरमञ्जर्याख्ये नाटके कर्पूरमञ्जरीसमाख्याया नायिकाया इयमुक्तिः। मेहलाहिं इति पञ्चम्यन्तपाठे मेखलाया इति। ये वाता लङ्कागिरेः सुवेलस्य मेखलासु नितम्बभागेषु स्खलिताः। स्वभोक्तृसर्पत्रासात्। सम्भोगेन खिन्नानां श्रान्तानामुरगीणां स्फाराभिर्विस्तृताभिरुत्फुल्लाभिरुर्ध्वप्रसृताभिः फणानामावलीभिः पङ्क्तिभिः कवलने ग्रसने सति दरिद्रत्वं क्षीणत्वं प्राप्तास्ते मलयसम्बन्धान्मलयानिला इदानीं विरहिण्या निःश्वाससम्पर्किणो निःश्वासमिश्रिताः सन्तः शिशुत्वेऽपि क्षीणत्वेऽपि बहला बाहुल्ययुक्तास्तारुण्येन पूर्णा इव जाता इति समुदितोऽर्थः। लङ्कासन्निहितो गिरिर्लङ्कागिरिर्मलयः इति चक्रवर्ती। अत्र स्त्रीणामाहारद्वैगुण्येनोरगीति स्त्रीनिर्देशः। फणानां स्फारोत्फुल्लत्वेन श्वासस्य स्थूलत्वं व्यज्यते। अनिलानां सुवेलतो मलयागमने समुद्रलङ्घनाच्छैत्यम् मलयसम्बन्धात्सौगन्ध्यं क्षीणत्वप्राप्त्या मान्द्यं च ध्वन्यते। अत्र[७४] कवि-निबद्धवक्तृप्रौढोक्तिसिद्धत्वेन वस्तुना निःश्वासमात्रेण प्राप्तैश्वर्याः किं किं न कुर्युरिति वस्तु व्यज्यते॥७०॥

सखी विरचय्यमानस्य मम धीरत्वेनाश्वासम्।

प्रियदर्शनविश्रृङ्खलत्वक्षणे सहसेति[७५] तेनापसृतमिति संस्कृतम्॥

सहीति। हे सखि! मम धीरत्वेन धैर्येण मानस्याश्वासं स्थिरो भवेति समाश्वासनं विरचय्य कृत्वा प्रियदर्शनेन विश्रृङ्खले व्याकुले क्षणे स्वव्याकुलत्वस्य क्षणे उपचारात्। कौतुकोत्तरलताक्षणे इत्यन्ये। विह्वलक्षणे इति पाठे। विह्वलत्व क्षणे इत्यर्थः। सहसेति। तेन धैर्येणापसृतं सहसेति सह सैवेत्यर्थमिति चण्डीदासः[७६]। इति शब्दो वाक्यसमापकोऽन्ते योजनीय इत्यन्ये। अत्र[७७] तादृशेन वस्तुना अकृतेऽपि प्रार्थने प्रसन्नेति विभावनालङ्कारो व्यज्यते॥७१॥

आर्द्रार्द्रकरजरदनक्षतैस्तव लोचनयोर्मम दत्तम्।

रक्तांशुकं प्रसादः कोपेन पुनरिमे नाक्रान्ते इति संस्कृतम्।

आल्लोल्लेति। किमिति कुपिते लोचने वहसीति पृच्छन्तं परनायिकानखक्षतादिचिह्न नायकं प्रति नायिकाया उक्तिरियम्। तवेत्यनन्तरमङ्गे इति शेषः। तवाङ्गे

---

७४. अत्र कविनिवद्धवक्तृप्रौढ़ोक्तिसिद्धेन वस्तुना निःश्वासमात्रेण प्राप्तैश्वर्याः किं किं न कुर्युरिति वस्तु व्यज्यते। इति 'क' एवं 'ख' मातृकायां नास्ति।

७५. 'व्याकुले' इति' क एवं 'ख' मातृकायाम् अधिकम्।

७६. 'चण्डीदासः' इति क मातृकायां नास्ति।

७७. 'अत्र तादृशेन वस्तुना अकृतेऽपि प्रार्थने प्रसन्नेति विभावनालङ्कारो व्यज्यते।' इति 'क' एवं 'ख' मातृकायां नास्ति।

आर्द्रार्द्रैरत्यार्द्रैरित्यर्थः। करजानां नखानां दन्तानां च क्षतैः परनायिकाकृतैर्मम लोचनयोः रक्तांशुकं रक्ता अंशव एव रक्तांशुकं रक्तवस्त्रं प्रसादो दत्तः। कोपेन[७८] पुनरिमे लोचने नाक्रान्ते इत्यर्थः। स चायमुक्तरूपस्य नायकप्रश्नस्योन्नामकोत्तररूपत्वादुत्तरालङ्कारो न केवलमार्द्रक्षतानि[७९] गोपायसी यावत्तेषामहं प्रसादपात्रमपि जातेति वस्तुव्यञ्जकः ॥७२॥

महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती।

अनुदिनमनन्यकर्मा अङ्गं तन्वपि तनयति॥ इति संस्कृतम्।

महिलेति। विरहकृशां नायिकां नायकाया[८०]वेदयन्त्याः[८१] सख्या उक्तिरियम्। हे सुभग! सौभाग्ययुक्त! महिलानां स्त्रीणां सहस्रैर्भरिते व्याप्ते तव हृदयेऽमान्ति[८२] अवकाशमलभमाना सा नायिका दिवसमभिव्याप्य नान्यत्कर्म कर्त्तव्यं यस्यास्तथाभूता तनुमप्यङ्गं तनयति[८३] तनूकरोतीत्यर्थः। अत्र सुभगेत्यनेन नायिकाया एवानुरागविषयत्वं नतु सा तवेति ध्वन्यते ॥७३॥

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा।

तारकातरला श्यामा सानन्दं न करोति कम्॥

अतन्द्रेति। अत्र प्रकृता श्यामा रात्रिः कं जनं सानन्दं न करोति, अपितु सर्वमिति सम्बन्धः। कीदृशी न विद्यते तन्द्रा आलस्यं यस्याः सा चातन्द्रा मेघा घनावृत्ततया। स्फुरद्रूपायाश्चन्द्रमा आभरणं भूषणं यस्याः सा तथाभूता। अतएव सम्यग् उद्दीपितो मन्मथो यया सा तादृशी तारका नक्षत्राणि तरलानि चञ्चलानि यस्यां सा तथेति। अत्र व्यञ्जनया श्यामा षोडशवार्षिकत्वादिविशिष्टनायकाविशेषः कं जनं सानन्दं न करोति। कीदृशी। अतन्द्रः अनल्पश्चन्द्रः। कर्पूर आभरणं यस्याः सा तथाभूता। चन्द्रः शिरोभूषणविशेष इति कश्चित्। समुत्। मुदा हर्षेण सहिता। दीपितो दीप्तिं प्रापितो मन्मथो यया। तारका अक्षिकनीनिका तरला यस्याः सा। तथा तारकावत्तरलो हारमध्यमणिर्यस्या इति प्रतीतौ स्त्रीविशेष इव रात्रिरित्युपमाप्रतीतिः। चन्द्रपदस्य परिवृत्त्यसहतया समुद्दीपितेत्यादेश्च तत्सहतयोभयशक्ति–मूलत्वम्॥७४॥

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा।

अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति।।

यस्येति। यस्य पुरुषस्य मित्राणि मित्राणि आश्वस्तानि विश्वासपात्राणि इत्यर्थः।

---

७८. कोपेन पुनरिमे लोचने नाक्रान्ते इत्यर्थः। स चायमुक्तरूपस्य नायक प्रश्नस्योन्नायकोत्तर इति 'क' मातृकायां नास्ति।

७९. न केवल मार्द्रक्षतानि गोपायसी यावत्तेषामहं प्रसादपात्रमपि जातेति वस्तु व्यञ्जकः 'इति' क एवं 'ख' मातृकायां नास्ति।

८०. 'नायकायाः' स्थाने नायिकायाः 'ख' मातृकायाम्।

८१. "यन्त्याः सख्या उक्तिरियम्" इति क मातृकायां नास्ति।

८२. 'अमान्ति' स्थाने अमाङ्गि 'ख' मातृकायाम्।

८३. 'कृशं' 'क' एवं 'ख' मातृकायां अधिकम्।

तथा शत्रवः शत्रवो निःशेषतो यन्त्रणीयाः दमनीया इत्यर्थः। यस्येत्यनुषङ्गः इहोत्तरत्र च बोध्यः। अनुकम्पा दया तद्योग्य अनुकम्प्यश्च स्नेहपात्रञ्च स जातः शोभनजन्मा स एव जीवति श्लाघ्यजीवनवानित्यर्थः। अत्रोक्तार्थान्तरसङ्क्रमितवाच्यैर्मित्रादिशब्दैर्यावज्जीवा-वस्थायित्वरुपतदतिशयव्यञ्जनद्वारा नायकस्य स्थिरप्रकृतित्वं व्यज्यते[८४]। त्वाममीति तु तस्मादत्र सावधानेन भाव्यमिति पदसमुदायरूपवाक्यव्यङ्ग्याभिप्रायमिति भेदः ॥७५॥

खलव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि[८६] धीराणाम्।

हृदयवयस्य बहुमता न खलु व्यवसाया विमुह्यन्ति॥

खलेति। यद्यपि खलानां दुष्टानां व्यवहारा दारुणा इष्टप्रतिबन्धका दृश्यन्ते, तथापि सदर्थग्राहितया हृदयरूपेण वयस्येन मित्रेण बहुमता अनुमोदिताः धीराणां व्यवसाया उद्योगान्न विमुह्यन्ति। न प्रतिबद्धा भवन्तीत्यर्थः। अथवा खलप्रतारणया स्वार्थसाधने न विसम्वदन्तीत्यर्थः अत्रोक्तार्थे लाक्षणिकस्य विमुह्यन्तीत्यस्येष्टकारित्वं व्यङ्ग्यम् ॥७६॥

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः।

तदा सुधास्पदमभूदधुना तु ज्वरो महान्॥

लावण्यमिति। - कस्यचिद्विरहिण उक्तिः। तत् अनुभवैकगोचरं लावण्यं मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा प्रतिभाति यदङ्गेषु तल्लावण्यमितीर्यत इत्युक्तलक्षणम्। कान्तिरुज्ज्वलता असाविति पूर्ववत्। एवमग्रेऽपि रूपम्। संस्थानसौष्ठवम्। वचसः क्रमः परिपाटीः सकलमिदं तदा अनुभवकाले सुधाया अमृतस्यास्पदं स्थानमभूत्। सर्वाङ्गीणसौहित्यसम्पादकत्वादधुना वियोगकाले स्मर्यमाणमिति शेषः। महान् ज्वर इव ज्वरः। सर्वाङ्गीणतापहेतुत्वादित्यर्थः। लावण्यं सर्वावयवगतो विशेषः। प्रत्येकावयवसंस्थानसौभाग्यं कान्तिः। रूपं वर्णविशेष इति चण्डीदासः। अत्र तदादिभिर्विशिष्य वचनानर्हतया लावण्यादिगतलोकोत्तरत्वप्रतिपादनद्वारा विप्रलम्भाभिव्यक्तिः ॥७७॥

मुग्धे, मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरीकुरु प्रेयसि।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति॥

---

८४. 'प्रत्येकं' इति 'ख' मातृकायामधिकम्।

८५. 'तथापि' बार द्वयं 'ख' मातृकायाम्।

८६. 'यद्यपि खलानां दुष्टानां व्यवहारादारुणा इष्टप्रतिबन्धका दृश्यन्ते, तथापि सदर्थग्राहितया हृदयरूपेण वयस्येन मित्रेण बहुमता अनुमोदिताः धीराणां व्यवसाया उद्योगान्न विमुह्यन्ति। न प्रतिबद्धा भवन्तीत्यर्थः। अथवा खलप्रतारणया स्वार्थसाधनेन न विसम्बदन्तीत्यर्थः।' इति 'क' एवं 'ख' मातृकायां बार द्वयम्। अत्रोक्तार्थे लाक्षणिकस्य विमुह्यन्तीत्यस्येष्टकारित्वं।

८७. 'ग्रहणादन' स्थाने' ग्रहादन 'क' मातृकायाम्।

मुग्ध इति। सख्या मानं शिक्षयन्त्या इयमुक्तिः। हे मुग्धे! उपदेशाग्रहणादनभिज्ञे। अखिलोऽतीतो वर्तमानो भविष्यंश्च कालो मुग्धतयैव यथोचितानाचरणेनैव नेतुं यापयितुं किं किमित्यारभ्यते। तर्हि किमाचरितुं युक्तं तत्राह-मानं धत्स्व धारय। धृति धैर्यं बधान्[८८] गृहाण। बन्धनोक्त्याऽनपनेयता ध्वन्यते। [८९]प्रेयसीति प्रियविषये। एतच्च वाक्यचतुष्टयेऽप्यन्वेति। ऋजुतां सरलतां दूरीकुरु। त्यजेत्येवं सख्या प्रतिबोधिता नायिका। भीतं भययुक्तमाननं यस्यास्तथाभूता सती तां प्रतिबोधयन्तीं सखीं प्रति प्रतिवचः प्रत्युत्तरमाहेत्यन्वयः। भयकार्यस्य शोषवैवर्ण्यादेराननगतत्वात्तत्र भीतत्वोपचारः[९०]। नीचैरित्याद्युत्तरम्। हे सखि! नीचैर्मन्दं शंस कथय हि यस्मात् मे मम हृदि हृदये स्थितो विद्यमानः प्राणेश्वरः प्राणानां तदायत्तत्वाज्जीवितसर्वस्वायमानः कान्तः श्रोष्यति। ननु शङ्कायाम्। प्रतिर्वीप्सायाम्। प्रतिबोधिता मुहुर्बोधिता प्रतिवचः[९१] प्रतिकूलं वच इति चक्रवर्ती। वचो[९२] वचः प्रतीति तु न युक्तोऽर्थः। एवं प्रतिबोधितेत्यस्यासङ्गतेः। प्रतिबोध्यमानेति हि तदोचितम्। अत्र नीचैः शंसनविधानस्यानाहार्यत्वरूपयुक्ततां[९३] प्रकाशय भीतानना पदं रागस्याकृत्रिमतया सम्भोगप्रकर्षे पर्यवस्यति। सख्या अपरिहार्यवचनतया च नीचैरिति विधिर्न तु मा शंसेति निषेध इति ज्ञेयम्। पूर्वत्र विप्रलम्भ इह सम्भोग इति भेदः ॥७८॥

रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः।
झटिति भ्रुकुटिविटङ्कितललाटपट्टो विभासि नृपभीम॥

रुधिरेति। हे भीम! भयंकर नृप! त्वं विभासि शोभस इत्यन्वयः। पक्षे भीमो भीमसेनो व्यङ्ग्यः। कीदृशः। रुधिरस्य विसरेण समूहेन प्रसाधितो भूषितः करालो भीषणो यः करवालः खड्गस्तेन रुचिरो मनोज्ञो भुजरूपः परिघोऽर्गला यस्य तादृशः। जयश्रीनिरोध-कत्वादर्गलोक्तिः। मित्रशत्रुभेदेन करालत्वरुचिरत्वे बोध्ये। पुनः कीदृक् झटिति भ्रुकुट्या भ्रूभङ्गेन विटङ्कितस्तदाकाररेखाङ्कितत्वात्सञ्जातविटङ्को ललाटमेव विशालतया पट्टो यस्य सः। कपोतपालिकायां तु विटङ्कः पुन्नपुंसकमित्यमरः। भ्रुकुट्यां विटङ्कितो ललाटपट्टो यस्येत्यर्थः इति केचित् ॥७९॥

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः।
कस्य नानन्दनिःस्यन्दं विदधाति सदागमः॥

भुक्तीति। जनान्तरसन्निधावुपनायके स्थितेऽप्रस्तुतेनेष्टप्रशंसाव्याजेन[९४] तदागमनाधीनं

---

८८. 'बधान्' स्थाने 'वलन्' 'ख' मातृकायाम्।
८९. ''प्रेयसीति प्रियविषये'' इति 'ख' मातृकायां नास्ति।
९० 'तत्र' इति 'ख' मातृकायामधिकम्।
९१. 'प्रति वचः' 'ख' मातृकायां नास्ति।
९२. 'वचो' स्थाने वाचां 'ख' मातृकायाम्।
९३. 'युक्ततां' स्थाने युक्तानां 'क' एवं 'ख' मातृकायाम्।
९४. 'नेष्ट' स्थाने 'वेद वेद' 'ख' मातृकायाम्॥

हर्षं व्यञ्जयन्त्या नायिकाया[९५] इयमुक्तिः। संश्चासावागमोऽथर्ववेदः कस्यानन्दनिःस्पन्दं आनन्दप्रवाहं[९६] न विदधाति करोति, अपितु सर्वस्येत्यन्वयः। कीदृक् भुक्तिं स्वर्गादिभोगं मुक्तिं च निःश्रेयसं करोतीति तथाभूतः। कर्मकाण्डवेदान्ताभ्यां उभयोपायबोधनात्। एकान्तेन नियमेन सम्यगादेशने[९७] हितोपदेशे तत्परः। अप्रतारकत्वादिति बाह्योऽर्थः। मुख्यतया तु विवक्षितो गोपनायाप्राकरणिकीकृतो व्यङ्ग्यो यथा। सतः सुन्दरस्य नायकस्यागम आगमनं कस्य नायिकाजनस्य[९७] आनन्दनिष्यन्दं न विदधाति। कीदृशः भुक्तिः सम्भोगः मुक्तिर्विरहादिदुःखत्यागः। तौ करोतीति तथा। एकान्तस्य सङ्केतस्थानस्य समादेशने तत्पर इति पूर्वत्रोपमाध्वनौ भीमपदस्य इहोक्तवस्तुध्वनौ प्रधानभूतस्य सदागमपदस्य परिवृत्त्यसहत्वाच्छब्दशक्तिमूलत्वं ज्ञेयम्॥८०॥

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः।
आश्चर्यन्तव सौकुमार्यमभितः क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासितुम्॥

सायमिति। उपपतिं सम्भुज्य तज्जनितश्रमापनयनाय स्नानादिकृतवतीं[९९] सखीं प्रति ज्ञातरहस्यायाः सख्या इयमुक्तिः। हे सखि! तव सौकुमार्यमाश्चर्यं येन कारणेनाधुना श्रमनिवर्त्तकस्नानादिसमवधानदशायामभितः समन्ततः[१०१] बहिरन्तश्च क्लान्तासि श्रान्तासि। कथं तत्राह-नेत्रेत्यादि। ते तव नेत्रयोर्द्वन्द्वं युग्मं न विद्यते मीलनस्य व्यतिकरः पौनःपुन्यं यत्र तथा आसितुं स्थातुं न शक्नोति। तथा च मीलनपौनःपुन्यं सर्वाङ्गीणं श्रमं गमयतीति भावः। आश्चर्यं कुतस्तत्राह- सायमित्यादि। सायंकाले स्नानमुपासितं श्रमापनोदनसमर्थं यथा स्यात्तथा कृतम्। मलयजेन चन्दनेनाङ्गं सम्यगासमन्ताल्लेपितम्। अम्बरस्याकाशस्य मणिरिव मणिः सूर्यः अस्ताचलस्य चलं मस्तकं यातः अस्तंगत[१०१] इत्यर्थः। तेनातपादिजनितत्वसम्भावनानिवृत्तिः। अत्र मत्सविधे विस्रब्धं निःशङ्कं मन्थरं वा आगतिरागमनम्। एतेन भयत्वराहेतुकत्वं क्लमस्य नास्तीत्युक्तम्। यत्तुश्रमापनयनव्याजेन स्वाङ्गमभिसरणार्थं प्रसाधयन्तीं सखीं प्रति नायिकोक्तिरियमित्यवतार्य नेत्रद्वन्द्वेत्यादेः स्वच्छन्दमसम्बद्धव्याख्यापूर्वकं कृतः परपुरुषेण परिचयः सङ्केतो ययेति[१०२]

---

९५. 'नायिकाया' स्थाने 'नायकाया' 'ख' मातृकायाम्।
९६. 'आनन्द' इति क मातृकायां नास्ति।
९७. 'सम्यंगा 'स्थाने' सर्गा 'ख' मातृकायाम्।
९८. 'नायक' स्थाने 'नायिका' 'ख' मातृकायाम्।
९९. 'कृतवन्ती' स्थाने 'छतवती 'ख' मातृकायाम्।
१००. 'समन्ततः' 'ख' मातृकायां नास्ति।
१०१. 'अस्तंयात' स्थाने स्तंगत 'क' मातृकायाम्।
१०२. 'येति प्रकाश' इत्यारभ्य 'हारोपि निवारित एव' इत्यन्तं इति 'ख' मातृकायां नास्ति।

प्रकाशव्याख्यानम्। पूर्वव्याख्यायां चाक्षरानार्जवोद्भावनं तद्भ्रान्तिविलसितं नूतनकल्पनोत्कलिका विजृम्भितमित्युपेक्षणीयम्॥८१॥

तद्प्राप्तिमहादुःखविलीनाशेषपातका।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरुपिणम्।
निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका॥

तद्प्राप्तीति। विष्णुपुराणगतमेतत्पद्यद्वयम्। पूर्वोक्ताभ्योऽन्या गोपस्य कन्यका निर्गत उच्छ्वासः, प्राणोत्क्रमणं यस्याः सा तथा तस्या भावस्तत्ता तया प्राणोत्क्रमणं विनेत्यर्थः। न तस्य प्राणा उत्क्रामन्तीहैव समवलीयन्ते इति श्रुतेः। मुक्तिङ्गता। भावनया तद्रूपतां प्राप्तेत्यन्वयः। कीदृशी, तस्य कृष्णस्याप्राप्त्या वियोगेन यन्महादुःखं तेन विलीनानि नष्टान्यशेषाणि समग्राणि पातकानि यस्यास्तादृशी। तथा तस्य चिन्तया ध्यानेन यो विपुलो महानाह्लाद आनन्दस्तेन क्षीणः पुण्यस्य चयः समूहो यस्याः सा तथाभूता। पापपुण्ययोः फलनाश्यत्वात्। पुनः कीदृक् जगतः सूतिरुत्पत्तिर्यस्मात्तादृशं श्रीकृष्णं परब्रह्मस्वरूपिणं सच्चिदानन्दस्वरूपं चिन्तयन्ती भावयन्तीति। अत्र कृष्णवियोगदुःखचिन्ताह्लादयोरशेष-पापपुण्यफलत्वेनाध्यवसितयोरवगतिरित्यतिशयोक्तेर्व्यङ्ग्यत्वम्॥८२॥

क्षणदाऽसावक्षणदा वनमवनं व्यसनमव्यसनम्।
बत वीर, तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम्॥

क्षणदेति। बतेति खेदे विस्मये वा। तवेति द्वेषकर्मणि षष्ठी। भो वीर! तव त्वां द्विषतां त्वयि पराङ्मुखं प्रतिकूले सति सर्वं। विपरीतं जातमिति शेषः एतदेवोपपादयति-क्षणदेत्यादिना। क्षणदा रात्रि अक्षणदा रात्रिभिन्ना, वनभवनं वनभिन्नम्। व्यसनं द्यूतादि तद्भिन्नम्। इत्येवं शब्दशक्तिमूला व्यञ्जनागम्यविरोधालङ्कारेण सर्वपराङ्मुखत्वोपपत्तिः। विरोधपरिहारस्तु क्षणमुत्सवं ददातीति तथा, पश्चान्नञ्समासेन तद्भिन्ना रात्रिः। वनभवनं रक्षकम्, अवीनां मेषाणामसनं प्रेरणं तदेव व्यसनं इति रीत्या बोध्यः॥८३॥

तव बल्लभस्य प्रातरासीदधरो म्लानकमलदलम्।
इति नववधूः श्रुत्वा करोति वदनं मही सम्मुखमिति संस्कृतम्।

तुहेति। गोसम्मीति प्रभाते देशी। प्राकृते लिङ्गानियमाद्दलपदे पुंस्त्वम्। रात्रावत्यन्तचुम्बितदयिताधरां वधूं प्रति कस्याश्चिदुक्तिः। तव वल्लभस्य दयितस्य प्रातःकालेऽधरोष्ठं म्लानं च तत्कमलस्य दलं तद्रूपं आसीदिति सखीवचनं श्रुत्वा नवा तरुणी वधूर्वदनं मुखं मह्याः भूमेः सम्मुखम् अधोमुखमिति यावत्। करोतीत्यन्वयः। वर्त्तमाननिर्देशाल्लज्जाया अविरामः सूच्यते॥८४॥

रात्रिषु चन्द्रधवलासु ललितमास्फाल्य यश्चापम्।
एकच्छत्रमिव करोति त्रिभुवनराज्यं विजृम्भमाणः ॥ इति संस्कृतम्॥

राईस्विति। यः प्रकरणात्कामः। चन्द्रेण[१०३] धवलासु रात्रिषु ज्योत्स्नीष्विति यावत्। ललितं सुकुमारमनोहरं न जठरं आस्फाल्येव त्रिभुवनानां राज्यमेकमेवच्छत्रं यत्र तथाभूतम् अद्वितीयमिति यावत्। करोति अत एव विजृम्भमाणो विस्फुरमाण इत्यर्थः ॥८५॥

निशितशरधियाऽर्पयत्यनङ्गो दृशि सुदृशः स्वबलं वयस्यराले।
दिशि निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः॥

निशितेति। अनङ्गः अराले सकलकामिहिन्स्रतया कुटिले वयसि यौवने सति सदृशः शोभननयनायाः कामिन्याः दृशि दृष्टौ निशितास्तीक्ष्णाश्च ते शराश्च तेषां धिया अयं मम निशितः शर इति बुध्या स्वस्य बलमर्पयति। सा चार्पितबला दृष्टिर्यत्र यस्यां दिशि लक्षणया तत्सम्बन्धिनि युवजने निपतति। तत्रावस्था हसितरुदितमूर्च्छनादयो व्यतिकरं मिश्रणमेत्य प्राप्य समुन्मिषन्त्युद्भवन्तीत्यर्थः ॥८६॥

वार्यमाणोऽपि पुँनः सन्तापकदर्थितेन हृदयेन।
स्तनभरवयस्यत्वेन विशुद्धजातिर्न चलत्यस्या हारः॥ इति संस्कृतम्॥

वारिज्जन्तो इति। विरहजनितेन सन्तापेन कदर्थितेन पीडितेन हृदयेन पुनः पुनर्वार्यमाणोऽप्यस्याः प्रकृतनायिकाया हारः स्तनभरस्य वयस्यत्वेन सख्येन न चलति यतो विशुद्धजातिर्निर्दुष्टमुक्ताजातिमान् श्लेषेण विशुद्धजन्मा च। विशुद्धजातयो हि न कदापि स्वस्थानाच्चलन्तीत्यर्थः। अत्र च पुनः पुनः[१०४] बारमनवरतकम्पनं[१०५] श्वासोच्छवासाधिक्येन[१०६] हृदयकम्पनप्रयुक्तं वेदितव्यम्। केचित् आलिङ्गनान्तरायतया सन्तापकदर्थितेन स्तनभरस्य हारेण सहालिङ्गने पीड़ानिवर्त्तकतया वयस्येन हृदयेनेति विपरीतरतावस्थावर्णनपरतया योजयन्ति ॥८७॥

स मुग्धश्यामलाङ्गो धम्मिल्लः कलितललितनिजदेहः।
तस्याः स्कन्धाद्बलं गृहीत्वा स्मरः सुरतसङ्गरे जयति[१०७]।

सोमुद्धेति। स धम्मिल्लः केशपाश एव स्मरः कामस्तस्या नायिकायाः स्कन्धो स एव स्कन्धः सेना निवेशस्तस्माद्बलं सामर्थ्यमेव बलं सैन्यं गृहीत्वा सुरतरूपे सङ्गरे सङ्ग्रामे जयन्ति उत्कृष्टो भवति। कीदृशः मुग्धं सुन्दरं श्यामलम् अङ्गं यस्य तथा। कलितः पुनरासादितो ललितो मनोहरो निजदेहो धम्मिल्लरूपो येन तथाभूत इवेत्युत्प्रेक्षागर्भम्। अत्र धम्मिल्लस्य स्कन्धसम्बन्धेन शोभातिशयलाभात्तत्पदप्राधान्यम् ॥८८॥

नवपूर्णिमामृगाङ्कस्य सुभग कस्त्वमसि भण मम सत्यम्।
का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य॥

---

१०३. 'चन्द्रेण' स्थाने 'चन्द्रो' इति 'क' मातृकायाम्।

१०४. 'पुनः पुनः' इति पदानन्तरं व्यङ्ग्यपदं अधिकं 'क' मातृकायाम्

१०५. 'कम्पनं स्थाने' कम्पत् इति 'क' मातृकायाम्।

१०६. 'अधिक' इति 'क' मातृकापाठः।

१०७. 'सूरतसङ्गरे जयति सधम्मिलः केशपाश एव' इति 'क' मातृकायाम् अधिकम्।

णवेति। खण्डितायाः स्वामिनं प्रतीयमुक्तिः। हे सुभग! त्वं नवस्य प्रथमोदितस्य पूर्णिमासम्बन्धिनो मृगाङ्कस्य चन्द्रस्य सम्बन्धी कः भ्राता सखा वा असि एतन्मम सत्यं भण वद। तत्सम्बन्धित्वं विना क्षणिकानुरागित्वस्य तत्स्वभावस्य त्वय्यनुपपत्तेरिति भावः। तथा चन्द्रस्य प्रदोषरजनीव तव का नायिका सौभाग्यं नायकानुरागादि समग्रं यस्यां सा तथाभूतेत्यर्थः। प्रदोषो रजनीमुखमित्यमरः। अत्र नवेत्यनेन क्षणिकानुरागित्वलाभः। पूर्णिमामृगाङ्केत्यनेन नायिकान्तरसंसर्गित्वं व्यज्यते। एवं प्रदोषेत्यनेन प्रकृष्टदोषवत्त्वं रजनीत्यनेन रागित्वमित्यूह्यम्। केचित्तु, नवः प्रतिपदुदितः इत्यर्थमाहुः ॥८९॥

सखि! नवनिधुवनसमरे अङ्कपाली सख्या निबिडया।

हारो निवारित एवोच्छ्रियमाणस्ततः कथं रमितमिति संस्कृतम्॥

सहीति। सख्या इयमुक्तिः। हे सखि! नवं नूतनं निधुवनं सुरतमेव समरः सङ्ग्रामस्तस्मिन्निबिडया दृढया विश्वस्तया वा। अङ्कपाली आलिङ्गनं तद्रूपया सुखहेतुत्वात्सख्या उच्छ्रियमाणः द्वयोस्तृतीयतया अधिको भवन् हारोऽपि निवारित एव गाढालिङ्गनेन त्रोटित इत्यर्थः। ततो हारच्छेदानन्तरं कथं रमितं क्रीडितमिति प्रश्नेन वैलक्षण्यसूचनाद्व्यतिरेकलाभः। उच्छेरन्तो इति पाठे तदर्थो दर्शितः। उच्चेरन्तो इति पाठे उच्चरन् उर्ध्वं चलन्नित्यर्थः। उच्चेरन्तो इति पाठे उद्गृणन् उक्तार्थतां हि यत इति हार इत्यन्वर्थतां आगच्छन्निति चक्रवर्त्ती। उच्चेअन्तो उछिजमान इति चण्डीदासः। अङ्कपाली परिरम्भ इति मेदिनीकारः ॥९०॥

प्रविशन्ती गृहद्वारं विवलितवदना[१०८] विलोक्य पन्थानम्।

स्कन्धे गृहीत्वा घटं हा हनष्टमिति रोदिषि सखि! किमिति॥

प्रविसंतीति। हे सखि! गृहद्वारं प्रविशन्ती त्वं विवलितं परावृत्तं वदनं यस्यास्तथाभूता सती पन्थानं मार्गं विलोक्य स्कन्धे घटं गृहीत्वा हा हा नष्ट इति किमिति रोदिषि। घटभङ्गस्य बुद्धिपूर्वकत्वेन रोदनहेतुत्वाभावादिति भावः। रोदने नष्टत्वं हेत्वलङ्कारः। नाशे स्कन्धग्रहणं हेतुरिति चक्रवर्ती। रोदनवैयर्थ्यबोधन द्वारा समीहितसाधनानुमितिसूचनात्किमिति पदस्य प्राधान्यं बोध्यम्।९१॥

विशृंखलां त्वां सखि दृष्ट्वा कुटेन तरलतर दृष्टिम्।

द्वारस्पर्शमिषेण चात्मा गुरुक इति पातयित्वा विभिन्नः॥

विहलङ्खलमिति। हे सखि! त्वां विशृंखलां व्याकुलां अत एव तरलतरा अतिशयेन तरला चञ्चला दृष्टिर्यस्यास्तथाभूता दृष्ट्वा कुटेन घटेन द्वारस्पर्शस्य मिषेण व्याजेनात्मा स्वस्वरूपम्। गुरु कः गुरुरिति हेतोः पातयित्वा विभिन्नो विभेदित इत्यर्थः। अन्तर्भूतः व्यर्थत्वात्। नायं द्वारस्पर्शात्कूटनाशः[११०] किन्तु गुरुतया परपीडकत्वात्। घटेनैव

१०८. 'वदना' स्थाने 'वाना' 'ख' मातृकायाम्।

१०९. 'वदनं' स्थाने वनं 'ख' मातृकायाम्।

११०. 'कूट स्थाने' घट 'ख' मातृकायाम्।

स्वात्माविनाशित[१११] इत्यपह्नुतिः। दीष्टी इति पाठे तु भाष्करेणार्थ उक्तो यथा विशृंखलं प्रियं दृष्ट्वा कुटेन घटेनोपलक्षिता त्वं तरलतरदृष्टिः जातेति शेष इत्येकं वाक्यम्। द्वितीयवाक्ये विभिन्न इत्यनन्तरं त्वयेतिशेष इति ॥९२॥

ज्योत्स्नया मधुरसेन च वितीर्णतारुण्यौत्सुक्यमनाः सा।
वृद्धापि नवोढेव परवधूरहह हरति तव हृदयम्॥

जोह्वाए इति। गतयौवनान्यनायिकाप्रसक्तं स्वामिनमुपहसन्त्या नायिकाया इयमुक्तिः। अहह खेदे। वृद्धापि सा नायिका ज्योत्स्नया मधुनो मद्यस्य रसेनास्वादेन च वितीर्णं दत्तं यत्तारुण्यं तेनोत्सुकं अर्थाद्रते मनो यस्यास्तथाभूता[११२] सती नवोढेव तव हृदयं हरति यतः परवधूः। परनायिकात्वेनैव तव चित्तं हरति नतु सौन्दर्यादिनिमित्तान्तरमस्तीति भावः। तदेतत्काव्यलिङ्गम्। ज्योत्स्नामधुरसाभ्यां दत्तं तारुण्यं हृदयहरणे हेतुरिति काव्यलिङ्गमिति चक्रवर्ती। आक्षेपे परवधूत्वस्य प्राधान्येन प्रयोजकत्वात्तत्पदप्राधान्यम्॥९३॥

अलं स्थित्वा श्मशानेऽस्मिन्गृध्रगोमायुसङ्कुले।
कङ्कालबहले घोरे सर्वप्राणिभयङ्करे॥
न चेह जीवितः कश्चित्कालधर्ममुपागतः।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी॥

अलमिति। भारते शान्तिपर्वणि मृतं बालं सन्ध्यासमये श्मशाने समानीतं दृष्ट्वा दिवसे समर्थस्य रात्राबन्धस्य गृध्रस्य तद्बन्धुविसर्जनार्थमुक्तिः। हे जनाः! अस्मिन्श्मशाने स्थित्वा अलं पूर्यताम्। कीदृशे गृध्रैर्मांसादैः पक्षिविशेषैर्गोमायुभिः शृगालैश्च संकुले व्याप्ते। तथा कङ्कालानि अस्थीनि बहलानि यत्रैवंभूते घोरे दारुणे अतएव सर्वेषां प्राणिनां भयङ्करे त्रासजनके। तथा च प्रयोजनाभावे एवं विधे स्थले स्थितिरनुचितेत्यर्थः। ननु मृतस्यापि पुनरुज्जीवनं सम्भाव्यत इत्यत आह-चेहेति। इह संसारे कालधर्मं मरणमुपागतः प्राप्तः प्रियो वा द्वेष्यः शत्रुर्वा कश्चित् उदासीनोऽपि जीवितः। तथा चैतदसम्भावितमित्यर्थः। समाधानायाह-प्राणिनां संसारिणामीदृशी प्राणोत्क्रमणरूपा गतिः स्वभावः। एवं च स्वभावस्य दुरतिक्रमत्वान्मोहो न कार्य इति भावः॥९४॥

आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम्।
बहुविघ्नो मुहूर्त्तोऽयं जीवेदपि कदाचन॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम्।
गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशङ्किताः॥

आदित्योऽयमिति। हे मूढाः! मूर्खा अयमादित्यः सूर्यः स्थितः अस्तीतिशेषः। तथा च रात्रिञ्चरेभ्यो भयं अधुना नास्तीति भावः। अतः साम्प्रतमधुना स्नेहं सविधस्थितिरूपं

---

१११. 'विनाशित' स्थाने विमेदित 'क' एवं 'ख' मातृकायाम्।
११२. 'भूता' 'ख' मातृकायां बारं द्वयम्।

कुरुत। स्नेहं जीवनोपायानुष्ठानलक्षणमिति दीपिकायाम्। मृतस्य जीवनासम्भवादफलमवस्थानमित्याशङ्कयाह– बहुविघ्न इत्यादि। इयं संध्यात्मको मुहूर्त्तो बहुविघ्नः। राक्षसवेलात्वात् भूतावेशादिरूपविघ्नबहुलः। तथा चैतन्मुहूर्त्तापगमे तद्विघ्नोपशान्तौ कदाचन जीवेदपीति सम्भावनायामपिशब्दः। एवं जीवनसम्भावनामुत्पाद्य मोहयितुमाह–अमुमिति। हे मूढाः! गृध्रस्य वाक्यात्पूर्वोक्तादविशङ्किताः कथं कस्मात्त्याज्योऽयं बाल इति विचार रहिता विश्वस्ता वा अमुं बालं कनकवर्णवदाभा यस्य तथाभूतं न तु कनकाभम्। तदा कनकगतकाठिन्यस्यापि प्रसङ्गात्। तथा न प्राप्तमासादितं यौवनं येन तथाभूतमिति। अत्र बालत्वेन मृत्युकालाभावः। कनकेत्यनेन मृत्युचिह्नवैवर्ण्याभावः। अप्राप्तेत्यनेन परदाराभिगमनादिराहित्येनायुः सत्वं च सूच्यते। मूढाह– इत्यत्र बाला इति क्वचित्पाठः। तत्राविवेचका इत्यर्थः ॥९५॥

रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य।
रुद्रस्य तृतीयनयनं पार्वती परिचुम्बितं जयति ॥

रईति। रुद्रस्य महादेवस्य तृतीयं नयनं पार्वत्या परिचुम्बितं सत् जयति सर्वोत्कृष्टं भवति। कीदृशस्य रुद्रस्य रतिकेलौ सुरतक्रीडायां हृतं निवसनमर्थात् गौरीसम्बन्धिवासो येन स चासौ करकिसलयाभ्यां करपल्लवाभ्यां रुद्धं पिहितमर्थात् गौर्या नयनयोर्युगलं द्वन्द्वं यस्य तथा भूतश्चेति बहुब्रीहिद्वयोत्तरं कर्मधारयः। रतिकेलिहृतनिवसनायाः करकिसलयाभ्यामित्यादिविग्रहे निवसनेत्यत्र ह्रस्वानुपपत्तेः। तथा च करद्वयस्य नेत्रद्वयपिधानव्यापृततया अलौकिकचुम्बन[११३] पिधानवत्तया तृतीयनयनस्योत्कृष्टत्वमुच्यमानं रागातिशयहर्षलज्जादिसम्पत्तिमुखेन रसातिशयं पुष्णाति ॥९६॥

प्रेयान् सोयऽमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः।
तावत्प्रत्युत पाणिसंपुटगलन्नीवीनिबन्धं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥

प्रेयानिति। सशपथतिति। मध्यमणिन्यायेनोभयत्र सम्बध्यते। सोऽयं। परमप्रेमास्पदत्वेन प्रसिद्धः प्रेयान्प्रियः शपथेन सहितं यथास्यात्तथा पादयोरानतः प्रणतः कान्तया सशपथमपाकृतो निराकृतः सन्नुन्मना उत्सुकमनाः सन्वासभवनाद्वासगृहात्। रासेति पाठे क्रीडागृहात्। द्वित्राण्येव पदानि नाधिकानि पदानि न द्वाराणि यावन्न याति तावत् धावित्वैव प्रत्युत विपरीतं कृतः प्रणामो यत्र तद्यथा स्यात्। पूर्वं प्रणतस्यापाकरणमधुना प्रणामपूर्वकं धरणमिति वैपरीत्यम्। तथागलञ्चासौ नीवीनिबन्धश्च स तथा पाणिसम्पुटे प्रणामार्थं बद्धाञ्जलौ गलन्नीवीनिबन्धो यत्र तद्यथा स्यात्तथा धृतः रागौत्कण्ठयात्गलतो नीवीबन्धस्य प्रणामाञ्जलिनैवालम्बनम्। केचित् सम्पुटेत्यादि धावनक्रियाविशेषणमित्याहुः। लसदितिपाठे आर्थिकं गलनम्। अहो

---

११३. 'म्बन पिधानवत्तया' इत्यारभ्य इति पुरुष व्यत्यनेक इतयन्तं 'ख' मातृकायां नास्ति त।

इति विस्यमे। गतिः स्वभावः। अत्र प्रेयान्कान्तयेत्येताभ्यां परस्परविरहाक्षमत्वं ध्वन्यते। क्वचित् सायमिति पाठः ॥९७॥

पथि पथि शुकचञ्चूचारुराभाङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा
पुरि पुरि विनिवृत्ता मानिनीमानचर्चा॥

पथीति। पथि पथि मार्गे मार्गे अङ्कुराणामाभा कान्तिः शुकचञ्चूनामिव चारुर्मनोहरास्तीति शेषः। रम्भेति पाठे शुकचञ्चूवत्। चारुणां रम्भाङ्कुराणां कदल्यङ्कुराणां लासक इत्यन्वयः। पवमानो वायुर्दिशि दिशि प्रतिदिशं वीरुधां लतानां लासको नर्त्तकश्चास्तीति नूतनाङ्कुरशोभाशालिवसन्तर्तुसर्वदिक्सञ्चारिमन्दमारुतयोरुद्दीपकयोः सम्पत्तिरुक्ता। तत्कार्यमाह-नरीति। नृशब्दस्य सप्तम्यां रुपम्। पुष्पं धनुर्यस्य तथाभूतः कामो नरि नरि प्रतिमनुष्यं द्राक् शीघ्रं सायकान् पञ्चापिबाणान् किरति विक्षिपति। एवं कामोद्दीपने सति पुरि पुरि नगर्यां नगर्यां मानिनीनां मानवतीनां मानस्य चर्चा प्रसङ्गः। विनिवृत्ता विशेषेण निवृतेत्यर्थः ॥९८॥

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना॥

लिखन्निति। बहुदिनव्यापिमानवतीं प्रति सख्या इयमुक्तिः। हे कठिने! कठिन-हृदये तव प्राणा इव दयितः प्रियः अवनतो नम्रो बहिः बाह्यशालायां भूमिं लिखञ्शून्यहृदयतया विलिखन्नास्ते। उपविष्टोऽस्ति। तथा सख्यः सर्वा निर्गत आहारो यासां तथाभूताः सत्यः सततं निरन्तरं यद्रुदितं रोदनं तेनोच्छूने जातशोथे नयने यासां तथाभूताः सन्तीति शेषः। तथा पञ्जरस्थैः शुकैः सर्वं हसितयुक्तं पठितं परित्यक्तम्। तव चेयमवस्था दृश्यमानात्यन्तन्तरा विशिष्य वक्तुमशक्या अतोऽधुना ईदृशातिशये सतिमानं विसृज त्यजेत्यन्वयः। अत्र शुकेऽपि हास्यवर्णनं न विरुद्धम्। विहायसा तेन विहस्य भूयः इत्यादिनैषधदर्शनादित्याहुः।

ग्रामीणास्मि ग्रामे वसामि नगरस्थितिं न जानामि।
नागरिकाणां पतीन्हरामि या भवामि सा भवामि॥

गामेति। एतच्च ग्रामरुहम्मीतिपाठे। ग्रामारुहम्मीतिपाठे ग्रामार्हास्मीति। गामारिक्रीति पाठेग्रामीणास्मीति ज्ञेयम्। कलहे का त्वमसीत्यधिक्षिपन्तीं नागरिकस्त्रियं प्रति ग्राम्यस्त्रिया इयमुक्तिः। ग्रामरुहा ग्रामजाता वसामि निवसामि। नगरस्य स्थितिर्मर्यादा वैदग्ध्यरूपा। नागरिकाणामित्यनादरे षष्ठी। तथा च नगरे भवा नागरिका अनादृत्य तासां पतीन्हरामि वशीकरोमीत्यर्थः। पतिकर्तृकेऽपि तासामनादरे एतस्याः प्रयोजककर्त्तृत्वमवसेयम्। यद्यपि

षष्ठी चानादरे इत्यनुशासनाद्वाच्य एव सः तथापि तद्बोधनद्वारा गर्वरूपव्यभिचारीभावव्यञ्जकत्वं विवक्षितमक्षतमेव। अतएव पदैकदेशेत्यादौ रसादय इत्येवोक्तम्। एवं सर्वत्रैवंविधस्थले द्रष्टव्यमिति दिक्॥९९॥

तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः।

तेषां भणितानां सुन्दरं ईदृशं जातमवसानम्॥

ताण इति। एतच्च एरिसि अमिति पाठे। ईरिसि अमिति पाठेतु दर्षितमिति ज्ञेयम्। सापराधं दयितं प्रति कुपिताया इयमुक्तिः। हे सुन्दर! तेषां विशिष्यानिर्वाच्यानां नानाविधानां गुणग्रहणानां गुणवर्णनानां तासामसान्निध्ये उत्कण्ठानाम्। तस्य प्रेम्णः। तेषां भणितानां त्वमेव जीवितसर्वस्वमित्यादिनां वचनानाम्। ईदृशमेवंविधापराधकलुषितमवसानं पर्यवसानं जातमित्यन्वयः। ईर्षितं संजातेर्ष्यमिति पाठान्तरेऽर्थः। प्रकाशे बहुत्वं बहुविधम्। एकत्वं एकरूपत्वम्। सततमविच्छेदेन प्रकर्षनिकर्षराहित्यात्परमोत्कृष्टत्वलक्षणमिति॥१००॥

रे रे चञ्चललोचनाञ्चितरुचे, चेतः प्रमुच्य स्थिर-
प्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि।
किं मन्ये विहरिष्यसे बत हतां मुञ्चान्तराशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारान्निधौ॥

रे रे इति। शान्तस्य स्वचित्तं प्रति सापेक्षसम्बोधनमिदम्। चञ्चललोचनायाममञ्चिता गमिता रुचिरभिलाषो येन तथाभूतेति चेतोविशेषणम्। चञ्चलाभ्यां लोचनाभ्यामञ्चिता आविष्कृता रुचिरर्थान्नायिकायामस्येति चण्डीदासः। एणनयनां हरिणाक्षीमालोक्य स्थिरं प्रेम यत्र तादृशं महिमानं माहात्म्यं स्थिरता रूपं प्रमुच्य त्यक्त्वा किं कस्मान्नृत्यसि। नर्त्तकवद्धर्षादुल्लोलं भवसीत्यर्थः। हेतुमाशङ्कय निराकर्त्तुमाह-किं मन्ये इति। किं मन्यसे विहरिष्यमीत्यर्थः। प्रहासे च मन्योपपदेमन्यतेरुत्तम एकवच्चेत्यनुशासनान्मध्यमोत्तमयोर्व्यत्ययः। वत खेदे हतां निन्दिताम्। इमामन्तर्विद्यमानामाशां मुञ्च त्यज खलु यत। एषा उपदर्शिता आशा स्त्रीति कश्चित्। संसार एव वारान्निधिः समुद्रस्तस्मिन् कण्ठतले कृता बद्धा शिला। मज्जनहेतुत्वात्तरूपा भवतीति शेषः। इत्थं च परिणामविरसत्वाद्धर्षो न युक्त इतिभावः। अत्र मन्य इति पुरुषव्यत्ययेन प्रहासो व्यज्यते[११४]॥१०१॥

येषां दोर्बलमेव दुर्बलतया ते सम्मतास्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः।
ये क्ष्माशक्र, पुनः पराक्रमनयस्वीकारकान्तक्रमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम्॥

---

११४. 'अत्र मन्य इति पुरुषव्यत्ययेन प्रहासो व्यज्यते' इति 'क' मातृकायां नास्ति।

येषामिति[११५]। येषां पुंसाम्[११६]। दोर्बलमेव बाहुबलमेव। एवकारेण नीतिबलव्यवच्छेदः। ते राजानो दुर्बलतया निर्बलत्वेन सम्मताः। नीतिज्ञानां वृद्धानामिति शेषः। तैर्दोर्बलमात्रशरणैः। केवलनीतिरीतिशरणैश्चोर्वीश्वरैः पृथ्वीश्वरैः प्रायः किं कार्यं न किमपीत्यर्थः। समुच्चयार्थकस्यापिशब्दस्य भिन्नक्रमतया योजनात्। नीतिर्नीतिशास्त्रम्। तदुक्तवृत्तिप्रकारः रीतिः। हे क्ष्माशक्र! पृथ्वीन्द्र! ये पुनः पराक्रमनययोः स्वीकारेण कान्तो रमणीयः क्रमो व्यवसायो येषां तथाविधास्ते त्रिजगति भुवनत्रयेऽपि नैवस्युः न स्युरेव। यदि पुनः[११७] स्युस्तदा परं केवलं भवादृशा भवतुल्याः पवित्रा द्वित्राः न बहव इत्यर्थः। अत्र पराक्रमपदस्य पूर्वनिपातस्तदर्थस्याभ्यर्हितत्वं गमयति ॥१०२॥

प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम्।
दिवसेन तु नरप, भवानयुद्ध विधिसिद्धसाधुवादपरम्॥

प्रधनेति। हे वीर! धनुषोटङ्कार रूपं विभर्तीति धनुर्ध्वनिभृत्। तथाभूते प्रथनं युद्धमेव प्रवेशनिःसरणहेतुत्वादध्वा मार्गस्तस्मिन्। तव विधुरैः शत्रुभिर्दिवसं व्याप्यायोधि युद्धमकारि। हे नरप! नरान्पाति रक्षतीति तथाभूतः, भवांस्तु दिवसेन विधिना विधानेन सिद्धस्य न तु कृत्रिमस्य साधुवादस्य कीर्तेः पदं स्थानं यथा स्यात्तथा अयुद्ध युद्धं कृतवानित्यर्थः। अत्र दिवसेनेति तृतीयावगतो युद्धक्रियासमाप्ति रूपोऽपवर्गो युद्धफलस्य विजयस्य प्राप्तिं द्योतयति। क्रियायाः फलापवर्गित्वादिति बोध्यम् ॥१०३॥

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था।
साक्षात्कामं नवमिव रतिर्मालती माधवं यद्
गाढोत्कण्ठालुलितललितैरङ्गकैस्ताम्यतीति।।

भूयो भूय इति। मालतीमाधवे कथितं च नः मालती धात्रेय्या लवङ्गिकयेति चूर्णिकामुपक्रम्य कामन्दकी वचनमिदम्। यन्मालती गाढया दृढयोत्कण्ठयौत्सुक्येन ललितैः म्लानैः सद्भिर्ललितैः मनोहरैरङ्गकैस्ताम्यति ग्लायतीति मालत्या धात्रीपुत्र्या लवङ्गिकया कथितमिति चूर्णिकावाक्येनान्वयः। किं कृत्वा भूयो भूयो बारम्बारं सविधया निकटस्थया नगरीसम्बन्धिन्या रथ्यया राजमार्गेण पर्यटन्तं गच्छन्तं नवं युवानं माधवम्। रतिः काममिव साक्षात् न तु चित्रादौ दृष्ट्वा पुनःपुनरवलोक्य तेन रागौत्कण्ठ्यलाभः। किं भूता मालती भवनस्य वासगृहस्यं सम्बन्धिनी या वलभी उपरितनमण्डपस्तदीये तुङ्गे उच्चे वातायने गवाक्षे तिष्ठतीति तथाभूता, न तु रथ्यासंलग्नगृहान्तरवलभीवातायनस्था। तत्र स्थितं पश्यति

---

११५. येषामिति-येषा. पुन्साम्। दोर्बलमेव बाहुवलमेव। एव कारेण नीतिवलव्यवच्छेदः। ते राजनो दुर्बलतया इति पदं 'ख' मातृकायां नास्ति।

११६. 'पुंसाम् स्थाने' राज्ञां 'क' मातृकायाम्।

११७. पुनः 'ख' मातृकायां नास्ति।

न तु तेन पश्यन्तीं मामयं पश्येदिति शङ्कया वातायने शरीरस्यानर्पणात्। ललितललितैरिति पाठेऽतिमनोरमैरित्यर्थः। अत्र कप्रत्ययप्रतिपाद्यानुकम्पा व्यङ्ग्येन सौकुमार्येण दुःखासहिष्णुत्वाभिव्यक्तिद्वारा विप्रलम्भोत्कर्षः ॥१०४॥

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते॥

परिच्छेदेति। तत्रैव मकरन्दं प्रति माधवस्य स्वावस्था कथनमेतत्। मम कोऽपि विकारः अन्तः अन्तःकरणं जडयति स्तम्भयति। विषयाग्राहकं[११८] करोतीति यावत्। अन्तस्तापं[११९] विरहसन्तापं[१२०] च कुरुते इत्यन्वयः। कथं भूतः परिच्छेद इयत्ता विरामो वा तमतीतोऽतिक्रान्तः तद्रहित इत्यर्थः तथा सकलानां शक्तलाक्षणिकव्यञ्जकानां वचनानां[१२१] शब्दानामविषयः शक्त्या लक्षणया व्यञ्जनयापि वा प्रतिपादयितुमशक्यत्वात्। पुनः शब्दोऽत्र कालान्तरमात्रे, न त्वावृत्तौ। तस्या औत्तरकालिकपदार्थाश्रित्वात्। तथा च यो विकारोऽस्मिंजन्मनि पुनरन्यदानुभवपथं अनुभवगोचरत्वं न गतवानित्यर्थः। पुनरिति त्वर्थे। अस्मिंजन्मनि तु अनुभवपथं न गतवानित्यर्थः इति केचित्। पुनः कीदृक्। विवेकस्य गुणदोषविषयस्य प्रध्वंसान्नाशादुपचितेन प्रवृद्धेन महता मोहेन विपरीतज्ञानेन गहनो व्याप्त इत्यर्थः। अत्र प्रशब्देन समूलोन्मूलनलक्षणः प्रकर्षस्तद्वारा वा मोहप्रकर्षो व्यज्यते। तेन रागातिशयस्तेन च विप्रलम्भातिशय इति ज्ञेयम् ॥१०५॥

कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः।
तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलिताम्॥

कृतञ्चेति। नृपं प्रति मन्त्रिण उक्तिः। हे राजन्! त्वया मनः गर्वस्याभिमुखं न तु गर्वितं कृतञ्च। किमन्यदपेक्षितमिति शेषः। एवं शस्त्रप्रयोगादिकं विना नोऽस्माकं द्विषः शत्रवो निहताश्च। न तु निहनिष्यन्ते। दृष्टान्तमाह–तमांसीति। अंशुमान्सूर्यो यावदुदयाद्रेर्मौलितां शिरोऽलङ्कारतां नायाति तावदेव[१२२] तमांसि तिष्ठन्ति, तस्मिन्स्तु तथाभूते न तिष्ठन्तीति वैधर्म्येण दृष्टान्तः। अत्र चकाराभ्यां स्वसमभिव्याहृतक्रिययोस्तुल्यकालतारूपः समुच्चयस्तद्द्वारा वा वीरप्रकर्षो ध्वन्यते ॥१०६॥

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्।

---

११८. 'ग्राहकं' स्थाने 'ग्रहाहकं' 'ख' मातृकायाम्।
११९. अन्तस्थाने तथा 'ख' मातृकायाम्।
१२०. अन्त क मातृकायां नास्ति।
१२१. वचनानां स्थाने व्यञ्जकानां 'ख' मातृकायाम्।
१२२. 'तावदेव' स्थाने क्षतावदेव 'ख' मातृकायाम्।

वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-

श्रेणीभूत विशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥

रामोऽसाविति। राघवानन्दे रावणमुद्दिश्य कुम्भकर्णस्य वचनम्। असौ खरदूषणादिहन्तृत्वेन प्रसिद्धो रामो भुवनेषु न तु यत्रकुत्रचित्। विक्रमसम्बन्धिभिः सन्धिविग्रहादिभिः तत्प्रमुखैर्वाधैर्यादिभिः गुणैर्न न तु दोषैः परामुत्कृष्टां प्रसिद्धिं प्राप्तः। यदि परमित्यखण्डो निपातोऽवधारणार्थः। तं रामं देवो भवान्यदिपरं केवलमस्माकं सर्वेषां भाग्यस्य विपर्ययात्। दुर्भाग्यत्वेन परिणाम् न जानाति, न तु भाग्याभावात्। तस्मिन् हि सति सत्फलं दुर्भाग्यात्वसत्फलमिति विपर्ययपदद्योत्यम्। तं देवो जानात्येव। यदि न जानाति तदा परं केवलं भाग्ये विपर्ययादिति वार्थः। यदि पुनरिति पाठेऽयमेवार्थः। प्रसिद्धयानुभूतं[१२३] विक्रमगुणोदाहरणमाह-वन्दीवेति। एष वायुः मरुत् बन्दी वैतालिक इव सप्तभिः स्वरैः षड्जाद्यैर्यस्य यशांसि गायतीत्युत्प्रेक्षागर्भम्। कीदृशैः एकवाणाहतौ तन्निमित्तं श्रेणीभूतानां विशालानां विस्तृतानां तालवृक्षाणां विवरैः रन्ध्रैरुद्गीर्णाः प्रकाशितास्तैस्तथाभूतैरेक-वाणस्याहतिर्यत्रैवंभूता इति तालविशेषणमिति केचित् एकवाणाहतेति सम्यक् पाठः। रामेण सुग्रीवप्रत्ययाय विसंष्ठुलाः सप्ततालाः एकवाणेन भिन्ना इत्याख्यानम् ॥१०७॥

तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे।

अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना ॥

तरुणिमनीति। इयं चकितस्य मीतस्य हरिणस्येव चले चञ्चले नयने यस्यास्तथाभूता नायिका सकलानां ललनानां स्त्रीणां मौलिमधिवसति। मौलौ तिष्ठतीत्यर्थः। उपान्वध्वाङ्वस इत्याधारस्य कर्मसंज्ञा। कस्मिस्सति तरुणिमनि तारुण्ये कलामुपचयं कलयत्याश्रयति सति। तथा भ्रुवोरग्रे शिष्यभूते अनुमदनधनुः मदनधनुषो गुरुभूतस्य समीपे पठति सति अर्था-तत्कौशलं शिक्षति सति केचित् कलां चातुरीं कलयति प्रकाशयति सतीत्यर्थः। पठतीत्यत्रापि कलामित्यनुषङ्गः इत्याहुः। अत्रेमनिचा प्रकृत्यर्थस्य नवत्वं पूर्वपदार्थप्रधानाव्ययीभावेन च धनुषोऽनुगुणतां प्रकाशयतया ततोऽप्यधिकं जगद्वशीकारकौशलं भ्रूलताग्रस्य प्रत्याय्यते। मौलिमिति कर्मतया व्याप्तिसूचनद्वारा सौन्दर्यातिशय इति ज्ञेयम् ॥१०८॥

क्षणप्राघुणिका देवरजायजा सुभगकिमपि ते भणिता।

रोदिति गृहपश्चाद्भागवलभीगृहेऽनुनीयतां वराकीति संस्कृतम्।

छणेति। देवरानुरक्तामुपनायिकामुत्सवागतां तत्पत्न्या कटूक्तामनुनेतुं देवरंप्रति कस्याश्चिदुक्तिरियम्। पडोहरशब्दो गृहपश्चाद्भागे देशी प्रतिवेशिवाचीत्येके। हे देवर! सुभग क्षणे उत्सवे प्राघुणिका अभ्यागता काचित्ते तव जायया पत्न्या किमप्यवाच्यं भणिता उक्ता सती गृहस्य पश्चाद् भागे यद्वलभीगृहमुपरितनगृहं तत्र रोदिति। अतएव वराकी दीनानुनीयतां समाधीयतामित्यर्थः ॥१०८॥

---

१२३. 'हेतुभूत' इति 'क' मातृकायां पाठः।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदही तु कथं भविष्यति हहा हा देवि, धीरा भव॥

स्निग्धेति। विरहिणो रामस्येयमुक्तिः। स्निग्धो श्लक्ष्णा श्यामला च या कान्तिस्तया लिप्तं सम्पृक्तं विपदा काशं यैस्तथा वेल्लन्त्यो विलासेन खेलन्त्यो बलाका वकपन्क्त्यो येषु तथाभूता घना मेघा एव घना विबिडाः। कामं यथेष्टं सन्तु। तथा शीकरिणोऽम्बुकणशालिनो वाताः शीकरिणो इति नित्य योगे। तेन मान्द्यलाभः। एवं पयोदो मेघः सुहृत्केकाद्युपकारजनको येषान्ते तथाभूता केकापदसान्निध्यान्मयूरास्तेषामानन्देन केका वाण्यः अतएव कला अव्यक्त-मधुराः। आनन्देन कण्ठजाड्यात्कामं सन्तु। दृढमतिशयितं कठोरहृदयोऽहं रामः सकलदुःखपात्रत्वेन प्रसिद्धोऽस्मि। अतएव सर्वमुक्तोद्दीपकातिशयजनितं क्लेशं सहे। वैदेही विदेहराजतनया सुकुमारतया दुःखाक्षमा कथं भविष्यति जीविष्यति तस्या जीवनं न सम्भाव्यत इत्यर्थः। हहाहेति त्रयो निपाताः खेदातिशये। भावनोपनीतां सीतां सम्बोध्याह-देवीति। धीरा भव। धैर्यं कुर्वित्यर्थः। अतएव देवीति सम्बोधनम्। देवत्वेन धैर्यस्योचित्वात्। यत्तु सीतामरणं सम्भाव्य पृथ्वीं प्रत्याह-हे सर्वंसहे! वसुधे! देवि! धीरा भव दुहितृशोकेन त्वं मा विदीर्णां भूरित्यर्थो मदीय इत्युक्त्वा पूर्वोक्तार्थेऽज्ञानकृतत्वाभिधानं कस्यचित्तत्का-व्यहृदयानभिज्ञतया जल्पितमिति सहृदयैरुपेक्षणीयम्। अत्र द्रवद्रव्यसंयोगस्य लेपस्य हितकारित्वस्य च सुहृत्त्वस्य कान्तिर्मेघयोर्बाधादुक्तार्थलक्षणा। लेप सुहृत्वयोः सर्वथान्व-याननुप्रवेशादत्यन्ततिरस्कृतत्वम्। लक्ष्यातिशयौ व्यङ्ग्यौ। तयोस्त्रिरुपसङ्कराभावात्संसृष्टिः। रामपदेन च सर्वसहत्वानुपयुक्तार्थतयोक्तार्थसङ्क्रमितवाच्ये पीडासहस्त्रसम्पातेऽपि प्राणधारणादात्मनि न्यक्कारो व्यज्यते। तत्र च घनकेकाचिरस्थायित्वयोर्लिप्त-सुहृत्पदव्यङ्ग्ययोरनुग्राहकत्वं व्यक्तमेव। एवमेकेन रामपदेन दुःखभाजनत्वलक्षणया राज्यत्यागवनवासजटावल्कलधारणस्त्रीवियोगादिपात्रतया तदतिशयव्यक्तिः तद्द्वारा च सीतां विनापि जीविष्यामीति शोकावेगनिर्वेदाद्यभिव्यक्तिमुखेन विप्रलम्भपरिपोष इति लक्षणा[१२४] मूलातिशयध्वनिरसध्वन्योः सङ्कर इति दिक्॥१०९॥

॥इति श्रीमत्वैद्यनाथोन्नीतायां उदाहरणचन्द्रिकायां चतुर्थोल्लासः॥

---

१२४. 'लक्षणा' क मातृकायां नास्ति।

(अथ पञ्चमोल्लासः)[१]

यस्यासुहृत्कृततिरस्कृतिरेत्यतप्त-
सूचीवधव्यतिकरेण युनक्ति कर्णौ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमावहामि॥

यस्येति। बृहन्नलादशायां स्वाभ्युदयाय किमिति न चेष्टस इति केनाप्युक्तस्यार्जुनस्येयमुक्तिः। असुहृदा वैरिणाकृता तिरस्कृर्तियस्य तथाभूतो। यः यस्य स एत्य शरणमिति शेषः। तप्तया सूच्या यो व्यधो वेधस्तस्य व्यतिकरेण सम्बन्धेन कर्णौ युनक्ति सम्बध्नाति। शरणागतस्य तप्तलौहशलाकया कर्णवेधो देशाचार इति स्वयमेव शरणागतत्वसूचनाय तथा करोतीत्यर्थः। स एष ऐश्वर्यभ्रष्टोऽहं काञ्च्या गुणेन प्रकर्षेण यद्मथनं तस्य भाजनं पात्रमस्मि तत्र नियुक्त इति यावत्। अतः सम्प्रति अधुना न तु पूर्वं जीवन्न भवामि अश्लाघ्यजीवन इत्यर्थः। किमावहामि करोमीत्यर्थः। [२]असुहृत्कृततिरस्कृतिस्तद्वार्ता तप्तसूचीवधव्यतिकरेण कर्णौ युनक्ति। कर्णयोस्तादृश दुःखमुत्पादयतीत्यर्थः। अस्मीत्यहमर्थे वा काञ्चीगुणग्रथनभाजनं स एषोऽहमित्याद्यन्वय इति॥१॥

उन्निद्रकोकनदरेणुपिषङ्गिताङ्गा
गायन्ति मञ्जु मधुपा गृहदीर्घिकासु।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम्॥

उन्निद्रेति। नायकेन सह सुप्तां रतिश्रमालसतयानाकलितप्रबोधसमयां सखीं प्रति तत्सूचनाय सख्या इयमुक्तिः। मधुपा भ्रमरा गृहसम्बन्धिनीषु दीर्घिकासु वापीषु मञ्जुमनोहरं यथास्यात्तथा गायन्ति। एतद्रवेर्बिम्बं चकास्ति दीप्यते चेत्यन्वयः। तथा च सूर्योदयप्रतीक्षणमप्यनाशङ्कयमिति भावः। गृहेत्यनेनातिनिकटस्थतया सकलगृहजनवेद्यतयाऽनौचित्यप्रकाशनम्। कीदृशा भ्रमराः उन्निद्रं विकसितं कोकनदं रक्तोत्पलं तस्य रेणुना परागेण पिशङ्गितानि। कृष्णरक्तयोर्मिश्रणात्पिङ्गलवर्णान्यङ्गानि येषां ते तथाभूताः। अङ्गपदोपादानात्सर्वाङ्गव्यापि तद्वर्णलाभः। कीदृशं बिम्बं उदयसम्बन्धिनमचलं पर्वतं चुम्बति स्पृशतीति तथाभूतम्। अत एवेषदुदितत्वान्नवस्य

---

१. मया योजितम्।
२. 'अथवा' 'क' मातृकायामधिकम्।

नूतनविकसितस्य बन्धुजीवाख्यपुष्पस्यच्छदं पत्रं तद्वदाभा यस्य तथाभूतं रक्तत्वात् सूक्ष्मत्वाच्चेति ॥२॥

अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाप्यत्र मृगाक्षि, राक्षसपतेः कृत्ता च कण्ठाटवी॥

अत्रेति। रावणं हत्वा विमानेनायोध्यामागच्छतो रामस्य सीतां प्रतीयमुक्तिः। एत स्या एव समरभुवस्तत्तत्कर्माधारतया प्रत्येकं नवनवायमानाद्भुतरसालम्बनत्वेन पुनः पुनरत्रेत्यस्योपादानम्। यद्वा भिन्नान्येव स्थानान्यत्र पदैरुक्तानि इति दीपिकायाम्। फणिपाशो नागपाशस्तेन यद्बन्धनमर्थादावयोस्तस्य विधिरासीत्। विधेरलङ्घ्यत्वादनपकर्ष इति सूचनाय विधिग्रहणम्। शक्त्या आयुधविशेषेण भवत्या देवरे लक्ष्मणे वक्षसि गाढं दृढं ताडिते सति हनुमता द्रोणाद्रिर्दिव्यौषधीयुक्त आहृत आनीत इति तत्पराक्रमप्रकाशनम्। भवद्देवर इति सम्बन्धप्रदर्शनमुपकारप्रदर्शनार्थम्। इन्द्रजिद्रावणपुत्रः दिव्यैर्दिविभवैस्तादृशैरित्यर्थः। लक्ष्मणस्य शरैर्लोकान्तरं स्वर्गं प्रापितः दिव्यानां तत्प्रापकत्वस्योचितत्वात्। मृगाक्षीति सर्ववाक्यार्थान्वयि। केनापीत्यपिर्हेलायाम्। राक्षसपतेः रावणस्य कण्ठरूपा अटवी अरण्यं कृता छिन्नेत्यर्थः। अत्रेन्द्रजित्त्वेनोपन्यासाद्धन्तुरुत्कर्षलाभः। लक्ष्मणशरैरिति शराणां कर्तृत्वप्रदर्शनं लक्ष्मणस्यावहेलनसूचनार्थम्। अहङ्कारप्रकटनभयाद्धीरोदात्तनायकेन केनापीत्युक्तम्। छिन्नस्य पुनःपुनरुद्गतस्यच्छेदनादटवीत्युक्तमिति ॥३॥

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥

अयमिति। रणभूमिपतितं भूरिश्रवसः छिन्नं हस्तमादाय तद्वधूप्रलापोक्तिरियम्। अयं दृश्यमानावस्थः। सः पूर्वमनुभूतावस्थः कर इत्यन्वयः। पूर्वावस्थामेवाह-रशनेत्यादि। रशनां काञ्चीं उत्कर्षति आकर्षतीति तथा पीनयोः स्तनयोर्विमर्दनकारी नाभिश्च उरु च जघनं[3] चैतानि स्पृशतीति तच्छीलः। नीव्या वसनग्रन्थेर्विस्रंसनो मोचक इति। एवं चैवंविधशृङ्गारलीलापात्रभूतस्येदृशदुरवस्थाप्राप्तिरिति करुणपरिपोषः ॥४॥

कैलासालयभाललोचनरुचा निर्वर्त्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम्।
स्पर्धाबन्धसमृद्धयेव सुदृढं रुढा यया नेत्रयोः
कान्तिः कोकनदानुकारसरसा सद्यः समुत्सार्यते॥

कैलासेति। गिरिभुवः पार्वत्याः सा पादनखानां द्युतिः कान्तिर्वो युष्मान् त्रायतां रक्षत्विति

---

३. 'जघनं' स्थाने 'नयनं' 'क' मातृकायाम्।

सम्बन्धः। कीदृशी कैलास आलयः स्थानं यस्य तथाभूतस्य शिवस्य। भाल[४]-सम्बन्धिलोचनरुचा अरुणकान्त्या निर्वर्तिता निष्पादिता अलक्तकस्य लाक्षारसस्य व्यक्तिः प्रकटता यस्यां तथाभूता। मानिन्याः पादपतने सान्निध्येन लाक्षारुणललाटनेत्रप्रभासम्पर्कात्। सा का यया द्युत्या सुदृढं यथा स्यात्तथा रूढा वृद्धा कोकनदस्य रक्तोत्पलस्यानुकारेणानुकरणेन सरसातिशयिता नेत्रयोः कान्तिः कोपजनिता शोणा द्युतिः सद्यस्तत्क्षणं सम्यक् निःशेषं यथा स्यात्तथा उत्सार्यते दूरीक्रियते पादपतनगतस्योत्सारणकर्तृत्वस्य तदनुभावरूपायां तादृशद्युतौ उपचारौ वक्ष्यमाणोत्प्रेक्षार्थः। तदाह-स्पर्धायायां विजिगीषायां बन्धेन सातत्येन समिद्धया अतिदीप्तयेवेति। अत्र भाललोचनरुचिसम्पर्ककृतं दीप्तत्वं स्पर्द्धाबन्धहेतुत्वेनोत्प्रेक्षितं वेदितव्यम्। अत्र पादपतनाभिव्यक्तमहादेवरत्यास्पदत्वेन पार्वतीविषयो भावः प्रकृष्यत इति तत्प्राधान्यम्। एवमन्यत्राप्यङ्गाङ्गिभावः सुधीभिरुहनीयः॥५॥

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधयः
तानेतानपि बिभ्रती किमपि न क्लान्ताऽसि तुभ्यं नमः।
आश्चर्येण मुहुर्मुहुः स्तुतिमिमां प्रस्तौमि यावद् भुवः
तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः।।

अत्युच्चा इति। राजानं प्रति कवेरियमुक्तिः। परितः समन्ततः स्फारा विस्तीर्णा इत्युभयान्वितम्। अम्भोधय इत्यनन्तरं स्फुरन्तीत्यनुषङ्गः। अपिर्भिन्नक्रमः। विभ्रत्यपि धारयन्त्यपि किमपि किञ्चिदपि न क्लान्तासि न श्रान्तासीति हे पृथ्वीति सम्बोधनपदाध्याहारेणान्वयः। एवं विधगिर्यादिधारणेऽपि अक्लमादाश्चर्येण यावद्भुवः पृथिव्या इति। पूर्वार्धोक्तां स्तुतिं मुहुर्मुहुर्वारम्बारं प्रस्तौमि[५] प्रसञ्जयामि करोमीति यावत्। तावदिमां भुवं विभ्रत्पालयन्नेव विभ्रत् धारयन् तव भुजो न तु. भुजौ स्मृतस्ततो भुजस्मरणाद्वाचो मुद्रिताः सङ्कुचिता[६] इत्यर्थः॥६॥

वन्दीकृत्य नृप, द्विषां मृगदृशस्ताः पश्यतां प्रेयसां
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारान्निधे,
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे॥

बन्दीति। हे नृप! ते तव सैनिका येषां द्विषां शत्रूणां मृगदृशः कातरदृष्टितया। मृगनेत्रसमानदृष्टयः वन्दीकृत्य[७] हठादाहृत्य पश्यतां प्रेयसां पश्यतः प्रियतमाननादृत्य ताः श्लिष्यन्ति आलिङ्गन्ति। हठाश्लेष जनितस्य कोपस्य शान्तये प्रमणन्ति लान्ति गृह्णन्ति।

---

४. भाल 'स्थाने' लाभ 'क' मातृकायाम्।

५. बारं प्रस्तौमि 'इति' क मातृकायां नास्ति।

६. संकोचिता 'स्थाने' संकुचिता 'क' मातृकायाम्।

७. 'स्त्रियो' इति 'क' मातृकायाम् अधिकम्।

आत्मसात्कुर्वन्तीत्यर्थः इत्येके[८]। परितः कामशास्त्रानुक्तस्थलेऽपि चुम्बन्ति। मत्तत्वात्वरावेशाच्च। इत्थमनौचित्यप्रवर्तयितापि[९] त्वं तैः प्रत्यर्थिभिः शत्रुभिरिति स्तूयसे इत्यन्वयः। स्तुतिप्रकारमाहास्माकमित्यादि। हे! औचित्यवारान्निधे[१०]! औचित्यसमुद्र! अस्माकं सर्वेषां सुकृतैः पुण्यैर्दृशो गोचरे इति शेषः। निपतितोऽसि। तस्मात् त्वद्दर्शनादखिला विपदो विनष्टा ध्वस्ता इत्यर्थः ॥७॥

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात्॥

अविरलेति। हे राजन्! अविरलं-निरन्तरं करवालस्य खड्गस्य कम्पनैः भ्रुकुटीपूर्वकैस्तर्जनैः छिन्धिभिन्धीत्यादिवाक्यैः गर्जनैर्हुङ्कारसिंहनादरूपैः लिङ्गैस्तव वैरिणां यो मदोऽस्माभिर्मुहुर्ददृशे दृष्टः स मदो गर्वस्तवेक्षणे दर्शने सति क्षणात्क्वापि गतः पलायित इत्यन्वयः। अत्र गत इत्यनेनाचेतने मदे मुख्यार्थबाधान्नाशो लक्ष्यते। तदतिशयश्च व्यङ्ग्यो राजविषयकरतिभावस्याङ्गम्। अत एवोक्तं वृत्तिकृता-प्रशमः इति वैतालीय वृत्तम्॥८।

साकं कुरङ्गकदृशा मधुपानलीलां
कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते।
अन्याभिधायि तव नाम विभो, गृहीतं
केनापि तत्र विषमामकरोदवस्थाम्॥

साकमिति। हे विभो! प्रभो! तव वैरिणि बालकुरङ्गकदृशा बालकुरङ्गनेत्रया अनेककार्यतयान्याभिप्रायकम्। केनापि जनेन हेतुना वा गृहीतमुच्चारितं तव नाम कर्तृ तत्र वैरिणि विषमां कम्पादिकर्त्रीमवस्थामकरोदित्यन्वयः ॥९॥

असोढा तत्कालोल्लसदसहभावस्य तपसः
कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः।
प्रमोदं वो दिश्यात्कपटबटुवेषापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः॥

असोढेति। तपः कुर्वतीं पार्वतीं वटुवेषेण च्छलयतो महादेवस्य वर्णनमिदम्। कपटेन च्छलेन यो बटोर्ब्रह्मचारिणो वेषस्तस्यापनयने मोचने त्वराशैथिल्याभ्यां युगपत्समकालमभियुक्त आक्रान्तः स्मरहरः शिवो वो युष्माकं प्रमोदं दिश्यात् दद्यादित्यन्वयः। त्वराशिथिलतयोर्हेतुगर्भे विशेषणे क्रमेण चरणद्वयेनाह-असोढेत्यादि। तपस[१२] इति कर्मणि षष्ठी। तत्काले बटुप्रादुर्भावकाले उल्लसन्प्रादुर्भवन्नसहभावो दुःसहत्वमर्थात् गौर्या यस्य तादृशस्य

---

८. 'लालयन्ती' इति 'क' एवं 'ख' मातृकायाम् अधिकम्।
९. 'तापि' 'ख' मातृकायां नास्ति।
१०. 'सात्कुर्वन्ति इत्यर्थः' इत्यारभ्य "औचित्य वारान्निधे" इति यावत् बारं द्वयं पठितं 'ख' मातृकायाम्।
११. 'चरण' 'ख' मातृकायां नास्ति।
१२. तपस इति कर्मणि षष्ठी 'वाक्यं' इदं 'ख' मातृकायां नास्ति।

तपसोऽसोढा तपः सोढुमसमर्थः। तपोबलाकृष्टत्वेन स्वरूपमदर्शस्वरूपमदर्शयित्वास्थातुमसमर्थः[१३]। उल्लसदसमभावस्येति पाठे उल्लसन्नसमभावो निरूपमत्वं यस्येत्यर्थः। अथ चेति समुदितं समुच्चयार्थकम्। शैलदुहितः पार्वत्याः कथानां विस्रम्भेषु विश्वासेषु विस्रब्धकथास्विति यावत्। रसिकः प्रीतिमांश्चेत्यर्थः। अत्र त्वराशैथिल्याभ्यामवगतयोरावेगधैर्ययोः सन्धिः शिवविषयरतिभावाङ्गम्॥१०॥

पश्येत्कश्चिच्चल चपल रे का त्वराऽहं कुमारी
हस्तालम्बं विवर ह ह हा व्युत्क्रमः क्वासि यासि।
इत्थं पृथ्वीपरिवृढ, भवद्विद्विषोऽरण्यवृत्तेः
कन्या कञ्चित्फलकिसलयान्याददानाऽभिधत्ते॥

पश्येदिति। हे पृथ्व्याः! परिवृढ प्रभो अरण्ये वृत्तिर्वर्त्तनं यस्यैवं भूतस्य भवद्विद्विषः शत्रोः कन्या फलानि किसलयानि कोमलपल्लवांश्च भक्षणार्थमाददाना गृह्णती कञ्चिदाक्रान्तुकामं पुरुषं जातानुरागा इत्यमभिधत्ते इत्यन्वयः। कथमभिधत्ते। तत्राह-पश्येदित्यादि। कश्चिज्जनः पश्येदिति शङ्का तद्हेतुश्च सङ्गोपनीया पुरुषचेष्टाभिर्व्यङ्ग्यः। रे चपल! स्वच्छन्दाचरणाच्चञ्चल! चल अपसरेति काकुविशेषसाहित्याद्रागानुविद्धासूया, का त्वरेति धृतिः। सत्वरजिगमिषावारणायाहं कुमारी अस्मीति शेषः। तेन कुमार्या मम नैवं स्वातंत्र्यमुचितमिति स्मरणम्। हस्तरूपमालम्बं अवलम्बनं वितर देहीति श्रमस्तदुपमर्दकः। हह हेति भावजन्यं दैन्यम्। व्युत्क्रमः विपरीताचरणं जायत इति शेषः। सोऽयं विबोधः। असीति त्वमित्यर्थे त्वं क्व यासि गच्छसीत्यौत्सुक्यम्। एषामुक्तरीत्या पूर्व पूर्वोपमर्देनोत्तरोदयरूपा शबलता। तिलतन्दुलन्यायेन समप्राधान्येन चर्व्यमाणतारूपा इत्यन्ये। सा च राजपराक्रममूलकतया तदभिव्यक्तिद्वारा राजविषयां रतिमुद्दीपयन्ती तदङ्गमिति बोध्यम्॥११॥

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्।
कृतालङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाऽऽप्तं रामत्वं कुशलवसुता न त्वधिगता॥

जनस्थान इति। कस्यचित्कवेरियमुक्तिः। मया रामत्वं रामरूपत्वं आप्तं प्राप्तं कुशलवसुता तु नाधिगता, न प्राप्ता। कुशलं परिणामसुरसं उद्वेगनिरासेन निपुणं वा वसु धनं यस्य तत्ता। कुशलवौ सुतौ यस्याः सा तथाभूता सीता च। कथं रामत्वं प्राप्तमित्याकाङ्क्षायामाह-जनस्थान इत्यादि। कनकस्य मृगो मार्गणं प्रार्थना वा तत्र तृष्णयान्धिता विवेकरहिता धीर्यस्य कनके मृगतृष्णया निष्फलाशया वान्धिता धीर्यस्य तथाभूतेन कनकमृगे मारीचे तृष्णयान्धितधिया अन्धितया धियेति कर्मधारयो वा। जनानां स्थाने ग्रामनगरादौ भ्रान्तमेव

---

१३. 'तपस इति कर्मणी षष्ठी' वाक्यमिदं अत्र प्रयुक्तं दृश्यते 'ख' मातृकायाम्।

जनस्थाने दण्डकारण्ये भ्रान्तमिति श्लेषोपस्थितयोरभेदारोपाद्रामत्वोपपत्तिः विद्वन्मानसहंसेत्यादिवत्। एवमग्रेऽपि वै निश्चितं देहीति वचः वचनं प्रतिपदं प्रतिस्थानं उद्गतमश्रु यत्र तथा प्रलपितम्। रामपक्षे वैदेहीति वचः वैदेही सीता। भर्तुर्भरणकर्तुर्धनिकस्य परिपाटीषु सेवारचनासु का घटना अलमत्यर्थं न कृता तद्वदेति। अथवा काभर्तुः कुत्सितस्य भर्तुः वदनपरिपाटीषु मिथ्याभाषणप्रकारेषु घटनोपपत्तिरलमत्यर्थं कृतेत्यर्थः। वदनपरिपाटीषु मुखविवलनादिषु सत्सु तदुन्नयनार्थं घटनोपायः कृतेत्यन्ये। रामपक्षे तु लङ्काया भर्तू रावणस्य वदनानां मुखानां परिपाट्यां पङ्क्तौ विषूणां शराणां घटना संयोजना कृतेत्यर्थः ॥१२॥

आगत्य सम्प्रति वियोगविसंष्ठुलाङ्गी-
मम्भोजिनीं क्वचिदपि क्षपितत्रियामः।
एनां प्रसादयति पश्य शनैः प्रभाते
तन्वङ्गि, पादपतनेन सहस्ररश्मिः॥

आगत्येति। मानिनीं प्रति स्वापराधाल्पत्वसूचनायान्यनायकनायिकावृत्तान्तमारोप्य दर्शयतो नायकस्योक्तिरियम्। हे तन्वङ्गि! सहस्ररश्मिः सूर्यः क्वचिद् द्वीपान्तर एव क्वचिन्नायिकान्तरगृहे क्षपिता नीता त्रियामा रात्रिर्येन, तथाभूतोऽपि प्रभात एत्य आगत्य सम्प्रत्यधुना कुपितां प्रति त्वरानौचित्याच्छनैरम्भोजिनीं कमलिनीमेव नायिकां पादानां किरणानां पतनमधः[१४] संयोग एव। पादे चरणे पतनं प्रणामस्तेन प्रसादयति विकासयत्येवानुनयत्ये तत्पश्येत्यन्वयः। कीदृशीं वियोगः सम्बन्धाभाव एव वियोगो विरहस्तेन विसंष्ठुलाङ्गी सङ्कुचिताङ्गीमेव विसंष्ठुलाङ्गीं संतापकार्श्यादिना विषमाङ्गीमित्यर्थः। तथा च खण्डितापि पादप्रणामेन प्रसीदति न पुनर्भवतीति तात्पर्यम्। यत्तु अम्भोजिनी पद्मिनीतिपरिभाषित-नायिकामिति व्याख्यानम्[१५], तदयुक्तम्। नायिकाविशेषवाचिनः पद्मिनीपदस्य पर्यायपरिवृत्त्यसहत्वात्। अत्र श्लिष्टपादादिपदाभावेऽपि सहस्ररश्मिः क्वचिदपि क्षपितत्रियाम एत्याम्भोजिनीं विकासयतीत्येतावतापि नायकनायिकावृत्तान्तव्यक्ति-सम्भवादश्लिष्टपदबाहुल्याचार्थशक्तेः प्राधान्यात्तन्मूलत्वव्यपदेश इति ज्ञेयम्[१६] ॥१३॥

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम्।
मरणञ्च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम्॥

भ्रमीमि। जलदो मेघ एव त्रासकत्वाद्भुजगः सर्पस्तज्जं विषं जलमेव हालाहलं कर्तृ वियोगिनीनां भ्रम्यादि कुरुत इत्यन्वयः। भ्रमिः दिशां भ्रमणामिव दर्शयन् कश्चिदान्तरो विकारः। चेतसोऽनास्था वा अरतिर्विषयानभिलाषम्। अलसं हृदयं यासां तत्ता। प्रलयो नष्टचेष्टता। मूर्च्छा बाह्याभ्यन्तरेन्द्रियवृत्तिनिरोधः। तमः तमोगुणस्योद्रेकेणान्ध्यम्। मूर्च्छैव तम इति रूपकमिति कश्चित्। शरीरस्य सादोऽवसादः पीडेत्यर्थः। मरणं प्रसिद्धम्। मरणपदेन

---

१४. 'पतनमधः' स्थाने 'पातेनमयः' 'ख' मातृकायाम्।

१५. 'न कार' 'स्थाने' 'त कार' 'ख' मातृकायाम्।

१६. 'ज्ञेयम्' स्थाने 'नेयम्' 'ख' मातृकायाम्।

तत्पूर्वावस्थोच्यत इति केचित्। प्रतिपादमेकैकताधिकागीतिरेवेयमिति[१७] प्राञ्चः। गाथेति तु नव्याः ॥१४॥

गच्छाम्यच्युत, दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किं त्वेवं विजनस्थयोर्हतजनः सम्भावयत्यन्यथा।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन्पुलकोत्कराञ्चितवपुर्गोपीं हरिः पातु वः॥

गच्छामीति। गोपीमाश्लिष्यन्नालिङ्गन्हरिर्वो युष्मान्पातु रक्षत्विति सम्बन्धः। कीदृशः? पुलकानां रोमाञ्चानामुत्करेण समूहेनाञ्चिता व्याप्ता तनुर्यस्य सः। कीदृशीं गोपीयमिति पूर्वार्धोक्तं यदा मन्त्रणं सम्बोधनमच्युतेत्येवं रूपं तस्य या भङ्गी रचना तया स्खलितत्वव्यञ्जनद्वारा सूचितं यद्वृथावस्थानं स्थितिस्तेन यः खेदस्तेनालसाम्। अथवा आमन्त्रणभङ्गिभ्यां सूचितौ यौ वृथावस्थानखेदौ ताभ्यामलसामित्यर्थः। भङ्गिरुक्तिरचनादर्शनेन भवत इत्यादिरूपा। इतीति किं, हे अच्युतनामकृष्ण! अहं गच्छामि कुत इत्यत आह- दर्शनेनेत्यादि। भवतो दर्शनेन किं तृप्तिरुत्पद्यते, अपि तु नेत्यापाततोऽर्थः। तथा च निष्फलमवस्थानमिति भावः। अवस्थाने बाधकमप्याह-किंत्विति। एतच्च प्रत्युतेत्यर्थकम्। एवं विजनस्थयोरेकान्तगतयोरावयोः सतोः प्रत्युत हतजनः कुत्सितो लोकोऽन्यथा सम्भावयति। रत्यर्थं समागताविति सम्भावयतीति वाच्ययोऽर्थः। व्यङ्ग्यस्तु हे अच्युत! विजनेऽस्मद्विधनायिकादर्शनेऽपि धैर्यच्युतिरहित! भवतो दर्शनेन किं तृप्तिरुत्पद्यते ऽपि तु सम्भोगेनैव। किं त्वेवमित्यादिनाऽन्यथा सम्भावनमावश्यकं तद्वृथैवात्मानं वञ्चयात्र इति वृथावस्थानसहितखेदस्तत्रोत्पद्यत इत्येतेन वृथावस्थानं किं त्वेवमित्यादिना खेद इति ॥१५॥

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्॥

अदृष्ट इति। कस्याश्चित् प्रियं प्रत्युक्तिः। भवति अदृष्टे सति दर्शनस्योत्कण्ठा दृष्टे सति विच्छेदभीरुता जायत इति शेषः। विच्छेदो वियोगस्तद्विषये भयशीलतेत्यर्थः। इत्थञ्चादृष्टेन दृष्टेन वा भवता कृत्वा सुखं न लभ्यते मयेति शेषः। भवतेति हेतौ तृतीया ॥१६॥

हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे विम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥

हरस्त्विति। कुमारसम्भवे पद्यमिदम्। चन्द्रोदस्यारम्भे उत्पत्तिकालेऽम्बुराशिरिव किञ्चिदीषत्परिवृत्तं च्युतं धैर्यं यस्य तथाभूतो हरस्तु विम्बफलवदधरोष्ठो यत्र तथाविधे। विम्बफलमधरयतस्तौ विम्बफलाधरौ तभाभूतोवोष्ठौ यत्र तथाविधे वा। उमायाः पार्वत्याः

---

१७. "प्रतिपादमे कैकताधिकागीतिरेवेयमिति प्राचः। गाथेति तु नव्याः।" इति वाक्यं 'क' एवं 'ख' मातृकायां नास्ति।

मुखे विलोचनानि व्यापारयामास। सञ्चारयामासेत्यन्वयः। अत्रोदयाधिक्ये धैर्यच्युतेराधिक्यादारम्भपर्यन्तानुधावनम्। विलोचनानीति बहुवचनेनोत्कण्ठातिशयो व्यज्यते। ओष्ठद्वयं मुखञ्चेति त्रिषु त्रयाणां सञ्चारणलाभाय तदिति कश्चित्॥१७॥

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते॥

ब्राह्मणेति। परशुरामदूतस्य रावणं प्रति वचनम्। ब्राह्मणानामतिक्रमोऽवमानस्तस्य त्यागो भवतामेव भूतये भवतीति शेषः, न तु ब्राह्मणानाम्। जामदग्न्ये जीवति तेषामनिष्टस्यासम्भवादिति भावः। भवतामिति बहुवचनेन सकलसभाक्षेपः। अन्यथा ब्राह्मणातिक्रमस्यात्यागे तथा तादृशम्। जन्मप्रभृतिसकलरहस्यवेदीत्यर्थः। मित्रं जामदग्न्यः दुर्मनायते। क्षुब्धान्तःकरणो भवतीत्यर्थः। सामीप्याभिप्रायेण वर्त्तमाननिर्देशः। तथा च तत्क्षोभे सकलराक्षसक्षयरूपोऽनर्थो दुवार्रः स्यादिति व्यज्यते॥१८॥

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरु
सन्धिं करोतु भवतां नृपतिः पणेन॥

मथ्नामीति। सन्धिश्रवणकुपितस्य भीमसेनस्येयमुक्तिः। अत्र प्रतिज्ञातकुरुकुलक्षयस्य न मथ्नामीत्युक्तिर्विरुद्धेति नञा काकुः प्रतीयते। तथा च नञर्थान्तरं व्यज्यमानमुच्चारित-नञर्थान्वितं प्रतीयत इत्यभावरूपं मथ्नाम्येवेत्यवधारणं[१८] गम्यते। एवमग्रेऽपि उरस्तः हृदयात् सुयोधनस्योरु इति द्वितीयाद्विवचनम्। भवतां न तु मम प्रजानां वा। स्वबुध्या राज्यत्यागात्। अत्र क्रोधातिशयेन मथनादिक्रियासु वर्त्तमानत्वाभिमानः। भविष्यत्सामीप्ये वा वर्त्तमानवद्व्यपदेशः। दुःखेन योधनीयत्वाभावाभिप्रायेण[१९] दुर्योधनपदं विहाय सुयोधनपदप्रयोग इति द्रष्टव्यम्॥१९॥

वानीरनिकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः।
गृहकर्मव्यापृताया वध्वा सीदन्त्यंगानि॥

वानीरेति। गृहपार्श्ववर्तिवेतसनिकुञ्जे दत्तसङ्केताया निकुञ्जोड्डीनपक्षिकोलाहलत-र्कितनायकप्रवेशाया गुरुजनपारतन्त्र्येण गृहकर्मणि रन्धनादौ व्यापृताया अवस्थावर्णनमिदम्। सीदन्तीति वर्त्तमाननिर्देशादवसादस्याविरामः सूच्यते। तथा श्रवणसमकालं तत्कार्यस्यावसादस्य कथनरूपातिशयोक्त्योत्कण्ठातिशयो व्यज्यते॥२०॥

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम्॥

---

१८. 'भाव' इति 'क' मातृकायां अधिकम्।

१९. 'भावाभिप्रायेण' स्थाने 'भावानीप्रायेण' 'क' मातृकायाम्।

मात्सर्यमिति। हे आर्या: ! विद्वांस: ! भूधराणां पर्वतानां नितम्बा मध्यभागा: किमु सेव्या भजनीया उत स्मरेण कन्दर्पेण स्मेरा: स्मितयुक्ता विलासिन्य: प्रमदास्तासां नितम्बा: कटिप्रदेशा:[२०] सेव्या इति संशये मात्सर्यमेकतरपक्षेणेतरत्रासूयां मात्सर्यं त्यक्त्वा मयि वा प्रश्नोत्तरेण परिश्रमदानान्मात्सर्यमपहाय विचार्य न त्ववहेलनया समर्यादं प्रमाणमर्यादा[२१] सहितं यथा स्यात्तथा सप्रमाणमिति यावत्। कार्यं कर्तव्यमुदाहरन्तु सयुक्तिकं कथयन्त्वित्यर्थ:। किम्विति उतेति च संशयार्थकं सप्तम्यन्तम्। इदं वदन्त्विति पाठे निर्धार्येत्यध्याहृत्येदं कोटिद्वयं निर्धार्य वदन्त्वित्यर्थ:। उत्तरार्द्धमार्योत्तरत्वेन व्याचक्षाणानां त्वभिप्रायं न विद्म: ॥२१॥

कथमवनिप, दर्पो यन्निशातासिधारा-
दलनगलितमूर्ध्ना विद्विषां स्वीकृता श्री:।
ननु तव निहतारेरप्यसौ किं न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरिभि: ॥

कथमिति। हे अवनिप! अवनिं पाति रक्षतीति तथाभूत राजन्! यद्विषां शत्रूणां श्री: स्वीकृता गृहीता तत्तस्माद्धेतोर्दर्पो[२२] गर्व: कथं युक्त इति शेषपूरणेनान्वय:। दर्पोऽयमिति पाठे स्वीकृतेऽयं दर्प: कथमिति सम्बन्ध:। कथं भूतानां विद्विषां निशातया तीक्ष्णयासिधारया यद्वलनं छेदनं तेन गलिता: पतिता: मूर्धानो येषां तादृशानाम्। कथमयुक्तो दर्पस्तत्राह-नन्वित्यादि। नन्विति यत इत्यर्थे यतो निहतारेर्मारितशत्रोरपि[२३] तव वल्लभा प्रियासौ प्रसिद्धा कीर्तिरिभिर्वैरिभि: किं त्रिदिवं स्वर्गं प्रति न नीता। अपि तु नीतैवेत्यर्थ:। कीदृशै: ? अपगताङ्गै: हीनागैरित्यर्थ:। तथा च जीवत्येव त्वयि त्वद्वल्लभाया हीनाङ्गै: शत्रुभिरपहरणाद्गर्वोऽनुचित इति निन्दामुखेन स्तुतौ पर्यवसानात् व्याजस्तुतिरलङ्कार:[२४] ॥२२॥

कस्य वा न भवति रोषो दृष्ट्वा प्रियाया: सव्रणमधरम्।
सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्॥

कस्येति। परपुरुष[२५] खण्डिताधरतया कुपिते प्रोष्यागतेऽप्यागते[२६] पत्यौ सख्या निरपराधत्वबोधनाय प्रतारणोक्तिरियम्। वारिता सभ्रमरपद्माघ्राणं अधरदशनपर्यवसायिनिधुवनं च मा कृथा इति निवरितापि वामा निवारिताचरणात्प्रतिकूला सह स्वेत्यनन्तरं पत्युर्गञ्जनमिति शेष:। इदानीं अविचारदशायां उपनायिकासन्निधौ तत्सन्निधौ च सर्वं सुखायासीदधुना तु दु:खदमिति भाव: ॥२३॥

---

२०. 'प्रदेशा:' 'स्थाने प्रवेशा:' 'क' मातृकायाम्।

२१. 'प्रमाण' इति 'क' मातृकायामधिकम्।

२२. द्वेतोर्दर्पो गर्व: 'स्थाने द्वेतोर्योगर्व' 'ख' मातृकायां।

२३. 'तयो' स्थाने 'यतो' 'क' मातृकायां।

२४. 'व्याज' इति 'क' मातृकायां नास्ति।

२५. 'तया' इति 'ख' मातृकायामधिकम्।

२६. 'प्यागते' इति 'क' एवं 'ख' मातृकायां नास्ति।

प्रत्याख्यानरुचेः कृतं समुचितं क्रूरेण ते रक्षसा
सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः।
व्यर्थं संप्रति बिभ्रता धनुरिदं त्वद्व्यापदः साक्षिणा
रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्॥

प्रत्याख्यानरुचेरिति। सीतां प्रति रामस्योक्तिः। हे प्रिये! इति। भावनोपनीतां प्रति सम्बोधनम्। प्रत्याख्याने निराकरणे रुचिर्यस्तास्तत्परायाः इत्यर्थः[२७]। ते तव क्रूरेण रक्षसा रावणेन समुचितं क्रूरयोग्यं कर्म कृतम्। तच्च त्वया तथा सोढं यथा कुलस्थो जनो मल्लक्षण उच्चैरुन्नतं शिरो धत्ते श्लाघनीयत्वात्। अन्यथा लाञ्छनेन नम्रीभावापत्तेः। रामेण तु मया प्रेम्ण उचितं योग्यं न कृतम्। किम्भूतेन? प्रियं जीवितं यस्य तथाभूतेन[२८]। पुनः कीदृशेन? सम्प्रत्यस्यां दशायां व्यर्थं धनुर्बिभ्रता धारयता प्रतीकारासमर्थत्वात्। तथा तव व्यापदां विपत्तीनां साक्षिणा द्रष्ट्रा स्नेहातिशयेन तन्मयीभावादिति भावः॥२४॥

विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम्।
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति॥

विपरीतेति। रसेन सुरतरसावेशेनाकुला। सुरतरसान्निवर्तितुमक्षमा स्थगयति आच्छादयति। शेषं स्पष्टार्थम्॥२५॥

भ्रम धार्मिक! विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छनिकुञ्जवासिना दृप्तसिंहेन॥

भ्रमधार्मिकेति। सोसुम्मो इति पाठे सश्चेति संस्कृतम्। कुसुमाद्यवचयार्थे कुञ्जे धार्मिकपरिभ्रमणेन खण्डितसङ्केतायास्तन्निराकरणायोक्तिरियम्। हे धार्मिक। विस्रब्धो निःशङ्कः संभ्रम[२९]। ग्राम इति शेषः। धार्मिकेति[३०] साक्षेपोक्तिः। परश्रेयोघातकस्य तत्त्वायोगात्। कुत इत्यत आह स श्वा यद्भयात् ग्रामे भ्रमणं त्यक्तमासीत्। अद्य तेन गोदानद्योः कच्छं जलप्रायो देशस्तत्सम्बन्धिनिकुञ्जवासिना दर्पयुक्तेन सिंहेन मारितः। तेनेति प्रसिद्धार्थकेन मिथ्या मया नोच्यत इति सूच्यते॥२६॥

॥ इति श्रीमत्सदुपाख्य श्रीरामचंद्रात्मज वैद्यनाथकृत्यामुदाहरणचन्द्रिकायां पञ्चम उल्लासः॥

---

२७. 'इत्यर्थः' इति 'ख' मातृकायां नास्ति।

२८. ''भूते न। पुनः की दृशेन सम्प्रत्ययस्यां दशायां व्यर्थं धनुर्विभ्रताधारयता। प्रतीकारासमर्थत्वात्। तथा च'' इति पदं 'ख' मातृकायां नास्ति।

२९. 'संभ्रम' स्थाने 'संचय' 'ख' मातृकायाम्।

३०. 'धार्मिकेति शेषः' इति 'क' मातृकायामधिकम्।

(अथ षष्ठ उल्लासः)[१]

प्रथममरुणच्छायास्तावत्ततः कनकद्युति-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलप्रभः।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसविसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥

प्रथममिति। मालतीमाधवे चन्द्रोदयवर्णनमिदम्। मृगलाञ्छनश्चन्द्रः क्षणदामुखे रजनीप्रारम्भे प्रथमं तावदरुणच्छायः अरुणकान्तिः। तावदित्यवधारणे। अरुणच्छाय एवेत्यर्थः। ततस्तदनन्तरं कनकप्रभः पीतः तदनु, तत्पश्चाद्विरहेणोताम्यन्ती या तन्वी तस्याः कपोलतलस्येव द्युतिर्यस्य सः पाण्डुरवर्णः। ततः सरसायाः स्निग्धाया विसिन्याः कन्दो मृणालं तस्य च्छेदवच्छविः कान्तिर्यस्यातिधवलत्वात् तथाभूतोऽतएव ध्वान्तस्यान्धकारस्य ध्वंसे क्षमः समर्थः। अत एव विपक्षजयादुदयतीति। अत्र स्वभावोक्त्युपमयोः सत्वेऽपि [२]चकाराद्यनुप्रासप्राधान्यात् शब्दचित्रता ॥१ ॥

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥

ते दृष्टीति। ते प्रसिद्धाः। पक्ष्मले पक्ष्मबहुले दृशौ यासां तथाभूतानां कामिनीनां अलकाः केशाः[३]। तथा खला दुष्टजनाश्च दृष्टिमात्रे पतिताः दृष्टिमात्रगोचरा अपि न पुनर्मनसा भावितस्वरूपा व्यवहारगोचरा वा। अत्र लोके कस्य क्षोभाय धैर्यनाशाय सुस्थत्वाभावाय च न भवन्तीति शेषः। अपि तु सर्वस्य क्षोभाय भवन्ति। ते के ये कुटिलतामिव कालतां न त्जयन्ति[३], तथा कालतामित्यर्थः। कुटिलता कुञ्चितत्वं वक्रता च। कालता श्यामता यमरूपता च। कीदृशाः नीचा ह्रस्वाः क्षुद्राश्च। कृत्रिमविनयाय नीचाङ्गतां प्राप्ता वा। सदैव सर्वदैव। विलासेन विभ्रमेण[४] सहितं यथा स्यात्तथा अलीके ललाटे[५] लग्नाः। खल पक्षे बिलं रन्ध्रं बवयोरभेदात्। तत्रासनमासः प्रहारस्तत्सहितं यथा स्यात्तथा। अलीके मिथ्यावचने लग्नाः आसक्ता इत्यर्थः। अत्रार्थश्लेषसमुच्चयोः प्राधान्यादर्थचित्रता ॥२ ॥

॥ इति चन्द्रिकायां षष्ठ उल्लासः ॥

---

१. मया योजितम्

२. पि चकारा 'स्थाने' 'पि तकारा' 'क' मातृकायाम्।

३. 'केशं' इति 'ख' मातृकायामधिकम्।

४. 'यथाकुटिलतां न त्यजन्ति' इति पदं 'क' एवं 'ख' मातृकायामधिकम्।

५. 'विभ्रमेण' इति 'क' मातृकायां नास्ति।

६. 'ललाटे' स्थाने 'लला' 'क' मातृकायाम्।

(अथ सप्तम उल्लासः)[१]

शृङ्गारास्वादसाम्राज्यसमुल्लासन[२] सुन्दरम्।
दधानं मधुरां रीतिं कृष्णं काव्यमिवाश्रये॥
अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा॥

अनङ्गेति। अत्र लोचनैरित्यध्याहार्यम्। तृतीया चोपलक्षणे। तथा च तैरुपलक्षितया तन्वङ्ग्यालिङ्गितः स नायकः कदा कार्तार्थ्यं कृतार्थतां लभते प्राप्स्यतीत्यन्वयः। कदा शब्दयोगे लट्। कीदृशैर्लोचनैः। अनङ्गस्य मङ्गलगृहं चासावपाङ्गश्च तस्य भङ्गिभिः प्रकारविशेषैस्तरङ्गितानि सञ्जाततरङ्गाणि तैस्तथाभूतैः। यद्वा तरङ्गितैरिति णिजन्ताद्भावे क्तः। तेनापाङ्गभङ्गीनां तरङ्गयुक्तीकरणैर्लक्षितयेति न व्यङ्ग्येत्यस्य विशेषणम्। अथवा आचारक्विबन्ताद्भावे क्तः। तेनापाङ्गभङ्गीनां तरङ्गवदाचरणैरुत्तरोत्तराविच्छेदरूपैर्लक्षितयेत्यर्थः। करणे वा तृतीया। तन्वङ्ग्यालिङ्गितः संस्तरङ्गितैः कार्तार्थ्यं कदा लभत इति। तन्वङ्ग्या तरङ्गितैर्द्वारभूतैरालिङ्गित इति वार्थ इति॥१॥

एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते।
तत् पल्लीपतिपुत्रि, कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः॥

एतदिति। पल्लीपतिपुत्र्याः कुचयुगं दिदृक्षोः कस्यचिद्विदग्धस्योक्तिरियम्। हे पल्लीपतिपुत्रि! पल्ली वीथी क्षुद्रग्रामो वा तत्स्वामिनः पुत्रि। एतद्दृश्यमानमर्थात्तव कुचयुगं पुलिन्दानां शबराणां मध्ये सुन्दरस्तस्य करस्पर्शे क्षमं योग्यं यतो लक्ष्यते, तत्तस्मात्कुञ्जराणां करिणां[३] कुलं समूहस्त्वां पत्रैरावृतमाच्छन्नं मा कृथा इति अनुनाथते याचते इत्यन्वयः। याचनाहेतुगर्भे कुञ्जरकुलविशेषणमाह-कुम्भेत्यादि। कुम्भयोर्या अभयस्याभ्यर्थना प्रार्थना तया दीनम्। तथा च कुचयोः पत्रानावृतत्वे तदा सक्तचेतसः शबरस्य मृगयावैमुख्याद भयलाभ इति भावः। तदासक्तमनसः प्रहारपाटवं न स्यादिति वा। कीदृशं कुचयुगम्। मन्दमीषत्पक्वं तेन कठिनं पाण्डुरं च यत्तिन्दुकफलं तद्वत् श्यामं उदरं मध्यभागो यस्य तथाभूतं च तदा पाण्डुरं ईषत्पाण्डुरः प्रान्तो यस्य तथाभूतम्। हन्तेति हर्षे। लक्ष्यत इत्यनेनान्वयि।

---

१. योजितं मया।
२. 'समुल्ला' 'ख' मातृकायां नास्ति।
३. 'करिणां' 'ख' मातृकायां नास्ति।

स चामयदानयोग्यत्वात्। पल्लीपतिपुत्रीत्यनेन भीतत्राणौचित्यं ध्वन्यते[४] ॥२१॥

यथाऽयं दारुणाचारः सर्वदैव विभाव्यते।

तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽयथ वा॥

यथेति। अयं यथा यादृशो दारुणाचारः दारुणः क्रूर आचार आचरणं हिंसादि यस्य तथाभूतः। सर्वदैव न कदाचिद्विभाव्यते दृश्यते तथा तदनुरूपोऽस्य दैवत उपास्यः पिशाच अथवा राक्षस इति मन्ये इत्यन्वयः। यतः तथा[५] तत इत्यर्थ इति केचित्॥३॥

तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः।

सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरम्॥

तीर्थेति। सत्कृतिः पुण्यम्। तद्वशात् सुराणां[६] स्रोतस्विनी नदी गङ्गा तां प्रति हन्ति गच्छतीत्यर्थः। शेषं स्पष्टम्[७] ॥४॥

यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन।

मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा॥

यावकेति। यावकस्यालक्तकस्य रसेनार्द्रो यः पादस्तेन यः प्रहारस्तेन शोणिता आरक्तीकृताः कचाः केशा यस्य तथाभूतेन दयितेन प्रियेण रुधिरभ्रमात्साध्वसेन भयेन तरला व्याकुला अत एव मुग्धा। विलोक्य इयं साध्वसाकुलेत्यालोच्य सहसा अप्रसाद्यैव परिचुम्बितेत्यर्थः। सहसा शीघ्रमिति वा। विलम्बे भ्रमापगमसम्भावनात्॥५॥

तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या।

प्रयान्ति तामाशुगतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः॥

तपस्विभिरिति। या गतिस्तपस्विभिः सुचिरेण चिरकालेन[८] लभ्यते। या च प्रयत्नतः प्रयत्नेन सत्रिभिः। अनेकदिनसाध्यसत्राख्ययज्ञकारिभिरिष्यते। कालान्तरभावित्वान्न पुनस्तदैव लभ्यते तां गतिं रणः सङ्ग्राम एवाश्वमेधस्तत्र पशुतां वध्यतामुपागता अतएव यशस्विनः आशु शीघ्रं प्रयान्तीत्यन्वयः[९] ॥६॥

उत्फुल्लकमलकेसरपरागगौरद्युते, मम हि गौरि।

अभिवाञ्छितं प्रसिद्ध्यतु भगवति, युष्मत्प्रसादेन॥

---

४. ''अद्यः पाङ्क्तौ शोधः अत्रनाथत इति व्याकरणं विरुद्धं वाच्युत संस्कृतिः आशिषिनाथ इति नाथतेराशिष्ये वात्मने पद विधानात्। अत्र च याचनार्थत्वात्'' इति च 'क' मातृकायामधिकम्।

५. 'यथा' इति 'ख' मातृकायामधिकम्।

६. अत्र देवतानिपुंसिवेत्या इत्यात्यनेपि पुंसि दैवत् शब्दः कविभिर प्रयुक्त इत्यप्रयुक्तत्वं दोषः। इति 'क' मातृकायाम्धिकम्।

७. 'अत्रहन् हिंसा गत्योरित्यनुशासनेपिके वलंहन्तेर्गति बोधनेऽसमर्थत्वम्। पच्छतिरित्यादिषुपदादिपदोपसंदान सापेक्षत्वात्।' इति 'क' मातृकायामधिकम्।

८. 'चिर' 'ख' मातृकायां नास्ति।

९. अत्र पशुतामित्यनुचितार्थं कातरत्वाभिव्यक्तया वर्णनीयस्या शौर्यस्यातिरस्कारात्। इति 'क' मातृकायाम्धिकम्।

उत्फुल्लेति। उत्फुल्लं विकसितं यत्कमलं तस्य केसराणां परागो धूलिस्तद्वद्गौरीद्युतिः कान्तिर्यस्यास्तथाभूतेति गौरीविशेषणम्। ममाभिवाञ्छितमिति सम्बन्धः[१०] ॥७॥

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः॥

अवन्ध्येति। दुर्योधननिग्रहाय युधिष्ठिरमुद्बोधयन्त्या द्रोपद्या इयमुक्तिः। देहिनः शत्रुमित्ररूपाः यथाक्रमः मम वन्ध्यः अनिष्फलः कोपो यस्य तथाभूतस्य। एवमापदां निहन्तुर्नाशयितुर्दातुरिति यावत्। स्वयमेव प्रयत्नं विना वश्या भवन्ति। उक्तमर्थं व्यतिरेकमुखेनापि द्रढयितुमाह–अमर्षेत्यादि। अमर्षः क्रोधः स वा बन्ध्यो बोध्यः। तच्छून्येन भवादृशेन विद्विषा शत्रुणा जनस्य अर्थाच्छत्रुरूपस्य दरो भयं न भवति। तथा जातं हार्दं स्नेहो यस्य तेन मित्रेण जन्तुना जन्तुमात्रेण अदात्रेति यावत्। जनस्यार्थात् मित्ररूपस्यादरो न भवतीत्यकारप्रश्लेषेणार्थः। भयादरयोश्चाभावकथनेन भङ्ग्यन्तरेण वश्यत्वाभाव एवोक्त इति द्रष्टव्यम्॥८॥

हा धिक! सा किल तामसी शशिमुखी दृष्टा मया यत्र सा
तद्विच्छेदरुजाऽन्धकारितमिदं दग्धं दिनं कल्पितम्।
किं कुर्मः कुशले सदैव विधुरो धाता न चेत्तत्कथं
तादृग्यामवतीमयो भवति मे नो जीवलोकोऽधुना॥

हा धिगिति। रात्रौ स्वप्ने उर्वशीं दृष्टवतः पुरुरवस उक्तिरियम्। यत्र रात्रौ सा उर्वशीरूपा शशिमुखी चन्द्रमुखी मया दृष्टा सा किल तामसी तपस्विनी कल्पितेति लिङ्गविपरिणामेन सम्बध्यते। धात्रेति विभक्तिविपरिणामेन। किलेत्यरुचावलीके वा। शशिसत्त्वे तमस्वित्वानौचित्यात्। अत एव हा इति खेदे धिगिति निन्दायाम्। तथा तस्या विच्छेदो विरहस्तद्रूपया रुजा व्याधिनान्धकारितं संजातान्धकारमिदमनुभूयमानं कालरूपं वस्तु दग्धं दुःखदायित्वेन निन्द्यं दिनं प्रकाशमयत्वेन कल्पितम्। हा धिगित्यत्रापि योज्यम्। इत्थं धाता विधिः कुशलेऽभीष्टे सदैव सर्वदैव विधुरः प्रतिकूलः किं कुर्मः। विधुरे वर्जनीयत्वादिति भावः। न चेद्विधुरः तत् तदा अधुना मे मम जीवलोकः जीवनाखिल लोकः। कालस्तादृक् यामिनीमयः पूर्वोक्तप्रियादर्शनयुक्तरात्रिस्वरूपः कथं नो न भवतीत्यर्थः। कल्पितेत्यत्र मयेत्यस्य कर्तृत्वेनान्वयप्रदर्शनन्तु केषाञ्चिदविचारितरमणीयमेवेति। किल सम्भाव्य वार्तयोः हेत्वरुच्योरलीके चेति हैमः[११] ॥९॥

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः।

---

१०. "अत्र हि शब्दो निरर्थकः छन्दः पूरणमात्रप्रयोजनकत्वात्" इति 'क' मातृकायामधिकम्।
११. 'अत्र दिन पदंविवक्षि प्रकाशमयत्वविशिष्टा वाचकम्' इति 'क' मातृकायामधिकम्।

भर्त्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ।।

जङ्घेति। भर्तुः शिवस्य नृत्तानुकारेताललयाश्रितनर्त्तनानुकरण[१२] दशायां भवान्या अभिनवः इदंप्रथमतया नृत्यप्रवृत्तो दण्डपादः प्रसह्योर्ध्वीकृतोऽत एव दण्डाकारः पादो जयतीति सम्बन्धः। "नृत्यं पदार्थाभिनयो नृत्तं ताललयाश्रितम्" इति सङ्गीतरत्नाकरः। प्रसह्योर्ध्वीकृतः पादो दण्डपादोऽभिधीयत इति च। कीदृशः। निजा भवानीसम्बन्धिनी तनुरेव स्वच्छा लावण्यस्य वापी तत्सम्भूतं यदम्भोजं तस्य शोभां विदधत् विशेषतो विभ्रदित्यर्थः। एतदेव विशेषणचतुष्टयेन समर्थयति जङ्घत्यादिना। जङ्घाकाण्डमेवोरु महन्नालं यत्र। जङ्घाकाण्डं चोरुश्च तयोः समाहारो जङ्घाकाण्डोरु तदेव नालं येत्रेति वार्थः। एवं नखकिरण एव लसन्ति केसराणि तेषामाल्या पङ्क्त्या करालो दन्तुरः प्रत्यग्रस्यार्द्रस्यालक्तकस्य आभानां कान्तीनां[१३] प्रसरा एव किसलयानि नवपत्राणि यस्य स तथाभूतः। किसलयपदस्य पद्मपत्रेऽपि गौण्या प्रयोगः। मञ्जु मनोज्ञं मञ्जीरं नूपुरमेव भृङ्गो यत्र स इति। एवं च सत्युपमानधर्मस्याम्भोजशोभाया दण्डपादे समारोपः समर्थितो भवति, ज्योत्स्नाभस्मेत्यादिरूपकैरिव रात्रौ कापालिकीसमारोपः। तत्र प्रधानीभूतस्यारोपस्योपमानारोपरूपत्वाद्रूपकत्वम्। इह तु तदभावान्निदर्शनारूप इत्येतावान्परं[१४] विशेषः, न चोपमानाप्रसिध्योपमायाः कल्पनासभ्वात्कथमेषा निदर्शनेति वाच्यम्? वस्तुतोऽप्रसिद्धावपि कविसमयप्रसिद्धिबलेन बहुश उपमानदर्शनात्। तथा च राघवपाण्डवीये तदा तदा लोकनतत्पराणां मुखैर्वधूनां निचिता गवाक्षाः। विकासि हेमाम्बुजनिर्भरणां सरोवराणां समतामवापुरिति हेमाम्बुजव्याप्तानि सरोवराणि कविसमयप्रसिद्धान्याश्रित्य तदुपमया वधूमुखैर्व्याप्तेषु गवाक्षेषु उक्ता। निष्पेतुरास्यादिवतस्प्रदीप्ताः शराधुनर्मण्डलमध्यमाजः। जाज्वल्यमाना इव वारिधारादिनार्द्धभाजः परिवैषिणोर्कात्। इत्यत्र तु मध्याह्नार्कान्निष्तन्तीनां जाज्वल्यमाना इव वारिधाराणां कविसमयप्रसिद्धिरपि नास्तीति नोपमानिर्वाहः। एवं च स्वच्छलावण्यमिव या ऽन्यत्र प्रसिद्धा वापी तत्सम्भूताम्भोजशोभामिति क्लिष्टकल्पनयोपमानप्रसिद्धिसम्पादनं महेशोक्तं नादरणीयम्। यत्तु तेनोक्तं पद्मतुल्यशोभेवति अनम्भोजे दण्डपादेनालादिरुपकं बाधितमतो जङ्घाकाण्डमुरुनालमिव। यत्रेत्येवं पुरुषव्याघ्रो देश इतिवदुपपमितसमासगर्भबहुब्रीहिणा व्याख्येयमिति। तदयुक्तम्- उपमाया व्यङ्ग्यत्वेन प्राथमिकबोधा विषयत्वात्। तद्विषयीभूताम्भोज शोभावत्त्वस्य समर्थनाय नालादिरुपणस्यापेक्षिततत्वादित्यलं विस्तरेण[१५] ॥१०॥

---

१२. नर्तनानुकरण 'स्थाने' नृत्तानुकरण 'क' मातृकायाम्।

१३. 'कान्तीनां' इति 'ख' मातृकायां नास्ति।

१४. 'त्वं' इति 'ख' मातृकायामधिकम्।

१५. "अत्र निज पर्द विवक्षितां पार्वतीं सनुं न वोधयतिः निजादिपदानां स्व वाक्य मुख्य विशेष्य गामित्यस्य व्युत्पत्ति सिद्धत्वात्।" इति पदं 'क' मातृकायामधिकम्।

साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम्॥

साधनमिति। यस्य राज्ञः सुमहत्साधनं सैन्यं विलोक्यते। यदन्यस्य न विलोक्यते असाधारणमित्यर्थः। तस्य धीशालिनो नीतिज्ञस्यारालितां कोपेन कुटिलीकृतां भ्रुवं कोऽन्यः सहेतेत्यर्थः। अत्र साधनशब्दः पुंव्यञ्जनरूपार्थान्तरोपस्थापकतया व्रीडादायी॥११॥

लीलातामरसाहतोऽन्यवनितानि शङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्ततयाथ वा नतिमृते तेनानिशं चुम्बिता॥

लीलेति। अन्यस्य वनितया न त्वन्यया वनितया तदैव क्रोधातिशयात्। निःशङ्कं दष्टोऽधरो यस्य तथाभूतः कश्चिल्लीलार्थेन तामरसेन कमलेनार्थात् स्ववनितया आहत : सन् केसरैस्तल्लग्नपरागैर्दूषिते आकुलिते ईक्षणे यस्य तथाभूत इव च्छलेन नेत्रे व्यामील्य स्थितः ततः तदीय धूर्त्तत्वानभिज्ञतया कुड्मलितेन तदाकारीकृतेनाननेन तस्य नायकस्य। तत्रेति पाठे नेत्रेयोः वायुं फूत्कारं ददती स्थिता सा मुग्धा तेन नायकेन नतिमृते प्रणामं विनैव अनिशं चिरं चुम्बिता तत्र हेतुः। भ्रान्त्या धूर्त्ततयाऽथवेति। अस्याः कोपोऽपगत इति भ्रान्तिः। कोपानपगमेऽपि सापराधत्वदशायामपि निराबाधं चुम्बेयमिति धूर्त्तता। दीपिकाकारस्तु नतिं[१६] विनैव यच्चुम्बनं पत्रप्रयोजकसन्देहस्तत्र भ्रान्तिर्मुग्धायाः नेत्रयोर्दूषितत्वज्ञानरूपा। धूर्त्तता तु नायकस्य स्फुटैव। यद्यप्युभयोरपि प्रयोजकत्वाद्विकल्पः, सन्देहो वा न युज्यते तथाप्यन्यतरस्य प्राधान्यविवक्षया तदुपपत्तिरित्याह–अन्ये तु। भ्रान्त्या अथवा धूर्त्ततया वायुं ददती स्थितेत्यन्वयमाहुः। एतन्मते तु धूर्त्ततया तथा स्थितायानतिं विना चुम्बनाभिधानस्य निरभिप्रायकत्वं दोषः। यत्तु भ्रान्त्या नेत्रनिमीलने अग्रे कान्तामुखसत्त्वेऽपि तद्भावभ्रान्त्येति व्याख्यानं तदभिप्रायं न विद्मः। नहि तथाविधभ्रान्तेरनिशचुम्बने हेतुत्वं कथमपि सम्भावयितुं शक्यते। अत्र च तमृते परमात्मानम्। पुरुषाराधनमृते इत्यादि विशिष्टप्रयोगदर्शनादृतेशब्दयोगेऽपि द्वितीयो न विरुध्यते[१७]॥१२॥

मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोऽद्य जातः।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे क हरेदेष बर्ही॥

मृद्विति। विक्रमोर्वशीये उर्वशीविरहिणः पुरुरवस उक्तिरियम्। मृदुना मन्देन पवनेन विभिन्नो विकसितः घनो निविडश्चासौ रुचिश्चासौ कलापो मयूरपिच्छम्। मत्प्रियाया

---

१६. 'नतिं' स्थाने 'नीतं' 'ख' मातृकायाम्।

१७. "अत्र वायु शब्दोः पानवायुस्मारकतया जुगुप्सादायी" इति पदं 'क' मातृकायामधिकम्।

उर्वश्या विनाशाददर्शनाद् अद्य निःसपत्नः सदृशरहितो जात इत्यन्वयः। सुकेश्याः शोभनकेशाया उर्वश्याः केशपाशे सत्येष बर्ही मयूरः कं हरेदनुरञ्जयेन्नाकमपीत्यर्थः। विस्तृतकलापसाम्याय विशिनष्टि रतीति। रतौ विलुलितः शिथिलो बन्धो यस्य तथाभूते। तथा कुसुमैः सनाथे युक्ते तेन चन्द्रकसाम्यम्। बर्हः इति त्वपपाठः। पिच्छबर्हे नपुंसके इत्यनुशासनात्। एवं चैतत्पाठानुसारिघनरुचिरेत्यादौ कलापपदम्बर्हावयवपक्षपरन्तेन भेदादबहुब्रीहिरिति महेश व्याख्यानमनादेयम्[१८] ॥१३॥

आलिङ्गितस्तत्र भवान् सम्पराये जयश्रिया।
आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु॥

आलिङ्गित इति। सम्पराये युद्धे जयश्रियालिङ्गितस्तत्रभवान्पूज्यः त्वमाशीः परम्परामाशीर्वादपरम्पराम्। अर्थाज्जितशत्रुप्रयुक्तां कर्णे कृत्वा आकर्ण्य कृपां कुर्विति सम्बन्धः। तत्र सम्पराय इति वा। अत्र बवयोरभेदाद्वन्दनीयामित्यर्थकवन्द्याशब्दस्य द्वितीयान्तं रूपम्। किं वा गृहीतमहिलायामिति कृपाविषयसमर्पकं बन्दीशब्दस्य सप्तम्यन्तमिति सन्देहः ॥१४॥

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः।
विधीयमानमप्येतन्न भवेत्कर्म बन्धनम्॥

सम्यगिति। सम्यग्ज्ञानं तत्त्वज्ञानमेव महाज्योतिस्तेन दलितो नाशित आशयो मिथ्याज्ञानवासना यस्य तत्ताजुषो नरस्य विधीयमानं क्रियमाणमप्येतत्कर्म विहितनिषिद्धरूपं बन्धनं बन्धजनकं न भवेदित्यर्थः[१९] ॥१५॥

राकाविभावरीकान्तसंक्रान्तद्युति ते मुखम्।
तपनीयशिलाशोभा कटिश्च हरते मनः॥

राकेति। राका पूर्णचन्द्रा पूर्णिमा तत्संबन्धी यो विभावरीकान्तश्चन्द्रस्तस्य संक्रान्ता द्युतिर्यत्र तथाभूतं तव मुखम्। तपनीयस्य सुवर्णस्य शिलायाः शोभा यत्र। सा कटिर्नितम्बश्च मनो हरत इत्यन्वयः[२०] ॥१६॥

शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम्।
करोति ते मुखं तन्वि चपेटापातनातिथिम्॥

शरदिति। हे तन्वि! ते तव, मुखं कर्तृशरत्काले समुल्लासीयः पूर्णिमासम्बन्धी शर्वरीप्रियश्चन्द्रस्तं[२१] चपेटापातनस्य करतलप्रहारस्यातिथिं पात्रं करोतीत्यन्वयः। अत्र मुख्यार्थबाधाच्चपेटाशब्देन निर्जितत्वं लक्ष्यते। तथा च निर्जितत्वस्य पातनं[२२] सम्बन्धस्तत्पात्रं

---

१८. 'अत्र विलाश शब्दो ऽमङ्गल व्यञ्जकतया ऽश्लीलः' इति पदं 'क' मातृकायामधिकम्।

१९. 'अशाशय शब्दो मिथ्यो ज्ञान वासनायां योग शास्त्र मात्रे प्रयुक्त इत्यप्रतीतत्वम्' इति पदं 'क' मातृकायामधिकम्।

२०. 'अत्र कटि शब्दो ग्राम्यः पामर साधारण्येन प्रयुज्यमानत्वात्' इति 'क' मातृकायामधिकम्।

२१. 'प्रिय' स्थाने 'ईश्वर' 'क' मातृकायाम्।

२२. 'यदा' इति 'ख' मातृकायामधिकम्।

करोतीत्यर्थः पर्यवस्यति[२३] ॥२३॥

अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः।
सदृशं शोभतेऽत्यर्थं भूपाल, तव चेष्टितम्॥

अत्रीति। हे भूपाल! तव चेष्टितं चरित्रम्। अत्रेर्मुनिविशेषलोचनात्सम्भूतं यत् ज्योतिश्चन्द्ररूपं तस्योद्गमेनोदयेन भासनशीलैरर्थात्कुमुदैः सदृशं अत्यर्थमतिशयेन शोभत इत्यर्थः[२४] ॥१८॥

मूर्ध्नामुदवृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः॥

मूर्ध्नामिति। रामसेनया लङ्कायां वेष्टितायां रावणस्योक्तिः। मम मूर्ध्नां दोष्णां हस्तानां च इहास्मिन् वानरापादानके नगरीरक्षणे यत्प्रयासः एतदेव फलं किमित्यन्वयः। किमित्यनेनोक्तमनौचित्यं समर्थयितुं मूर्ध्नो दोष्णां च क्रमेण विशेषणद्वयमाह उद्धृत्तेत्यादिना। उद्धृतमुद्धतं यत्कृत्तं कर्त्तनं तेनाविरला सान्द्रा गलाद्गलन्ती या रक्तस्य संसक्ता अविच्छिन्ना धारा तया धौतौ प्रक्षालितौ यौ इशान्घ्री शिवचरणौ तत्प्रसादेनोपनतो लब्धो यो जयस्तेन जगति जातो मिथ्याभूतो महिमा येषामिति मूर्धविशेषणम्। कैलासस्य उल्लासने उद्धरणे या इच्छा तस्या व्यतिकरस्य सम्बन्धस्य पिशुनः सूचकश्चासौ उत्सर्पी उत्कटोदर्पस्तेनोद्धुराणां समर्थानामिति दोष्णां विशेषणम्। कैलासेन विमानगतिनिरोधे तमुद्धर्तुमान्दोलितवान् रावण इति पुराणकथा। तथा चैवंविधानामेतत्फलमनुचितमित्यतो महिमा मिथ्येति। मिथ्यात्वस्य विधेयत्वं विवक्षितम्। अतएव समासेन गुणीभावेन दत्तनिर्वाहादविमृष्टविधेयांशत्वदोषः। अर्वाचीनास्तु मूर्द्धामित्यस्य सान्निध्यात्कृतेनोवान्वयो न तु किमेतत्फलमित्यनेनापि। अनुषङ्गकल्पनापत्तेः कृतानान्वयप्राप्तमहिमत्वाभावेन विशेषणानुपपत्तेश्च। एवञ्च विशेषणद्वयमपि दोष्णामेव। दोष्णामेषामित्येव च पाठः। दोष्णां येषामिति पाठस्तूक्तदोषाद्धेय[२५] इत्याहुः। तदयुक्तम्[२६]। तात्पर्यग्राहकचकारसत्त्वेनानुषङ्गस्य प्रामाणिकत्वात्। कृतानामेव मूर्ध्ना पुनरारोपणेन द्वितीयदूषणस्याप्यभावात्। साजात्येनापि तथाव्यपदेशसम्भवाच्च॥१८॥

स्रस्तां नितम्बादवरोपयन्ती पुनःपुनः केसरदामकाञ्चीम्।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य॥

स्रस्तामिति। कुमारसम्भवे कामस्य हरं प्रत्यभियोगे सहायभूतां पार्वतीमदृश्यत

---

२३. 'एवं च रूढि प्रयोजनान्यतरविरहेरगानिषिद्ध लाक्षणिकत्व रूपनेयार्थम्।' इति पदं 'क' मातृकायामधिकम्।
२४. 'अत्र पूर्वाद्धिन कुमुद रूपार्थो वाधेक्लेशात् क्लिष्टत्वम्' इति पदं 'क' मातृकायामधिकम्।
२५. 'दोष' स्थाने 'छेप' इति 'क' मातृकायाम्।
२६. तदयुक्तम्–तात्पर्यग्राहक चकारसत्वेनानुषङ्गस्य प्रामाणिकत्वात्। इति 'क' मातृकायां नास्ति।

स्थावरराजकन्येति कुलकादिनोपक्रम्यैतत्पद्यम्। किम्भूता? स्थावरराजकन्या। नितम्बात्स्त्रस्तां विगलितां केसरो बकुलस्तत्सम्बन्धिपुष्पमालारूपां काञ्चीं पुनः पुनः बारम्बारमवरोपयन्ती नितम्बे निवेशयन्ती। कामिव? स्मरेण न्यासीकृतां निक्षेपीकृतां कार्मुकसम्बन्धिनीं द्वितीयमौर्वीमिव। अत्रैव किमिति न्यस्तानान्यत्रेत्यत आह-स्थानविदेति। आश्रयसाद्गुण्येन गुणप्रकर्षवत्वादिन्ये। तदेव स्थानं समर्पणयोग्यमिति जानतेत्यर्थः। स्वास्त्रभूता पार्वती स्वीयमौर्वीस्थापनस्थानमित्येवं जानतेत्यर्थ इत्यन्ये। अन्ततोत्धनयैव वशीकरिष्यामीति जानतेत्यर्थ इत्यपरे[२७] ॥२०॥

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि, मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥

वपुरिति। तत्रैव वटुवेषधारिणः शिवस्य पार्वतीं प्रति वचनम्। भो बालमृगाक्षि! वरेषु यत् रूपकुलधनादि समस्तं मृग्यतेऽन्विष्यते। त्रिलोचने हरे तद्व्यस्तमेकैकमपि किमस्ति। अपि तु नेत्यर्थः। भो बाल मृगाक्षीतिसम्बोधनेनैवंविधसौन्दर्यशालिन्यास्तव विरूपवरप्रार्थनमनुचितमिति व्यज्यते[२८]। एकैकस्याप्यभावं दर्शयति वपुरित्यादिना विरूपाणि विषमाणि सोमसूर्याग्निरूपत्वात्। भीषमणानि वाक्षीणि यस्य तथाभूतं वपुः। विरुद्ध रूपं सर्पकपालादिवेषोऽस्थीनि च यस्येति केचित्। अलक्ष्यमज्ञेयं जन्म यस्य तस्य भावस्तत्ता। अस्तीति शेषः। दिगम्बरत्वेन नग्नतया वसु धनं निवेदितं कथितमित्यर्थः। दीपिकाकृतस्तु-यत् त्रिलोचने अस्ति। तद् व्यस्तमपि किं वरेषु मृग्यते इत्यन्वयो युक्तः। यथास्थितान्वये तु रूपाभावादेः स्पष्टतयोपन्यासो न युज्यत इत्याहुः[२९] ॥२१॥

आनन्दसिन्धुरतिचापलशालिचित्त-
सन्दाननैकसदनं क्षणमप्यमुक्ता।
या सर्वदैव भवता तदुदन्तचिन्ता-
तान्तिं तनोति तव सम्प्रति धिग् धिगस्मान्॥

आनन्देति। विरक्तं नायकं प्रति नायिकासखीनामियमुक्तिः, या ऽस्मात्सखी भवता सर्वदैव क्षणमप्यमुक्ता। न-त्यक्ता। तस्या उदन्तो वर्त्ता तच्चिन्तापि तव सम्प्रत्यधुना तान्तिं ग्लानिं तनोति। वैराग्यादतोऽस्मान् धिक् धिक्। एवंविधसखीदुःखदर्शित्वात्। अतिशोच्या वयमित्यर्थः। किम्भूता सखी। आनन्दस्य सिन्धुः समुद्रः। अतिचापलशालिनश्चित्तस्य संदाननं बन्धनं तस्यैकं सदनं स्थानम्। तत्रैव चित्तस्य विश्रामन्तिरिति। सीतावार्ताज्ञानदुःखितं रामं प्रति लक्ष्मणस्येयमुक्तिरिति केचित्। तन्मते यथापूर्व क्षणमपि न वियोगस्तद्वार्तापि साम्प्रतं

---

२७. 'अत्र न्यासी करणौचित्ये नयर्थवसान गत्य द्वितीयत्वस्यैवोछयोणीयत्वात्तस्य च समासे गुणीभावाद् विधेयत्व दोषः' इति पदं 'क' मातृकायामधिकम्।

२८. 'इति व्य' इति 'क' मातृकायां नास्ति।

२९. ''अत्र जन्य निधिशितम् लक्ष्यत्वं समासेगुणीभूतम्'' इति पदं 'क' मातृकायामधिकम्।

दुर्लभेति प्रतीकारासमर्थास्मान् धिगित्यर्थः[३०] ॥२२ ॥

नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न तस्य शरासनम्।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी ॥

नवेति। विक्रमोर्वशीये विरहिणः पुरुरवस इयमुक्तिः। अयं नवो जलधरः सन्नद्धः कवची हन्तुमुद्यतो वा दृप्तनिशाचरो न भवतीति शेषः। एवमग्रेऽपि। विशेषदर्शनेन पूर्व-संजातभ्रमविषयनिषेधो नञो गम्यमानभवनक्रियान्वयात् द्रष्टव्यः। इदं सुरधनुः इन्द्रधनुः दूरमाकृष्टं तस्य राक्षसस्य शरासनं न। नामेति पाठे नाम वितर्के। अयमपि पटुस्तीव्रो धारासारो धारावर्षः बाणपरम्परा न। कनकस्य निकषः कषणरेखा तद्वत् स्निग्धा दीप्तिमती विद्युत् मम प्रियोर्वशी न भवतीत्यर्थः। केचित्तु नञ काक्वा तत्तदारोपपर्यवसितानेव वाक्यार्थानाहुः ॥२३ ॥

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुश्चाददे सोऽर्थानसक्तः सुखमन्वभूत् ॥

जुगोपेति। अगृध्नुः अलुब्धः। असक्तोऽनासक्तः शेषं स्पष्टम्[३१] ॥२४ ॥

सुधाकरकराकारविशारदविचेष्टितः।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥

सुधेति। सुधाकरश्चन्द्रस्तस्य कराः किरणास्तदाकारं निर्मलतया तत्सदृशं विशारदं प्रगल्भं च विचेष्टितं यस्य सः। आकारस्य विशारदं विज्ञात आश्रय इति यावदिति दीपिकायाम्। असौ एकः अकार्यमित्रं कार्ये उपाधौ मित्रं कार्यमित्रम्। पश्चान्नञ्समासेन कार्यनिरपेक्षं मित्रमित्यर्थः। तस्य किं वर्णयामहे अर्थात् गुणान् विद्वत्सु प्रगल्भौ विशारदावित्यमरः[३२] ॥२५ ॥

चिरकालपरिप्राप्तलोचनानन्ददायिनः।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥

चिरेति। कान्ता चिरकालात् या परिप्राप्तिः समागमस्तेन लोचनयोरानन्ददायिनः कान्तस्य गलग्रहं गलस्य ग्रहो ग्रहणमालिङ्गनं विदधातीत्यन्वयः। अत्र गलग्रहशब्दो रोगविशेषोपस्थापकतया विरुद्धमतिकृत् ॥२६ ॥

न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मनः
तेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः।

---

३०. अप्रामुक्तेपि पकुदास प्रतीनत् विधेयस्य मुक्तानेति प्रसज्य प्रतिषेधस्येत्यविमृष्टविधेयांशत्वदोषः प्रसज्यप्रतिषेधं मुदा हृत्पदर्शयति इति पदं 'क' मातृकायामधिकम्।

३१. 'अत्रात्रस्तता धनुवादेनात्यगोपनादेविधेयत्वात्पर्युदासेऽपि मृष्टाविधेयोशत्व दोषः' इति 'क' मातृकायामधिकम्।

३२. 'अधत्राकर्त्ये मित्रमितिविरुद्धमतिकृत्' इति 'क' मातृकायामधिकम्।

तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः

स्कन्दः स्कन्द इव प्रियोऽहमथवा शिष्यः कथं विस्मृतः ॥

न त्रस्तमिति। दाशरथिमुद्दिश्य परशुरामोक्तिः। धनुर्व्यारुजता भञ्जता तेन प्रकृतेन दाशरथिना यदि नाम भगवतो मम भवानीपतेर्न त्रस्तं भीतम्। तत्पुत्रस्तु स्कन्दोऽथवा स्कन्द इव प्रियोऽहं शिष्यः कथं विस्मृतः इत्यन्वयः। यदिनामशब्दोऽखण्डः सम्भावनायां एतत्सम्भाव्यमित्यर्थः। यः कोपात्तेनेति विशिष्य नामाग्रहणम्। भवानीपतेरत्रासे हेतुगर्भे विशेषणम्-भूतेत्यादि। भूतेषु यः करुणासन्तानः कृपासमूहस्तेन शान्त आत्मा यस्य तथाभूतात्। मदान्धो यस्तारकासुरस्तस्य वधाद्विश्वस्य देवगणस्य दत्त उत्सवो येनेत्युत्कर्षगर्भं स्कन्द विशेषणम्। स्कन्द इव प्रिय इत्यनेन[33] धनुर्भङ्गोपेक्षासम्भावनाविरहसूचनम्। अहमित्यनेन क्षत्रियकुलान्तकृत्वसङ्क्रमितवाच्येन[34] धनुर्भङ्गकर्त्तुः साहसकारित्वातिशयो व्यज्यते[35] ॥२७॥

गोरपि यद्वाहनता प्राप्तवतः सोऽपि गिरिसुतासिंहः।

सविधे निरहङ्कारः पायाद्वः सोऽम्बिकारमणः॥

गोरपीति। सः अम्बिकाया रमणो महेशः वो युष्मान् पायादित्यन्वयः। स कः यद्वाहनतां प्राप्तः तस्य गोर्वृषस्यापि सविधे निकटे सोऽपि अतिक्रूरतया प्रसिद्धोऽपि गिरिसुतायाः पार्वत्याः सिंहो निरहंकारः सौम्यो भवतीति शेषः[36] ॥२८॥

सा दूरे च सुधासान्द्रतरङ्गितविलोचना।

बर्हिनिर्ह्रादनार्होऽयं कालश्च समुपागतः॥

सेति। विरहिणो रामस्येयमुक्तिः। सुधायाः सान्द्रास्तरङ्गाः सुधासान्द्रतरङ्गाः सञ्जाता ययोस्तथाविधे विलोचने यस्याः सा सीता दूरे स्थितेति विशेषः। अयं बर्हिणां मयूराणां यन्निर्ह्रादनमव्यक्तशब्दस्तर्दस्तद्यौग्यः कालो घनसमय एव कालोऽन्तकश्च समुपागत इत्यन्वयः[37] ॥२९॥

सोऽध्यैष्ट देवांस्त्रिदशानयष्ट पितृनतार्प्सीत् साममंस्त बन्धून्।

व्यजेष्ट षडवर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च॥

सोध्यैष्टति। भट्टिकाव्यगतमिदं पद्यम्। स राजा दशरथः वेदानध्यैष्टाधीतवान्। त्रिदशान्

---

३३. ''भूतेषु यः करुणासंतानः कृपासमूहस्तेन शान्त आत्मायस्य तथाभूतात्। मदान्धोयस्तारकासुरस्तस्य वय'' इति पदं 'क' मातृकायामधिकम्।

३४. 'सङ्क्रमित वाच्ये' 'क' मातृकायां नास्ति।

३५. 'अत्र भवानीपतेरिति विरुद्धमतिकृत भवस्त्रीपतिरित्यर्थकादस्मात्पत्यन्तरप्रतीतेः इति पदं 'क' मातृकायामधिकम्।

३६. 'अत्राम्बिकाया मातू रमण इति विरुद्धं प्रतीयते' इति पदं 'क' मातृकायामधिकम्।

३७. अत्र समासगतं श्रुति कटुत्वम्। एवमितरेषामपि समासगतत्वं बोध्यम्। च्युतसंस्कृतसमर्थ निरर्थकान-पास्योक्तदोषान् वाक्यगतत्वेनोदाहरति इति पदं 'क' मातृकायामधिकम्।

देवानयष्ट अपूजयत्। पितृनतार्प्सीदतर्पयत्। अपारिदिति पाठेऽप्ययमेवार्थः। पृ तर्पणे इति धात्वनुसारात्। बन्धून्सममंस्त। सम्मानितवान्। षड्वर्गं कामक्रोधलोभमोहमदमात्सर्याणां षण्णां वर्गं समुदायं व्यजेष्ट विजितवान्। नीतो अरंस्त रेमे अरीन् समूलघातं न्यवधीच्च। समूलं हतवानित्यर्थः[३८] ॥३०॥

स रातु वो दुश्च्यवनो भावुकानां परम्पराम्।
अनेडमूलकताद्यैश्च द्यतु दोषैरसम्मतान्॥

स रात्विति। स प्रसिद्धो[३९] दुश्च्यवन इन्द्रो वो युष्माकं भावुकानां मङ्गलानां परम्परां रातु ददातु। च परं असम्मतान् शत्रून् अनेडमूकताद्यैर्मूकबधिरताद्यैर्दोषैः करणभूतैर्द्यतु खण्डयतु नाशयत्वित्यर्थः। अनेडमूक उद्दिष्टः शठे वाक् श्रुति वर्जिते इति मेदिनी। यत्तु न एडमूकः बधिरो यस्मादिति व्युत्पत्तिप्रदर्शनं तद्भ्रान्ति विलसितम्। एडमूकशब्दस्यापि मूकबधिरे शक्तत्वात्। एडमूकः स्मृतोधीरैः शठे वाक् श्रुतिवर्जित इति विश्वकोशात्।[४०] ॥३१॥

सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः।
अब्जरुचिभास्वरस्ते भातितरामवनिप, श्लोकः॥

सायकेति। हे अवनिप! राजन्! ते तव श्लोको यशः अब्जस्य चन्द्रस्य रुचिवद्भास्वरो भातितरां शोभतेतरामित्यन्वयः। कीदृशस्य सायकः खड्गः सहायो यस्य तथाविधो बाहुर्यस्य तथाभूतस्य मकरध्वजेन समुद्रेण नियमिता परिच्छिन्ना या क्षमा भूमिस्तस्या अधिपतेः सार्वभौमस्येत्यर्थः। अत्र सायकमकरध्वजक्षमाब्जश्लोकशब्दानां शरमदनक्षान्तिपद्मपद्येषु प्रसिद्धबाहुल्यात्प्रकृतार्थतिरोधानम्। सायकः शरखड्गयोरिति विश्वः ॥३२॥

कुविन्दस्त्वं तावत्पटयसि गुणग्राममभितो
यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह॥

कुविन्द इति। राजानं प्रति कवेरुक्तिः। हे विभो! त्वं तावत् कुविन्दः कुं पृथ्वीं विन्दति लभते इति कुविन्दो लब्धपृथ्वीकः। अभितः समन्तात् गुणानां शौर्यादीनां ग्रामं समूहं पटयसि पटूकरोषि। अतएव[४१] एते नग्ना वन्दिनो दिशि दिशि तव यशो गायन्ति, तथापि एवंविधे वैभवे सत्यपि त्वत्कीर्तिस्त्री इह लोके विगतमाच्छादनमावरणं यत्र तथा भ्रमतीति व्याजस्तुतिः। कुरुपत्वादुपेक्षामाशङ्क्य परिहरति-शरदिति। शरत् ज्योत्सनावत् गौराणि स्फुटानि दृश्यानि विकटानि सुन्दराणि यानि सर्वाङ्गानि तैः सुभगा सुन्दरीत्यर्थः।

---

३८. 'अत्र अनेकपदगतत्वेन श्रुतिकटुत्वस्य वाक्यदोषत्वम्। एवमन्येषामपि' 'इति पदं' 'क' मातृकायामधिकम्।

३९. 'स प्रसिद्धो' इति 'ख' मातृकायां नास्ति।

४०. अत्र दुश्च्यवनानेडमूकशब्दावप्रयुक्तौ इति पदं 'क' मातृकायामधिकम्।

४१. 'रच्यापयसीयावतियावत्' इति पदं 'क' एवं 'ख' मातृकायामधिकम्।

अत्र कुविन्दस्तन्तुवायस्त्वं गुणग्रामं तन्तुसमूहमभितः सव्यापसव्यतुरीचालनेन पटयसि पटं करोषि। अतएव त्वत्तो लब्धवस्त्रा एते नग्ना वस्त्रहीना दिशि दिशि तव यशो गायन्ति तथाप्येवं वस्त्रसमृद्धावपि त्वत्कीर्त्तिरूपा स्त्री विगताच्छादनं वस्त्ररहितं भ्रमतीत्यर्थान्तरं स्तूयमानस्य राज्ञोऽपकर्षगमकं प्रतीयत इत्यनुचितार्थत्वम्[४२] ॥३३॥

प्राभ्रभ्राड्विष्णुधामाप्यविषमाश्वः करोत्ययम्।

निद्रां सहस्रपर्णानां पलायनपरायणाम्॥

प्राभ्रेति। अयं विषमाश्वः। विषमसंख्या अश्वा यस्य सः सप्ताश्वः सूर्य इति यावत्। विष्णुधाम विष्णुपदमाकाशमाप्य प्राप्य सहस्रं पर्णानि पत्राणि येषां तेषां कमलानां निद्रां संकोचं पलायनतत्परां करोति पद्मानि विकासयतीत्यर्थः। कीदृशं विष्णुधाम, अभ्रे भ्राजत इत्यभ्रभ्राड्। जलदः प्रकृष्टोऽभ्रभ्राड् यत्र[४३] तथाभूतं प्राभ्रभाट्शब्दः। प्रकृष्टजलदत्वेन प्रकारेणावाचक इति प्रदीपकृतः। तेषामत्रेत्यादिप्रकाशग्रन्थे प्राभेत्यनन्तरं भ्राडिति पाठश्चण्डीदासोक्तः सम्मतः। यथास्थितपाठे तु प्राभ्रशब्दस्य प्रकृष्टजलदवाचकत्वं गम्यते। तत्रोपपत्तिं केचिदेवमाहुः। प्रादयो[४४] गताद्यर्था इत्यनुशासनात्प्रगताभ्रस्यैव बोधो न प्रकृष्टाभ्रस्येति। अन्ये पुनर्नामपदपूर्ववर्तिनः प्रशब्दस्य नामार्थतावच्छेदकनिष्ठप्रकर्ष बोधकत्वमेव। यथा प्रखलः प्रमधुर इत्यादौ, न तु नामार्थगतप्रकर्षबोधकत्वमित्याहुः। तदुभय-मप्यसत्। प्रशमप्रबलादिशब्दानां प्रकृष्टशमवलादिरूपार्थबोधकानां निरङ्कुशकविभिः प्रयुज्यमानानां दर्शनात्। अनुशासनेऽप्यादिपदसत्त्वेन विरोधाभावात्। तस्मात्प्रदीपकृतां व्याख्यैव रमणीयेत्यलं पल्लवितेन॥३४॥

भूपतेरुपसर्पन्ती कम्पना वामलोचना।

तत्तत्प्रहरणोत्साहवती मोहनमादधौ॥

भूपतेरिति। भूपतेः कम्पना सेना उपसर्पन्ती आगच्छन्ती वामं भ्रुकुटिविषमं लोचनं यस्याः तादृशी। तत्तत्प्रहरणैः शस्त्रैरूत्साहवती च मोहनं व्याकुलीभावमर्थाच्छत्रूणामादधौ चकारेत्यर्थः। अत्र रमणायोपगच्छन्ती कम्पयुता सुन्दरलोचना तत्तत्प्रहरणैः कामशास्त्रोदितजघनादिताडनैरू त्साहवती मोहनं सुरतमादधादवित्यर्थान्तरं व्रीडाजनकमं प्रतीयते॥३५॥

तेऽन्यैर्वान्तं समश्नन्ति पटोत्सर्गञ्च भुञ्जते।

इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्त्तनम्॥

तेऽन्यैरिति। येषां कवीनामितरार्थग्रहे इतरनिबद्धार्थग्रहे प्रवर्त्तनं प्रवृत्तिः स्यात्तेऽन्यैर्वान्तं छर्दितं समश्नन्ति भक्षयन्ति परेषामुत्सर्गं पुरीषं च भुञ्जते इत्यन्वयः। अत्र प्रवर्तनशब्दः

---

४२. 'अनुचितार्थत्वम्' स्थाने 'अनुचितार्थत्वात्'। 'क' मातृकायाम्।

४३. 'अत्र' 'क' एवं 'ख' मातृकायामधिकम्।

४४. 'प्राद' स्थाने 'शरद' 'ख' मातृकायाम्।

पुरीषोत्सर्गरूपमर्थान्तरं जुगुप्सितं व्यञ्जयति ॥३६॥

पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम्॥

पितृवसतिमिति। शोकपीडितायाः कस्याश्चिदियमुक्तिः। अहं परिवारजनेन सह तां पितुर्वसतिं गृहं व्रजामि गच्छामि। यत्र पितृवसतौ पावकान्वये पवित्रे वंशे पावकानां पावित्र्यकारकाणां पित्रादीनामन्वये सम्बन्धे सतीति वा हृदयं न शेषितं शोकरूपं शल्यकं कुत्सितं शल्यं यस्य तथाभूतं सपदि तत्कालं भवतीत्यन्वयः। अत्र पितृवसतिपावकान्वय-शब्दौ श्मशानबह्निसम्बन्धरूपामङ्गलार्थगमकौ ॥३७॥

सुरालयोल्लासपरः प्राप्तपर्याप्तकम्पनः।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम्॥

सुरेति। सुरालयो देवगृहं मदिरामन्दिरं वा तत्रोल्लासो हर्षस्तत्परः प्राप्ता पर्याप्ता पूर्णा कम्पना सेना येन। प्राप्तं पर्याप्तं बहु कम्पनं कम्पो वा येन सः। मार्गणाः वाणाः मार्गणं याचनं वा। तत्र प्रवणो रतः भास्वन्ति उज्ज्वला भूतिः समृद्धिर्भस्म वा यस्यैवंभूत एष राजा जनो वा विलोक्यतामिति सन्देहः ॥३८॥

तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः।
दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः सखे॥

तस्येति। कस्यचित्सखायं प्रति मित्रवृत्तान्तोक्तिरियम्। हे सखे! तस्यास्मन्मित्रस्य स नायिकाविशेषसंगमविषयको यत्नः प्रियस्य तन्नायिकासंगमस्य प्राप्तौ सत्यां फलितः। किम्भूतस्य अधिका मात्रा प्रमाणं यस्य तथाविध उपायो दूतीसम्प्रेषणादिर्यस्य तथाभूतस्य तथा तीव्रः संवेगस्त्वरा यस्य स तथा तत्ताजुषः। कीदृशो यत्नः, दृढभूमिः, दृढास्थिरा प्रतिबन्धकानपनेया या भूमिर्विषयः संगमरूपो यस्य स इति प्रकृतोऽर्थः। इतरस्तु–हे सखे! पुरुषस्य स चित्तैकाग्रतास्थितिविषयको यत्नः प्रियस्यात्मसाक्षात्कारस्य प्राप्तौ सत्यां फलितः। मोक्षरूपफलभाग्जातः फलप्राप्तौ हेतुगर्भं विशेषणद्वयमाह–अधिमात्रेत्यादि। अधिमात्रं प्राग्भवीयसंस्कारादृष्टवशादुत्कटं उपायः श्रद्धाविदिर्यस्य सः। तथा तीव्रः सम्वेगो वैराग्यं यस्य स तथा तत्ताजुषः। तदुक्तं पातञ्जलभाष्यव्याख्यायां वाचस्पतिमिश्रैः–उपायाः श्रद्धादयो मृदुमध्यादिमात्राः प्राग्भवीयसंस्कारादृष्टवशाद्येषान्ते तथोक्ताः सम्वेगो वैराग्यम्। तस्यापि मृदुमध्यती व्रता। प्राग्भवीयवासनादृष्टवशादेवेति। श्रद्धादयश्च श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषामिति सूत्रोक्ता वेदितव्याः। एवं च मृदुमध्याधिमात्रोपायानां त्रयाणां प्रत्येकं मृदुमध्यतीव्रसम्वेगैस्त्रिभिर्भेदैर्नव योगिभेदा भवन्तीति। एवं च तीव्रसम्वेगानामासन्न इति सूत्रात्फलप्राप्तिर्युक्तेति भावः। कीदृक् यत्नः[४५] दृढभूमिः। दीर्घकालादनैरन्तर्यसत्कारवत्तया दृढा व्युत्थानसंस्कारैरनभिभूता भूमिर्विषयश्चित्तैकाग्रतास्थितिरूपो यस्य सः। व्युत्थानं च

४५. यत्नः स्थाने 'फलः' 'क' मातृकायाम्।

चित्तस्य समाधिशून्यतयावस्थानमिति। अत्र च भद्रात्मनः इत्यादिवत्प्रकृतनायकस्य योगिनिरूपितोपमा व्यज्यते। तत्राधिमात्रादिशब्दा योगशास्त्रमात्रप्रसिद्धाः। यत्तु दृढभूर्मिदृढाभ्यासदायी। तीव्रसम्वेगिता समाधि विशेषः। अधिमात्रनामा क्रियाविशेषणमिति[४६] महेशव्याख्यानम्। तदप्रतीतत्वदोषविलसितमित्युपेक्ष्यम्[४७] ॥३९॥

ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः।

करोति खादनं पानं सदैव तु यथा तथा॥

ताम्बूलेति। ताम्बूलेन भृतः पूर्णो गल्लः कपोलो यस्य सोऽयं मानुषः सदैव यथा खादनं भक्षणं पानं च करोति। तथा तु तथैव भल्लं समीचीनं जल्पति वदतीत्यर्थः। नैसर्गिकत्वं चात्र साधर्म्यम्। अत्र गल्लादिशब्दा ग्राम्याः ॥४०॥

वस्त्रवैदूर्यचरणैः क्षतसत्त्वरजः परा।

निष्कम्पा रचिता नेत्रयुद्धं वेदय साम्प्रतम्॥

वस्त्रेति। सखीं विबोधयन्त्याः कस्याश्चिदुक्तिः। हे सखि! वस्त्रमम्बरमाकाशं तस्य वैदूर्यमणिः सूर्यस्तस्य चरणैः पादैः किरणैः निष्कम्पा निश्चला भूमिः क्षतं निरस्तं सत्त्वरजोभ्यां परं तमो यस्यास्तथाभूता रचिता कृता[४८]। साम्प्रतमधुना नेत्रयोर्युद्धं द्वंद्वं वेदय बोधय उद्घाटयेत्यर्थः। अत्र वस्त्रादिशब्दानां स्ववाचकाम्बरादिपदवाच्यत्वरूप-शक्यसम्बन्धेनाकाशादिषु लक्षणारूढि प्रयोजनान्यतराभावान्निषिद्धेति। अथवा स्वशक्यवाचकत्वसम्बन्धेनाम्बरादिपदं[४९] लक्ष्यते। तेन च गगनप्रतीतिः। द्विरेफपदलक्षितेन भ्रमरपदेनेव भ्रमरस्य। यत्त्वयमेव लक्षितलक्षणा पक्षोग्रन्थकृत्सम्मतः। पदैकदेशोदाहरणो किमुच्यते। अस्य भूपालेत्यादौ वचोभि वाणैरित्यत्र वचः शब्देन गीः शब्दो लक्ष्यते इति व्याख्यानस्य मानत्वादिति महेशोक्तम्, तदयुक्तम्। तत्र गीर्वाणशब्दस्यैव सुरेष्वखण्डतया रूढत्वेन वचः शब्देनार्थबोधनायोगेन गीः शब्दलक्षणाया एवोचितत्वेन वैषम्यस्य स्फुटत्वात्। अर्थस्य शक्त्वैव वचः शब्दबोध्यतया तत्र लक्षणाया अप्रसक्तेश्च। अतएव तत्रैव शब्दो लक्ष्यत इति स्फुटमुक्त नत्वत्रेति बोध्यम्॥४१॥

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः।

रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम्॥

धम्मिल्लस्येति। कुरङ्गशावाक्ष्याः धम्मिल्लस्य केशपाशस्य शोभां प्रेक्ष्य अपूर्वा अद्भुता या बन्धे व्युत्पत्तिः कौशलम्। बन्धस्य व्युत्पत्ती रचना वा तस्या हेतोः कस्य मानसन्न रज्यति हृष्यतीत्यन्वयः। अपूर्वा बन्धव्युत्पत्तिर्यस्येति धम्मिलविशेषणं वा। अपूर्व

---

४६. 'विशेषण' स्थाने 'विशेष' 'ख' मातृकायाम्।

४७. अत्राधिमात्रादिशब्दानां योगशास्त्रमात्रप्रसिद्धत्वेनाप्रतीतत्वं दोषः इति पदं 'क' मातृकायामधिकम्।

४८. 'कृता' 'ख' मातृकायां नास्ति।

४९. 'कत्व सम्बन्धेन' 'ख' मातृकायां नास्ति।

बन्धेऽर्थाद्धम्मिल्लस्य व्युत्पत्तिर्निपुणता यस्या इति नायिकाविशेषणं वा। अत्रानासन्नता या। क्लिष्टत्वम्॥४२॥

न्यक्कारो ह्यमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥

न्यक्कार इति। रामेण राक्षसक्षये क्रियामाणे क्षुब्धान्तः[५०] करणस्य रावणस्य स्वाधिक्षेपाक्तिरियम्। अरयो यत् सन्तीति शेषः। अयमेव मे न्यक्कारो निन्दा अन्येषां पराभवादिः मम पुनर्वशीकृतजगत्रयस्यारिसत्त्वमेव न्यक्कारा इत्यर्थः। बहुवचनेनै- तावत्कालमेकोऽप्यरिपुर्नासीत्साम्प्रतं[५१] बहवो जाता इति न्यक्कारातिशयो ध्वन्यते। तत्रापि तेष्वपि अरिषु मध्ये असौ रामस्तापसो मुख्य इति शेषः। तापसत्वेन निर्वीर्यत्वं शस्त्रानभिज्ञत्वञ्च सूच्यते। तथा च तपस्विसहस्रभक्षकस्य ममेकस्तपस्वी[५२] अरित्यत्यन्तमेव न्यक्कार इति भावः। सोऽपि तापसोऽपि अत्रैव मत्समीप एव राक्षसकुलं निहन्ति, न तु बालवृद्धस्त्रीष्वेकमपि त्यजतीति न्यक्कारातिशयः। अहो! आश्चर्यम्। एवं सत्यपि रावणो जीवति। अथवा अहो! इति खेदे। रावणो जीवति। काक्वा न जीवतीत्यर्थः। शक्रजितमिन्द्रजितं धिक् धिक् इति वीप्सया निन्दातिशयः। प्रबोधितेति णिजन्ताद्भावे क्तः। ततो मतुप्। प्रबोधनकर्मभूतेनेत्यर्थः। एवंविधेन कुम्भकर्णेन किं प्रयोजनमिति शेषः। एवं स्वर्ग एव ग्रामटिका क्षुद्रग्रामस्तद्विलुण्ठनेन वृथोच्छूनैर्वृथा पुष्टैरेभिर्भुजैर्विंशतिसंख्यैः किं प्रयोजनं न किमपीत्यर्थः। भुजैरिति बहुवचनेन बहुभिरपि[५३] भुजैर्द्विभुजं शत्रुं प्रति प्रतीकाराक्षमतया न्यक्कारो व्यज्यते। अत्र च किं पदेन भुजवैयर्थ्यं वृथापदेन च तदुच्छूनत्ववैयर्थ्यमुक्तमिति न पौनरुक्त्यम्। वृथात्वस्य पूर्वमसिद्धत्वादनुवादासङ्गतिः। वृथोच्छूनतया वैफल्यस्यौचित्यतया तत्त्वात्तदभिधानसंगतिश्च वृत्तिकृतैव दर्शितेति। अत्रायंपदन्यक्कारपदयोरुद्देश्यविधेयार्थकत्वेन विवक्षितयोः पौर्वापर्यविपर्ययो दोषः।

हे! यच्छब्दयोगः, प्राथम्येत्याद्युद्देश्यलक्षणम्। तथा अनुवाद्यमनुक्त्वैव नाभिधेयमुदीर- येत् इत्यादि वृद्धवचनेन तयोः पौर्वापर्यस्य नियमितत्वात्॥४३॥

अपाङ्गसंसर्गि तरङ्गितं दृशोर्भ्रुवोररालान्तविलासि वेल्लितम्।
विसारि रोमाञ्चनकञ्चुकं तनोस्तनोतिं योऽसौ सुभगे तवागतः॥

अपाङ्गेति। नायकागमनोत्सवं निवेदयन्त्याः सख्या इयमुक्तिः। तवेत्यस्य

---

५०. 'क्षुब्धान्तः' स्थाने क्षुध्वान्तः 'ख' मातृकायाम्।
५१. 'अकस्मात्' इति 'क' एवं 'ख' मातृकायामधिकम्।
५२. 'अरि 'स्थाने' शत्रु 'क' मातृकायाम्।' रिपु 'मूल' मातृकायां नास्ति।
५३. 'बहुभिरपि' स्थाने बहुरपि 'ख' मातृकायाम्।

षठ्यन्तत्रयेऽप्यन्वयः। हे सुभगे! यो नायकस्तव दृशोरपाङ्गसंसर्गि नेत्रान्तसम्बद्धं तरङ्गितं चालनं तथा भ्रुवोरन्तराले कुटिलेऽन्ते विलासेन वेल्लितं नर्त्तनम्। एवं तनोः विसारिसर्वाङ्[५४]गव्यापि रोमाञ्चनमेव कञ्चुकं च तनोति यस्मिन्दृष्टे तवैवं भवतीत्यर्थः। असौ स नायक आगत इत्यन्वयः। अत्र यस्तनोत्यसावागत इति यच्छब्दार्थानुवादेन तदर्थपरामर्शकतया असावित्यस्य विधेयसमर्पकत्वमभिप्रेतं[५५] न सम्भवति। यच्छब्दसान्निध्येन प्रयुज्यमानस्यादसादेर्यच्छब्दार्थगतप्रसिद्धिबोधकतयानुवाद्यकोटिप्रविष्टार्थकत्वात्। एवं च यच्छब्दः स्वार्थपरामर्शकतच्छब्दाद्यभावात्साकाङ्क्ष एवावतिष्ठते। तदाहुः- यत्तदोर्नित्यमभिसम्बन्ध इति। स चायमुपात्तयोः स्पष्ट एव। अनुपादानं तु त्रिप्रकारम् यच्छब्दस्येव तच्छब्दस्यैव उभयोर्वेति। तत्र यच्छब्दानुपादानेऽपि प्रक्रान्तप्रसिद्धानुभूतार्थकेन तच्छब्देन यच्छब्दाक्षेपात्सम्बन्धः। क्वचिच्चानुपात्तस्य तत्छब्दस्य यच्छब्देनोत्तरवाक्यगतेनाक्षेपात्।[५६] क्वचिदर्थसामथ्र्यादुभयोरप्यनुपात्तयोराक्षेपादिति। तदेतत्तत्र तत्रोदाहरणे स्फुटीकरिष्यते।।४४।।

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम्।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः।।

कातर्यमिति। रघुवंशे राज्ञोऽतिथेर्वर्णनम्। कातर्य कातरता, केवला शौर्यहीना केवलेति लिङ्गविपरिणामेन शौर्यमित्यनेनाऽपि सम्बध्यते, सिद्धिमर्थात्कार्यस्य। उभाभ्यां नीतिशौर्याभ्याम्। अन्वियेष अन्विष्टवान्। प्रक्रान्तो राजा चापलचेष्टितमिति पाठे चापलं चपलता तत्र युक्तं चेष्टितमित्यर्थः। चपल एव चापलः। स्वार्थेऽण्प्रत्ययः, तदीयचेष्टितमित्यर्थः इति महेशः[५८]।।४५।।

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी।।

द्वयमिति। कुमारसंभवे वटुवेषेण पार्वतीं छलयतो महादेवस्योक्तिः। कपालिनः कपालधारिणः शिवस्य समागमप्रार्थनया हेतुभूतया सम्प्रति तवैवं निश्चये सति द्वयं शोचनीयतां गतं प्राप्तम्। पूर्वं त्वेकैव चन्द्रकला शोच्यासीदित्यर्थः। कलावतश्चन्द्रस्य सा प्रसिद्धा कला अस्य लोकस्य[५९] नेत्रकौमुदी आह्लादकतया नेत्रयोश्चन्द्रिकारूपा त्वं चेत्यन्वयः। अत्र गतमिति भूतनिर्देशेनावश्यभाव्यत्वं सूच्यते। कपालिनः नेत्रकौमुदीत्येताभ्यां च शोचनीयत्वस्य

---

५४. 'सति' 'क' मातृकायामधिकम्।
५५. 'समर्पकत्व' स्थाने 'सर्पकत्व' 'ख' मातृकायाम्।
५६. 'गतेन' 'क' मातृकायां नास्ति।
५७. 'सिद्धि' 'ख' मातृकायां नास्ति।
५८. 'अत्र प्रक्रान्तार्थकेन तच्द्ब्देन यच्छब्दाक्षेपाद् अन्वयबोधः' इति 'क' मातृकायामधिकम्।
५९. 'लोकस्य' 'ख' मातृकायां नास्ति।

युक्तता ध्वन्यते इति[६०] ॥४६ ॥

उत्कम्पिनी भयपरिस्खलितांशुकान्ता
ते लोचने प्रतिदिशं विधुरे क्षिपन्ती।
क्रूरेण दारुणतया सहसैव दग्धा
धूमान्धितेन दहनेन न वीक्षिताऽसि॥

उत्कम्पिनीति। रत्नावल्यां वासवदत्तां दग्धां सम्भाव्यतामनुध्याय शोचतो वत्सराजस्योक्तिरियम्। हे प्रिये! क्रूरेण दहनेन[६१] दारुणतया सहसैवाकस्मात् दग्धा न वीक्षितासि। सौन्दर्यातिशयशालिन्यास्तव दर्शने सति क्रूरेणापि दहनेन दग्धुमशक्यत्वादिति भावः। अदर्शनहेतुमाह–धूमेति। धूमेनाञ्चितो युक्तः। धूमान्वितेनेति। पाठः स्पष्टार्थ एव। किम्भूता त्वम्। उत्कम्पिनी, उत्कटकम्पवती भयेन परिस्खलितोऽंशुकान्तो वसनप्रान्तो यस्याः सा तथाभूता। प्रतिदिशं विधुरे कातरे ते अनुभूते लोचने क्षिपन्ती विधुरे विफले इति दीपिकायाम्। मया न वीक्षितासीति केषाञ्चित् व्याख्यानन्तु धूमाञ्चितेनेत्यस्य निरभिप्रायकत्वापत्त्या विरुद्धमतिकारित्वेन चोपेक्षणीयम्[६२] ॥४७ ॥

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः॥

साध्विति। पुष्करैः पद्मैः साधु कृतं यदभिरामतया सौन्दर्येणाधिके चन्द्रमसि सति मीलितं मुकुलितम्। पुनरिति त्वर्थे। तेन चन्द्रेण तु साहसं धाष्टर्यमनुष्ठितं कृतमित्यर्थः। किम्भूतेन जयिन्युत्कर्षशालिनी कामिनिमुखे सत्युद्यताउदयं प्राप्तवता। अत्रोत्तरवाक्यगतेन यच्छब्देन पूर्ववाक्ये तत्साधुकृतमिति तच्छब्दाक्षेपः[६३] ॥४८ ॥

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥

ये नामेति। भवभूतेरियमुक्तिः। न इति "अस्मदो द्वयोश्च" इत्येकत्वे बहुवचनम्। तेन ममेत्येकवचनाविरोधः। नामेति क्रोधे कुत्सने वा। नामप्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने इति। अमरोक्तेः। ये नाम केचिज्जना इह लोके ममावज्ञामवधारणां प्रथयन्ति कुर्वन्ति ते किमपि जानन्ति। अपि तु न किमपीति काक्वा अर्थः। अतस्तान्प्रति एष यत्नः मालती माध्वाख्यप्रकरणारम्भरूपो न भवतीति शेषः। अत्र ग्रन्थस्य परार्थत्वात्। विशेषनिषेधस्य च

---

६०. 'अत्र प्रसिद्धार्थकेन तच्छब्देन यच्छब्दाक्षेपादन्वय बोधः' इति पदं 'क' मातृकायामधिकम्।

६१. 'दहनेन' 'स्थाने' देवेन 'ख' मातृकायाम्।

६२. 'अत्रानुभूतार्थकेन तच्छब्देन यच्छब्दाक्षेपः' इति पदं 'क' मातृकायामधिकम्।

६३. 'अत्रोत्तर वाक्यगतेन यच्छब्देन पूर्व वाक्येन साधुकृतं इति तच्छब्दाक्षेप' इति 'क' मातृकायामधिकम्।

शेषाभ्यनुज्ञानफलकत्वात्कं प्रतीति जिज्ञासायामुत्तरार्द्धम्। कालोऽयं निरवधिरनन्त इति हेतोः कोऽप्येकः। मम समानधर्मा य उत्पत्स्यते। पृथ्वी विपुला विस्तृतेति हेतोश्चास्ति वा तं प्रति यत्न इति यत्तच्छब्दयोर्वाशब्दय चाध्याहारेण योजनीयम्। इयता कालेनानुत्पन्नस्य कथमुत्पत्स्यमानत्वं विद्यमानत्वे वा कथमदृश्यत्वमित्याशङ्काद्वयं क्रमेण हेतुद्वयेन परिहृतम्। केचित्तु नोऽस्मत्सम्बन्धिनि। इह नाटके ये नाम केचिद्विरक्ता आत्मनिष्ठा अवज्ञां प्रथयन्ति। ते किमप्यनिर्वाच्यं [६४]वस्तु ब्रह्मरूपं जानन्तीत्यर्थमाहुः[६५] ॥४९॥

असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः।
वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः॥

असाविति। असौ दृश्यमानचिन्हो वसन्तकालः लङ्कातो हनूमानिवागतः। कीदृशः। मरुता वायुना चुम्बिताः संस्पृष्टाः केसरा बकुला नागकेसरा वा यस्मिन् तथाभूतः। हनूमत्पक्षे मरुता पवनाधिष्ठातृदेवतारूपेण पित्रा चुम्बिताः केसराः सटा यस्येत्यर्थः। प्रसन्नं यत्ताराधिपस्य चन्द्रस्य मण्डलं अग्रणीः अग्रेसरो यस्य प्रसन्नताराधिप। एव मण्डलाग्रणीर्यस्येति वा तथाभूतो वसन्तः। विरहोद्दीपकत्वात्। पक्षे वियुक्तेन रामेण आतुरया उत्सुकया दृष्ट्या वीक्षित इत्यर्थः[६६] ॥५०॥

करवालकरालदोःसहायो युधि योऽसौ विजयार्जुनैकमल्लः।
यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात्॥

करवालेति। योऽसौ प्रसिद्धः कर्णः स भूपतिना दुर्योधनेन यदि तत्र कार्ये सेनापत्ये विनियुज्येत ततस्तदा कृतं पाण्डवराज्यत्यागादि कृतं स्यात्सफलं स्यादित्यर्थः। कीदृशः? करवालेन खड्गेन करालो भीषणो दोर्बाहुरेव सहायो यस्य तथाभूतः। तथा युधि सङ्ग्रामे विजयार्जुनयोः पार्थकार्त्तवीर्ययोरेको मल्लः प्रतीकारसमर्थः। विजयनामा योऽर्जुनः पार्थ इति वा। 'विजयार्जनैकमल्लः' इति पाठे विशिष्टस्य जयस्यार्जने सम्पादने एकमल्लः प्राधान्येन समर्थ इत्यर्थः। अत्रासावित्युक्त्वा पुनः स इति तच्छब्दनिर्देशात् तच्छब्दार्थकत्वं तस्य नास्तीति गम्यते ॥५१॥

योऽविकल्पमिदमर्थमण्डलं पश्यतीश, निखिलं भवद्वपुः।
आत्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम्॥

य इति। परमेश्वरं प्रति भक्तस्योक्तिः। हे ईश! इदं निखिलमर्थमण्डलं प्रपञ्चजातम्। यः पुरुषोऽविकल्पम्। विकल्पः संशयस्तद्रहितं यथा स्यात्तथा। भवद्वपुः भवत् स्वरूपं पश्यति। बाधायां सामानाधिकरण्यम्। परमार्थतोऽसत्त्वेन[६७] तद्बोधेन भवन्तमेव पश्यतीत्यर्थः।

---

६४. 'वस्तु' स्थाने न सु 'ख' मातृकायाम्।
६५. 'अत्र यत्तदोरभारेवेऽप्यर्थसामर्थ्या उभभ्याध्याहारेणान्वयः' इति 'क' मातृकायामधिकम्।
६६. 'अत्रासावित्यस्मात्तच्छब्दार्थाप्रतीतेन दिसः तदर्थकत्वम्। प्रतीतौविवदमानं प्रतिवाधकमाह' इति 'क' मातृकायामधिकम्।
६७. 'असत्वेन' स्थाने 'सत्वेन' इति 'ख' मातृकायाम्।

यथाश्रुतेर्जडस्य प्रपञ्चस्य परब्रह्मस्वरूपत्वाभावादसंगतेः। अस्यात्मैक्यदर्शिनः नित्यसुखिनः प्रकाशमाननित्यानन्दस्यात्मपक्षेणात्मस्वरूपेण जगति प्रपञ्चे परिपूरिते व्याप्ते आच्छादिते बाधित इति यावत्। कुतः[६८] कस्माद्भयं न कुतोऽपीत्यर्थः। द्वितीयाद्वै भयं भवति इति श्रुतेः। विकल्पं विधिकल्पनायोगि इदमिति केचित्। अत्र यच्छब्दव्यवहितोपात्तत्वादिदंशब्दस्तदर्थपरामर्शकः ॥५२॥

यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः।
दीव्यताऽक्षैस्तदाऽनेन नूनं तदपि हारितम्॥

यत्तदिति। वेणीसंहारे भीमस्योक्तिः। अस्य भूपतेर्युधिष्ठिरस्य तत्प्रसिद्धं यत ऊर्जितं उद्भटं अत्युग्रं क्षात्रं तेजः प्रतापरूपमासीदिति शेषः। तदा द्यूतप्रसङ्गेऽक्षैः पाशकैः दिव्यता क्रीडतानेन राज्ञा नूनं तदपि तेजः हारितम्। अर्थाच्छत्रुभिर्गृहितमित्यर्थः। राज्यं हारितमेव तदैव नूनं तेजैऽपीत्यपिशब्दार्थः। अत्र यच्छब्दाननृतरवर्ती तच्छब्दोऽपि प्रसिद्धिपरामर्शकः किं पुनरिदमादिरिति योऽसावित्यत्रोक्तदोषो वज्रलेपायित इति सिद्धम्[६९] ॥५३॥

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते,
धुर्यां लक्ष्मीमथ मयि भृशं धेहिदेव, प्रसीद।
यद्यत्पापं प्रतिजहि जगन्नाथ, नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन्, भूयसे मङ्गलाय॥

कल्याणानामिति। मालतीमाधवे सूत्रधारस्य सूर्यप्रार्थनमिदम्। हे विश्वमूर्ते! सर्वात्मक! सूर्य! सूर्य आत्मा जगतस्तस्थुश्चेति श्रुतेः। त्वं कल्याणरूपाणां तद्धेतूनामिति यावत्। आयुघृतमितिवत्कारणे कार्योपचारात्। महसां तेजसां भाजनमाश्रयोऽसि। अथ नृत्यारम्भे मयिधुर्यां नृत्यभारवहनक्षमां लक्ष्मीं भृशमतिशयेन धेहि अर्पय हे देव! प्रसीद हे जगन्नाथ! नम्रस्य प्रणतस्य मे मम यद् यद् ज्ञातमज्ञातं[७०] च यत्पापं तत्प्रति[७१] जहि नाशय। भो भगवन्! भूयसे बहुतराय मङ्गलाय श्रेयसे भद्रं प्रकृष्टं भद्रं शोभनं कर्म वितर देहि। भद्रं यथा स्यादिति क्रियाविशेषणं वा। त्वमिह महसामिति। शिषेत्वं विधत्से पुण्यां लक्ष्मीं अयमपि दृशं धेहिति पाठे तु इह लोके त्वं कल्याणानामीशिषे कल्याणानि नियमयसीत्यर्थः। अधीगर्थदयेशां कर्मणीति कर्मणि षष्ठी। पुण्यापुण्यफलां विधत्से करोषि ददासीति यावत्। दिश कृपादृष्टिमित्यर्थोबोध्यः। अत्र यत्पदद्वयेन ज्ञातत्वाज्ञातत्वाभ्यां रुपाभ्यां परामृष्टस्य सकल[७२] पापस्यैकेनैव तत्पदेन पापत्वेन रूपेण[७३] परामर्शोपपत्तेर्न द्वितीयतत्पदापेक्षा।

६८. 'कुतः' इति बारं द्वयं पठितं 'ख' मातृकायाम्।

६९. 'यत्तयोर्नित्य सम्बन्ध इत्यत्र व्यभिचारमाशङ्क्य निराकरोति' इति पदं 'क' मातृकायामधिकम्।

७०. 'अज्ञातं' ख मातृकाया नास्ति।

७१. 'श्रुति,' इति 'क' मातृकायामधिकम्।

७२. 'सकल' स्थाने सकलस्य 'क' मातृकायाम्।

७३. 'मर्शो पपत्तेर्नद्वितीयतत्पदा पेक्षा। यत्तदभ्यामेकरुपेणैव परामर्श इति नियमे मानाभवात् प्रदीपकृतस्तु। यद्यदिति न पदद्वयम्' इति 'क' मातृकायां नास्ति।

यत्तद्भ्यामेकरूपेणैव परामर्श इति नियमे मानाभवात्। प्रदीपकृतस्तु यद्यदिति न पदद्वगम्। किन्तु 'नित्यवीप्सयोरिति' सूत्रेण यदो द्वित्वापन्नोपमादेशः। तथा चादेशिना एकेन यत्पदेन तत्पदेन वा एकरूपेणैव पापपरामर्शः। आदेशस्तु साकल्येनान्वये तात्पर्यग्राहक इत्येकत्रैव तेन तदुपपत्तौ न तच्छब्देऽपि तदपेक्षेत्याहुरित्पलं विस्तरेण॥५४॥

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
मात्रा स्त्रीलघुतां गता किमथ वा मातैव मे मध्यमा।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ गुरु-
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम्॥

किं लोभेनेति। रामस्य वनवासे हेतुं चिन्तयतो लक्ष्मणस्योक्तिरियम्। सः विनयार्जवादिमत्त्वेन प्रसिद्धो भरतो लोभेन विलङ्घितः आक्रान्तः किम्? येन भरतेनैतत् वनवासादिकम्। एवं कपटेन मात्रा करणभूतया मातृद्वारेति यावत्। कृतं सम्पादितमित्यर्थः। येन पुत्रलोभरूपेण हेतुना मात्रा कर्तृभूतया एतदेवं वरप्रार्थनाच्छलेन कृतमिति वा। अनौचित्यकारित्वेन कोपान्नामाग्रहणम्। अथवा मे मध्यमा माता कैकेय्येव स्त्रीणां निसर्गसिद्धां लघुतां क्षुद्रतां गता प्राप्ता किमिति वितर्कः। एवकारेण भरतस्य व्यवच्छेदः। पुनर्विमृश्याह - मिथ्यैतदिति। एतन्मम चिन्ताविषयीभूतं द्वितयमपि भरतस्य लुब्धत्वं मातुः क्षुद्रत्वं च मिथ्या, कुत इत्यत आह- आर्येति। इतिशब्दो हेतौ। असौ गुरुर्भरतः। विमर्शेन कोपापगमान्मान्यत्वेन नामाग्रहणम्। आर्यस्य श्रेष्ठस्य रामस्यानुज इति[७४] हेतोराद्यम्। माता तातस्य[७५] दशरथस्य कलत्रम्भार्येति हेतोर्द्वितीयं चेत्यर्थः। तर्हि केनैतत्कृतम्, तत्राह-अनुचितमिति। विधात्रानुचितं कृतमिति मन्ये इति सम्बन्धः[७६]॥५५॥

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः॥

श्रितेति। सामोपायलव्धसिद्धीनां राज्ञां वर्णनमिदम्। अद्य ते राजानो विग्रहस्य युद्धस्य क्षपणेन त्यागेन गतमसुखं दुःखं येषां तथाविधाः शेरते। निश्चिन्ततया निद्रां कुर्वन्तीत्यर्थः। कीदृशाः[७७] श्रिता आश्रिता क्षमा क्षान्तिर्यैस्तथाभूताः। रक्तानुरक्ता भूर्लक्षणया तद्गतनिखिलजना येषु तादृशाः शिवेन कल्याणेनालिङ्गिता मूर्तयो येषां तथाभूता[७८] इति। अत्र श्रिता क्षमा भूमिर्यैस्तथाभूताः रक्तस्य रुधिरस्य भुवः स्थानानि[७९]।

---

७४. 'इति' हेतोराद्यम्। माता तातस्य दशरथस्य कलत्रम्भार्येति हेतोर्द्वितीयञ्च इति 'ख' मातृकायां नास्ति।
७५. 'तातस्य' 'स्थाने' 'तस्य' 'क' मातृकायाम्।
७६. 'अत्रानुचिताकरणे हेतुत्वेन विधित्सितस्यानुजे आर्यसंबंधस्य कलत्रे तातसम्बन्धस्य समासे गुणी भावाद् विमृष्ट विधेयां सता दोषः।' इति 'क' 'मातृकायामधिकम्।'
७७. 'भूताः रक्ता' इति 'क' मातृकायामधिकम्।
७८. 'भूता स्थाने' 'भद्रता' 'क' मातृकायाम्।
७९. 'शिवो' त कल्याणे ना लिङ्गितामूर्तियो येषां तथाभूमिः इति 'क' मातृकायामधिकम्।

शिवाभिः[८०] कोष्ट्रीभिरालिङ्गितमूर्तयो विग्रहस्य शरीरस्य क्षपणेन नाशेन गता असवः खानीन्द्रियाणि च येषां तथाभूताः[८१] शेरते[८२] इति विरुद्धप्रतीतिः ॥५६॥

अलमतिचपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः।
इति यदि शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा॥

अलमिति। कस्यांचित्कामिन्यामनुरक्तस्य कामुकस्येयमुक्तिः। चपलत्वादिहेतवोऽङ्गना-संगमनिष्ठतया योजनीयाः। तथा चातिचपलत्वात् अस्थिरत्वात्स्वप्नः स्वप्नसृष्टिः मन्त्रादिना-[८३] सदर्थप्रकाशनं माया तत्सदृशत्वात्। परिणतिविरसत्वात् विरहादिदुःखानुबन्धित्वाच्चाङ्गनायाः सङ्गमेनालं प्रयोजनाभाव इति तत्त्वं परमार्थम्। शतकृत्वोऽनेकबारं यद्यप्यालोचयामस्तदपि तथाप्यन्तरात्मा हरिणाक्षीं न विस्मरतीत्यन्वयः। अत्र त्वादित्येकदेश श्रुतिकटुः ॥५७॥

तद्गच्छ सिद्ध्यै कुरुदेवकार्यमर्थोऽयमर्थान्तरलभ्य एव।
अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः॥

तद्गच्छेति। कुमारसम्भवे कामं प्रतीन्द्रस्योक्तिरियम्। हे काम! तत् तस्मात् सिध्यै कार्यसिध्यर्थं गच्छ। कार्यं किं तत्राह-देवानां सर्वेषां न ममैव कार्यं स्कन्दोत्पत्तिरूपम्। कुरु शिवयोः सङ्गमैकलभ्येऽस्मिन्नर्थे किं मयेति शङ्कायामाह-अर्थोऽयमिति। अर्थान्तरेणोमामहेश्वरसंगमेन लभ्य एव लभ्योऽप्ययं स्कन्दोत्पत्तिरूपार्थः अंगस्य स्वरूपस्य लब्ध्यै लाभाय प्रत्ययम्। शिवस्य पार्वतीवशतासम्पादनेन कारणमर्थात्त्वामपेक्षते। अत्रोमामहेश्वरसंगमस्य[८४] वक्तुमयोग्यत्वादर्थान्तरत्वेनोक्तिः। कः किमिव? बीजाङ्कुरः उदयात्प्रागम्भो जलमिवेत्यर्थः। अङ्गेति कामसम्बोधनमिति केचित्। प्रत्ययमुत्तममत्वामिति क्वचित्पाठः। अत्र चतुर्थ्यन्तपदद्वयैकदेशः ॥५८॥

यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्बिभर्त्ति।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम्॥

यश्चेति। तत्रैव हिमालयवर्णनम्। यश्च हिमालयः शिखरैः करणभूतैर्धातुमत्तां गैरिकादिधातुमतो भावस्तत्ता ता विभर्तीत्यन्वयः। कीदृशीं अप्सरसां विभ्रमार्थं विलासार्थं मण्डनान्यलङ्करणानि तिलकपत्रिकादीनि तेषां सम्पादयित्रीम्। विभ्रमेण सन्ध्याकालभ्रमेण यानि यानि मण्डनानीत्यर्थः। अत्र एवाकालसन्ध्योत्प्रेक्षेति केचित्। तथा बलाहकानां मेघानां

८०. 'शिवाभिः' 'क' मातृकाया नास्ति।
८१. 'भूताः' स्थाने 'विधाः' 'क' मातृकायाम्।
८२. 'निश्चन्द्र'.'क' मातृकायामधिकम्।
८३. 'मन्त्र' इति पदं बार द्वयं 'ख' मातृकायाम्।
८४. 'महेश्वर' स्थाने हेमश्वर 'क' मातृकायाम्।

छेदेषु खण्डेषु विभक्तो रागो यस्यास्तथाभूताम्। अकालसन्ध्यामिवत्युत्प्रेक्षा। तद्कालेऽपितद्वद्भासनात्। अकालसन्ध्यावर्षासन्ध्येति दीपिकायाम्। चित्रमेघच्छन्नः सन्ध्यातुल्यकाल इति महेशः। एतन्मते उपमापि सम्भवति। सन्ध्याया अपि निमित्तत्वेन मण्डनसम्पादकत्वात्[८५]। बलाहकच्छेदेषुविभक्तो रागो यस्यामिति विग्रहाच्च विशेषणद्वयान्वयो बोध्यः। अत्र मत्तेत्येकदेशः क्षीबार्थे सुप्रसिद्ध इति निहतार्थता॥५९॥

आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम्।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा॥

आदाविति। रुदत्या विरहातुरायाः कस्याश्चिद्वर्णनमिदम्। कुरङ्गेक्षणा काममतिशयेनाश्रुपयसा सम्प्रत्येव दृशां निषेकं कुरुत इत्यन्वयः। उत्प्रेक्षते चेतोभुवो देवस्य मदनस्य भल्लीनां वाणविशेषरूपाणां पानकर्मेति वेति। इवशब्दस्यार्थवशादिभन्नक्रमत्वम्। धारातैक्ष्ण्यायास्त्रं पङ्केन लिप्त्वाग्नौ सन्ताप्य पयसा क्षालनं पानकर्मस्वरूपम्। तत्र लेपतापयोः सम्पादनाय दृशां विशेषणद्वयमाह- आदावित्यादि। आदौ प्रथममञ्जनपुञ्जेन लिप्तं वपुः स्वरूपं यासां तथाभूतानां भल्लीनामप्यङ्गारचूर्णाञ्जनेन लेपात्तथाभूतत्वम्। ततोऽनन्तरं श्वासानिलेनोल्लासितः सन्धुक्षितोऽत एव प्रोत्सर्पन्सर्वाङ्गव्यापी यो विरहानलस्तेन सन्तापितानां चेति भिन्नक्रमश्चकारः। भल्लीनां तु भस्त्रास्वासानिलोल्लासितेन प्रोत्सर्पता विरहसदृशेनानलेन सन्तापितत्वमवसेयम्। अत्र दृशामिति बहुवचनमनर्थकम्॥६०॥

चापाचार्यस्त्रिपुरविजयी कार्त्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः।
अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः॥

चापेति। रावणदूतस्य परशुरामं प्रतीयमुक्तिः। हे राम! तव चापाचार्यो धनुर्वेदाध्यापकस्त्रिपुरविजयी महादेवस्तथा कार्तिकेयः स्कन्दः। विजेयः विजितः। शस्त्रेण व्यस्त उत्सारित उदधिः सदनं गृहम्। पृथिव्यां दत्तायां परशुरामस्य निवासाय शस्त्रतापितेन समुद्रेण भूर्दत्तेति पुराणकथाप्रसिद्धेः। इयं भूः पृथ्वीं हन्तकारः, ग्रासषोडशकरूपोऽतिथिभिक्षा। एतत्सर्वं[८६] प्रशस्तिहेतुः, तद्वत्कश्यपाय दत्तेत्यर्थः। अस्त्येव न कस्याप्यत्र सन्देहः। किमु किं तु रेणुकाया मातुः कण्ठबाधां कण्ठच्छेदनं कृतवता तव परशुना बद्धस्पर्द्धश्चन्द्रहास- नामा रावणस्य खड्गो लज्जत इति भङ्ग्या। एवंविधनिन्द्यकर्मकारिणा त्वया सह स्पर्धितुं रावणो लज्जत इत्युक्तं भवति। हन्तकारोऽतिथिदानमन्त्रः तत्सम्बन्धात् भूरेव तथेति महेशव्याख्यानन्तु।

---

८५. 'मण्डन' स्थाने 'मण्डलन' 'क' मातृकायाम्।
८६. एतत्सर्वं प्रशस्ति हेतुः 'इति' 'क' मातृकायां नास्ति।

ग्रासप्रमाणा भिक्षास्य दग्रं ग्रासचतुष्टयम् ।
अग्रं चतुर्गुणं प्राहुर्हन्ताकारं द्विजोत्तमाः ॥

इति मार्कण्डेयपुराणवचनानालोकननिबन्धनत्वादनादेयम्। अत्र विजेय इति यत्प्रत्ययः क्तप्रत्ययार्थवाचकः ॥६१ ॥

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः ।
परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥

अतिपेलवमिति। शठः अतिपेलवं कोमलम्। अति परिमिता अल्पावर्णा यत्र तथाविधं लघुतरमतिमन्दम्। उदाहरति वदति। पुनरिति त्वर्थे। परमार्थतस्तु स शठः कालकूटेन विषेण घटितमिव हृदयं वहति तथा च कृत्रिमतया तद्वाक्यमश्रद्धेयमिति। मित्रं प्रत्याप्तस्योपदेशोऽयम्। अत्र पेलेत्येकदेशो लाटभाषायां वृषणरूपगुह्याङ्गबोधकतया व्रीडादायी ॥६२ ॥

यः पूयते सुरसरिन्मुखतीर्थसार्थ-
स्नानेन शास्त्रपरिशीलनकीलनेन।
सौजन्यमान्यजनिरुर्जितमूर्जितानां
सोऽयं दृशोः पतति कस्यचिदेव पुंसः ॥

यः इति। कस्यचित्महापुरुषस्य प्रशंसनमिदम्। सोऽयं पूर्वोक्तगुणवान्महापुरुषः कस्यचिदेव पुण्यशालिनः पुंसो दृशोः पतति। गोचरीभवतीत्यर्थः। स कः ? यः सुरसरिद्गङ्गा तन्मुखानि तत्प्रधानानि तत्प्रभृतीनि वा यानि यानि तीर्थानि तेषां सार्थे समूहे स्नानेन तथा शास्त्रस्य वेदान्तादेः परिशीलनेनाभ्यासेन यत्कीलनं संस्कारदार्ढ्यं तेन पूयते पवित्रो भवति। कीदृशः ? सौजन्यमानयोर्जनिरुत्पत्तिस्थानम्। तयोर्जनिरुत्पत्तिर्यस्मादिति वा सौजन्यमान्येति पाठे सौजन्यमान्या जनिरुत्पत्तिर्यस्येत्यर्थः। ऊर्जितानां बलवतामूर्जितं बलं ऊर्जितानां बलानामपि बलमिति वा। अत्र पूयेत्येकदेशो विकृतरुधिररूपपूयव्यञ्जकतया जुगुप्सादायी ॥६३ ॥

विनयप्रणयैककेतनं सततं योऽभवदङ्ग, तादृशः ।
कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ॥

विनयेति। हे अङ्गः ! यः सततं विनयप्रणययोरेकं केतनं स्थानं तादृशः, तद्गुणवत्त्वेन प्रसिद्धोऽभवत्। सोऽद्य तस्याभिप्रेतमभिलषितं पदमर्थान्नीचं समागतः प्राप्तः सन् तद्वत पूर्ववत् कथमीक्ष्यतां दृश्यताम्। नीचपदप्राप्त्या गुणविलोपादिति भावः। तदेतत्सखायं प्रति कस्यचित्पूर्वप्रवृत्तमैत्रीकस्य पुरुषस्य वृत्तान्तकथनम्। केचित्तु, नायिकायाः सखीं प्रति नायकवृत्तान्तोक्तिरियम्। अङ्ग ! हे सखि ! यस्तादृशो नायक आसीत्। सोऽद्य तस्याः सपत्न्या अभिप्रेतं पदं समागतः न दृशीभूतः। तद्वत्, प्राग्वत् कथमीक्ष्यताम्। अन्यथा दृश्यत इत्यर्थ इति योजयन्ति। अत्र प्रेतेत्येकदेशोऽमङ्गलार्थः ॥६४ ॥

कस्मिन्कर्मणि सामर्थ्यमस्य नोत्तपतेतराम्।
अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ॥

कस्मिन्निति। अस्य पुरुषस्य उत्तपते दीप्यते। अत्र च रेत्येकदेशो भूतपूर्वे चरडिति चरट् प्रत्ययो वा "चरेष्टः" इति टान्तश्चरधातुर्वेति सन्देहात्पूर्वं साधुरिति वा साधुषु चरतीति वार्थ इति सन्देहः ॥६५॥

किमुच्यतेऽस्य भूपालमौलिमालामहामणेः।
सुदुर्लभं वचोवाणैस्तेजो यस्य विभाव्यते॥

किमिति। भूपालमौलीनां माला तत्त्वेनाध्यवसिता पङ्क्तिस्तत्र महामणेर्मेरुस्थानीय-महामणेरस्य राज्ञः किमुच्यते किं वर्ण्यते। न किमपि वर्णयितुं शक्यम्। यस्य तेजः वचोवाणैर्गीर्वाणैर्देवैः सुदुर्लभं विभाव्यते ज्ञायत इत्यर्थः। यत्तु भूपालमौलिगतमालामहाणेरिति महेशेन व्याख्यातम्। तदसम्बद्धत्वादुपेक्षणीयम्। अत्र वचः शब्देन स्वशक्यनिरुपित-वाचकत्वसम्बन्धेन गीः शब्द एव लक्ष्यते। गीर्वाणशब्दयोरेव मिलितयोर्देवेषु रूढत्वात्। न च शब्दलक्षणायां रूढिः प्रयोजनं वेति नेयार्थत्वम् ॥६६॥

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि, माम्।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्त्तिमुद्धर॥

अकुण्ठेति। नायिकासङ्गमोत्सुकस्य कस्यचिदियमुक्तिः। हे कलकण्ठि! कलो मधुरस्वरस्तद्युक्तः कण्ठो यस्यास्तथाविधे इति दूतीसम्बोधनम्। विरहातुरतया कोकिलाया वा। मां कम्बुकण्ठ्याः शङ्खसदृशग्रीवाया नायिकायाः कण्ठे क्षणं कुरु। तदालिङ्गनशालिनं कुर्वित्यर्थः। कण्ठस्यार्तिं तदालिङ्गनौत्सुक्यरूपामुद्धर अपहर। कीदृशं माम्। आकण्ठं कण्ठपर्यन्तम्, अकुण्ठा अप्रतिहता, उत्तरोत्तरवर्द्धमानेति यावत्। तथाविधा या उत्कण्ठा तया पूर्णं व्याप्तमित्यर्थः। अत्र शृङ्गारे अटवर्गाः इत्यादिना प्रतिषेधात् ठकारः प्रतिकूलः ॥६७॥

देशः सोऽयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः।
तान्येवाहितहेतिघस्मरगुरुण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः॥

देशः इति। वेणीसंहारेऽश्वजत्थाम्नः कर्णं प्रतीयमुक्तिः। यस्मिन्नरातीनां शत्रूणां शोणितरुपैर्जलैः पञ्च ह्रदाः पूरिताः अर्थात्परशुरामेण सोऽयं कुरुक्षेत्ररुपो देशः। तातस्य द्रोणस्य केशग्रहाद्धेतोः क्षत्रात्क्षत्रियादेव। धृष्टद्युम्नात्तथाविधः। कार्त्तवीर्यार्जुनात्। जमदग्नेरिव परिभवः। अहितानां शत्रूणां या हेतयः शस्त्राणि तेषां घस्मराणि भक्षकाणि, अतएव गुरुणि श्रेष्ठानि मे मम भास्वन्ति भास्वराणि अस्त्राणि ब्रह्मास्त्रादीनि तान्येव यानि मत्तातेन परशुरामात्प्राप्तानि। अतः क्रोधनो द्रोणात्मजो मल्लक्षणो जनो यत् रामेण परशुरामेण कृतं पितृवैरनिर्यातनं तदेव कुरुत इत्यन्वयः। अत्र रौद्रे मृदवो वर्णाः प्रतिकूलाः ॥६८॥

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वेधाविधाविर्भवत्-
क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात्।

उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि-

र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥

प्रागिति। कृतपिनाकधनुभङ्गं रामं प्रति भार्गवस्येवमुक्तिः। स परशुः क्षणात्-त्वत्कण्ठपीठातिथिर्भवत्विति सम्बन्धः। स कः? येनानेन परशुना हरो देवः। जगत्सु खण्डपरशुरिति ख्याप्यते[८७]। रिपु खण्डने न तन्नामत्वेन प्रसिद्धः क्रियत इत्यर्थः। तेन यद्धनुस्त्वया खण्डितं तत्परशुना त्वमपि खण्डनीय इति ध्वन्यते। कीदृशः परशुः? प्राक् पूर्वम्। अप्राप्तो निशुम्भो नमनं भङ्गो वा येन तथाभूतस्य शाम्भवस्य शम्भुसम्बन्धिनो धनुषो या द्वेधाविधा द्वैधीकरणं तेनाविर्भवन्। यः क्रोधस्तेन प्रेरितो यो भीमो भयानको भार्गवस्य मम भुज एव स्तम्भस्तेनापविद्धः क्षिप्तः। अत एवाशिथिलो वेगवत्तरः। तथा उद्गता ज्वाला दीप्तिर्यस्य तथाभूतः। अत्रागच्छतः परशोरनिवारणीयत्वद्योतनायातिथित्वोक्तिः। तस्य च पीठारोहणौचित्यात्कण्ठे पीठत्वारोप इति बोध्यम्। अत्र चतुर्थपादे गुरुस्मरणेन भावोद्रेकात्तदौचित्येन मसृणवर्णविन्यासः। पादत्रये तु रौद्रप्राधान्यत्तदुचितो विकटवर्णविन्यासः ॥६९॥

धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः।

यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः

धीरइति। अत्र स इति सावधारणम्। तेनात्र जगति स एव नृपो धीरत्वादिगुणयुक्त इत्यन्वयः। वरः श्रेष्ठः आकारो यस्य सः। यस्य भृत्याः सेवकाः बलेनोत्सिक्ता दृप्ताः। बुद्ध्या प्रभया तेजसा चान्विता युक्ता इत्यर्थः। अत्र पूर्वार्द्धे रोरुत्वप्राप्तिरूपाद्विसर्गोपघातादुत्तरार्द्धे च तल्लोपाद्बन्धशैथिल्यम् ॥७०॥

राजन्, विभान्ति भवतश्चरितानि तानि

इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः।

धीदोर्बले अतितते उचितानुवृत्ती

आतन्वती विजयसम्पदमेत्य भातः ॥

राजन्निति। हे राजन्! भवतस्तानि चरितानि विभान्ति शोभन्ते। यानि रसातले पातालेऽन्तः गभीरप्रदेशे इन्दोर्द्युतिं दधति धारयन्ति। इन्दुवत्प्रकाशमानानि सन्तीत्यर्थः। धीः नीत्यनुसारिणी बुद्धिः। दोर्बलं बाहुबलं ते उभे विजयस्य सम्पदं सम्पत्तिं एत्य प्राप्य। भातः शोभेते। किम्भूते अतितते अतिविस्तृते उचितयोरवसरयोरनुवृत्ती अनुसरणे आतन्वती कुर्वाणे। यथोचितावसरानुसारेण, प्रवर्त्तमाने इत्यर्थः। उचितानुवृत्तिमिति क्वचित्पाठः। तत्रोचितानुवृत्तिं विजयसम्पदं चातन्वती धीर्दोर्बले इत्यन्वयप्रदर्शनं तु दीपिका कृतामयुक्तम्। सन्निहिततया सम्पदमित्यनेनान्वययोग्यस्य एत्येत्यस्याध्याहृतेन त्वामित्यादिनान्वय-

---

८७. 'प्रसिद्धः क्रियते। हरेण स्वपरशोरेकः खण्डः परशुरामाय दत्त इति प्रसिद्धिः। यद्वा खण्डयतीति खण्डस्तथाभूतः परश्वर्यस्येत्येवं ख्याप्यते' इति पदं 'क' मातृकायामधिकम्।

स्यानुचितत्वात्। वकारा भावाच्च, एत्येत्यत्र एष्विति पाठे तु निरवद्यम्। एषु चरितेषु मध्ये उचितेत्यादेर्धीर्दोर्बलविशेषणत्वं तु नुमागमप्रसक्त्या वृत्तिनी इति रूपापत्तेरयुक्तम्। अत्र पूर्वार्द्धेऽनित्यतया ऐच्छिकः सन्ध्यभावः सकृदपि दोषः। उत्तरार्द्धे तु इदूदेद्विवचनं प्रगृह्यमित्या- नुशासनिकप्रगृह्यसंज्ञाप्रयुक्तत्वादसकृदेवेति।।७१।।

तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः।
निजवंश उदात्तकान्तकान्तिर्बत मुक्तामणिवच्चकास्त्यनर्घः।।

तत इति। पतिंवरां प्रति सख्या इयमुक्तिः। ततः पूर्वोक्तात्पितुरयमुदितः उत्पन्नः। कस्मात्क इव। उच्चैरत्युच्चादुदयाचलादिन्दुरिव। कीदृशः? उदारेण महता हारेण हारिणी मनोहारिणी द्युतिर्यस्य सः। इन्दुस्तु उदारहारवत् हरिद्युतेः। एवंविधोऽयं निजवंशे मुक्ता-मणिवच्चकास्ति दीप्यते। मुक्तामणेरपि वंशे समुत्पत्तेः। कीदृशः? उदात्ता उत्कटाकान्ता रमणीया कान्तिर्यस्य तथाभूतः। तथा अनर्घ्यः श्रेष्ठः अमूल्यश्चेति। अत्र यलोपासिद्धत्वप्रयुक्तः सन्ध्यभावः।।७२।।

वेगादुड्डीय गगने चलण्डामरचेष्टितः।
अयमुत्तपते पत्री ततोऽत्रैव रुचिङ्कुरु।।

वेगादिति। नायकाधिष्ठितं संकेतस्थानं बोधयन्त्या दूत्या इयमुक्तिः। हे सखि! अयं पत्री पक्षी वेगादुड्डीय गगने चलन्नुत्तापत्ते उत्तसो भवति। ततस्तस्मादत्रैव प्रवेशे रुचिं प्रीतिं अवस्थितिमिति यावत्। कुर्वित्यन्वयः। कीदृशः डामरमुद्भटं चेष्टितं यस्य सः। डामरं डमरूवाद्यन्तद्वच्चेष्टितं यस्येत्यर्थः इत्यन्ये। अत्र चलं डामरेऽतिरूचिं कुर्विति च सन्निकर्षरूप सन्ध्युपस्थापिताभ्यां[८८] लण्डाचिङ्कुशब्दाभ्यां पुंव्यञ्जनयोन्यङ्कुरयोः प्रतीतिरित्यश्लीलः न्धिः। लाटदेशभाषायां चिङ्कुशब्देन योन्यग्राभिधानादिति।।७३।।

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः।
नात्रर्जुः क्षमते गन्तुं शिरो नमय तन्मनाक्।।

उर्व्यसाविति। अध्वगं प्रति कस्यचिदुपदेशोक्तिरियम्। अत्र मरूदेशस्यान्ते समीपे चारुरवस्थितिर्यस्यास्तथाभूता उर्वी महती तर्वाली तरुपङ्क्तिरस्तीतिशेषः। अत्र ऋज यथास्यात्तथा गन्तुं न युज्यते। तत्तस्मान्मनागीषत् शिरोनमय नीचैः कुर्वित्यन्वयः। क्षमते इति पाठे जन इत्यध्याहार्यम्। अत्र सन्धेः श्रुतिकटुत्वम्।।७४।।

अमृतममृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम्।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो
वदतु यदिहान्यत्स्वादु स्यात्प्रियादशनच्छदात्।।

अमृतमिति। अत्र द्वितीयममृतपदं स्वादुतरत्वरूपार्थान्तरसंक्रमितवाच्यम्।

---

८८. 'सन्ध्यु' स्थाने 'सम्बन्धि' 'क' मातृकायाम्।

स्वादुतरत्वायोगव्यवच्छेदो व्यङ्ग्यः । तथा चामृतममृतं स्वादुतरमत्र कः सन्देहः ? मधून्यपि अन्यथा न अमधूनि न मधून्येवेत्यर्थः। मधुराण्येवेति यावत्। चूतस्याम्रस्यापि प्रसन्नरसं स्वच्छरसं फलमधिकमधुरं कः सन्देह इत्यनुषज्यते। पुनरिति परन्त्वित्यर्थकम्। परन्तु रसानामन्तरं तारतम्यं वेत्तीति तथाभूतः । रसानामान्तरं मर्म वेत्तीति तथाभूतो वा जनो मध्यस्थः पक्षपातरहितः सन्निह जगति प्रियाया दशनच्छदादधरात् तदपेक्षयेत्यर्थः । तथा च न तादृशं जगति विद्यत इति भावः। अत्र हरिणीच्छन्दसि षष्ठे वर्णे प्रतिपादे समुचिताया-यतेश्चतुर्थपादगते षष्ठे[८९] हेति वर्णे भङ्ग इत्यश्रव्यत्वम्॥७५॥

यत्परिहर्तुं तीर्यते मनागपि न सौन्दर्यगुणेन।
अथ केवलं यस्य दोषः प्रतिपक्षैरपि प्रतिपन्नः इति संस्कृतम्॥

जं परीति। मानवतीं प्रति दूत्याः समाधानोक्तिरियम्। तथाविधमतत्कामचेष्टितं यत्सौन्दर्यगुणेन रमयणीयतारूपेण गुणेन मनागीषदपि परिहर्तुं न तीर्यते न शक्यते। अथ च यस्य दोषः। पूर्वोक्तापरिहारार्थत्वरूपः प्रतिपक्षैरपि ब्रह्मचार्यादिभिः केवलं प्रतीपन्नोऽङ्गीकृतः न तु परिहृतः[९०]। त्वत्कान्तस्य तु कैव कथेति। तस्य दैवादन्यवनितासंगमेऽपि कोपातिशयो न विधेय इति भावः। अहेत्यव्ययमित्यर्थकमिति चण्डीदासः। अन्ये तु, यः परिहर्त्तुमिति संस्कृतं प्रदर्श्य यो नायकः सौन्दर्यगुणो नापराधशीलोऽपीत्युक्तं न शक्यते। यस्य दोषोऽपराधः प्रतिपक्षैरप्यस्माभिः केवलं प्रतिपन्नः। पूर्वा द्रोक्तप्रकारेण, समाहित इति व्याचक्षते। तत्र यथास्थितपाठे य इति संस्कृतप्रदर्शनं कथं सङ्गच्छत इति चिन्तनीयम्। जोपरि हरि अमिति[९१] प्राकृतपाठेन भवितव्यमिति। आचार्यायां द्वितीयहरि[९२] उमित्यन्त गुरोः सगणस्य तीरइ इति तृतीयस्यादिगुरोर्भगणस्य चाश्रव्यत्वं छन्दःशास्त्रसिद्धम॥७६॥

विकसितसहकारतारहारिपरिमलगुञ्जितपुञ्जितद्विरेफः।
नवकिसलयचारुचामरश्रीर्हरति मुनेरपि मानसं वसन्तः॥

विकसितेति। वसन्तः मुनेरपि मानसं हरतीत्यन्वयः। कीदृशः? विकसितानां सहकाराणामाम्रवृक्षाणां तार उद्भटो हारि मनोहरश्च यः परिमलस्तेन गुञ्जिता गुञ्जनयुक्ताः पुञ्जिताः पुञ्जीभूताश्च द्विरेफा भ्रमरा यत्र तथाभूतः। अथवा तथाविधः परिमलो यत्र स चासौ गुञ्जितपुञ्जितद्विरेफश्चेति विग्रहः। मुनिमनोहारकत्वसमर्थनाय वसन्तगतप्रकर्षाधायकतया विवक्षितस्य तथाविधपरिमलस्य शब्दतो वसनान्वयसम्भवे अर्थतस्तत्सम्बन्धानुधावनस्यानुचितत्वात्[९३]। पुनः कीदृक्? नवकिसलयानि नव पल्लवा

---

८९. 'षष्ठे' हेति वर्णे इति 'क' मातृकायां नास्ति।
९०. 'परि' 'स्थाने' यदि 'ख' मातृकायाम्।
९१. 'हि तदा' ख मातृकायामधिकम्।
९२. 'द्वितीय' 'स्थाने' द्वितीयस्य 'ख' मातृकायाम्।
९३. धावनस्या 'ख' मातृकायामधिकम्।

एव चारुणि[९४] मनोहराणि चामराणि तैः श्रीः शोभा[९५] यस्य सः। अत्राद्यपादान्तस्थस्य गुरुत्वानुशासनेऽपि तत्कार्याक्षमतयाश्रव्यत्वम् ।।७७ ॥

अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
सम्भाराः खलु तेऽन्य एव विधिना यैरेष सृष्टो युवा।
श्रीमत्कान्तिजुषां द्विषां करतलात्स्त्रीणां नितम्बस्थलात्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च॥

अन्यास्ता इति। कस्यचिद्राज्ञो वर्णनमिदम्। स एष युवा विधिना यैः पदार्थैः सृष्ट उत्पादितः। ताः तदन्तर्गताः गुणरूपाणां रत्नानां सम्बन्धिन्यो रोहणस्य रत्नोत्पत्तिस्थान-भूतपर्वतविशेषस्य भुवो भूमयः अन्या विलक्षणा इत्यर्थः। एवमग्रेऽपि। मृत् उपादानभूतपार्थिव- भागरूपा। सम्भाराः उपकरणानि स कः, यत्र यस्मिन् दृष्टे सति द्विषां करतलादस्त्राणि पतन्ति। स्त्रीणां नितम्बस्थलाद्वस्त्राणि च पतन्तीति योज्यम्[९६]। श्रीमदित्यादि मूढेत्यादि च द्विषां स्त्रीणां च विशेषणम्। मोहश्च द्विषां भयप्रयुक्तः स्त्रीणान्तु कामावेशादित्यूहनीयम्। यत्तु यैरित्यत्र यद्रवगुणरत्नयन्मृत्सहितैरिति शेषः। तदैव तत्पदत्रयाकाङ्क्षापूरणादिति महेशेनोक्तम्, तदयुक्तम्। याभिश्च याभिश्च यैश्च यैरित्येवं पुमान्स्त्रियेत्यानुशासनिकैकशेषाभ्युपगमेनैवोपपत्तेरिति। अत्र श्लोकान्त्यस्य गुरु कार्याक्षमत्वम् ।७८ ॥

हा नृप! हा बुध ! हा कविबन्धो! विप्रसहस्रसमाश्रय, देव।
मुग्ध, विदग्ध, सभान्तररत्न, क्वासि गतः क्व वयं च तवैते।

हा नृपेति। राज्ञि मृते तदीयानां विलापोऽयम्। मुग्ध सुन्दर, सभान्तरे सभामध्ये रत्नभूतस्त्वं[९७] क्व गतोऽसि। तव सम्बन्धिन एते ईदृगवस्था वयं च क्व च वनखण्डे गताः स्म इति शेषः। मुग्धानां सुन्दरीणां विदग्धसभवन्तरे रत्नभूतेत्यर्थ इति महेशः। प्रत्येकं हा पदेन नृपत्वादेः प्रत्येकं प्राधान्येन शोकोद्दीपकत्वं व्यज्यते। इदं दोधकवृत्तं हास्यव्यञ्जकतया शोकाननुगुणम् ।।७१ ॥

तथा भूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
ने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु॥

तथा भूतामिति। तृतीयोल्लासे व्याख्यातमेतत्। अत्र वल्कलधरैरित्यस्य

---

९४. 'चारुणि मनोहराणि' 'ख' मातृकायां नास्ति।

९५. 'शोभा चामराणि तैः श्रीः' इति 'ख' मातृकायामधिकम्।

९६. 'योज्यं' 'ख' मातृकायां नास्ति।

९७. 'रत्न भूत त्वं क्व गतोसि। तव सम्बन्धिन एते ईदृगवस्था वयं च क्व च वनखण्डे गताः स्म इति शेषः मुग्धानां सुन्दरीणां विदग्ध सभानान्तरे' इति पदं 'क' मातृकायां नास्ति।

विशेष्यसाकाङ्क्षत्वात्। स्थितमित्यस्य च कैरिति कर्तृसाकाङ्क्षत्वादस्माभिरित्यपेक्षितम्। तथा खेदमित्यतरमित्थमित्यपि। अन्यथा खेदपदस्य पूर्वोक्तार्थहेतुकत्वालाभेन[९८] हेतुसाकाङ्क्षत्वापत्तेः। मात्सर्यानौचित्यासङ्गतेरिति[९९] दिक्[१००] ॥८०॥

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः।

अविरुद्धसमन्वितोक्तियुक्तिः प्रतिमल्लास्तमयोदयः स कोऽपि॥

स्फटिकेति। कस्यचिद्विदुषो वर्णनम्। स प्रकृतो विद्वान्कोऽपि लोकोत्तर इत्यर्थः। कीदृक्? स्फटिकाकृतिवन्निर्मलः स्वच्छान्तःकरणः। अतएव प्रकाममत्यर्थं प्रतिसंक्रान्तं प्रतिसंकानां निशातं तीक्ष्णम्। तीक्ष्णमतिवेद्यमिति यावत्। शास्त्रतत्त्वं शास्त्रस्याबाधितार्थो यत्र तथाभूतः। एवमविरुद्धा समन्विता सङ्गता उक्तिर्युक्तिः उक्ति योजना यस्य सः। अविरुद्धं यथा स्यात्तथा समन्विता उक्तिर्युक्तिर्येनेत्यर्थ इति केचित्। अविरुद्धेऽर्थे समन्विताः सम्बद्धा उक्तयो युक्तयश्च यस्येत्यन्ये। पुनः कीदृक्? प्रतिमल्लानां प्रतिवादिनामस्तमयस्य लक्षणया पराभवस्योदयः प्रादुर्भावो यस्यास्तथाभूतः। कदापि केनाप्यपरिभूतानामपि पराभव कर्तेत्यर्थः। एतेनोदयपदस्याधिक्यपरिहाराय अदयइति भिन्नपदत्वेन महेशकृतं व्याख्यानमनादेयम्। अत्राकृतिपदमधिकम्॥८१॥

इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः।

यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा॥

इदमिति। इह जगति पुंसां जरास्वपि वृद्धावस्थास्वपि यन्मान्मथः कामसम्बन्धी विकारः इदमनुचितम्[१]। वैरस्याधायकत्वादयुक्तम्[२]। अयमक्रमःअप्रशस्ता परिपाटी कुसम्प्रदाय इत्यर्थः। बाल्ययौवनजरासु विद्याविषयोपभोगधर्मा इति शास्त्रोक्तसम्प्रदायस्यैवावस्थानुरुपतया समीचीनत्वात्[३]। नञोऽप्राशस्त्यार्थकत्वात्। यदपि च नितम्बिनीनां स्त्रीणां जीवितं रतं वा स्तनपतनमवधिरुत्तरावधिर्यस्य तथाभूतं न कृतम्। अर्थाद्विधात्रा तदप्यनुचितं लोकविरुद्धम्। अक्रमः शास्त्रक्रमविरुद्ध इत्यनुचिताक्रमपदयोर्थमाहुः। तदयुक्तम्। जीवितरतयोः स्तनपतन-पर्यन्ताकरणे तदसम्भवात्। नहिं स्तनपतनान्तरं जीवितरतयोर्लोकविरोधः। शास्त्रीयविरोधो वा कस्यापि सम्मत इति पूर्वोक्तमेव ज्याय इति। अत्र कृतमित्यधिकम्॥८२॥

अधिकरतलतल्पं कल्पितस्वापलीला

परिमिलननिमीलत्पाण्डिमा गण्डपाली।

---

९८. 'लाभेन' स्थाने 'तेन' 'ख' मातृकायाम्।

९९. 'सङ्गतेरिति दिक्' 'क' मातृकायां नास्ति।

१००. 'परिपोषाच्चेति–न्यून्य पदत्वम्। नव द्रष्टा खिन्ने इत्यन्वयादित्यमिति व्यर्थमिति वाच्यं दृष्टवेत्यस्य गुरुणैवान्वयात् अन्यथानौचित्या' इति पदं 'क' एवं 'ख' मातृकायामधिकम्।

१. 'मनुचितम्' स्थाने 'मनुतं' 'ख' मातृकायाम्।

२. 'तथा' 'ख' मातृकायामधिकम्।

३. इत्यर्थ 'ख' मातृकायामधिकम्।

सुतनु, कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम्॥

अधिकरतलेति। करतले कपोलमाधाय चिन्तयन्तीं नायिकां प्रति सख्या इयमुक्तिः। हे सुतनु! करतलरूपे तल्पे इत्यधिकरतलतल्पं सप्तम्यर्थेऽव्ययीभावः। कल्पिता स्वापलीला यया तथाभूता। परिमिलनेन करतलघर्षणेन रक्तिमोदयात् निमीलन् तिरोभवन् पाण्डिमा यस्यास्तादृशी तव गण्डपाली गण्डस्थली कर्त्री कस्य यूनः स्मरनृपतेर्लीलायां वशीकरणरुपायां यौवराज्यस्याभिषेकं अञ्जसा तत्त्वतः व्यञ्जयति सूचयतीति कथमित्यन्वयः। यः स्मरेण स्वतः कर्तुमशक्यम्। तवैवंविधं स्वापादि करोति स ध्रुवं वृद्धेन स्मरेण स्वराज्येऽभिषिक्त इति भावः। अनेन कन्दर्पादप्यधिकं वशीकारकत्वं व्यञ्जितं भवति। अत्र लीलेत्यस्य द्विःप्रयोगात्कथितपदत्वम्॥८३॥

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्त्तते॥

कः क इति। कस्कादित्वात्तु[४] कस्क इति युक्तम्। पञ्चाननः सिंहो यतः यस्मात् सिंह्याः स्नेहेन यो विलासः कण्डूयनादिस्तेन बद्धा स्थिरीकृता वसतिः[५] स्थितिर्येन तथाभूतो वर्त्तते। अतः कः कः सूकरः कुत्र न घुरेत् भीमं शब्दं कुर्यात्। अपि तुत्तममध्यमाधमरूपः सर्व एव सर्वत्र घुर भीमार्तशब्दयोरिति दीपिकायाम्। घुरेत्पर्यटेदिति महेशः। कीदृक् घुर्घुरायिता तादृशशब्दवती या घुरी नासिका तया घोरोः भीषणः घुरी घोरं सूकरमुखाग्रमित्यन्ये। घुरी वाद्यविशेषः तद्वत् घोर इत्यपरे। एवं कः करीहस्तीकं कमलानामाकरमुत्पत्तिस्थानं विगतकमलं कर्त्तुं नोद्यतः। अपि तु सर्वः सर्वमपि के के आरण्यमहिषाः कानि वनानि नोन्मूलयेयुरपितुसर्वाणि। स्वाश्रयोन्मूलनेन मदौत्कट्यं सूच्यते। एवं च राजनि व्यसनशीले क्षुद्रा अपि भौमिका निर्मर्यादा भवन्तीति प्रस्तुतध्वननादप्रस्तुतप्रशंसालंकारः। अत्र वाच्यस्य[६] सूकरादेरुत्तरोत्तरमुत्कृष्टतया तथैव समुचितस्य बन्धप्रकर्षस्य भङ्गः। उत्तरोत्तरं तदपकर्षस्य स्फुटत्वात्॥८४॥

क्रेंकारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो
झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः॥

---

४. 'कस्कादित्वात्तु कस्क इति युक्तम्। पञ्चाननः सिंहो यतः यस्मात् सिंह्याः स्नेहेन यो विलासः कण्डूपनादिस्तेन वद्धा स्थिरिकृता' इति पदं 'क' मातृकायां नास्ति।

५. 'सतिः' स्थाने 'वसतिः' 'ख' मातृकायाम्।

६. 'वाच्यस्य' स्थाने 'सूच्यस्य' 'ख' मातृकायाम्।

क्रेन्कार इति। स्वगृहं प्रति प्रस्थितान्पथिकान्प्रति कस्यचित्कवेरियमुक्तिः। तन्व्याः कञ्चुलिकाया अपसारणेऽर्थाद्भवद्भिः क्रियमाणे सति यो भुजयोराक्षेपो धूननं तेन स्खलतां कङ्कणानां क्वाणः शब्दः वो युष्माकं प्रेम प्रीतिं तनोत्विति सम्बन्धः। कीदृश इत्यपेक्षायां क्रेंकार इत्यादीनि पञ्च रूपकाणि। क्रेंकार इति धनुर्ध्वनेरनुकरणम्। सुरतक्रीडार्थं पिक्यस्ता एव वा पिक्यः कोकिलाः। रतिरेव विलासादिफलोत्पत्तिस्थानत्वान्मञ्जरी तत्सम्बन्धिनां मधुलिहां झंकारः। रतिमञ्जरीमधुलिहां लम्पटतया तत्त्वेनाध्यवसितानां कामुकानां झंकारो हर्षोद्भवचुम्बनादिशब्दः तद्धेतुतया तत्त्वोपचारः आयुर्घृतमितिवदिति केचित्। रत्यर्थं या मञ्जरी तत्सम्बन्धिनां मधुलिहामित्यन्ये। रतिरेव मञ्जरी मधुलिहस्तेषामिति दीपिकायाम्। लीलार्थं चकोरी। लीलैव वा चकोरीति पूर्ववत्। नवं वयस्तारुण्यं तस्य लास्याय तत्तद्विलासादिरूपनृत्याय वेणुस्वनः वंशीध्वनिः। नवं वयोयस्यास्तादृश्यास्तरुण्या लास्याय सुरतरूपनृत्यायेति केचित्। अत्र समासमेव वाक्यं नवेत्यादिविशेषणेन स्वान्वयाय पुनरुपात्तम्॥८५॥

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि धर्मः कठोरः।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च॥

मसृणेति[७]। जनकपुत्री सीता पथि मार्गे पथिकानां वधूभिरश्रुपूर्णैर्लोचनैर्वीक्षित इति पूर्वोक्तप्रकारेण शिक्षिता चेत्यन्वयः इति किम्? हे बाले! यतो भूः सदर्भा दर्भाङ्कुरसहिता तस्मान्मसृणोमन्दश्चरणपातो यत्र तथा गम्यताम्। एवं यतो धर्म आतपः कठोरस्तीक्ष्णस्तस्मान्मूर्ध्नि सिचयस्य वस्त्रस्यान्तं प्रान्तं विरचयेति[८]। अत्र पूर्वार्धान्वयिनस्तदित्यस्यार्द्धान्तरगतत्वात्प्रतीतिविलम्बः॥८६॥

येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभि-
र्लीलापानभुवश्च नन्दनवनच्छायासु यैः कल्पिताः।
येषां हुंकृतयः कृतामरपतिक्षोभाः क्षपाचारिणां
किन्तैस्त्वत्परितोषकारि विहितं किञ्चित्प्रवादोचितम्॥

येषामिति[९]। हनुमता लङ्कायां दग्धायां वीरराक्षसानधिक्षिपतः कस्यचिद् रावणं प्रतीयमुक्तिः। हे प्रभो! येषां क्षपाचारिणां निशाचराणां प्रतापस्योष्मभिः कर्तृभूतैः ताः प्रसिद्धाः। त्रिदशानां देवानामिभस्य हस्तिन ऐरावताख्यस्य दानसरितः मदजलनद्यः पीताः शोषिता इत्यर्थः। तथा यैर्नन्दनस्येन्द्रक्रीडावनस्य तरुणां छायासु लीलया यत्पानमर्थान्मद्यस्य तस्य

७. 'मश्रृणेति' इति 'ख' मातृकायामधिकम्।
८. 'विरचयेति स्थाने' विचरयेति 'ख' मातृकायाम्।
९. 'येषामिति। हनुमता लङ्कायां दग्धायां वीरराक्षसानधिक्षिपतः कस्यचिद् रावणं प्रतीयमुक्तिः। हे प्रभो' इति पदं 'क' मातृकायां नास्ति।

भुवो भूमयः कल्पिता रचिताः। येषां हुंकृतयो हुंकाराः कृतोऽमरपतेरिन्द्रस्य क्षोभो याभिस्तथाभूताः आसन्निति शेषः। तैः क्षपाचारिभिस्तव परितोषकारि। प्रवादोचितं सभायां कथनयोग्यं प्रवादस्य स्वख्यातेरुचितं वा किंचित् किं विहितम्। अपि तु न किंचिदित्यन्वयः। अत्र यैरित्यस्य क्षपाचारिपदार्थेनाभिमतोऽन्वयो न भवति, भिन्नविभक्तिकत्वात्॥८७॥

त्वमेवं सौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वा-
मतः शेषं यत्स्याज्जितमिह तदानीं गुणितया॥

त्वमेवमिति। नायिकां प्रति दूत्या इयमुक्तिः। हे सुभगे! त्वमेवं दृश्यमानोत्कर्षं सौन्दर्यं यस्यास्तथाभूता। स च प्रकृतनायकोऽपीत्यर्थः चकारस्याप्यर्थत्वात्। रुचिरतायाः सुन्दरतायाः परिचितः सम्बन्धी इह संसारे कलानां चातुरीणां परां सीमानं परां काष्ठां युवामेव भजथः। आश्रयथः। सीमान्तमिति पाठेऽपि स्फुट एवार्थः। तत्तस्मात्, इत्येवंविधं वां युवयोर्द्वन्द्वं मिथुनं दिष्ट्या भाग्येन सम्वदत्यपि परस्परयोग्यमपि भवति। अतः पूर्वोक्ताच्छेषमवशिष्टं समागमरूपं यदि स्यात्तदानीमिह[१०] द्वन्द्वे विद्यमानया गुणितया जितं स्यादित्यनुषङ्गेणान्वयः तदैव गुणिताया उत्कर्षोऽन्यथा वैफल्यादपकर्ष इति भावः। शेषं परस्परं प्रेमेति तु व्याख्यानमयुक्तम्। तथा सति प्रेम्णो सिद्धत्वाऽलाभेनाभासतापत्तेरिति। अत्र यदीत्यभावाद्यदीत्यस्य च तदर्थाबोधकत्वादभिमतान्वयालाभः॥८८॥

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम्।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम्॥

सङ्ग्रामेति[११]। सङ्ग्राम एवाङ्गणं निर्भयसञ्चारात्। समारोपिते[१२] मौर्व्यामारोपिते सति। देवेति सम्बोधनम्। येन येन सहसा झटिति यद्यत्समासादितं प्राप्तं तदाकर्णयेति सम्बन्धः। केन किं समासादितमित्याकाङ्क्षायामुत्तरार्द्धम्[१३]। तत्र च समासादितमित्यस्य वचनादिविपरिणामेन[१४] समासादिताः समासादितः[१५] समासादितेत्येवमनुषङ्गो बोध्यः। भूमण्डलेन च राज्ञः समासादनं स्वस्वामितयेत्यवगंतव्यम्॥८९॥

चापाचार्य इति प्रागेव व्याख्यातम्।

---

१०. 'नुषङ्गेगान्वयः' स्थाने 'नुषङ्गणान्वयः' 'ख' मातृकायाम्।
११. 'खण्ड प्रशस्तौपद्यमिदम्' इति 'क' मातृकायामधिकम्।
१२. 'आगतेनभवता चाये' इति 'क' मातृकायामधिकम्।
१३. 'मुक्षया' 'ख' मातृकायामधिकम्।
१४. 'वचनादि' स्थाने 'वनादि' 'ख' मातृकायाम्।
१५. 'समासादितः' इति पदं 'ख' मातृकायां नास्ति।

चत्वारो वयमृत्विजः स भगवान्कर्मोपदेष्टा हरिः
संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं हतो दुन्दुभिः॥

चत्वार इति। वेणीसंहारे दुन्दुभिध्वानमाकर्ण्य रणयज्ञः प्रवर्तत इत्युक्त्वा भीमस्योक्तिरियम्। चत्वारो युधिष्ठिरव्यतिरिक्ता वयं भ्रातरो ऋत्विजः। अर्थात्सङ्ग्रामाध्वरे। एवमग्रेऽपि योज्यम्। स सर्वज्ञत्वेन प्रसिद्धो हरिः श्रीकृष्णः। कर्मणामुपदेष्टोपदेशकः सदस्यापरनामधेयः। सङ्ग्रामाध्वरे दीक्षितो गृहीतनियमः नरपतिर्युधिष्ठिरः। पत्नी द्रौपदी। गृहीतं व्रतं दुर्योधनवधपर्यन्तं वेणीसंयमरूपं यया तथाभूता। सपत्नीकस्यैव यज्ञाचरणौचित्यात्। कौरव्याः दुर्योधनाद्याः शतं भ्रातरः पशवः। तत्तुल्यतया वध्यत्वात् प्रियायाः द्रौपद्याः परिभवः सभायां केशाम्बरादिकर्षणादिरूपः तज्जनितस्य क्लेशस्योपशन्तिरेव फलम्। राजन्यानां क्षत्रियाणामुपनिमन्त्रणायाह्वानाय हतो[१६] दुन्दुभिः स्फीतं स्निग्धं यथा स्यात्तथा रसति शब्दायत इत्यर्थः। ताडने स्निग्धशब्दोदयात् जयसूचनम्। यशोदुन्दुभिरिति पाठे यश एव दुन्दुभिरिति रूपकम्। स्फीतमिति यशो विशेषणं वा[१७]॥९०॥

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः।
भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः॥

जङ्घेति। व्याख्यातं प्राक्[१८]।

अप्राकृतस्य चरितातिशयैश्च दृष्टै-
रत्यद्भुतैरपहृतस्य तथापि नास्था।
कोऽप्येष वीरशिशुकाकृतिरप्रमेय-
सौन्दर्यसारसमुदायमयः पदार्थः॥

अप्राकृतस्येति। रामेण धनुर्भङ्गे कृते जनकस्योक्तिरियम्। दृष्टैश्चेति भिन्नक्रमचकारेण श्रुतत्वसमुच्चयः। अप्राकृतस्य यत्किंचित् कौतुकानाकर्षणीयस्यात्यद्भुतैर्दृष्टैः श्रुतैश्च चरितातिशयैः। अर्थादन्येषां हृतस्य वशीकृतस्य मम। तथापि तेषु नास्थानादर इत्यर्थः अप्राकृतस्य लोकोत्तरस्य रावणस्य चरितातिशयैः कैलासान्दोलनाद्यैरिति केचित्। एषः पुरोवर्त्ती रामः वीरशिशुकाकृतिः वीरबालकाकृतिः। अप्रमेयस्यापरिमितस्य माहात्म्यस्य साराणां यः समुदायस्तन्मयः कोऽप्यनिर्वाच्यः पदार्थो वर्त्तत इति शेषः। अप्रमेयं अन्यत्रादृष्टमित्यर्थ इति

१६. 'छानाय' इति 'ख' मातृकायामधिकम्।

१७. 'अत्र' ऋत्विगादीनामध्वरसंभवस्याभिमतस्यासम्भवः स्पष्टः इति पदं 'क' मातृकायामधिकम्।

१८. 'अत्र जनितनु शब्दे न पार्वती तनुरभीताय प्रतीयते किन्तु दण्डपाद सम्बन्धिनी। निजादि पदानां स्व वाक्य मुख्यविशेष्यान्वयित्वव्युत्पत्तेः। इति पदं 'क' मातृकायामधिकम।

कश्चित्। महेशस्तु वकारोऽप्यर्थे। तथा च दृष्टैरपि परिचितातिशयैर्हृतस्याकृष्टस्य मम तथापि नास्था। दशरथपुत्रेणैव धनुर्भग्नमित्याश्वासो नास्तीत्यर्थः। ननु[१९] वैदग्ध्याभावादयमनाश्वासस्तत्राहाप्राकृतस्येति। प्राकृतोऽविदग्धः तद्भिन्नस्येत्यर्थः। तर्हि किं सम्भावयसीत्यत्राह कोऽप्येव इति। जनागम्य इत्यर्थ इत्याह[२०] ॥९१॥

एषोऽहमद्रितनयामुखपद्मजन्मा
प्राप्तः सुरासुरमनोरथदूरवर्त्ती।
स्वप्नेऽनिरुद्धघटनाधिगताभिरुप-
लक्ष्मीफलामसुरराजसुतां विधाय॥

एषोऽहमिति। उषाहरणे स्वप्ने उषानिरुद्धयोर्वास्तवं संगमं निगूढं सम्पाद्यागतस्य कामस्येयमुक्तिः। एषोऽहं कामोऽसुरराजस्य बाणस्य सुतामुषाख्यां[२१] स्वप्नेऽनिरुद्धेन प्रद्युम्नसुतेन या घटना समागमस्तेनाधिगतं प्राप्तं अभिरुपं योग्यं लक्ष्म्याः सौन्दर्यश्रियः फलं यया तथाभूतां विधाय सम्पाद्य प्राप्त आगत इत्यन्वयः। कीदृशः ? अद्रितनयायाः मुखपद्माज्जन्म यस्य तथाभूतः दाहानन्तरं हरेण वरे दत्ते गौरीवदनात्कामोत्पत्तिरिति पुराणप्रसिद्धिः। पुनः कीदृक् सुरासुरमनोरथानां[२२] दूरवर्त्ती। सुरासुरैर्मनसाप्यचिन्त्यगतिरित्यर्थः। अन्यथेन्द्रियान्तरगम्यत्वसम्भावनापत्तेः[२३] ॥९२॥

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः।
कमपराधलवं मम पश्यसित्यजसि मानिनि, दासजनं यतः॥

त्वयीति। विक्रमोर्वशीये उर्वशीं प्रति पुरुरवस उक्तिरियम्। हे मानिनि ! मामकमपराधस्य लवं लेशं पश्यसि यतो यस्मादपराधलेशाद्दासभूतं जनं मल्लक्षणं त्यजसीत्यन्वयः। कीदृशस्य मम। त्वयि निबद्धरतेः स्थिरानुरागस्य तथा प्रियवादिनः। एवं प्रणयभङ्गे पराङ्मुखं तद्भीरु चेतो यस्य तथाभूतस्येत्येवं विशेषणत्रयस्यापराधलेशाभावोपपत्त्याभिप्रायगर्भत्वात्परिकरालंकारः। अत्रापि लवमपीत्यवश्यं वाच्यम्। अन्यथा लवनिषेधेऽपि स्थूलसम्भावनापत्तेः ॥९३॥

प्रियेण संग्रथ्य विपक्षसन्निधा-
वुपाहितां वक्षसि पीवरस्तने।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुषु॥

---

१९. 'ननु वैदग्ध्याभावादयमनाश्वासस्तत्राहाप्राकृतस्येति। प्राकृतोऽविदग्धः तद्भिन्नस्येत्यर्थः।' इति पदं 'ख' मातृकायां नास्ति।

२०. 'अत्र तथापीत्यस्य यद्यपीत्येशाकांक्षत पायद्यप्यपहृत इति वाच्यं न च तथोक्त मित्यत भिहित वाच्यत्वं दोषः' इति पदं 'क' मातृकायामधिकम्।

२१. 'उषा' स्थाने 'ज्या' 'क' मातृकायाम्।

२२. 'सुरा' 'ख' मातृकायां नास्ति।

२३. 'अत्राप्यर्थोऽवश्यवाच्योऽनभिहितः' इति 'क' मातृकायामधिकम्।

प्रियेणेति। किरातार्जुनीये जलक्रीडावर्णने पद्यमिदम्। काचिन्नायिका प्रियेण कान्तेन विपक्षसन्निधौ सपत्नीसमक्षं संग्रथ्य सम्यग्ग्रथित्वा पीवरौ पीनौ स्तनौ यत्र तथाविधे वक्षसि उपाहितां निहितां जलेनाविलां म्लानामपि स्रजं मालां न विजहौ न परित्यक्तवतीत्यन्वयः। कुत इत्याकाङ्क्षायामाह- वसन्ति हीत्यादि। हि यस्मात्प्रेम्णि गुणा वसन्ति न वस्तुनि। प्रेमसत्व एव वस्तुन उपादेयत्वचित्ताकर्षकत्वयोर्दर्शनात्तदभावे चादर्शनादन्वयव्यतिरेकाभ्यां प्रेमैवोपादेयं[२४] चित्ताकर्षकं च भवतीति तदेव गुणवदित्यर्थः। तथा च सपत्नीसमक्षं निर्माय प्रेमपूर्वकं कान्तेन हृदि निहितायाः स्रजो जलाविलतया सौरभाभावेऽपि प्रेमास्पदतया-परित्याज्यत्वं युक्तमिति भावः। चक्रवर्त्तिनस्तु प्रेम्णि सति वस्तुनि उत्कर्षो न वस्तुमात्रे इत्यर्थमाहुः। प्रेम्णि गुणा उत्कर्षा न वस्तुनि। प्रेमोत्कर्ष एवो पादेयो न वस्तूत्कर्ष इति भाव इत्यन्ये। अत्र नकारोऽस्थानस्थः न काचिदपि तु सर्वा इति विरुद्धप्रतीतिप्रसङ्गात्॥९४॥

लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तः कपोलस्थलम्।
पार्वत्या नखलक्ष्मशङ्कितसखीमर्मस्मितह्रीतया
प्रोन्मृष्टः करपल्लवेन कुटिला ताम्रच्छविः पातु वः॥

लग्न इति। शितिकन्धरस्य महादेवस्येन्दुशकलेन चन्द्रखण्डेन निद्रान्तरे स्वापमध्येऽन्तः कपोलस्थलं कपोलस्थलमध्ये लग्नो मुद्रांकस्तदाकारचिन्हं वः युष्मान्पातु रक्षत्विति सम्बधः। कपोलस्थलं तु महादेवस्येति केचित्। पार्वत्या इत्यन्ये। शितिकन्धरपदोपादानस्वारस्यात्तु चरमपक्ष एव युक्तः प्रतिभाति। कीदृशेनेन्दुशकलेन। केल्या क्रीडया यः कचग्रहस्तेन श्लथा शिथिला या जटा तस्यां लम्बो लम्बनं यस्य तथाभूतेन। एवं च कपोलसम्बन्धोपपत्तिः। कीदृशो मुद्राङ्कः पार्वत्या नखलक्ष्मणि नखचिह्ने शङ्किता संजातशङ्का या सखी तस्या नर्मस्मितेन लीलास्मितेन[२५] या व्रीडा लज्जा तया हेतुभूतया करपल्लवेन प्रोन्मृष्टो मार्जितः। तथाविधस्मितेन व्रीडा यस्या इति पार्वत्या विशेषणमित्यन्ये। पुनः कीदृक्? कुटिलश्चासावाताम्रच्छविरीषदारक्तकान्तिः। इदमेव च नखलक्ष्मशङ्काबीजमिति। ततः पूर्वमेवैतत्पदस्थानं युक्तम्॥९५॥

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोशनिः सरदलिश्रेणीकृपाणं शशी॥

अद्यापीति। असौ दृश्यमानः शशी तत्क्षणे उत्फुल्लद्विकसद्यत्कैरवं कुमुदं तस्य कोशः कुड्मल एव कोषः खड्गपिधानं तस्मान्निःसरतां अलीनां श्रेणी पङ्क्तिरेव कृपाणः खड्गस्तं

---

२४. 'प्रेमै' स्थाने 'प्रियै' 'ख' मातृकायाम्।
२५. 'लीलास्मितेन' 'ख' मातृकायां नास्ति।

कर्षत्या कर्षतीत्यन्वयः। कुत इत्याकाङ्क्षायां हेतुमुत्प्रेक्षते- अद्यापीत्यादि। एष मानः सीमन्तिनीनां हृदि अद्यापि मत्सान्निध्येऽपि स्थातुं वाञ्छति धिक् निन्द्यमिदमिति क्रोधादिवेत्यर्थः। अतएवालोहित आरक्तः कोपेन रक्तिमोदयात्। हृदि तिष्ठासायां हेतुगर्भं तद्विशेषणमाह-स्तनेति। स्तनावेव शैलौ तद्रूपेण दुर्गेण विषमेऽनाक्रमणीये। शशी कीदृक्। प्रोद्यन्तो दूरतरं प्रसारिताः कराः किरणा एव करा हस्ता येन तथाभूतः। खड्गाकर्षणेऽपि हस्तस्य तथात्वात्। प्रोद्यन्निति पाठे भिन्नमेव शशिविशेषणम्। तत्क्षणादिति पाठे तत्क्षणात्कर्षतीत्यन्वयः। यत्वद्यापि ममोदयेऽपीति व्याख्यानम्, तदयुक्तम्। आरक्तस्यैवोदयेन ततः पूर्वमेव क्रोध कथनौचित्यात्। कोशोऽस्त्रीकुद्मले रवखड्गपिधानेऽर्थोद्यदिव्ययोरित्यमरः। अत्रास्थाने दीर्घसमासः। पूर्वार्ध एव क्रुद्धोक्तौ तदौचित्यात्॥९६॥

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम्।
ननु मुञ्च हृदयनाथं कण्ठे सनसस्तमोरुपम्॥

किमितीति। मानिनीं प्रति सख्या इयमुक्तिः। अत्र पादगतं पादप्रणतं बहुगुणं हृदयनाथं किमिति न पश्यसि। इमं कण्ठे गृहाण। मनसस्तमोरूपं कोपं मुञ्चेति वाक्यत्रयं परस्परपदसङ्कीर्णम्॥९७॥

परापकारनिरतैर्दुर्जनैः सह संगतिः।
वदामि भवतस्तत्त्वं न विधेया कदाचन॥

परेति। स्पष्टम्। अत्र सङ्गतिर्न विधेयेति वाक्यं वदामीति वाक्यान्तरेण गर्भितम्। एवं च सङ्गतेः। सदसत्त्वसंशयः अन्त्यपादे कर्म साकाङ्क्षत्वं चेति दूषकताबीजमिति केचित्॥९८॥

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या न दृष्टा पतन्ती।
तत्सक्तोऽयं न किञ्चिद् गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिव गतेत्यम्बुधिं तस्य कीर्तिः॥

लग्नमिति। अत्रासियष्टिरसतीत्वेन श्री राजपत्नीत्वेन कीर्तिश्च दूतीत्वेनाध्यवसिता बोध्या। यस्य राज्ञः कीर्तिरम्बुधिं प्रति गतेत्यन्वयः। फलमुत्प्रेक्षते-श्रियो नियोगादाज्ञया इति तत्सन्देशं गदितुं वक्तुमिवेति। सन्देशस्वरूपं लग्नमित्यादि भृत्येभ्य इत्यन्तम्। तदर्थस्तु हे अम्बुधे! रागो रुधिरलौहित्यमेव रागोऽनुरागस्तेनावृतं व्याप्तमाङ्गं यस्यास्तथाभूतया ययैवासियष्ट्या खड्गयष्ट्येह सङ्ग्रामे अरीणां कण्ठे सुदृढं यथा स्यात्तथा लग्नम्। या चासियष्टिः इह सङ्ग्रामे मातङ्गा गजा एव मातङ्गाश्चण्डालास्तेषामुपरि पतन्ती परेषां शत्रूणां पुरुषैरेव प्रकृष्टपुरुषैर्दृष्टा। तस्मात्प्रकृष्टसाक्षिसत्त्वान्मिथ्यात्वशङ्कानिरासः[२६]। तया[२७]

२६. 'शङ्का' 'क' मातृकायां नास्ति।
२७. 'तया' स्थाने तस्यां 'क' मातृकायाम्।

खड्गयष्ट्यां सक्तः सम्बद्ध[२८] एव तस्यां सक्तोऽनुरक्तः। अयं मम भर्त्ता राजा न किञ्चिद्युक्तायुक्तं गणयति विचारयति। यथाश्रुते तु किञ्चित्षाड्गुण्यादिकं न गणयतीत्यर्थः। तेन युक्तायुक्तगणनाभावेन[२९] हेतुनाऽहं भृत्येभ्यो दत्तास्मिदं ते मत्पितुर्निवेदितमस्त्विति[३०]। तेन राज्ञेति कर्तरि तृतीयेति केचित्। खड्गपक्षेऽगं रेखाविशेष इति दीपिकायाम्। एव मनया भङ्ग्या शौर्यदातृत्वयशसामुत्कर्षो वर्णितः। अत्र भृत्येभ्य इत्यन्तवाक्यैकवाक्यमध्ये विदितमित्यादिवाक्यान्तरं प्रविष्टमिति विशेषः ॥९९ ॥

महाप्रलयमारुतक्षुभितपुष्करावर्त्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कृतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥

महाप्रलयेति। वेणीसम्वरणे रणकोलाहलमाकर्णयतोऽश्वत्थाम्न इयमुक्तिः। अद्यायं समरोदधेः सङ्ग्रामरूपाब्धेः सम्बन्धी तत्सकाशाद्वा पूर्वमभूतोऽभूतपूर्वो रवः सिंहनादः मुहुर्बारम्बारं कुतः कस्माद्धेतोरस्तीति प्रश्नः। कीदृशः महता प्रलयमारुतेन क्षुभितानां पुष्करावर्तकानां मेघविशेषाणां प्रचण्डमुग्रं घनं निबिडं च यद्गर्जितं तस्य प्रतिरवस्य प्रतिध्वनेरनुकारी सदृशः। तथा श्रवणयोर्भैरवः भीषणः। एवं स्थगिता आच्छादिता व्याप्तेति यावत्। रोदसी द्यावापृथिव्योरन्तरालमेव कन्दरा गुहा येन तथाभूतः। अत्र रवशब्दस्य मण्डूकादिशब्द एव कविप्रयोगप्रसिद्धिर्नत्वेवंविधे वीराणां गर्जित इति तदतिक्रमः ॥१०० ॥

नाथे निशाया नियतेर्नियोगादस्तंगते हन्त निशाऽपि याता।
कुलाङ्गनानां हि दशानुरुपं नातः परं भद्रतरं समस्ति ॥

नाथ इति। निशाया नाथे चन्द्रे नियतेर्दैवस्य नियोगादस्तं गते सति निशापि तद्वधूरस्तं याता। हन्तेति हर्षे। स च दशानुरूपत्वात्। इदमेवार्थान्तरन्यासेन समर्थयति–कुलाङ्गनानामिति। हि यस्मात्कुलाङ्गनानां दशानुरूपम्। पतिविनाशदशायोग्यम्। अतः अनुगमनात्परं अन्यत् भद्रतरं शोभनतरं न समस्ति। नास्तीत्यर्थः। अत्र गते इति गमधातोः प्रक्रमादग्रेऽपि तत्प्रयोग एवोचितो न तु यातेति याधातोरिति प्रकृतेः प्रक्रमभङ्गः ॥१०१ ॥

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
संपत्तौ च विपत्तौ च महतामेकरुपता ॥

उदेतीति। निगदव्याख्यातम्। एवं चोद्दिष्टप्रतिनिर्देशरूपतया कथितपदत्वाख्यदोषानवतारात्। यथाप्रक्रान्त ताम्रपदं प्रयुज्यते तथा दर्शितोदाहरणेऽपि प्रक्रान्तमेव प्रयोक्तुमिति सिद्धम् ॥१०२ ॥

---

२८. 'सम्बद्ध एव तस्यां सक्तोऽनुरक्तः अयं' इति पदं 'क' मातृकायां नास्ति।
२९. 'युक्ता' 'ख' मातृकायां नास्ति।
३०. 'निवेदित' स्थाने वेदित 'क' मातृकायाम्।

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा।

निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति लक्ष्मीः॥

यश इति। किरातार्जुनीये द्रौपद्या इयमुक्तिः। यशोऽधिगन्तुमित्यादीनामभियोगभाजामित्यनेनान्वयः। अधिगन्तुं लब्धुम्। मनुष्येषु संख्यां गणनामतिवर्तितुमतिक्रम्य वर्त्तितुम्। मनुष्यदुर्लभमुत्कर्षं प्राप्तुमिति यावत्। निरुत्सुकानामौत्सुक्यरहितानाम्। अभियोगभाजामुद्योगवताम्, अंकमुत्सङ्गम्। अत्र सन्प्रत्ययप्रयोगात्तुमुन्प्रत्ययप्रक्रमभङ्गः॥१०३॥

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।

सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः॥

त इति। कुमारसम्भवे पद्यमिदम्। ते मरीच्यादयो मुनयः, हिमालयमामन्त्र्य पृष्ट्वा पुनः शूलिनं महादेवं प्रेक्ष्यास्मै शूलिने सिद्धमर्थं गौरीविवाहघटनारूपं प्रयोजनं निवेद्य कथयित्वा तेन शूलिना विसृष्टा आज्ञप्ताः खमाकाशमुद्ययुरुत्पेतुरित्यर्थः। अत्रेदमः प्रक्रमभङ्गः॥१०४॥

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्।

अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा॥

महीभृत इति। इदमपि तत्रत्यमेव पद्यम्। पुत्रवतोऽपि महिभृतो हिमाचलस्य दृष्टिस्तस्मिन्गौरीरूपेऽपत्ये तृप्तिं दिदृक्षापूर्तिं न जगाम न प्रापेत्यर्थः। अत्र दृष्टान्तमाह-अनन्तेत्यादि। हि यतः अनन्तपुष्पस्य मधोर्वसन्तस्य सम्बन्धिनी द्विरेफाणां भ्रमराणां माला पंक्तिश्चूते आम्रे सविशेषः सातिशयसङ्ग आसक्तिर्यस्यास्तथाभूता भवतीति शेषः। अत्र द्विरेफमाला सादृश्यातिशयाद्वसन्तदृष्टित्वेनाध्यवसिता बोध्या। अत्र पुष्पसामान्यसत्तायां तद्विशेषादरदृष्टान्तेन दार्ष्टान्तिकेऽप्यपत्यसामान्यसत्ताभिधानार्थमपत्यवत इत्येव वक्तुमुचितम्, न तु विशेषतः पुत्रवतः इति। दृष्टान्तवैषम्यापत्तेः, अतः प्रक्रमभङ्गः। पर्यायत्वं त्वेकधर्मिवाचकतया गौणं न तु मुख्यमिति बोध्यम्। एतेन पुत्रे सत्यपि कन्यायामधिकप्रीतिरिति विवक्षणान्न दोषः इति समाधानं निरस्तमिति कृतं पल्लवितेन॥१०५॥

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः।

नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः॥

विपद इति। किरातार्जुनीये द्रौपद्या इयमुक्तिः। अविक्रमं पराक्रमरहितम्, आपदा उपेतं युक्तं जनमायतिरुत्तरकालशुद्धी रहयति त्यजति। निरायतेरायतिरहितस्य जनस्य लघुता, नीचता नियता, अगरीयान्। गौरवहीनो जनः श्रियो लक्ष्म्याः पदमाश्रयो न भवतीति शेषः। नृपेति युधिष्ठिरसम्बोधनम्। अत्रापदित्युपसर्गप्रक्रमभङ्गः। अगरीयानिति पर्यायस्य चेति॥१०६॥

काचित्कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मी-

रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः।

भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमानाः

प्रस्थाने पार्थिवानामशिवामेति पुरोभावी नार्यः शशंसुः ॥

काचिदिति। पार्थिवानां राज्ञां प्रस्थाने यात्रायां पुरोऽग्रे भावि उत्पत्स्यमानमशिवममंगलं नार्यः स्त्रिय इत्यनेन प्रकारेण शशंसुः सूचितवत्यः। कथमित्याकांक्षायामाह–काचिदित्यादि। काचिन्नारी रजोभिः कीर्णा व्याप्ता रजस्वला सती दिवमन्तरिक्षमनुविद्धौ अनुचकार, तस्या अपि रजोभीं रेणुभिर्व्याप्तित्वात[31]। पतिवियोगदुःखेन भूमिपतनाद्रेणुभिः कीर्णेत्यर्थः इति केचित्। कीदृशी। मन्दा वक्रेन्दोर्मुखचन्द्रस्य लक्ष्मीः शोभा यस्यास्तथाभूता। द्यौरपि मन्दवक्त्रसदृशचन्द्रशोभा बोध्या। काश्चिन्नार्योऽश्रीकाः शोभाहीना दिश इवान्तर्दाहं दधिरे। दिग्दाहस्याप्यमङ्गलसूचकत्वात् कीदृश्यः। उद्भ्रान्तं सत्त्वं चित्तं यासां तथाभूताः। दिक्पक्षे उद्भ्रान्तानि सत्त्वानि प्राणिनो यासु तथाभूता इत्यर्थः। सत्वं गुणे पिशाचादौवले द्रव्य स्वभावयोः। आत्मत्वे[32] व्यवसाये च चित्ते प्राणिषु जन्तुषु इति विश्वः। तथान्या नार्यः प्रतिपदं वात्या इव भ्रेमुः भ्रमणं चक्रुः। एवमपरा नार्यो भूमिवत्कम्पमाना अशिवं शशंसुरिति सम्बन्धः। वात्याभ्रमणभूकम्पयोरशुभसूचकत्वं प्रसिद्धम्। अत्र[33] काचिदित्येकवचनप्रक्रमादग्रे तद्भङ्गः एवं कम्पमाना इत्याख्यातप्रक्रमभङ्गोऽप्यूह्यः ॥१०७॥

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं

छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यताम्।

विश्रब्धः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले

विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥

गाहन्तामिति। शाकुन्तले आश्रमे शकुन्तलादर्शनान्नि वृत्तमृगयाभिलाषस्य राज्ञो दुष्यन्तस्य सेनापतिं प्रतीयमुक्तिः। तत्रोपक्रमे अद्य तावदिति श्लोकशेषः सर्ववाक्यान्वयी बोध्यः। महिषाः शृङ्गैर्मुहुर्बारम्बारं ताडितमुत्फालितम्। निपानसलिलं कूपसमीपजलाशयसम्बन्धिजलं गाहन्तामालोडयन्तु। त्रासापगमेन प्रकृतिस्वाच्छन्द्यात्। सेयं महिषजातिरुक्ता। एवमग्रिमयोरपि जातिकथनमुन्नेयम्। छायायां बद्धं कदम्बकं समूहो येन तन्मृगकुलं रोमन्थमुद्गिलितकवलचर्वणमभ्यस्यतु। त्रासात्पलायनपरतयान्योन्यवार्तानभिज्ञं विस्मृतरोमन्थं चाधुना तदपगमे सति सम्भूय शिक्षाक्रमेण रोमन्थाभ्यासं करोत्वित्यर्थः। कदम्बानां बहुत्वात्कुलस्यान्यपदार्थत्वोपपत्तिः। एवं वराहपतिभिः सूकरश्रेष्ठैर्विस्रब्धं विश्वासयुक्तं यथा स्यात्तथा पल्वलेऽल्पसरसि मुस्तायाः प्रसिद्धौषधिविशेषस्य क्षतिरुत्खननं क्रियताम्। तथेदं नानाविधदानवसेनाविनाशकमस्मद्धनुश्च शिथिलो ज्याबन्धो यस्य तथाभूतं सद्विश्रामं लभताम्।

---

३१. 'व्याप्तित्वात्' 'ख' मातृकायां नास्ति।

३२. 'आत्मत्वे' स्थाने 'आत्मने' 'ख' मातृकायाम्।

३३. 'अत्र' 'ख' मातृकायां नास्ति।

यद्वास्मदिति पञ्चमीबहुवचनान्तं पृथक्पदम्। अस्मत्सकाशाद्विरतं भवत्वित्यर्थः। अत्र गाहन्तामिति कर्त्तृतिङ् प्रक्रमात् क्रियतामित्यत्र तदभङ्गः ॥१०८॥

अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदाध्माते रोषान्मुनावभिगच्छति।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात्पाणिः पादोपसङ्ग्रहणाय च॥

अकलितेति। धनुर्भङ्गकुपिते भार्गवेऽभ्यागते श्रीरामचन्द्रस्योक्तिरियम्। मुनौ भार्गवे रोषादभिगच्छति अभ्यागते सतिपाणिः अर्थान्मम अभिनवाया नूतनाया धुनर्विद्याया दर्पस्य क्षमाय योग्याय युद्धरूपाय कर्मणे च रभसादवेगाऽत्स्फुरिति। नमस्यतया च[३४] पादयोरूप-संग्रहणाय च स्फुरतीत्यन्वयः। चद्वयेन तुल्यकालत्वाभिव्यक्तिः। किम्भूते मुनौ। अकलितोऽपरिमितस्तपस्तेजसो वीर्यस्य प्रभावस्य प्रथिमा महिमा यस्यैवंभूते यशोनिधौ प्रतिष्ठिते। तेनैतज्जयादुत्कर्षाधिक्यम्। अवितथेन यथार्थेन मदेन दर्पेणाध्माते। प्रदीप्त इत्यर्थः। अत्र तपसः प्रथमोद्दिष्टत्वेन तदुचितस्य पादोपसंग्रहणस्यापि प्राथम्यमुचितम्। क्रमश्च देशसामान्यादिति पाञ्चमिकन्यायादिति प्रक्रमभङ्गः ॥१०९॥

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतः त्वमस्य लोकस्य च नेत्रकौमुदी॥

द्वयमिति। पूर्वं व्याख्यातम्। अत्र त्वं शब्दार्थस्यैव शोच्यतायां समुच्चयविवक्षणात्। त्वं चेति पाठक्रमो युक्तस्तदभावात्वक्रमत्वम् ॥११०॥

शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ, दोषाकरश्री-
र्वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः।
आज्ञेयं सर्वगा ते प्रसरति पुरतः किं मया वृद्धया ते
प्रोच्यैवेत्थं प्रकोपात्सितकरसितया यस्य कीर्त्या प्रयातम्॥

शक्तिरिति। यस्य राज्ञः सितकरश्चन्द्रस्तद्वत्सितया श्वेतया कीर्त्या, प्रकोपात्, इत्थं प्रोच्येव उक्त्वेव प्रयातं प्रकर्षेण यातं दूरं गतमित्यर्थः। अत्र कीर्तेः पत्नीत्वेनाध्यवसानं बोध्यम्। एवं शक्त्यादीनामप्यसन्नायिकात्वेन। कीदृगुक्त्वेत्याकाङ्क्षायामाह शक्तिरित्यादि। हे नाथ! इयं प्रत्यक्षा निस्त्रिंशः खड्ग एव निस्त्रिंशः क्रूरस्तज्जन्मा शक्तिः सामथ्र्यमेव नायिका तव भुजयुगले प्रतिवसतीत्यग्रेतनेनान्वयः। असत्वं च क्रूरजायाः क्रूरस्वभावत्वात्। त्रिंशतः पूरणस्त्रिंशः,स निर्गतो यस्मात्समुदायात्स। निस्त्रिंशः पुरुषसमुदायस्तज्जन्या। ऊनत्रिंशत्पुरुषसमुदायजा वेश्यापुत्रीति यावदित्यर्थः इति महेशः। तथा तव वक्त्रे दोषाकरस्य चन्द्रस्य श्रीरेव दोषानिधानभूता श्रीर्नायिका प्रतिवसति तथा तव पार्श्वे एषा प्रत्यक्षा महाकुट्टनी महाच्छेदिकाव्यभिचारस्य महादूती खड्ग्यष्टिरेव नायिका प्रतिवसति तथा सर्वगा

---

३४. 'च' 'ख' मातृकायां नास्ति।

सर्वत्राप्रतिहतैव सर्वपुरुषगामिनी वेश्येति यावत्। इयं ते आज्ञारूपा नायिका पुरतो विलसति। वृद्धया समृद्धयैव जरत्या मया ते तव किं प्रयोजनमिति। इत्थमुक्त्वेति योज्यम्। अत्रापीत्थं प्रोच्येति क्रम उचित: ॥१११॥

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा॥

रामेति। रघुवंशे श्रीरामहतायास्ताडकाया वर्णनमिदम्। मन्मथ इव रामो राममन्मथः स एव रमयती रामो मन्मथस्तस्य दु:सहेन शरेण हृदये ताडिता सा निशाचरी राक्षसी ताडकैव निशाभिसारिका। जीवितेशो यमेव जीवितेश: प्राणेश्वर: उपचारेण नायकस्तस्य-वसति जगामेत्यन्वय:। कीदृशी गन्धवद्रुधिररूपं चन्दनमेव गन्धवद्रक्तचन्दनम्। तेनोक्षिता सिक्ता। गन्धवत्त्वं च पूतनाधूमस्येव रुधिरस्यापि पापक्षयादित्याहु:। अत्र रुप्यमाणानाम-प्रकृतार्थानां प्रकृतवीभत्सरसविरोधिशृङ्गारव्यञ्जकत्वादमतपरार्थत्वं दोष इति ॥११२॥

॥ समाप्तं वाक्यदोष प्रकरणम्॥

इदानीमर्थदोषा उपक्रम्यन्ते।

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः।
मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति॥

अतिवितेतेति। रविर्जयति। कीदृक्। अतिविततं विस्तृतं यद्गगनं तद्रूपायां सरणौ मार्गे प्रसरणेन गमनागमनेन परिमुक्तस्त्यक्तो विश्रमानन्दो विश्रान्तिसुखं येन तथाभूत:। तथा, मरुता उल्लासितं, प्रकाशितं सौरभं यस्य तादृशस्य कमलानामाकरस्य हासकृत् विकासकारीत्यर्थ:। अत्रातिविततत्वसरणित्वमरुदुल्लासितसौरभत्वानामर्थानामनुपादानेऽपि प्रकृतार्थस्याक्षतेरपुष्टार्थत्वम् ॥१॥

सदा मध्ये यासामियममृतनिःस्यन्दसुरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिमलम्।
प्रसादं ता एता घनपरिचिताः केन महतां
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः॥

सदेति। स्वकाव्यस्य गभीरचमत्कृतार्थशालितयातिस्फुटार्थकत्वाभावेऽपि दोषाभावं समर्थयितुं कस्यचित्कवेरियमुक्तिः। ता एता घनपरिचया अत्यन्ताभ्यस्ता अर्थात् गम्भीरकाव्ये महतां कवीनां रुचयो विवक्षा: क्षुद्रकाव्य इव महाकाव्यव्योम्नि व्योमसदृशे महाकाव्ये। केन प्रकारेण प्रसादं यान्तु गच्छन्तु सुव्यक्ता भवन्त्वित्यर्थ:। कथम्भूता रुचय:। स्फुरितो विषयीकृतो मधुर: शृङ्गारादिरसो याभिस्तथाभूतास्तेन नीरसत्वपरिहार:। ता: का इत्यपेक्षायामाह-सदेत्यादि। यासां कविरुचीनां मध्ये यद्गोचरीभूता अमृतनि:स्पन्दवत्सरसा उद्दामा उद्भटगुणा बहुमार्गा बैदर्भ्यादिरीतित्रयवती। इयं कवित्वरूपा सरस्वती परिमलं चमत्कारं बहतीति प्रकृतोऽर्थ: अन्यस्तुयासां रुचीनामादित्यप्रमाणां मध्ये बहुमार्गा त्रिपथगेयं

गङ्गारूपा सरस्वती नदी परिमलं सम्बन्धं वहति, ता एता मेघपरिचिताः स्फुरितमधुररसाः स्फुरितो दृष्टो मधुरोरम्यपदार्थो याभिस्तथाभूता वा महतां द्वादशादित्यानां रुचयः प्रभाः केन प्रकारेण प्रसादं स्वच्छकान्तित्वं यान्त्विति विशेषणद्वयमुक्तार्थम्। अमृतस्य जलस्य निःस्पन्देन प्रवाहेण सरसा हृद्येति वार्थः। महेशोक्ता एवं विधाः। कविरुचयः। केन मदीयकाव्येन प्रसादं यान्त्विति स्वस्य तादृशकाव्यकरणासामर्थ्यादुपायभावना कस्यचिदियमित्याह। तत्तु कथमितरकाव्यवत्प्रसन्ना भवन्त्वित्यादि वृत्तिसन्दर्भविरुद्धम्। सरस्वती सरितभेदे स्त्री वाग्देवतयोरपि। स्त्रीरत्नेचापगायात्र्येति विश्वकोशान्नदीसामान्यवचनोऽपि सरस्वती शब्दः। अयं चार्थो दुरुहत्वाकष्टः ॥२॥

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये।
मम तु यदियं याता लोके विलोचन चन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः॥

जगतीति। मालतीमाधवे माधवस्येयमुक्तिः। येऽन्ये नवेन्दुकलादलोभावाः पदार्था जगति मनो मदयन्ति हर्षयन्ति। अर्थादन्येषाम्। तेन सन्त्येव एव कारेण स्वस्य महोत्सवहेतवो न भवन्तीत्यनादरः प्रकाश्यते। कीदृशाः जयिनः उत्कर्षशालिनस्तथा प्रकृत्यैव मधुरा रमणीयाः। तव तर्हि किं महोत्सवहेतुस्तत्राह-मम त्विति। मम तु जन्मनि स एवैको महोत्सवो यदियं मालती विलोचनयोश्चन्द्रिकारूपालोके नयनविषयं याता नयनगोचरतां प्राप्तेत्यर्थः। अत्र पूर्वमसारतयोक्तायाश्चन्द्रिकाया मालत्यामारोपो व्याहतः ॥३॥

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्॥

कृतमिति। व्याख्यातमेतत्। अत्रार्जुनार्जुनेति प्राक्सम्बोधनाद्यैर्भवद्भिरित्युक्त्वा तेषामिति परामर्शादर्जुनस्यापि प्राप्तेः किरीटिपदार्थः पुनरुक्तः। अत्र केचित्क्रुद्धोक्तित्वेन परिहारमाहुः ॥४॥

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम्।
कर्णालं संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्कां
ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः॥

अस्त्रेति। वेणीसम्वरणेऽश्वत्थाम्न इयमुक्तिः। अस्त्रज्वालाभिरवलीढं व्याप्तं प्रतिवलं शत्रुसैन्यमेव जलधिस्तस्यान्तः[३५] मध्ये और्वायमाणे वडवानलतुल्ये सर्वधन्वीश्वराणां

---

३५. अस्त्र ज्वाल प्रतिवल जलधैरन्तरौद्रायमाणे सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम्। कर्णालंसंभ्रमेण संव्रज कृप समरं मुञ्च हार्दिक्य शंकांताते चापद्वितीये वहति। इति 'क' मातृकायामधिकम्।

सकलधनुर्धरश्रेष्ठानां गुरौ अस्मिन् प्रसिद्धशौर्ये मम पितरि द्रोणे सेनानाथे सेनापत्तौ स्थिते सति हे कर्ण! सम्भ्रमेण भयेनालम्। हे कृप! समरं ब्रज गच्छ। हे हार्दिक्य कृतवर्मन्। शङ्कात्रासं मुञ्च। चापमेव द्वितीयं यस्य चापैकसहाये ताते द्रोणे रणधुरं वहति सति भयस्य कोऽवकाशोऽवसर इत्यर्थः। अत्र चतुर्थपादार्थः पुनरुक्तः ॥५॥

भूपालरत्न, निर्दैन्यप्रदानप्रथितोत्सव।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम्॥

भूपालेति। कस्यचिदर्थिन उक्तिः। हे भूपालेषु रत्नभूत श्रेष्ठ! निर्गतं दैन्यं यस्मात् अर्थादर्थिनां तथाविधे प्रकृष्टदाने प्रथितः ख्यात उत्सवो यस्य तथाभूत राजन्! मे तुरङ्गमश्वं विश्राणय देहि मदेनालसं मातङ्गं वा विश्राणयेत्यनुषङ्गः। रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः। अत्र तुरङ्गं मातङ्गं वेति क्रमो लोकविरुद्धः ॥६॥

कारयित्वा क्षौरं ग्रामवृद्धो निमज्य भुक्त्वा च।
नक्षत्रं तिथिवारौज्यौतिषिकं प्रष्टुं चलितः॥ इति संस्कृतम्।

काराविऊणेति। अयं क्रमो धर्मशास्त्र विरुद्धः ॥७॥

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते।
तदपसंहर कूर्परमायतं त्वरितमुरुमुदञ्चय कुञ्चितम्॥

स्वपितीति। नवोढां प्रति रन्तुमिच्छोः कस्यचिदुक्तिरियम्। अयं जनः सखीरूपो निकटे स्थितो जन इति यावत्। स्वपिति स्वापं करोति तावदहं स्वपिमि लक्षणया रमामीत्यर्थः। तेन च किमपैति हीयते। तस्मात्कूर्पूरं जानुमपि साम्प्रतमुचितं यथा स्यात्तथा अपसंहर रचयेत्यर्थः। तथा कुञ्चितं सकुञ्चितं उरुं त्वरितं शीघ्रमुदञ्चय प्रसारयेति। अयीति पाठे सम्बोधनम्। अयमर्थो ग्राम्यः ॥८॥

गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते॥

गृहीतमिति। द्रोणे हते शोकाविष्टस्याश्वत्थाम्नः शस्त्रं सम्बोध्येयमुक्तिः। हे शस्त्र! येन मम पित्रा नोचितमपि ब्राह्मणजात्यनुचितमपि त्वं द्रुपदरुपशत्रोः परिभवभयात् गृहीतमासीः, यस्य प्रभावात्तव कश्चिन्न विषयो नाभूत, अपि तु सर्वोऽपीन्द्रादिस्त्वतपात-विषयोऽभूत्। तेन मत्पित्रा सुतस्य मम मिथ्यामरणश्रवणजाच्छोकात्त्वं परित्यक्तमसि न तु भयात्त्यक्तम्। अहमपि त्वां विमोक्ष्ये यतः अतो भवते स्वस्तीत्यर्थः। यतो यत्र भवते स्वस्ति तत्र विमोक्ष्ये इति वा। अत्र स्वस्य शस्त्रत्यागे हेतुर्नोपात्त इति निर्हेतुत्वम् ॥९॥

इदं ते केनोक्तं कथय कमलातङ्कवदने
यदेतस्मिन्हेम्नः कटकमिति धत्से खलु धियम्।

इदं तद्दुःसाधाक्रमणपरमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥

इदं त्र इति। कमलानामातङ्को भयं यस्मात्तादृशं वदनं यस्यास्तथाभूते हे सुन्दरि! अनेन वदनस्य चन्द्रत्वं सूचितम्। एतस्मिन्करस्थिते हेम्नः कटकं कङ्कणमिति यत् धियं धत्से धारयसि इदं ते केन भ्रान्तप्रतारकेणोक्तम्, कथयेति, सम्बन्धः। तर्हि किमेतदेत्याकाङ्क्षायामाह[३६]-इदमिति। इदं तत्प्रसिद्धम्। दुःसाधानां जितेन्द्रियाणामाक्रमणं वशीकारो यस्मात्तथाभूतं परमास्त्रं चक्रं स्मृतिभुवा कामेन प्रीत्या तव करकमलमूले हस्ते विनिहितमित्यन्वयः। अत्र चक्रस्य कामायुधत्वमप्रसिद्धम् ॥१०॥

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः।
तदनुभवतः कीर्तिः, केनाप्यगीयत येन सा
पतिगृहमगान्मुक्ताशङ्का क्व नासि शुभ प्रदः ॥

सुसितेति। राजानं प्रति कवेरुक्तिः। हे राजन्! सुदृशि शोभननयनायां कस्यांचिन्नायिकायां कदाचन कस्मिश्चिदवसरे कौमुदीमहसि चन्द्रिकोद्द्योते स्वैरं शङ्काराहित्येन स्वच्छन्दं यान्त्यां ज्योत्स्नाभिसारं कुर्वत्यामित्यर्थः। अतएव सुसिता अतिश्वेता वसनालङ्कारा, वस्त्रसहिता अलङ्कारा यस्यास्तथाभूतायां सत्यां विधुश्चन्द्रः अस्तङ्गतोऽभूत्। तदनु तदनन्तरं केनापि भवतः कीर्तिरगीयत। गीता येनकीर्तिगानेन, तज्ज्योत्सना प्रकाशनात्। साभिसारिका मुक्ता आशङ्का श्वेताभरणैर्लोकदृश्यत्वभयं यया तथाभूता सती पतिगृहमगात् गतवती। अतस्त्वं क्व कस्मिन्देशेऽवसरे वा शुभप्रदो नासि न भवस्यपि तु सर्वत्रेत्यर्थः। अत्र कीर्त्तेर्ज्योत्स्नावत्वेन प्रकाशनं[३८] कविसम्प्रदायप्रसिद्धमित्यदोषः[३९] ॥११॥

उपपरिसरं गोदावर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरवेक्ष्यताम्।
इह हिं विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥

उपेति। अशोककलिकादर्शनमूर्च्छितस्य गृहमागच्छतः पथिकस्य तेनैव पथा जिगमिषूनन्यान्प्रतीयमुक्तिः। भो अध्वगाः। गोदावर्या उपपरिसरं पर्यन्तभूसमीपे सरणिं मार्गं परित्यजत। भवद्भिस्तावदपरो मार्गोऽवेक्ष्यतां तावदिति यावदशोकोऽङ्कुरितः। कुत इत्यत्राह हि यस्मादिह सरणौ कयापि हताशया वनितया रक्ताशोकः चरणनलिनस्य चरणकमलस्य

---

३६. 'आशङ्का' 'क' इति मातृकायां पाठः।

३७. 'दव' 'क' मातृकायामधिकम्।

३८. 'लत्' इति 'क' मातृकायां पाठः।

३९. 'सिद्ध' स्थाने प्रसिद्ध 'ख' मातृकायाम्।

न्यासेनाघातेनोदञ्चन्त उद्गच्छन्तो नवाङ्कुरा एव कञ्चुकं सर्वाङ्गव्यापितया यस्य तथाभूतो विहितः कृतः। हताशयेत्याशाविघातकतया रोषोक्तिः। अत्र पादाघातेनाशोकस्य पुष्पोद्गम एव कविसमयो न त्वङ्कुरोद्गमे दूतिनैतत्कविप्रसिद्धेरुदाहरणम्॥१२॥

सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः।
नानाविधानि शास्त्राणि व्याचष्टे च श्रृणोति च॥

सदेति। निगदव्याख्यातम्। अत्र निमित्तं विना रात्रौ स्नानं धर्मशास्त्रविरुद्धम्॥१३॥

अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते।
षाड्गुण्यानुसृतिस्तस्य सत्यं सा निष्प्रयोजना॥

अनन्येति। यस्य वाह्वोर्भुजयोरनन्यसदृशमनुपमं बलं समीक्ष्यते, तस्य सा प्रसिद्धा षाड्गुण्यानुसृतिः सन्धिविग्रहयानासनद्वैधसंश्रयाख्यषड्गुणानुसरणम्। निः प्रयोजनेति सत्यमित्यन्वयः। षाड्गुण्यमिति स्वर्थे ष्यञ्। अयमर्थो नीतिशास्त्रविरुद्धः॥१४॥

विधाय दूरे केयूरमनङ्गाङ्गणमङ्गना।
बभार कान्तेन कृतां करजोल्लेखमालिकाम्॥

विधायेति। अङ्गना केयूरं प्रसिद्धमङ्गदं दूरे विधाय अनङ्गाङ्गदरूपां कान्तेन कृतां करजानां नखानामुल्लेखानां क्षतानां मालिकां पङ्क्तिं बभार धृतवतीत्यन्वयः। अनङ्गाङ्गदमित्यनङ्गायाङ्गप्रदमेवानङ्गसम्बन्धि बाहुभूषणमिति श्लेषेणार्थः। अनङ्गाङ्गणमिति वा पाठः। तत्रापि केयूर विशेषणत्वमिति। केचित्। अत्र केयूरस्थाने नखक्षतं कामशास्त्रविरुद्धम्। नखक्षतस्य स्थानानि। कक्षौ वक्षस्तथा गलः। पार्श्वौ जघनमुरु च स्तनगण्डललाटिकाः इति वात्स्यायनोक्तस्थानभिन्नत्वात्॥१५॥

अष्टाङ्गयोगपरिशीलनकीलनेन दुःसाधसिद्धिसविधं विदधद्विदूरे।
असादयन्नभिमतामधुना विवेकख्यातिं समाधिधनमौलिमणिर्विमुक्तः॥

अष्टाङ्गेति। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाण्यष्टावङ्गानि यस्य तथाभूतस्य योगस्य परिशीलनेन नाभ्यासेन यत्कीलनं स्थिरीकरणं तेन दुःसाधाया दुष्प्रापायाः सिद्धेः मुक्तिरूपायाः सविधं निकटस्थं पुरुषमात्रविश्रान्तमनोवृत्तिरुपमसम्प्रज्ञातयोगं[40] दूरे विदधत् तमनपेक्ष्यैवाभिमतां कार्यसमर्थो विवेकख्यातिं प्रकृतिपुरुषयोभेदज्ञानरूपामासादयन् प्राप्नुवन् सन् समाधिधनानां[41] योगिनां मौलिमणिः श्रेष्ठः कश्चिदधुना विमुक्त इत्यन्वयः। दुःसाधसिद्धयोऽणिमाद्यास्तत्सान्निध्यं वर्ज्यन्नित्यर्थ इति केचित्। अत्र विवेकख्यात्यनन्तरं सम्प्रज्ञातासम्प्रज्ञातयोगावनपेक्ष्य मुक्तिः कथनं योगशास्त्रविरुद्धम्। वितर्कविचाराद्यनुसारी सम्प्रज्ञातयोगः॥१६॥

---

४०. 'योगं' स्थाने 'वियोगं' 'ख' मातृकायाम्।
४१. 'समाधिघनानां' स्थाने समाधिनानां 'क' मातृकायाम्।

प्राप्ताः श्रियः सकलकामदुघस्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम्।
संमानिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम्॥

प्राप्ता इति। शान्तस्य भर्तृहरेरियमुक्तिः। सकलकामदुघाः सकलकामदायिन्यः श्रियः सम्पदः प्राप्तास्ततस्तेन किम्? कः पुरुषार्थः? मुक्तिं विना कृत[४२] कृत्यताया अभावादिति भावः। एवमग्रेऽपि द्विषतां शत्रूणां शिरसि पदं दत्तम्। तेषामाक्रमणं कृतमिति यावत्। प्रणयिनो मित्राद्याः। विभवैः समृद्धिभिः, तनुभृतां शरीरिणां तनुभिः शरीरैः कल्पं व्याप्य स्थितं जीवितं[४३] ततोऽपि किमित्यर्थः। अत्र ततः किमिति पुनरुक्त्या अनवीकृतत्वम्[४४]॥१७॥

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता।

यदीति। सतामविषादिता। विषादशून्यता प्रकृतिरेव नाश्चर्यकरी। अत्रोपमानभूतं वाक्यार्थत्रयमुपन्यस्यति-यदीत्यादिना। एवं च यथानलो बह्निर्यदि दहति अत्रार्थे किमद्भुतमाश्चर्यं न किमपीत्यर्थः। यदि चाद्रिषु पर्वतेषु गौरवमस्तीतिशेषः। ततः किं तदपि नाद्भुतमित्यर्थः[४५]। महोदधेरम्बु सदैव लवणं क्षारमतस्तदपि नाद्भुतम्। तथा च सतामविषादिता प्रकृतिरेवेत्यर्थपर्यवसानं बोध्यम्। अत्रैक एवाश्चर्याभावो भङ्गिभेदेनोक्त इति नवीकृतत्वसत्वान्न दोषः॥१८॥

यत्रानुल्लिखिताख्यमेव निखिलं निर्माणमेतद्विधे-
रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा।
याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्संपद-
स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम्॥

यत्रेति। तस्य मणेः चिन्तामणेः आभासेनेषत्कान्तिमात्रेणामणय एव मणित्वेन कल्पिता येऽश्मानः पाषाणास्तेषु मध्येऽश्मत्वं पाषाणत्वमेवोचितम्, न तु मणित्वम्। चिन्तामणेः साधारणमणिगणनायां[४६] गणनमनुचितमित्यर्थः। यस्य कस्येत्यप्रेक्षायामाह-यत्रेति। यत्र चिन्तामणौ सति एतत्सकलं बिधेर्निर्माणं सृष्टिर्न उल्लिखिता निर्दिष्टा आख्या नाम यस्य तथाभूतं भवतीति शेषः। प्रयोजनाभावेन नामाग्रहणात्। अनुल्लिखितार्थमिति पाठे अनुल्लिखितोऽनिर्दिष्टोऽर्थः प्रयोजनं यस्य तत् अप्रयोजकमित्यर्थः। अथवा यत्र यद्विषयकं

---

४२. 'कृत्य' इति पदं 'क' मातृकायां बारं एकमेवं पठितम्।
४३. 'जीवितं' 'ख' मातृकायां नास्ति।
४४. 'पुनः' मूल मातृकायां नास्ति।
४५. 'आश्चर्य' इति 'क' मातृकायाभेदः।
४६. 'आभाषेण' 'क' मातृकायामधिकम्।

विधेर्निर्माणं अनुल्लिखितार्थं अनिर्वचनीयप्रयोजनमित्यर्थः। तथा यत्र मणौ उत्कर्षस्य प्रतियोगिनोऽवधेः कस्यचित्कल्पनमपि परान्यक्कारस्यावज्ञायाः कोटिः काष्ठाः सर्वोत्कृष्टतया यत्किंचिन्निरूपितोत्कर्षकथनस्यापकर्षहेतुत्वात्। उत्कर्षप्रतियोगिनः प्रतिसम्बन्धिनः, सदृशस्येत्यर्थः। कल्पनं कथनं परा न्यक्कारस्य कोटिः निरूपमत्वहानेरिति केचित्। तथा यस्य मणेः सम्पदः प्राणभृतां प्राणिनां मनोरथस्याप्यगोचरा इत्यर्थः। अत्रान्योक्तौ आभासमात्रेणेति वाच्यम्। अन्यथा निन्दनीयानां[४७] गुणान्तरव्यवच्छेदाप्रतीतेः ॥१९॥

वक्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः।
वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्त्यभीक्ष्णं
स्वच्छेऽन्तर्मानसेऽस्मिन्कथमवनिपते तेऽम्बुपानाभिलाषः॥

वक्राम्भोजमिति। मृगयायां पिपासुं राजानं प्रति कवेरियमुक्तिः। हे अवनिपते! ते तवान्तः स्वच्छे सत्त्वगुणप्रधान एव स्वच्छे निर्मले मानसेऽन्तःकरण एव मानसे सरसि सति अभक्ष्णं पुनःपुनरम्बुपानस्याभिलाषः कथं भवतीति शेषः। जलाधारतया तव पिपासानुचितेति भावः। अनौचित्यातिशयं प्रतिपादयितुमाह–वक्रेत्यादि। ते इत्यग्रेतनमिहापि सम्बध्यते। तव वक्राम्भोजं सरस्वती भारत्येव नदीविशेषः सदाधिवसति। ते तवाधरः शोणो रक्त एव शोणो नद एव। ते दक्षिणो दक्षिणदिगवस्थ एव वामेतरो बाहुःमुद्रया राजचिह्नभूतया सहित एव समुद्रो जलधिः कीदृशः काकुत्स्थस्य रामस्य वीर्यस्मृतेःकरणे पटुः समर्थः तद्वाहुसादृश्यात्। एवं समुद्रोऽपि वन्धनात्तथाभूतः। एता वाहिन्यः सेना एव नद्यः भवतः पार्श्वं क्षणमपि नैव मुञ्चन्ति त्यजन्तीत्यर्थः। अत्र शोण एवेत्यवधारणमनुचितम्। अन्य जलाशयव्यावृत्तेः, पिपासानौचित्यातिशयप्रतिकूलत्वात्॥२०॥

श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकैः
मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियम्।
चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके
येन द्रष्टुमहं क्षमे दशदिशस्तद्रवक्त्रमुद्राङ्किताः॥

श्यामामिति। विद्धशालभञ्जिकाख्यानाटिकायां मृगाङ्कावलीवियोगातुरस्य राज्ञो विद्याधरमल्लदेवस्येयमुक्तिः। भो इत्याकाशे सम्बोधनम्। भो जनाः। सान्द्रैर्घनैर्मषीणां कूर्चकैस्तूलिकाभिः चूर्णैरिति महेशः। श्यामां रात्रिं चन्द्रिकाधवलां श्यामलिमानं श्यामलतामानयत प्रापयतेत्यर्थः। अथेति विकल्पे। मन्त्रमथवा तन्त्रं वैद्यकादिशास्त्रं प्रयुज्य तदुक्तौषधप्रयोगं कृत्वेत्यर्थः। तन्त्रमौषधमित्यन्ये। श्वेतानामुत्पलानां श्रियं शोभां हरत नाशयत। रुचमिति पाठे दीप्तिम्। चन्द्रं च शिलापट्टके कृत्वा निधाय क्षणात्कणशश्चूर्णयत्।

---

४७. 'निन्दनीयानां मणिनां' इति 'क' मातृकायां पाठः।

येनैवंविधकरणेनाहं तस्या मृगाङ्कावल्यां वक्रमुद्रया वदनरूपचिह्नेनाङ्किता दश दिशो द्रष्टुं क्षमे समर्थो भवामि। भावनोपनीतं तन्मुखं दशसु दिक्षु पश्यतश्चन्द्रिकादिभिरुद्दीपकतया सन्तापकैः क्रियमाणं प्रतिबन्धमुक्तरीत्या तदपनयने नापहरतेत्यर्थः। अत्र ज्योत्स्नीरूपरात्रिविशेषस्य विवक्षितत्वाद्विशेषत एव ज्योत्स्नीमित्यभिधातुमुचितम्। अन्यथा विशेषस्य प्रतीतौ विलम्बापत्तेः। यत्तु श्यामायाः श्यामलीकरणं व्यर्थमिति दूषकताबीजमित्याहुः। तदयुक्तम् एवं सति रात्रिं श्याममलिमानमित्यस्यापुष्टत्वापत्तेरिति ॥२१॥

कल्लोलवेल्लितदृषत्परुषप्रहारै
रत्नान्यमूनि मकरालय मावसंस्थाः।
किं कौस्तुभेन विहितो भवतो न नाम
याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि॥

कल्लोलेति। हे मकराणामालय! समुद्र! कल्लोलैस्तरङ्गैर्वेल्लितानां चालितानां दृषपदां पाषाणां परुषैः कठोरैः प्रहारैरमूनि स्वाश्रितानि रत्नानि मावमंस्थाः मावज्ञासीः। कुत इत्यपेक्षायामाह-किमिति। भवतः कौस्तुभाख्येन[४८] रत्नेन पुरुषोत्तमः श्रीकृष्णोऽपि याच्चार्थं प्रसारितः करो येन तथाभूतः किं नाम न विहितः, अपि तु विहित एवेत्यर्थः। तथा चैकेन रत्नैनेवंविधोत्कर्षलाभादन्येषामपि रत्नानामवमाननं नोचितमित्यर्थो विवक्षितः। स च कौस्तुभेनेति विशेषतोऽभिधाने न निर्वहति। कौस्तुभस्योपकारकत्वेऽप्यन्यरत्नासामान्यावमाननिषेधायोगात्। कौस्तुभस्य रत्नसामान्यान्तर्गतत्वेनाप्रतीतेः।एकेन किमिति पाठे तु तथा प्रतीतेर्न दोषः ॥२२॥

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभो प्रत्युत
द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया।
उत्कर्षञ्च परस्य मानयशसोर्विस्रंसनं चात्मनः
स्त्रीरत्नञ्च जगत्पतिर्दशमुखो देवः कथं मृष्यते॥

अर्थित्व इति[४९]। सीताप्राप्तौ निराशस्य रावणदूतस्य शौष्कलस्येयमुक्तिः। अर्थित्वे मत्प्रेषणाद्याचकत्वे-प्रकटीकृतेऽपि प्रभोः रावणस्य फलप्राप्तिः सीतालाभो नास्ति। प्रत्युत विपरीतं द्रुह्यन् सुकेतुताडकादिबधेन द्रोहकारी विरुद्धं चरितं यज्ञादिरक्षणरूपं यस्य तथाभूतो दाशरथिस्तया प्रार्थ्यमानया कन्यया सीतया युक्तः संयुक्तः। दाशरथिरिति पितृसम्बन्धोत्कीर्तनेन स्वतःख्यात्यभावादपकर्षसूचनम्। स्वप्रार्थितं स्वयं न लब्धं किं तु शत्रुणेति वैपरीत्यम्। परस्य शत्रोरुत्कर्षं आत्मनश्च मानयशसोर्विस्रसनं भ्रन्शं स्त्रीरत्नं च सीताख्यं जगतां

---

४८. 'महिता एवेत्यर्थः। तथा चैकेन रत्ने' इत्यधिकं 'क' मातृकायाम्।
४९. 'अर्थित्व इति' इत्यारभ्य समापनं इत्याहुः इत्यन्तं 'क' मातृकायां नास्ति।

पतिर्दशमुखो देवः कथं मृष्यते न कथंचिदपीत्यर्थः। अत्र स्त्रीरत्ने अमर्षायोगेन स्त्रीरत्नमुपेक्षितुमित्यर्थसाकाङ्क्षम् ॥२३॥

आज्ञा शक्रशिखामणिप्रणयिनि शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः॥

आज्ञेति।वीरचरिते। सन्त्येव बहवो गुणास्तथापि बलवानेको दोषस्तानपवदतीत्युपक्रम्य रावणदूतं प्रति जनकपुरोहितस्य शतानन्दस्येयमुक्तिः। यस्य रावणस्याज्ञा शक्रस्येन्द्रस्य शिखामणेः प्रणयिनी प्रिया शिरोधार्येति यावत्। प्रणयिनीत्वेन रूपणान्दम्पत्योरविच्छेदसूचनम्। शास्त्राण्येव नवं चक्षुः शास्त्रदृष्ट्यैवाचरणात्। बहुवचनैकवचनाभ्यां सर्वशास्त्रविषयकज्ञानसूचनम्। नवत्वेनाभ्रान्तत्वं सूच्यते। भूतपतौ सकलप्राणिनामीश्वरे पिनाकिनि हरे भक्तिः। लङ्केति प्रसिद्धा। दिव्या पुरी पदं निवासस्थानम्। द्रुहिणस्य ब्रह्मणोऽन्वये कुले चोत्पत्तिर्जन्म तत्तस्मादहो! आश्चर्यमीदृगुक्तगुणगणयुक्तो न लभ्यते दुर्लभ इत्यर्थः। एष रावणः[५०] रावणः रावयति पीडाजननेनाक्रन्दयति लोकानिति, तथाभूतश्चेन्न स्यात्तदा क्व नु पुनः सर्वत्र जने सर्वे पूर्वोक्ता गुणाः, न क्वापि, किन्तु रावण एव सर्वगुणशालितयोत्कृष्टः स्यात्। जगदाक्रन्दनदायित्वेन तु बलवता दोषेणायमनुपादेय इति भावः। अत्र स्याच्चेदेष न रावण इत्यत्रैव काव्यार्थसमाप्तिरुचिता। क्व नु पुनरित्यादिविस्तारेण तु मध्यप्रवेशेन स्याच्चेदेष न रावण इत्यर्थोऽलक्षितप्रायतया न चमत्कारविश्रान्तिस्थानतां लभत इत्यनुभवैकसाक्षिकमिति। केचित्तु न केवलं रावणस्यैव दोषमिश्रिता गुणा अपि तु सर्वेषामेवेत्याह क्व नु पुनरिति। क्व नु पुनः सर्वत्र जने सर्वे गुणा एव, अपि कश्चित्दोषोपीत्यर्थः। एवं च समाधाने पर्यवसानादस्थानेऽर्थसमापनमित्याहु ॥२४॥

श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा।
निशा शशाङ्केन धृतिः समाधिना नयेन चालङ्क्रियते नरेन्द्रता॥

श्रुतेनेति। श्रुतेन शास्त्रश्रवणेन बुद्धिरलंक्रियत इत्याद्यन्वयः। व्यसनेन द्यूतादिना निम्नगा नदी। धृतिर्धैर्यम्। समाधिना योगेन धर्मचिन्तया वा नयेन नीत्या। शेषं स्पष्टार्थम्। अत्र श्रुतादिषूत्कृष्टतया सहचरेषु निकृष्टतया तद्भिन्नयोर्व्यसनमूर्खतयोरूपादानमनुचितम्। प्रायपाठन्यायेन तयोरप्युपादेयत्व[५१] प्रसङ्गादिति[५२] ॥२५॥

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती।

---

५०. 'रावणः' 'ख' मातृकायां बारम् एकम्।

५१. 'तयो नतयो' इति 'ख' मातृकायां पाठः।

५२. प्रतीति इति पदं 'ख' मातृकायामधिकम्।

तत्सक्तोऽयं न किंचिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिव गतेत्यम्बुधिं यस्य कीर्तिः ॥

लग्नमिति। व्याख्यातपूर्वम्। अत्र विदितं तेऽस्त्वित्यनेन लक्ष्मीस्ततोऽपसरतीति विरुद्धार्थप्रकाशः ॥२६॥

प्रयत्नपरिबोधितस्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निःसोमकम्।
इयं परिसमाप्यते रणकथाद्य दोःशालिना-
मपैति रिपुकाननातिगुरुरद्य भारो भुवः ॥

प्रयत्नेति। वेणीसम्वरणे द्रोणवधकुपितस्य शत्रून्प्रति प्रतिकर्तुमिच्छोरश्वत्थाम्नो दुर्योधनं[५३] प्रत्याश्वासनोक्तिरियम्। हे राजन्! अद्य त्वं निशां व्याप्य शेषे विद्रास्यसीति सम्बन्धः। सामीप्याद्वर्तमानत्वेन निर्देशः। कीदृशः स्तुतिभिः प्रयत्नेन परिबोधितः। तथा निद्रास्यसि[५४] यथैवं प्रतिबोधनीय इत्यर्थः। अद्य भुवनमकेशवं श्रीकृष्णरहितमपाण्डवैश्च रहितम्। निर्गताः सोमकाः पाञ्चाला यस्मात्तथाभूतं च यतः करोमीति शेषः। अद्य दोःशालिनां बाहुशालिनां क्षत्रियाणामियं रणकथा सङ्ग्रामवार्ता परिसमाप्यते। दूरतस्तु सङ्ग्रामः अद्य भुवः पृथिव्याः भारः अपैतु। अपगच्छतु। कीदृशः रिपुरूपेण काननेन वनेनाति गुरुर्गरीयानित्यर्थः। कालान्तरकर्त्तव्यत्वसम्भावनायाः सर्वथैवनिरासायप्रतिपादमद्येत्युक्तिः। अत्र तथा निद्रास्यसि यथैवं परिबोध्यसे इति प्रतिबोधन एव विधेयत्वविश्रान्तिर्युक्ता न शेषे इति शयने इत्ययुक्तविधित्वम् ॥२७॥

वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः।
तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते॥

---

५३. दुर्योधन प्रत्यायाथाम्नो इति पदं 'ख' मातृकायामधिकम्।
५४. ते हते रेस्नु सं इत्यधिकं 'क' मातृकायाम्।

वातेति[५५]। विषधरैः सर्पैर्वाताहारतया जगदाश्वास्य। एतेऽतिधर्मिष्ठास्तपस्विन इति विश्वासयुक्तं कृत्वा निःशोषितं भक्षितम्। ते पुनर्विषधराः। अभ्रसम्बन्धितोयकणिकैव तीव्रं ब्रतं येषां तथाभूतैर्मेघजलबिन्दुमात्राहारैरित्यर्थः। बर्हिभिर्मयूरैर्ग्रस्ताः. तेऽपि मयूराः क्रूरं कठिनस्पर्शं चमूरोश्चित्रमृगस्य चर्मैव वसनं येषां तथाविधैर्लुब्धकैर्व्याधैः क्षयं नीताः। इत्येवं दम्भस्य शाठ्येन धर्माचरणस्य स्फुरितं चेष्टितं विदन्नपि वाताशनादिव्रतं सर्पाद्यैर्जगदादिभक्षणाय कृतमिति जानन्नपि जाल्मो[५६] मूर्खो जनः गुणानीहते दाम्भिकेष्विति शेषः। ईहते सम्भावयतीत्यर्थः। जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः। अन्ये तु दम्भस्यस्फुरितमसत्फलं विदन्नपि जाल्मो जनो गुणा दम्भगुणनीहते चेष्टते। अमुमेवार्थमर्थान्तरन्यासैर्दृढयति वातेत्यादिना। अत्र दम्भकृतपरहिंसाफलज्ञानेऽपि सर्पादीनामाश्वासहेतुः। वाताहारा तु गुणचेष्टेत्याहुः। अत्र दम्भचेष्टाया विधेयत्वेन विवक्षितत्वाज्जगन्निःशेषयितुं वाताहारः कृस्तान् ग्रसितुं अभ्रकणिकाव्रतं कृतम्। तान्क्षयं नेतुं चर्मवसनं कृतमित्येवं व्युत्क्रमेणाभिधातुं युक्तम्। केचित्तु, चर्मवसना तोयकणिकापानस्य ततोऽपि वाताहारस्य तीव्रतरत्वेन व्युत्क्रमेणोपन्यासो युक्तइति व्युत्क्रमेणेति वृत्तेरर्थमाहुस्तन्नमनोरमम्। तथा सति दुष्क्रमत्वस्यैवापत्तेरिति ॥२८॥

---

५५. अर्थित्वे इति। सीताप्राप्तौनिराशस्य रावणदूतस्य शौष्कलस्येयमुक्तिः। अर्थित्वे मत्प्रेषणाहवाचकत्वे प्रकटीकृतेऽपि प्रभोः रावणस्य फलप्राप्तिः सीता लाभो नास्ति प्रत्युत विपरीतं दुह्यन् सुकेतुतातुकादिवधेनद्राहकारी विरुद्धं चरितं यज्ञादिरक्षणरूपं यस्य तथा भूतौ दाशरथिस्तया।

प्रार्थ्यमानया कन्यया सीतया युक्तः संयुक्तः दाशरथिरिति पितृसम्बन्धोत्कीर्त्तनेन स्वतः ख्यात्यभावादपकर्षसूचनम्। स्वप्रार्थितं स्वयं न लब्धं किन्तु शत्रुणेति वैपरीत्यम्। परस्य शत्रोरुत्कर्षम्। आत्मनश्च मानायशसोर्विस्त्रं सनं भ्रशंस्त्रीरत्नं च सीताख्यं जगतां पतिर्दशमुखो देवः कथं मृष्यते क्षमते। न कथं चिदपीत्यर्थः। अत्र स्त्री रत्नेऽमर्षायोगेन स्त्रीरत्नमुपेक्षितुमित्यर्थ साकाङ्क्षम्।

आज्ञेति। वीरचरिते सत्येव बहवोगुणास्तथापि बलवानेको दोषस्तानय वदतीत्युक्रम्य रावणदूतं प्रति जनकपुरोहितस्य शतानन्दस्येयमुक्तिः। यस्य रावणस्याज्ञा शक्रेस्येन्द्रस्य शिखामणेः प्रणयिनी प्रिया शिरो धार्येति यावत्। प्रणयित्वेन रूपेणाद्वयत्योरविच्छेद सूचनम्। शस्त्राण्येव नवं चक्षुः। शास्त्रदृष्टौ वाचरणात्। बहुवचनैकवचनाभ्यां सर्वशास्त्रविषयक ज्ञान सूचनं नवत्वेनाभ्रान्तत्वसूच्यते भूतपतौ सकलप्राणिनामिश्वरे पिनाकिनि हरेभक्तिः। लङ्केति प्रसिद्ध दिव्या पुरीपदं निवासस्थानम्। द्रुहिणस्य ब्रह्मणोऽन्वये कुले चोत्पत्तिर्जन्म। ततस्मादहो आश्चर्यमीदृगुक्तगुण युक्तो वरो न लभ्यते। दुर्लभ इत्यर्थः। एष रावणः रावयति पीडाजननेनाक्रन्दयति लोकानिति तथा भूतेश्चेन्न स्यात्तदा क्व नु पुनः सर्वत्र जने सर्वे पूर्वोक्ता गुणा। न क्वापि। किं तु रावण एव सर्वगुणशालितयोत्कृष्टः स्यात्। जगदाक्रन्दनदायित्वेन तु बलवता दोषेणायमनुपादेय इति भावः। अत्र स्याच्चेदेष न रावण इत्यत्रैव काव्यार्थसमाप्तिरुचिता। क्व नु पुनरित्यादिविस्तारणे तु मध्य प्रवेशेन स्याच्चेदेष न रावण इत्यर्थाक्षिप्तप्रायतया न चमत्कारविश्रान्तिस्थानतां लभत इत्यनुभवैकसाक्षिकमिति। किञ्चित्तु केवलं रावणस्यैव वा दोषमिश्रिता गुणाः अपितु सर्वेषामेवेत्याह क्व पुनरिति। क्व नु पुनः सर्वत्र जने सर्वे गुणा एव अपि तु कश्चिद्दोषोऽपीत्यर्थः। एवं च समाधाने पर्यवसानादस्थान्यर्थसमापनमित्याहुः। इति पदं मूल मातृकायां नास्ति।

५६. 'मन्द मारुत चञ्चलानि दलानि' 'ख' मातृकायां बारं द्वयम्।

अरे रामाहस्ताभरण भसलश्रेणिशरण
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन।
सरोहंसोत्तंस प्रचलदल नीलोत्पल सखे
सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना॥

अरे इतिं। विरहिणः पुरुरवस इयमुक्तिः। अरे! हे सखे! नीलोत्पल! अहं सखेदः खेदसहितोऽस्मि। अत इन्दुवहना उर्वशी क्वेति कथय मोहं श्लथय । शिथिलीकुर्विति सम्बन्धः। कीदृश? रामाणां हस्तस्याभरणालंकारभूत। अनेन परिचयाद्वार्ताभिज्ञत्वं ध्वन्यते। भसलानां भ्रमराणां श्रेण्याः शरणगृहभूत। स्मरक्रीडायां या व्रीडा तच्छमन उद्दीपनतया तदपनायक। विरहिप्राणानां दमन संत्रासक। सरोहंसस्य सरःश्लेष्ठस्योत्तंसभूषण। प्रचलानि मन्दमारुतेन चञ्चलानि दलानि यस्य, तथाभूतेत्यर्थः। निर्लोभे नृपतौ हंसः इति विश्वः। अत्र विरहिणः स्वस्य मोहश्लथनविधौ विरहिप्राणदमनेत्यनुवादो विरुद्धत्वादयुक्तः ॥२९॥

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।
यथास्य जायते पातो न तथा पुनरुन्नतिः॥

हन्तुमिति। हननं हिंसा। सुरतोचितप्रहारश्च। स्तब्धत्वमनम्रता, दृढत्वं च विवरं, परदूषणं, स्त्रीणां वराङ्गं च, पातोऽपकर्षः धातुपातजनितः संकोचश्च उन्नतिरुत्कर्षो धातुप्रत्यागमात् दृढता। अत्र स्पष्टमश्लीलत्वम्॥३०॥

अस्याः कर्णावतंसेन जितं सर्वं विभूषणम्।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम्॥

अस्या इति। स्पष्टम्। अत्रावतंसादिपदेनैव कर्णाभरणोक्तावपि कर्णपदस्य कर्णस्थितिव्यञ्जकतया[५७] न पुनरुक्त्वादिदोषः॥३१॥

अपूर्वमधुरामोदप्रसादितदिशस्ततः।
आययुर्भृङ्गमुखराः शिरःशेखरशालिनः॥

अपूर्वेति[५८]। अपूर्वो लोकोत्तरो मधुरो हृद्यो य आमोदो गन्धपुष्पादिपरिमलस्तेनामोदिता दिशो यैस्तथाभूताः भृङ्गैर्मुखराः। शिरसि शेखरशालिनः किरीटशोभिनः पुरुषा आययुरित्यन्वयः। मदिरामोदेति पाठे परिपीताया मदिराया आमोदः। अत्रापि शिरःशेखरेति पूर्ववत्॥३२॥

विदीर्णाभिमुखारातिकराले संयुगान्तरे।
धनुर्ज्याकिणचिह्नेन दोष्णा विस्फूर्जितं तव॥

विदीर्णेति। हे राजन्! संयुगान्तरे रणमध्ये तव दोष्णा हस्तेन विस्फूर्जितमित्यन्वयः।

---

५७. 'कर्णादि' 'स्थाने' कर्ण 'ख' मातृकायाम्।

५८. 'अपूर्वेति' इत्यारभ्य ''मदिराया आमोदः'' इति वारं द्वयं 'क' मातृकायाम्।

५९. 'प्रसादात्' 'ख' मातृकाया बारं त्रिणि।

किदृशे ? विदीर्णैर्विक्षतैरभिमुखैररातिभिः शत्रुभिः कराले व्याप्ते भीषणे वा। किम्भूतेन दोष्ण धनुर्ज्जर्यायाः किणः प्ररुढव्रणचिह्नं तदेव चिह्नं यस्य तथाभूतेनेत्यर्थः। अत्र धनुरारूढता प्रतीयते धनुःपदेन। सा च किणस्य प्रहारकृतत्वप्रतिपत्तये ॥३३ ॥

ज्याबन्धनिःस्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरम्परेण।

कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात्॥

ज्याबन्धेति।यस्य कार्तवीर्यार्जुनस्य कारागृहे बन्धनागारे निर्जितेन्द्रेणापि लङ्केश्वरेण रावणेनाप्रसादात्प्रसादपर्यन्तं स्थितमिति[६०] सम्बन्धः। कीदृशेन्? ज्यया मौर्व्या यो बन्धस्तेन निःस्पन्दौ[६१] निश्चेष्टौ भुजौ यस्य तथाभूतेन। तथा विशेषतो निःश्वसन्ती वक्त्रपरम्परा यस्य तथाभूतेनेत्यर्थः। अत्र पूर्वोक्तप्रयोजनाभावाद्धनुःपदानुपादानम्॥३४॥

प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः।

मुक्ताहारेण लसता हसतीव स्तनद्वयम्॥

प्राणेश्वरेति।स्तनद्वयं कर्तृ प्राणेश्वरस्य दयितस्य परिष्वङ्गेनालिङ्गनेन या विभ्रमस्य विलासस्य प्रतिपत्तयस्ताभिरुपलक्षितम्। लसता स्फुरता मुक्ताहारेण हसतीवेत्यन्वयः। मुक्ताहार एव हास इत्यर्थः। हारो मुक्तावलाविति विश्वः। अत्रापि रत्नान्तरामिश्रत्वबोधनाय मुक्तापदप्रयोगः ॥३५ ॥

सौन्दर्यसम्पत्तारुण्यं यस्यास्ते ते च विभ्रमाः।

षट्पदान्पुष्पमालेव कं नाकर्षति सा सखे॥

सौन्दर्येति। हे सखे! सा वनिता। कान्पुरुषान्नाकर्षति न वशीकरोति। कान्केव। षट्पदान्पुष्पमालेव। सा का? यस्याः सौन्दर्यसंपत्तारुण्यं चास्तीति[६२] शेषः। ते तेऽनुभूतानानाविधा विभ्रमा विलासाः सन्तीत्यर्थः। अत्र निरुपपदान्मालाशब्दादेव पुष्पस्रक्प्रतीतेः पुष्पपदमुत्कृष्टपुष्पत्वे संक्रमितवाच्यम्। एवमेव करिबृन्हितादिष्वपि बोध्यम्॥३५ ॥

चरणत्रपरित्राणरहिताभ्यामपि स्फुटम्।

पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते॥

चरणत्रेति।चरणत्रमुपानत्। तत्कृतपरित्राणरहिताभ्यामित्यर्थः। अत्र चरणत्रेति विशेषण बोधनाय पादाभ्यामित्यस्योपादानान्नापुष्टार्थत्वम्॥३६॥

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम्।

उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः॥

---

६०. 'स्थित' 'ख' मातृकायां नास्ति।

६१. न निःस्पन्दौ निश्चेटौ भुजौ यस्य तथाभूतेन। तथा विशेषतो निःश्वसन्ती वक्रपरम्परा यस्य तथा भूतेनेत्यर्थः इति 'क' मातृकायां नास्ति।

६२. 'संयत्' इति मूल मातृकायां नास्ति।

चन्द्रमिति[६३]। कुमारसम्भवे पद्यमिदम्। लक्ष्मीश्चन्द्रगता सती पद्मगुणान्सौरभ्यादीन् न भुङ्क्ते। तत्सम्पृक्ता न भवतीत्यर्थः। रात्रौ पद्मस्य सङ्कुचितत्वात्। पद्माश्रिता दिवा विकसत्कमलाश्रिता सती चान्द्रमसीमभिख्यां शोभां न भुङ्क्त इत्यनुषङ्गः। अत्र चन्द्रस्य निष्प्रभत्वं हेतुः। उमामुखं तु प्रतिपद्य प्राप्य अत एव लोला चपलाक्षी लक्ष्मीर्द्विसंश्रयां चन्द्रपद्मोभयाश्रितां[६४] प्रीतिमवाप। तस्योभयगतगुणशोभाश्रयत्वादिति[६५] भावः। अत्र हेतोः प्रसिद्धत्वान्न पूर्वार्धे निर्हेतुत्वदोषः ॥३७॥

मृगचक्षुषमद्राक्षमित्यादि कथयत्ययम्।
पश्यैष च गवित्याह सुत्रामाणं यजेति च॥

मृगेति। मृगचक्षुषं मृगनेत्राम्। गवीत्यपशब्दानुकरणम्। सुत्रामाणमिन्द्रम्। अत्र परोक्तानुकरणात् श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तत्वानामदोषता ॥३८॥

दीधीङ्वेवीङ्समः कश्चिद्गुणवृध्योरभाजनम्।
क्विप्प्रत्ययनिभः कश्चिद्यत्र सन्निहिते न ते॥

दीधीङिति। कश्चिन्मन्दभाग्यः दीधीङ् वेवीङ् इति धातुद्वयसदृशः गुणबृध्योर-भाजनमाश्रयः[६६]। गुणोधैर्यादिः बृद्धिः समृद्धिः। धातु पक्षे गुणः अदेङ्गुणः इति परिभाषितः। वृद्धिरादैजिति परिभाषिता। तयोरभाजनम्। दीधीवेवीटामिति सूत्रेण निषेधात्। तथा कश्चित् क्विप्प्रत्ययेन निभस्तुल्यः। यत्र यस्मिन्दैवहतके पुरुषे क्विप्प्रत्यये च सन्निहिते सति ते गुणवृद्धिर्न भवतः। क्ङिति च इति निषेधात्। अत्र वक्तुर्वैयाकरणत्वात्कष्टत्वं गुणः। कश्चिन्क्विप्प्रत्ययेत्यादिकमर्थकष्टत्वोदाहरणम्। यथा क्विपः सर्वापहारीलोपस्तथा तस्यापीत्यर्थस्य दुरुहत्वादित्याह ॥३९॥

यदा त्वामहमद्राक्षं पदविद्याविशारदम्।
उपाध्यायं तदाऽस्मार्षं समास्प्राक्षं च सम्मदम्॥

यदिति। पदविद्यायां व्याकरणशास्त्रे विशारदं निपुणं त्वामहं यदाद्राक्षं दृष्टवान्। तदास्वस्योपाध्यायं गुरुमस्मार्षं सादृश्यात् स्मृतवान् सम्मदं हर्षं च सम्यगस्प्राक्षं स्पृष्टवान्। प्राप्तवानित्यर्थः। अत्र वैयाकरणस्य सम्बोध्यत्वादगुणत्वम् ॥४०॥

अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम्।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लस-
द्व्यालोलस्तनभरभैरववपुर्दर्पोद्धतं धावति॥

---

६३. 'चन्द्रेति कुमारसम्भवे पद्यमिदम्' इति 'क' मातृकायां बारं द्वयम्।

६४. पद्मो 'स्थाने' भोज 'क' मातृकायाम्।

६५. 'शोभा' 'क' मातृकायां नास्ति।

६६. 'गुणवृध्योरभाजनमाश्रयः' इति 'क' मातृकायां नास्ति।

अन्त्रेति। अत्र प्रकृता ताडका दर्पेणोद्धतं यथा स्यात्तथा धावतीत्यन्वयः। कीदृशी? अन्त्रैः प्रोतानि ग्रथितानि बृहन्ति महान्ति यानि कपालानि शिरोस्थीनि नलकानि जङ्घास्थीनि च तान्येव क्रूरं यथा स्यात्तथा क्वणन्ति कङ्कणानि तत्प्रायाणि तद्बहुलानि प्रेङ्खितानि चञ्चलानि यानि भूषणानि ग्रैवेयाङ्गदादीनि तेषां रवैः शब्दैरम्बरमाकाशमाघोषयन्ती प्रतिध्वनिव्याप्तं कुर्वती तथा पूर्वं पीतं पुनश्छर्दितं वान्तं रक्तमेव कर्दमः पङ्कस्तेन घोरो व्याप्तो यः प्राग्भार उत्तरकायस्तत्र घोरं यथा स्यात्तथोल्लसन्तौ नृत्यन्तौ व्यालोलौ यौ स्तनौ[६७] तयोर्भारेण भैरवं भीषणं वपुर्यस्यास्तथाभूता। प्राघारेतिपाठे। प्रघारो निरन्तरक्षरणम्। सेक इति कश्चित्। तेन घोराविति स्तनविशेषणम्। अत्र बीभत्सरसस्य व्यङ्ग्यत्वात्कष्टत्वं गुणः ॥४१॥

मातङ्गाः किमु वल्गितैः किमफलैराडम्बरैर्जम्बुकाः
सारङ्गा महिषा मदं व्रजथ किं शून्येषु शूरा न के।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः
सिन्धुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितम्॥

मातङ्गा इति[६८]। हे मातङ्गा! बल्गितैर्बृंहितैः किमु प्रयोजनमिति शेषः। हे जम्बुकाः! शृगालाः, अफलैराडम्बरैः किम? हे सारङ्गा! मृगास्तथा महिषाः मदं गर्वं किं किमर्थं ब्रजथ। शून्येषु बलवद्रहितेषु स्थानेषु के न शूराः? अपि तु सर्वेऽपीत्यर्थः। तथा च शूरत्वख्यापनार्थमपि नैतदुचितमितिभावः। किं तर्हि सार्थकं तत्राह–कोपेत्यादि। कोपस्याटोपेन परिपाट्या समुद्भटा उत्कटा उच्छ्रिता सटाकोटिः केसराग्रं यस्य तथाभूतस्येभारेः सिंहस्य पुरोऽग्रे सिन्धोरिव ध्वानिनि ध्वानशालिनि हुंकृते स्फुरति सति यदगर्जितं तद्गर्जितं सार्थकमित्यर्थः। द्वितीयगर्जितपदस्य सार्थकत्वविशिष्टलाक्षणिकत्वात् सफलगर्जितत्वरूपार्थान्तरसंक्रमितवाच्यत्वं तु न युक्तम्। गर्जितान्तरस्याफलत्वेन पूर्वमनुक्तत्वादिति। अत्र सिंहरूपवाच्यौचित्यात्तदभिधाने कष्टत्वं गुणः ॥४२॥

रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः।
उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः॥

रक्तेति।विरहिणः पुरुरवसः किलेयमुक्तिः। हे रक्तवर्णाशोक[६९]! अनुरक्तानामशोको यस्मात्तथाभूत। अनुक्तं जनं मद्रूपं त्यक्त्वा कृशोदरी क्व नु गतेत्यन्वयः, वातचालितां तदग्रशाखां दृष्ट्वा पुनराहन्नो दृष्टेतीति। इतीत्यनन्तरं सूचयितुमिति शेषः। वातेनाधूतं कम्पितं

---

६७. 'चपलौ' इति पदं 'ख' मातृकायामधिकम्।
६८. 'मातङ्गा इति' इत्यारभ्य कष्टत्वं गुणः इति पर्यन्तम् 'क' मातृकायां नास्ति।
६९. 'श्लेषा' इति 'क' एवं 'ख' मातृकायामधिकम्।

िरः मुधैव वृथैवेतियावत्[७०]। किं कुतश्चालयसि। पवनावधूतस्यैव शिरसः क्रोधाद्वातव्याधिकम्पितत्वेनोक्तिः। मिथ्यात्वं समर्थयति उत्कण्ठेत्यादिना। तस्याः कृशोदर्याः पादाहतिं पादाघातमन्तरेण विना भवतः। अयं दृश्यमानः पुष्पोद्गमः कुतः[७१] कस्माद्धेतोः यादिति शेषः। कीदृशः पुष्पोद्गमः उत्कण्ठया घटमानानाम् मिलितानां षट्पदानां या घटा समूहस्तस्य संघट्टेन[७२] निबिडसम्बन्धेन[७३]। दृष्टाः खण्डिताश्छदाः पत्राणि यस्य तथाभूत इत्यर्थः। अत्र मिथ्या शिरोधूननेन कोपप्रकरणे कष्टत्वं गुणः ।।४३।।

शीर्णघ्राणाङ्घ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्तघोषा-
न्दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन्यः।
धर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्ते-
र्दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम्।।

शीर्णेति। मयूरकवेः सूर्यस्तुतिरियम्। तस्य धर्मांशोः सूर्यस्य घृणयो रश्मयः वो युष्माकमंहसां[७४] पापानां विघातं नाशं शीघ्रं विदधतु कुर्वन्त्वित्यन्वयः। स कः। यो विशीर्णनासाचरणहस्तान् व्रणयुतैरपघनैरङ्गैरूपलक्षितान्[७५]। अत एव[७६] घर्घरवत् चलद्वारिध्वनिवदव्यक्तो घोषः शब्दौयेषां तथाभूतान्[७७]। यतोऽघौघैः पापसमूहैः। दीर्घकालं व्याप्याघ्रातानाक्रान्ताञ्जनानुल्लाघयन्नीरोगान्कुर्वन्घटयति। अर्थात् घ्राणादिभिरङ्गैः सम्बध्नाति। कीदृशस्य धर्मांशोः अन्तर्हृदये द्विगुणा बहुला घना निविडा या घृणा कृपा तन्निघ्ना तदायत्ता विर्विघ्ना विघ्ननाशिका वृत्तिर्व्यवसायो यस्यैवंभूतस्य। घृणयः कीदृशाः सिद्धानां संघैः समूहैर्दत्तोऽर्घो येभ्यस्तथाभूताः। घृणिभिरपघनैरितिपाठे जुगुप्साविषयैरित्यर्थः। घर्घरस्तु चलद्वारिध्वान इति विश्वः। उल्लाघो निर्गतो गदादित्यमरः। अत्रानुप्रासैकपरतया नीरसत्वात्कष्टत्वं न गुणो न वा दोषः ।।४४।।

येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत्।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः।।

येनेति। सर्वदः सर्वप्रदः माधवः श्रीकृष्णस्त्वां पायादित्यन्वयः। स कः अभवेन

---

७०. 'मिथ्यै' इति 'क' एवं 'ख' मातृकायामधिकम्।
७१. 'कुतः' 'क' मातृकायां नास्ति।
७२. 'संघट्टेन' स्थाने 'संघटेव' ख मातृकायाम्।
७३. 'निविड' 'स्थाने' निगर 'ख' मातृकायाम्।
७४. 'हसां' स्थाने 'हरसी' 'क' मातृकायाम्।
७५. 'पलक्षितान्' स्थाने 'पक्षिलतान्' 'क' मातृकायाम्।
७६. 'अत' स्थाने अत्र 'ख' मातृकायाम्।
७७. तथा भक्षण युक्तैर पद्यनैरङ्गेरूप लक्षितान्। अत्र घर्घर चञ्चलद्वारि ध्वनिवद् व्यक्तोघोषः शब्दो येषां इति 'ख' मातृकायामधिकम्।

निःसंसारिणा येनानः शकटं ध्वस्तं पादेन पर्यस्तम्। बलिं दैत्यं जयतीति बलिजित्। स्वस्य कायः पुरामृतमथनावसरे स्त्रीकृतः कैटभीरूपतां प्रापितः। यश्च उद्धृत्तस्य कालीयभुजङ्गस्य हन्ता। रवे शब्द[७८] ब्रह्मणि लयो यस्य सः। अराणां वलयं मण्डलं यत्र तदरवलयं चक्रम्। उद्वृत भुजङ्गं हतवत्तदस्येति वा। अरं शीघ्रे च चक्राङ्गे इति विश्वः। अगं गोवर्द्धनगिरिं गां पृथ्वीं च वराहावतारे यो धृतवान्। यस्य अमराः। शशिनं मथ्नतीति शशिमत् राहुस्तच्छिरोहर इति स्तवनीयं नामाहुः। अन्धकानां यादवानां क्षयस्य द्वारकायां निवासस्य कर्त्तेत्यर्थः। शिवपक्षे तु सर्वदा स स्वयमुमाया धवः शिवस्त्वां पायात्। स कः। ध्वस्तो मनोभवः कामो येनैवं भूतेन येन बलिजितो विष्णोः कायः पुरा त्रिपुरदाहकासमयेऽस्त्रीकृतो[७९] वाणतां प्रापितः। उद्धृत्तभुजङ्गैर्हारवलयानि यस्य सः, यो गङ्गां शिरसि अधारयत्। यस्य शिरः शशिमच्चन्द्रयुक्तमाहुः। अमरा हर इति स्तुत्यं नाम चाहुः। अन्धकासुरस्य क्षयकारो नाशक इति। यो बर्हिपत्रप्रियः इति पाठे बर्हि पत्रं मयूरपिच्छं तत्प्रियः श्रीकृष्णः। शिवस्तु बर्हि पत्रं वाहनं यस्य स्कन्दस्य तत्प्रिय इत्यर्थः। एवमिष्ट भुजङ्ग इति पाठे इष्टो भुजङ्गहा गरुडो यस्य स श्रीकृष्णः। शिवपक्षे तु सुगममेव। अत्र कृष्णपक्षे शशिमत्पदस्य राहौ अप्रयुक्तत्वम्। क्षयपदस्य च गृहे नियतार्थत्वं न दोषः। श्लेषनिर्वाहकत्वादिति ॥४५॥

करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते॥

करिहस्तेनेति। साधनस्य सेनाया अन्तर्मध्ये प्रविश्योपसर्पन्गच्छन्पुन्सो ध्वजः केतुर्विराजत इत्यन्वयः। अन्तः कीदृशे सम्बाधे? नराश्वादिभिः संकटे। करिणां हस्तेन शुण्डया विलोडिते विस्फारिते इत्यर्थः। अत्र साधनस्य स्त्रीवराङ्गस्यान्तर्मध्ये प्रविश्योपसर्पन् गतागतं कुर्वन्पुंसो ध्वजो लिङ्गं विराजते। कीदृशेऽन्तः सम्बाधे संकुचिते कथं तर्हि प्रवेशस्तत्राह–करिहस्तेन। तर्जन्यनामिके श्लिष्टे मध्यमापृष्ठतस्तयोः। करिहस्त इति प्रोक्तः कामशास्त्रविशारदैः। इति परिभाषितेन विलोडिते विस्फारिते इति गुणोऽश्लीलार्थः द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्त्विति कामशास्त्रेण सुरतारम्भोपयुक्तवार्तायामनुमतत्वाद्गुणः ॥४६॥

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते॥

उत्तानेति। उत्तान उच्छूनो जातशोफश्च यो मण्डूकस्तस्य पाटितं विदारितं यदुदरं तत्सन्निभे तत्तुल्ये क्लेदिनि क्लिन्ने स्त्रीव्रणे योनिरूपे कस्य कृमिभिन्नस्य सक्तिरासक्तिर्जायते। तदासक्तः कृमिरेवेत्यर्थः। अत्र शान्तकथायां जुगुप्साश्लीलं गुणः ॥४७॥

निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन।

---

७८. 'शब्द' 'क' मातृकायां नास्ति।

७९. 'समये' स्थाने काले 'क' मातृकायाम्।

रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥

निर्वाणेति। वेणीसम्बरणे सूत्रधारोक्तिरियम्। अरीणां प्रशमात्कलहोपशमान्निर्वाणः शान्तो वैरमेव दहनोऽग्निर्येषां तादृशाः पाण्डुतनयाः पाण्डवा माधवेन कृष्णेन सह नन्दन्तु। तथा कुरुराजस्य धृतराष्ट्रस्य सुता दुर्योधनादयः सभृत्याः स्वस्था निश्चिन्ता भवन्तु। कीदृशाः कुरुराजसुताः रक्ता अनुरक्ता प्रकर्षेण साधिता भूर्यैस्तादृशाः। क्षतो निवर्तितो विग्रहः कलहो यैस्तथाभूताः। अत्र प्रशमान्नाशात् रुधिरशोभितभूमयः खण्डितशरीराः स्वर्गस्थाः इत्यमङ्गलाश्लीलं भाव्यर्थसूचकतया गुणः ॥४८॥

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥

पृथ्विति। राजानं[८०] प्रतिकवेरुक्तिः। भो देव! सम्प्रत्यऽधुना आवयोः सदनं गृहं सममित्यन्वयः। त्वत्तो धनलाभानन्तरं न सममिति सम्प्रति पदाभिप्रायः। साम्यमेव श्लेषेणाह- पृथ्वित्यादिना। पृथूनि महान्ति कार्तस्वरस्य सुवर्णस्य पात्राणि यत्र। तद्राजगृहम्। कविगृह्णन्तु पृथुकानां बालानामार्त्तस्वरस्य पात्रं स्थानम्। भूषिता निःशेषाः परिजना यत्र तथाभूतं राज्ञः। कवेस्तु भुवि उषितः भूशायी निःशेषः परिजनो यत्र तादृशम्। तथा विलसन्तीभिः करेणुभिर्हस्तिनीभिर्गहनं व्याप्तं राज्ञः। कवेस्तु विले विवरे सीदन्ति ते विलसत्कामूषकास्तेषां रेणुभिर्गहनं व्याप्तं। बबयोरभेदात्। यद्वा विलसत्कं जलं रेणुश्च ताभ्यां व्याप्तम्। अत्रोक्तविशेषणानां योग्यतया तत्तत्पक्षानुकूलार्थनिर्णयाद्व्याजस्तुतिनिर्वाहकतया संदिग्धं गुणः ॥४९॥

आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्ति देव पुराणम् ॥

आत्मेति। वेणीसम्बरणे श्रीकृष्णबन्धनोद्यतं दुर्योधनं श्रुत्वा। किं दुर्योधनो वासुदेवस्वरूपं न जानातीति पृच्छन्तं सहदेवं प्रति भीमसेनस्येयमुक्तिः। मोहेनाज्ञानेनान्धो वस्तुतत्वप्रतिपत्तिरहितोऽयं दुर्योधनस्तममुं श्रीकृष्णं पुराणमनादि देवं परमात्मानं कथं वेत्ति जानातीत्यन्वयः। तं कं यं श्रीकृष्णमात्मन्यारमन्ते प्रत्याहृतेन्द्रियाः सन्तस्तदेकताना भवन्ति। आत्मैव वा आरामः क्रीडास्थानं येषां तथाभूता योगिनः निर्विकल्पे भेदावभासशून्ये समाधौ योगे विहिता रतिरासक्तिर्यैस्तादृशाः। ज्ञानोत्सेकादात्मसाक्षात्कारदाढ्र्याद्विघटितो नाशितस्तमसोग्रन्थिरज्ञानग्रन्थिर्यैस्तथाभूताः। सत्त्वगुणैकविश्रान्ताः सन्तोऽयं वीक्षन्ते पश्यन्ति। एवं विधानामेव वेद्यत्वेन हेतुगर्भं यत्पदार्थस्य विशेषणम्-तमसां ज्योतिषां वा परस्ताद्वर्तमानमिति। रजस्तमोऽभिभूतैर-

---

८०. 'राजानं' प्रति 'क' मातृकायां नास्ति।

लभ्यमित्यर्थः। अत्र वक्तृश्रोत्रोर्विज्ञतया अप्रतीतत्वं गुणः ॥५० ॥

षडधिकदशनाडीचक्रमध्यस्थितात्मा
हृदि विनिहितरुपः सिद्धिदस्तद्विदां यः।
अविचलितमनोभिः साधकैर्मृग्यमाणः
स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥

षडधिकेति। मालतीमाधवे कपालकुण्डलायाः स्वयं परामर्शोऽयम्। स शक्तिभिर्ज्ञाने-च्छाकृतिभिर्ब्राह्म्यादिभिर्वा[८१] परिणद्धो नित्ययुक्तोऽत एव तासां नाथ ईश्वरो जयतीत्यन्वयः। स कः यः षडधिकानां दशनाडीनामिडादिषोडशनाडीनां यच्चक्रं मणिपूराख्यं तन्मध्ये स्थित आत्मा स्वरूपं ज्योतीरूपं यस्य स तादृशः हृदि विनिहितरूपः हृदये[८२] चिन्त्यमानः। तद्विदां तथा ध्यायतां सिद्धीरणिमाद्या ददातीति तथाभूतः। पुनः कीदृक् अविचलितमनोभिः स्थिरान्तःकरणैः साधकैर्मृग्यमाणोऽन्विष्यमाण इत्यर्थः। अत्र वस्तुतस्तज्जत्वाद्गुणत्वम् ॥५१ ॥

पुष्पोत्करं कलमौदननिभं वहन्ति ये
सिन्धुवारविटपा मम वल्लभास्ते।
ये गालितस्य महिषीदध्नः सदृशास्ते
किं च मुग्धविचकिलप्रसूनपुञ्जाः ॥इति संस्कृतम् ॥

फुल्लक्कुरबुरमिति। विद्धशालभञ्जिकायां विदूषकोक्तिरियम्। क्रूरशब्दो भक्ते देशी। कलमाः। शालयस्तदोदनतुल्यं तुल्यं पुष्पोत्करं ये वहन्ति ते सिन्दुवारवृक्षस्य विटपाः शाखा मम बल्लभाः प्रियाः। शाल्योदनसदृशत्वं प्रियत्वबीजम्। तया ये गालितस्य वस्त्रनिर्जलीकृतस्य महिषीदध्नः सदृशाः किञ्चेति समुच्चये। तेऽपि विचकिलप्रसूनस्य मल्लिकापुष्पस्य पुञ्जा मम बल्लभा इत्यनुषङ्गः। अत्र विदूषकोक्तौ ग्राम्यत्वं गुणः ॥५२ ॥

गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा।
मा मा मानद माऽति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥

गाढेति। अमरूककवेरिदं पद्यम्। सखायं प्रति कस्यचिदुक्तिः। गाढालिङ्गनेन खर्वीकृतकुचा चासौ प्रोद्भूतरोमोद्गमा। तथा सान्द्रो घनो यः स्नेहरसोऽनुरागस्य रसस्तस्यातिरेकेणाधिक्येन विगलत् श्रीमतो नितम्बस्याम्बरं वसनं यस्यास्तथाभूता। हे मानद! दमानदायक[८३]। मामा पीडयेति शेषः। मा इति माम्। आयासयेति शेषः। अलं पूर्यतामित्यक्षरोल्लापिनी क्षामा। कृशाङ्गी। क्षामेत्यक्षरविशेषणं वा। एवम्भूता प्रिया

---

८१. 'शब्द' 'क' मातृकायाम् इत्यधिकम्।

८२. 'चिन्त्यमानः। तद्विदा तथाध्यायतां सिद्धिरणिमाद्या ददातीति तथा भूतः। पुनः कीदृक् इति 'क' मातृकायां नास्ति।'

८३. 'दमान' 'क' मातृकायां नास्ति।

निश्चलतातिशयात्सुप्ता किं नु। श्वासादिकृतचेष्टाया अपि विरहमभिप्रेत्याह-मृता नु किम्? भिन्नत्वेनानवभासमभिप्रेत्याह-मे मम मनसि लीना। जतुकाष्ठन्यायेन सम्बद्धा किं नु इत्यनुषङ्गः। तथाभूताया अपि पृथक्कर्तुमशक्यत्वादाह-विलीना नीरक्षीरादिवदैक्यमापन्ना नु किमिति। अत्र पीडयेत्यादिक्रियापदन्यूनता रसातिरेकव्यञ्जकतया गुणः ।।५३ ।।

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।
तां हर्त्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ।।

तिष्ठेदिति। विक्रमोर्वशीये पुरुरवस इयमुक्तिः। सा उर्वशी कोपवशात्प्रभावेणान्तर्धान-विद्ययाऽपिहितान्तर्हिता। अत्रैव तिष्ठेदिति वितर्कः। एतदुत्तरं नैतद्युक्तं भवतीति[८४] पूरणीयम्। यस्मात्सा उर्वशी दीर्घं चिरकालं न कुप्यति। स्वर्गाय[८५] स्वर्गं गन्तुम्। तुमर्थाच्च भाव वचनादिति चतुर्थी। उत्पतिता उड्डीना भवेत्। अस्या मनः पुनर्मयि स्नेहेनार्द्रं सरसम्। तेनैतदपि नेति शेषः। भवेदित्यनन्तरं नैतद्यत इति शेषपूरणे पुनःशब्दार्थान्वयप्रसङ्गात्। मे मम पुरोवर्त्तिनीं च तां प्रियां हर्तुं विवुधद्विषोऽसुरा अपि न शक्ताः किमुतान्ये। सा चात्यन्तं नयनयोरगोचरं भावप्राधान्यादगोचरत्वं याता प्राप्तेति कोऽयं विधिः प्रकारो दैवं वा वर्तत इति शेषः। अत्र दीर्घमित्याद्युत्तरवाक्यार्थावगमेनैव पूर्वस्य बाध्यत्वावगनान्न्यूनत्वं न दोषः ।।५४ ।।

यद्वञ्चनाहितमतिर्बहु चाटुगर्भं
कार्योन्मुखः खलजनः कृतकं ब्रवीति।
तत्साधवो न न विदन्ति विदन्ति किन्तु
कर्तुं वृथा प्रणयमस्य न पारयन्ति ।।

यद्वञ्चनेति। वञ्चनायां प्रतारणायामाहिता स्थापिता मतिर्थेन सः कार्ये उन्मुखः तत्परः खल्जनो बहुचाटुगर्भं प्रियवचनमिश्रं यत्कृतकं मिथ्याभूतं ब्रवीति तत्साधवो न विदन्ति न जानन्तीति, तत्राह-अस्य खलस्य प्रणयं चाटुभाषणादिरूपं वृथाकर्तुं न पारयन्ति न शक्नुवन्तीत्यर्थः। अत्र द्वितीयस्य विन्दन्तीत्यस्य नञ्द्वययोगेनोक्तार्थकत्वेऽपि साधव एव जानन्तीत्यन्ययोगव्यवच्छेदपरत्वाद्गुणत्वम् ।।५५ ।।

वद वद जितः स शत्रुर्न हतो जल्पश्च तव तवास्मीति।
चित्रं चित्रमरोदीद्धा हेति परं मृते पुत्रे ।।

वद वदेति। रणादागतं चारं प्रति स्वामिनः प्रश्नः। न हत इत्याद्युत्तरं तवास्मीति जल्पन्नित्यन्वयः। पुत्रे मृते सति चित्रं विचित्रं हाहेत्यरोदीदिति सम्बन्धः। अत्र क्रमेण हर्षभीतिविस्मयविषादव्यञ्जकत्वादधिकपदत्वं गुणः ।।५६ ।।

---

८४. 'भवती' स्थाने यत् 'ख' मातृकायाम्।
८५. 'स्वर्गाय' द्वय बारं इति 'क' मातृकायाम्।

सितकरकररुचिरविभा विभाकराकार, धरणिधर, कीर्तिः।

पौरुषकमला कमला सापि तवैवास्ति नान्यस्य॥

सितेति। हे विभाकराकार! सूर्यतुल्य! हे धरणिधर! पृथ्वीपालक! राजन्। सितकरस्य[८६] श्वेतकिरणस्य चन्द्रस्य कराः किरणाः तद्वद्रुचिरा विभा कान्तिर्यस्याः सा कीर्त्तिस्तथा[८७] पौरुषकमला पराक्रमलक्ष्मीर्लक्ष्मीश्च तवैवास्ति नान्यस्यास्तीति शेषः। यत्तु पौरुषमेवाधिष्ठानभूतं[८८] कमलं यस्या इति लक्ष्मीं विशेषणत्वेन व्याख्यानम्, तदयुक्तम्। अर्थभेदेन कमलाकमलेत्यस्य[८९] लाटानुप्रासाभावापत्त्या लाटानुप्रासे कथितपदगुणत्वोदाहरणा-सङ्गतेः। अन्वयमात्रभेद एव तस्य वक्ष्यमाणत्वात् मत्वर्थीयाच्प्रत्ययेन कमलवतीति द्वितीयकमला पदार्थाङ्गीकारे त्वेवमपि शक्यं वक्तुम्॥५७॥

तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।

रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि[९०]॥

तालेति। व्याख्यातं पूर्वमेतत्। अत्र द्वितीयकमलपदस्यार्थान्तरसंक्रमितवाच्यत्वेन व्यञ्जनोपयुक्तत्वाद्गुणत्वम्॥५८॥

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते।

गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः॥

जितेन्द्रियत्वमिति। गुणैरधिके गुणैरुत्कृष्टे। अत्रापि कारणमालानिर्वाहकतया गुणत्वम्। पदान्तरेणानुवादे भेद प्रतिभासात्॥५९॥

भ्रमाम्यपहस्तितरेखो[९१] निरङ्कुशोऽथ विवेकरहितोऽपि।

स्वप्नेऽपि त्वयि पुनः प्रतीहि भक्तिं न प्रस्मरिष्यामीति संस्कृतम्॥

भम्भीति। हुम्मीति पाठे भवामीति। णेहो इत्यरेहो इति रेरव[९२] इति। रेखा मर्यादा न त्रिपुलसिमीति पाठेन त्रिचिन्ताम्। प्रमोक्ष्यामीति। कामं प्रति यौवनस्येयमुक्तिरिति केचित्। मलयानिलादिसहचरसम्पत्तौ। कामं प्रतीयं तरुणोक्तिरित्यन्ये। गुरुं प्रति शिष्योक्तिरित्यपरे। अपहस्तिता त्यक्ता रेखा मर्यादा येन सः। निरङ्कुशोऽनुरोधशून्यः। त्वयि पुनर्भक्ति चिन्तां वा स्वप्नेऽपि न प्रस्मरिष्यामि विस्मरिष्यामि। त्वं प्रतीहि विश्वसिहीत्यर्थः। अत्र त्वं प्रतीहीति वाक्यगर्भितत्वं दृढप्रत्ययार्थतया गुणः॥६०॥

---

८६. 'लक्ष्मी' इत्यधिकं 'क' मातृकायाम्।
८७. सा कीर्तिस्तथा 'इति' 'क' मातृकायां बारं द्वयम्।
८८. 'भूतं' स्थाने 'रूपं' 'क' मातृकायाम्।
८९. 'कमला' 'ख' मातृकायां नास्ति।
९०. 'कमलानि' 'मूल' मातृकायां बारं द्वयम्।
९१. 'भ्रमाम्यप' 'स्थाने' भ्रमास्य 'ख' मातृकायाम्।
९२. 'रे रव' स्थाने पाठे र रैव 'ख' मातृकायाम्।

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे

सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि।

सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे

पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायाऽस्तु वः ॥

सव्रीडेति। नवसङ्गमे[१३] आद्यसमागमे प्रणयशालिनी पार्वत्याः दृष्टिर्वो युष्माकं शिवाय कल्याणायास्तु[१४]। कीदृशी। दयितानने सव्रीडा। प्रथमदर्शनात्। लज्जावती। मातङ्गचर्मरूपेऽम्बरे वस्त्रे[१५] सकरुणा। मातङ्गवधस्मृत्या शोकोदयात्। भुजगे सर्पे[१७] त्राससहिता। अमृतस्यन्दिनि चन्द्रे विस्मयरससहिता जह्नुसुता तत्कर्मके तत्कर्तृके वावलोकनविधौ सतीति सतिसप्तमी। तेन तस्या ईर्षालम्बनत्वलाभः। कपालस्योदरे गर्भे दीना मणिस्थाने तद्दर्शनात्। अत्र व्रीडादिव्यभिचारिणां वाच्यत्वं दोषः ॥६१ ॥

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम्।

नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ॥

तामिति। तां नायिकां नेत्रयोर्गोचरे कृतवतोऽस्य कोऽप्यनिर्वाच्यो निरन्तरो घनो रसः अजायत इत्यन्वयः। कीदृशीम्? अनङ्गस्य जये मङ्गलसम्पत्तिरूपाम्। किंचिदुच्चैर्भुजमूले कुचसन्धौ लोकितां दृष्टामित्यर्थः। अत्र रसस्य वाच्यतादोषः ॥६२ ॥

आलोक्य कोमलकपोलतलाभिषिक्त-

व्यक्तानुरागसुभगामभिराममूर्तिम्।

पश्यैष बाल्यमतिवृत्य विवर्तमानः

श्रृङ्गारसीमनि तरङ्गितमातनोति।

आलोक्येति। एष युवा कोमले कपोलतलेऽभिषिक्तोऽत एव पुलकादिचिह्नैर्व्यक्तो योऽनुरागस्तेन सुभंगां शोभनाम्। अभिरामा रमणीयामूर्तिर्यस्यास्तादृशीं नायिकामालोक्य शृङ्गारस्य सीमनि तरङ्तिगतमनवच्छिन्नखेलनमातनोति, त्वं पश्येत्यन्वयः। तथा खेलने हेतुगर्भं विशेषणमाह-वाल्यमतिवृत्यातिक्रम्य विवर्तमानः। पुलककटाक्षादिभिश्चेष्टमान इत्यर्थः। अत्र विशेषतः शृङ्गारपदवाच्यत्वम् ॥६३ ॥

सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम्।

ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ॥

सम्प्रहार इति। सम्प्रहारे[१८] युद्धे प्रहरणैरायुधैः परस्परं ये प्रहारास्तेषां[१९]

---

१३. 'सङ्गमे' 'क' मातृकायां नास्ति।

१४. 'कल्याण' 'क' मातृकायां नास्ति।

१५. 'वस्त्रे' 'क' मातृकाया नास्ति।

१६. सर्पे 'क' मातृकायां नास्ति।

१७. अन्तरिक्ष गामितया दुर्लभस्य ललाटे दर्शनात् इति 'क' एवं 'ख' मातृकायामधिकम्।

१८. 'प्रहारे युद्धं' 'क' मातृकायां बारं द्वयम्।

१९. 'प्रहरणैय युधैः' इति 'ख' मातृकायामधिकम्।

छणत्कारैस्तादृशशब्दैः कर्णागतैस्तस्य प्रकृतवीरस्य कोऽप्यनिर्वचनीय उत्साहोऽभूदित्यन्वयः। अत्रोत्साहस्य स्थायिभावस्य वाच्यता ॥६४॥

कर्पूरधूलिधवलद्युतिपूरधौत-
दिङ्मण्डले शिशिररोचिषि तस्य यूनः।
लीलाशिरोऽशुकनिवेशविशेषक्लृप्ति-
व्यक्तस्तनोन्नतिरभून्नवयौवना सा॥

कर्पूरेति। तस्य यूनः सा नायिका नयनावनौ नेत्रप्रसारणभूमौ नेत्रगोचर इति यावत्। अभूदित्यन्वयः। कीदृशी ? लीलया शिरःसम्बन्धिनोऽन्शुकस्य यो निवेशविशेषतस्य क्लृप्त्या करणेन व्यक्ता स्तनयोरुन्नतिर्यस्यास्तथाभूता। कस्मिन्सति। कर्पूरधूलिवत् धवलेन द्युतिपूरेण धौतं प्रक्षालितं दिशां मण्डलं येन तभाभूते शिशिररोचिषि चन्द्रे सति। तेनोद्दीपनप्रकर्षः। अत्र पुन्निष्ठ शृङ्गारानुभावः कष्टगम्यः ॥६५॥

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्तते च भूयः।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः॥

परिहरतीति। बत खेदे। विषमा दशा विरहावस्था अस्य देहं प्रसभं हठादिति। एवं प्रकारेण परिहरतीति[१००]। अत्र किं कुर्म इत्यन्वयः। परिभवप्रकारमाह-परिहरतीत्यादि। रतिर्विषयाभिलाषः। मतिरर्थनिर्धारणम्। लुनीते छिनत्ति। परिवर्तनं पार्श्वपरिवृत्तिः। अत्र विभावः कष्टगम्यः। शोकेऽप्येवम्भावात् ॥६६॥

प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः॥

प्रसाद इति। मानवतीं मालतीं[१०१] प्रति माधवस्येयमुक्तिः[१०२]। हे प्रिये! प्रसादे वर्तस्व प्रसन्ना भवेत्यर्थः। मुदं हर्षं प्रकटय रुषं कोपं सन्त्यज। अमृतमिव ते तव वचः शुष्यन्ति शुष्यमाणानि अर्थान्ममाङ्गानि सिञ्चतु। सौख्यानां निधानमाकरं सुखं[१०३] क्षणमभिमुखं[१०४] स्थापय। मुग्धे विवेकरहिते गतः कालरूपो हरिणः प्रत्येतुं परावर्त्तितुं न प्रभवति न शक्नोतीत्यर्थः। हरिणत्वारोपेण चपलत्वं ध्वन्यते। तच्च शृङ्गारप्रतिकूलस्य शान्तस्य विभाव इति दोषः ॥६७॥

निभृतरमणे लोचनपथे पतिते गुरुणां मध्ये।
सकलपरिहारहृदया वनगमनमेवेच्छति वधूरिति संस्कृतम्।

---

१००. 'परिहरतीति' 'स्थाने' परिभवति 'क' एवं 'ख' मातृकायाम्।

१०१. 'मालती' 'स्थाने' प्रति 'ख' मातृकायाम्।

१०२. 'प्राते' 'क' मातृकायाम् इत्यधिकम्।

१०३. 'सुखं' 'स्थाने' सुमुखं इति 'क' मातृकायाम्।

१०४. 'भिमुखं' स्थाने निमुखं 'ख' मातृकायाम्।

णिहुअ इति[१०५]। निभृतरमणे गुप्तकामुके गुरुणां मध्ये लोचनमार्गं पतिते सति सकलस्य गृहकार्यस्य परिहारे त्यागे हृदयं यस्यास्तथाभूता वधूः। तेन सह वनगमनमेवेच्छतीत्यर्थः। अत्र निर्व्याजवनगमनसकलपरिहारयोः शान्तानुभावत्वेन प्रतिभासः। इन्धनानयनादिव्याजोपनिबन्धे तु न दोषः ॥६८॥

औतसुक्येन कृतत्वरा सहभुवा व्यावर्तमाना हिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।
दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः॥

औत्सुक्येनेति। नवे संगमे हसता हरेणाश्लिष्टा अत एव संरोहत्पुलका उद्गतरोमाञ्चा गौरी वः शिवायास्तु। कीदृशी? दयितसमीपगमने औत्सुक्येन कृतत्वरा। सहभुवा सहोत्पन्नया स्वाभाविकयेति यावत्। हिया लज्जया व्यावर्तमाना परावर्तमाना। पुनस्तैस्तैस्तत्कालोचितैर्बन्धुवधूजनस्य वचनैराभिमुख्यं सम्मुखत्वं नीता प्रापिता। तथाग्रे वरं दृट्वा आत्तो गृहीतः साध्वसरसो भयरसो यया तथाभूतेत्यर्थः। अत्रौत्सुक्यस्य सञ्चारिणो वाच्यता न दोषः। असाधारणानुभावाभावेन तद्व्यङ्ग्यत्वासम्भवात्। अत एव दूरादुत्सुकमित्यत्राप्यौत्सुक्यमेव शब्देनोपात्तमिति दिक् ॥६९॥

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः॥

पाण्डु क्षाममिति। हे सखि! तव पाण्डुक्षामं वदनं सरसमन्नरससहितं स्निग्धं च हृदयम्। अलसमालस्ययुक्तं वपुश्च हृदन्तः हृदयमध्ये नितान्तमत्यर्थं क्षेत्रियरोगमावेदयतीत्यन्वयः। क्षेत्रियः। देहान्तरचिकित्स्योऽसाध्यरोगः। क्षेत्रीयश्च परक्षेत्रे चिकित्स्यः इति निपातनात्। सर्वशरीरव्यापिपीडाजनक इत्यन्ये। क्षेत्रियं क्षेत्रजपुत्रे[१०७] परदाररतेऽपि च। अन्य देहचिकित्सार्हासाध्यरोगे च जायते इति विश्वः ॥७०॥

सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम्॥

सत्यमिति। मत्ताङ्गनाया अपाङ्गभङ्गः कटाक्षस्तद्वल्लोलमस्थिरम्। तथा च रामादीनां रमणीयत्वेऽपि जीवितस्य भङ्गुरतया तत्सापेक्षाणामनुपादेयत्वमेवेति शृङ्गारबाधेन शान्ते पर्यवसानमिति न विरोधः ॥७१॥

भूरेणुदिग्धान् नवपारिजातमालारजोवासितबाहुमध्याः।
गाढं शिवाभिः परिरभ्यमाणान् सुराङ्गनाश्लिष्टभुजान्तरालाः॥

---

१०५. 'णि हुअ इति' 'क' मातृकायां नास्ति।
१०६. 'हृतः' स्थाने 'हृदन्तः' 'ख' मातृकायाम्।
१०७. 'पुत्रे' स्थाने 'तृणे' 'क' एवं 'ख' मातृकायाम्।

भूरेणुदिग्धानिति। युद्धे पतिता वीरा देवत्वलाभेन विमानपर्यङ्कतले निषण्णाः उपविष्टाः सन्तः तदानीं ललनानामप्सरसामङ्गुलीभिर्निर्दिश्यमानान्प्रदर्श्यमानान्स्वदेहान् रणपतितान्कुतूहलाविष्टतयाश्चर्याविष्टतया अपश्यन्नित्यन्वयः। कौतुकहेतुगर्भाणि क्रमेण कर्मकर्तृविशेषणान्याह भूरेण्वित्यादि। भूसम्बन्धीरेणुना व्याप्तान्। नवानां पारिजातमालानां रजोभिः परागैर्वासितानि सुरभीकृतानि बाह्वोर्मध्यान्तरालानि येषां ते। शिवाभिः क्रोष्ट्रीभिर्गाढमालिङ्ग्यमानान्स्वदेहान् सुराङ्गनाभिरप्सरोभिराश्लिष्टं भुजयोरन्तरालं वक्षो येषान्ते। सरुधिरैः[१०९] क्रव्यभुजां मान्सादानां खगानां गृध्रादीनां स्फुरद्भिः पक्षैरुपवीज्यमानान् देहान्। चन्दनवारिसेकैः सुगन्धिः कल्पलताप्रसूतैः दुकूलैः पट्टवस्त्रैः संवीजिता वीराः। अत्र पतितस्वदेहसुराङ्गनालम्बनयोर्वीभत्सशृङ्गारयोर्मध्ये वीरस्य निवेशान्न विरोधः ॥७२॥

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीस्रंसनः करः॥

अयमिति। व्याख्यातं प्राक्। अत्र स्मर्यमाणशृङ्गारस्य करुणोद्दीपकतया तदङ्गत्वान्न विरोधः ॥७३॥

दन्तक्षतानि करजैश्च विपाटितानि
प्रोद्भिन्नसान्द्रपुलकैर्भवतः शरीरे।
दत्तानि रक्तमनसा मृगराजवध्वा
जातस्पृहैर्मुनिभिरप्यवलोकितानि॥

दन्तेति। अपत्यं प्रसूय तदेव भोक्तुमुद्यतायै[११०] सिंह्यै तदपत्यदयया स्वाङ्गमर्पितवन्तं जिनं प्रति[१११] कस्यचिदुक्तिरियम्। हे जिन! भवतः शरीरे रक्ते रुधिरे मनो यस्यास्तथाभूतयैव[११२] अनुरक्तमनसा मृगराजस्य सिंहस्य वध्वैव मृगजातीयराजवध्वा[११३] दन्तक्षतानि करजैर्नखैर्विपाटितानि[११४] विदारितानि च दत्तानि अर्पितानि जातस्पृहैर्वयमप्येवं विधा भूयास्मेतिजाताभिलाषैर्मुनिभिरप्यवलोकितानीत्यन्वयः। कीदृशे शरीरे, परपरित्राणहर्षात्प्रोद्भिन्ना उद्गताः सान्द्राः पुलका रोमाञ्चा यत्रैवम्भूते। पक्षेऽनुरागात्तथाभूते। अत्र दयावीरस्यानुभावविशेषे शृङ्गार उपमानभावेनाङ्गम्॥७४॥

क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव गलद्बाष्पाम्बुधौताननाः।

---

१०८. 'सापेक्षाणाम्' स्थाने सापेक्षायाम् 'क' मातृकायामधिकम्।
१०९. 'सशोणितैः' 'इति' पदं 'क' एवं 'ख' मातृकायामधिकम्।
११०. 'मुद्यतायै' 'स्थाने मुषतयौ' 'क' मातृकायाम्।
१११. 'प्रति' स्थाने प्राप्ति 'क' मातृकायाम्।
११२. यस्यास्तथाभूता 'क' मातृकायां नास्ति।
११३. 'राज' 'क' मातृकायां नास्ति।
११४. 'पाटिता' स्थाने 'पाठिता' 'ख' मातृकायाम्।

भीत्या भर्तृकरावलम्बितकरास्त्वद्वैरिनार्योऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ॥

क्रामन्त्य इति। राजानं प्रति कवेरुक्तिः। हे राजन्! अधुना त्वद्वैरिनार्यो भीत्या भयेन भर्त्तृकरेषु अवलम्बिता : करा याभिस्तादृश्यो भूत्वा दावाग्निं परितः दावानलस्य समन्ततो भ्रमन्ति। पलायनवनेऽप्यग्न्युत्पत्तेः। उत्प्रेक्षते-पुनरप्युद्यन् जायमानो विवाहो यासां ता इवेति। तत्रापि भर्तृकरं गृहीत्वाग्नेः परितो भ्रमणात्। कीदृशोः ? दर्भाङ्कुरैः क्षताम्यः कोमलाङ्गुलिभ्यो गलद्भक्तं येषां तैः पादैः सदर्भाः स्थलीररण्यप्रदेशान् क्रामन्त्यो लङ्घयन्त्यः पातितो यावको लाक्षारसो येषु तथाभूतैरिवेत्युत्प्रेक्षा विवाहोत्प्रेक्षा[११५] समर्थनाय। एवं सदर्भा इत्यपि। तथा गलता वाष्पाम्बुनाश्रुजलेन धौतं प्रक्षालितमाननं यासां ताः। विवाहेऽपि धूमादश्रुनिर्गमः। अत्र प्रधानभूते राजविषयकरतिभावे द्वावपि करुणशृङ्गारावङ्गमिति न विरोधः ॥७५ ॥

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर।
एवमाशाहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥

एहीति। एहीत्यादि प्रकारेणाशारूपग्रहग्रस्तैरर्थिभिर्याचकैर्धनिनः क्रीडन्तीत्यर्थः। क्रिडन्तीति रीत्या सर्वेषां प्रधानीभूतक्रीडान्वयादागमनगमनाद्यैर्न विरोधः ॥७६ ॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोऽंशुकान्तं
गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥

क्षिप्त इति। अमरुककवेरिदं पद्यम्। स त्रिपुरदाहकालीनः शुम्भुसम्बन्धी शराग्निर्वाणाग्निर्वो युष्माकं दुरितं पापं दहत्वित्यन्वयः। स कः। यः आद्रापराधोऽव्यवहितापराधः कामीव हस्तयोरवलग्नः सन् सास्रे भयात्कोपाच्चाश्रुसहिते नेत्रोत्पले यासां तथाभूताभिस्त्रिपुरयुवतिभिः क्षिप्तः प्रक्षिप्तः। तथा प्रसभं बलादंशुकान्तं वस्त्रप्रान्तमाददानो गृहणन्नभिहतस्ताडितः। तथा केशेषु गृहणन्नपास्तः। कामिनापि चुम्बनाय केशग्रहात्। चरणयोर्निपतितः सम्भ्रमेण भयेनादरेण च नेक्षितः। तथालिङ्गन्नवधूतः। क्षिप्त इत्यर्थः। अत्र यथा पूर्वं कामुकः करालम्बनादिकमकार्षीत्तथा[११६] सम्प्रति शराग्निरित्युपमानतया शृङ्गारपरिपोषितेन[११७] करुणेन भगवतः शम्भोः प्रभावातिशय एव प्रकर्षमानीयत इत्यनवद्यम् ॥७७ ॥

॥ इति श्री मत्पदवाक्य प्रमाणाभिज्ञतत्सदुपाख्य
श्रीरामभट्टात्मजवैद्यनाथसूरिविरचिता-यामुदाहरणचन्द्रिकायां सप्तमः[११८] ॥

---

११५. 'विवाहोत्प्रेक्षा' 'ख' मातृकायां नास्ति।

११६. 'नादिकम्' स्थाने वादिकम् 'ख' मातृकायाम्।

११७. 'परि' 'ख' मातृकायाम् इत्यधिकम्।

११८. 'उल्लासः' इति पदं 'क' एवं 'ख' मातृकायामधिकम्।

श्रीः[१]

(अथ अष्टम् उल्लासः)[२]

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला॥

अपसारयेति। रे[३]! आलिघनसारं कर्पूरं अपसारय दूरीकुरु हारम्[४]। दूर एव कुरु- अलमलमिति वीप्सया उद्वेगातिशयः सूच्यः॥१॥

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमो ज्वलति विधुतः पावक इव।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति न चाम्बा भवती॥

मनोराग इति। लवङ्गिकां प्रति मालत्या इयमुक्तिः। माधवविषयो मनसो राग आसक्तिः। अविरतं निरन्तरं विषमिव तीव्रं यथा स्यादेवं विसर्पति विविधप्रकारेण सर्वाङ्गीणं सञ्चरति। अत एव प्रमाथी क्षोभकारी निर्धूमो विधुतः संधुक्षितः पावक इव ज्वलति। ततश्च गरीयानुत्कर्षकाष्ठां गतो ज्वर इव प्रत्यङ्गं हिनस्ति पीडयतीति विभिन्नधर्मा मालोपमा। अतो हेतोरितो मनोरागान्मां त्रातुं तातादिकं न प्रभवति न शक्नोतीत्यर्थः। निर्धूममिति पाठे विधुत इति क्रियाया विशेषणम्॥२॥

चित्ते विघटते न त्रुट्यति सा गुणेषु शय्यासु लुठति विसर्पति दिङ्मुखेषु।
वचने वर्त्तते प्रवर्त्तते काव्यबन्धे ध्याने न त्रुट्यति क्षणं तरुणि प्रगल्भेति संस्कृतम्॥

चित्त इति। विरहिणः उक्तिः। नखोत्कृतं चर्म चिहुट्टेति प्रसिद्धम्। तद्वदाचरतीत्यर्थ इत्यन्ये। गाढं लग्नेत्यपरे। गुणेषु न त्रुट्यति पर्यवसानं न प्राप्नोतीत्यर्थः। न हीयत इति केचित्। शय्यासु लुठनं दिक्षु विसर्पणं भावनया स्वस्योद्भ्रमात् विसट्टदीतिपाठे। विकसति प्रकाशत इत्यर्थः। वचने वर्त्तते, सैव वचनविषयीभवति। काव्यबन्धेऽपि सैव विषयीभवति। तथा ध्याने न त्रुट्यति सदा तद्विषयीभवतीत्यर्थः। वचने वर्त्तते उपदेशं गृह्णाति। उपदिष्टे च काव्यबन्धे प्रवर्तते इति महेशः॥३॥

मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम्।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः॥

---

१. 'श्रीः' स्थाने श्री गणेशाय नमः 'क' मातृकायां एवं श्रीः 'ख' मातृकायां नास्ति।
२. मया योजितम्।
३. 'लवङ्गिका प्रतिमात्या इयं उक्तिः' 'क' एवं 'ख' मातृकायामधिकम्।
४. हारम्। दूर एवं कुरु 'ख' मातृकायां नास्ति।

मित्र इति। सन्ध्याकालीनचक्रवाकचेष्टावर्णनम्। मित्रे सूर्ये सुहृदि च क्वाप्यगम्यवार्ताके देशे गते सति।[५] सरोरुहवने बद्धानने मुद्रिते अवचने च ताम्यति ग्लायति शोकात्ताप्यमाने च। भ्रमरेषु क्रन्दत्सु तारस्वरं शब्दायमानेषु रुदत्सु च। दयिताया आसन्नं युक्तं सारसपक्षिणं पुरोऽग्रे वीक्ष्य वियोगिना चक्रादकेन चक्रवाकेन विसलता। नास्वादिता नोज्झिता[६], केवलं निर्गच्छतो जीवस्यार्गलेव वक्त्रे निहितेत्यन्वयः। वियुक्तदर्शनवत्संयुक्तदर्शनस्यापि विरहोद्दीपकत्वादुभयप्रदर्शनम्। अत्र विप्रलम्भे जीवनिरोधोत्प्रेक्षा अनुपकारिका॥४॥

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम्॥

स्वर्गेति। वरवर्णिनी उत्तमाङ्गनैव। अनेनैव मानुषेणैव देहेन स्वर्ग प्राप्तिः (सा च) न तु दिव्यदेहेन स्थानविशेषप्राप्तिः। अस्यास्ततोऽप्युत्कृष्टत्वात्। तदाह-अस्या रदच्छदस्याधरस्य रसः सुधां न्यक्करोतितरां अतिशयेन तिरस्करोतीति॥५॥

अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तितानि॥

अनङ्गेति। अनङ्गस्य रङ्गो। नृत्यस्थानं तत्सदृशमानताङ्ग्यास्तदनुभवैकगोचरमङ्गं भङ्गीभिर्विलासवलनैस्तथाङगीकृतम्। स्वयमादरेण गृहीतम्। यथा अङ्गीकारप्रकारेणैता-भङ्ग्योः यूनां स्वान्तानि चित्तानि शान्तान्यपरविषयचिन्तितानि येषां तथाभूतानि सहसा कुर्वन्तीत्यन्वयः॥६॥

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम्॥

परिम्लानमिति। इदं विसिन्याः कमलिन्याः पत्राणां शयनं तल्पः कृशाङ्ग्याः सन्तापं वियोगतापं वदति कथयतीत्यन्वयः। कीदृशम्? पीनयोः स्तनजघनयोः सङ्गादुभयतः तदुभयस्थानयोः परिम्लानम्। न्युब्जकायशयनात्। तनोः कृशस्य मध्यस्य परिमिलनं संघर्षमप्राप्यान्तर्मध्यभागे हरितवर्णम्। तथा श्लथा निर्बलतया शिथिला या भुजलता तस्याः क्षेपैर्वलनैश्च व्यस्तोऽन्यथाभूतो न्यासो रचना यस्य तथाभूतम्। इच्छापूर्वकत्वतदभावाभ्यां क्षेपवलनयोर्भेदः। श्लथेनाक्षेपणाभिघातेन यानि वलनान्युद्वर्तनानीत्यर्थ इति केचित्॥७॥

मन्थायस्तार्णवाम्भः प्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्॥

---

५. 'सरोरुह' स्थाने सरोवर 'ख' मातृकायाम्।
६. 'त्यक्ता' 'ख' मातृकायामधिकम्।

मन्थेति । रणस्थाने दुन्दुभिध्वनिं श्रुत्वा भीमसेनस्यायं प्रश्नः । अयं शब्दायमानो दुन्दुभिः केन ताडित इत्यन्वयः । कीदृशः मन्थो मन्थनं तेनायस्तमान्दोलितं यदर्णवस्याम्भस्तेन प्लुतं व्याप्तं कुहरं गुहा यस्य तादृशस्य चलतो मन्दरस्य गिरेर्ध्वानवद्धीरः । प्लुतीति पाठेऽम्भसः प्लुत्या कुहरेषु चलन्यो मन्दरध्वान इत्यर्थः । कोणो वादनदण्डः तदाभिघातेषु[७] सत्सु यद्वा भेरीशतसहस्राणि ढक्काशतशतानि च । एकदा यत्र हन्यन्ते कोणाघातः स उच्यते उच्यते इति परिभाषितकोणाघातेषु सत्सु । तदन्तर्गतोऽयं गर्जन्त्याः प्रलयकालीनाया घनघटाया अन्योन्यसंघट्टवच्चण्डः दारुण इत्यर्थः । कृष्णाया द्रौपद्याः क्रोधस्याग्रे वर्तमानो दूतः तत्प्रयुक्तत्वात् । कुरुकुलस्य निधनं क्षयस्तदर्थमुत्पातरूपो निर्घातसहितो वातः । मेघानां वातानां चान्योन्यसंघट्टजश्चण्डध्वनिर्निर्घातः । तथा अस्मत्सिंहनादप्रतिरसितस्य प्रतिध्वनेः सखासदृश इत्यर्थः ॥८ ॥

प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात-
त्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम् ।
कुर्वत्काकुत्स्थवीर्यस्तुतिमिव मरुतां कंधरारन्ध्रभाजां
भांकारैर्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम् ॥

प्रौढेति । वीरचरिते वैतालिकस्येयमुक्तिः । एतद्भीमं कुम्भकर्णस्योत्तमाङ्गं शिरो वियत आकाशान्निपततीत्यर्थः[८] । कीदृशम् ? कन्धरा रन्ध्रभाजां तत्प्रविष्टानां मरुतां झांकारैस्तादृशशब्दैः काकुत्स्थवीर्यस्य श्रीरामचन्द्रपराक्रमस्य स्तुतिमिव कुर्वत्कुर्वाणम् । तथा प्रौढस्य महावेगप्रयुक्तस्य छेदस्यानुरूपेणोच्छलनस्य रयेण वेगेन भवन्यः[९] सैंहिकेयस्य राहोरुपघातत्रासस्तेनाकृष्टैरश्वैस्तिर्यग्वलितो वक्रतया संस्थापितो रविरथो येन तथाभूतेनारुणेनेक्ष्यमाणं दृश्यमानमित्यर्थः ॥९ ॥

॥ इति[१०] श्रीमत्पदरामभट्टात्मजवैद्यनाथ कृत चन्द्रिकायाम् अष्टम् उल्लासः ॥

---

७. तदाघाते 'स्थाने' तदभिघाते 'ख' मातृकायाम् ।

८. ''पततीत्यर्थः'' 'स्थाने' 'पततीत्यन्वयः' 'ख' मातृकायाम् ।

९. 'भवनम्' 'स्थाने' मिलनषः 'ख' मातृकायाम् ।

१०. इति श्री मत्पदवाक्य प्रमाणाभिज्ञस्तत्सद्रामभट्टात्मजवैद्यनाथकृतायामुदाहरणचन्द्रिकायामष्टमोल्लासः 'इति' 'क' एवं 'ख' मातृकायां पाठः ।

श्री:[१०क]

(अथ नवम उल्लास:)[११क]

नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो
वामानां हितमातनोति हितकृन्नैवाबलानां भवान्।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मन:
सामर्थ्यं भवत: पुरन्दरमतच्छेदं विधातुं कुत:॥

नारीणामिति। नारीणां स्त्रीणामनुकूलमाचरसि चेज्जानासि। ज्ञाताभवसीत्यर्थकमञ्जरीणामनुकूलं नाचरसि[११] इति योजयित्वा कश्चिदाह-कश्चेतनो भूत्वा वामानां प्रतिकूलानां हितमातनोतीति। वामानामित्यस्य कामिनीनामित्यर्थं कल्पयित्वा प्रथम: पुनराह-भवान् अवलानां स्त्रीणां हितकृन्नैव भवतीति। अपरस्तु हितं कृन्ततिच्छिन्नत्तीत्यर्थं परिकल्प्याह-बलाभावेन सिद्ध[१२] आत्मा स्वरूपं यस्य तादृशजनस्य हितकर्तनं किं युक्तमपि तु सति। प्रथमस्तु बलस्य दैत्यस्याभावेन नाशेन प्रसिद्धरुपस्येन्द्रस्येत्यर्थं परिकल्प्य पुनराह-भवत: पुरन्दरस्य मतमिष्टं तस्य छेदं नाशं विधातुं कुत: सामर्थ्यमिति। सामर्थ्ये सति युक्तायुक्तविचारस्तदेव तु भवतो नास्तीति भाव:। अत्र वक्रोक्तिरलङ्कार:॥१॥

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥

अहो इति। अत्र दारुणेत्यस्य काष्ठेनेत्यर्थं परिकल्प्यान्य आह-त्रिगुणेति। सत्त्वादिगुणत्रयंवतीत्यर्थ:। अत्राभङ्गश्लेष इति पूर्वस्याद्भेद:॥२॥

गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिल ललिते सखि नैष्यति सुरभिसमयेऽसौ॥

गुर्विति। हे सखि! गुरुपराधीनतया बत खेदे दूरतरं देशं गन्तुमुद्यतोऽसौ कान्त:। अलिकुलै: कोकिलैश्च ललिते मनोहरे बसन्तसमये नागमिष्यतीति नायिकोक्तं वाक्यं सख्या काक्वा न एष्यति अपि तु एष्यत्येवेत्यन्यथा योज्यत इति काकुवक्रोक्ति:॥३॥

ततोऽरुणपरिस्पन्दमन्दीकृतवपु: शशी।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥

तत इति। अरुणस्य परिस्यन्देन संचारेण उदयेनेति यावत्। मन्दीकृतं निष्प्रभीकृतम्। कामेन परिक्षामाया: कृशाया: कामिन्या गण्डवत्पाण्डुतां दध्रे धारयामासेत्यर्थ:। अत्र

१०क. 'श्री:' स्थाने 'श्री गणेशाय नम:' 'क' मातृकायाम्।

११क. मया योजितम्।

११. 'चेज्जानासी' 'इति' 'ख' मातृकायामधिकम्।

१२. 'सिद्ध' 'स्थाने' प्रसिद्ध 'ख' मातृकायाम्।

स्यन्दमन्दीति गण्डपाण्डु इति च नकारदकारात्मकस्य णकारडकारात्मकस्य चानेकव्यञ्जनस्य सकृदावृत्तेश्छेकानुप्रासः ॥४॥

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।

यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।

यस्येति। यस्य पुंसः सविधे समीपे दयिता नास्ति तस्य तुहिनदीधितिश्चन्द्रो दवदहनः विरहोद्दीपकत्वाद् दावाग्नितुल्यः इत्यर्थः। उत्तरार्द्धे तु दावाग्निश्चन्द्रतुल्य इति विपरीत उद्देश्यविधेयभाव इत्यन्वयमात्रभेदाल्लाटानुप्रासः ॥५॥

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः।

सुधाकरः क्व नु पुनः कलङ्करहितो भवेत्॥

वदनमिति। सत्यमित्यर्धाङ्गीकारे। वरवर्णिन्या उत्तमनायिकायास्तस्या[१३] वदनं सुधाकरश्चन्द्र इति सत्यम्, परन्तु सः कलङ्केन विकलो रहितः पुनः क्व नु भवेत्सम्भवेदतो नैवमित्यध्यारोपापवादः[१४]। पूर्वं सुधाकरपदं विधेयपरं उत्तरन्त्वनुवाद्यपरमिति तात्पर्यभेदः ॥६॥

सितकरकररुचिरविभा विभाकराकार धरणीधर कीर्तिः।

पौरुषकमला कमला सापि तवैवास्ति नान्यस्य॥

सितेति। सप्तमे व्याख्यात ॥७॥

सन्नारीभरणोमायमाराध्य विधुशेखरम्।

सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय॥

सन्नारीति। हे राजन्! सतीं नारीं बिभर्तीति भरणातामुमां यातीति यस्तमुमासहितं विधुशेखरं हरमाराध्य ततस्तदाराधनादेव हेतोस्त्वममायो दम्भशून्यः सन्पृथिवीं जयेत्यन्वयः। कीदृशस्त्वम्? सन्ना अवसादं गता अरिणामिभा यत्र तादृशो रणो यस्य स इत्यर्थः ॥८॥

विना यमेनोनयतासुखादिना विनायमेनो नयता सुखादिना।

महाजनोऽदीयत मानसादरं महाजनोदी यतमानसादरम्॥

विनेति। अयं महाजनो विना पक्षिरूपेण यमेन मानसाच्चित्तादरं शीघ्रं यतमानानां सादमवसादं राति ददाति[१५] यथा तथा अदीयताखण्ड्यतेत्यन्वयः। कीदृशेन? एनोऽपराधं विना नयता स्वस्थानं प्रापयता। असुखादिना प्राणभक्षकेण। सुखादिना ऊनयता न्यूनं कुर्वता। कीदृशो महाजनः। महान्तमजं नुदति यागार्थं हिनस्तीति तथा। महमुत्सवमजन्ति-क्षिपन्ति ये दुर्जनास्तन्नोदी तदपसारक इति वा। अन्ये तु-विना गरुडाख्यपक्षितुल्येन ऊनयता हानिं प्रापयता। सुखादिना सुखभक्षकेणेति व्याचक्रुः ॥९॥

---

१३. 'नायिका' 'स्थाने' वनिता 'ख' मातृकायाम्।

१४. 'दन्ये' स्थाने 'दती' 'ख' मातृकायाम्।

१५. 'ददाति' 'ख' मातृकायां नास्ति।

सत्त्वारम्भरतोऽवश्यमबलम्बिततारवम्।
सर्वदारणमानैषी दवानलसमस्थितः ॥
सत्वारं भरतोऽवश्यमबलं विततारवम्।
सर्वदा रणमानैषीदवानलसमस्थितः ॥

सत्त्वारम्भेति। स तु प्रकृतो राजा आरमरिसमूहं सर्वदा सर्वकालमवश्यं निश्चितं भरतोऽतिशयेन रणं युद्धमानैषीत्प्रापितवानित्यन्वयः। आरं कीदृशम्? अबलं सैन्यशून्यम्। विततः विस्तृतः आरवः शब्दो यस्य तत्। दीपिकाकृतस्तु-द्वयमप्यनैषीदिति क्रियाविशेषणम्। तेन सैन्यमनपेक्ष्यैव सिंहनादं विस्तार्य समरसंचारं चकारेति पर्यवस्यतीत्याहुः। कीदृशः? अलसं मन्दं अवान् अगच्छन् शीघ्रं गच्छन्नित्यर्थः। अस्थि तस्यति उपक्षिपतीत्यस्थितः। सान्तत्वेप्यधातोरिति निषेधात् दीर्घत्वाभावः। यद्वा ए विष्णौ स्थितस्तत्पर इत्यर्थः। पुनः कीदृश इत्यपेक्षायामाद्यः श्लोकः। सत्त्वगुणेन य आरम्भस्तत्र रतः। पुनः कीदृशमारमवश्यम् अस्वाधीनम् अवलम्बितानि वस्त्रतया स्वीकृतानि तारवाणि तरुसम्बन्धीवल्कलानि येन तत्। तारवं तरुसमूहमिति केचित्। तरुधर्मः इत्यन्ये। सर्वेषां दारणो यो मानस्तदैषी तदिच्छाशीलो राजा। तथा दवानलेन समस्तुल्यः स्थितः। तेन समं स्थितं स्थितिरस्येति वा। शत्रुसन्तापकतया दीप्ततमत्वेन च दावाग्निसाम्यम् ॥१०॥

अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम्।
या च मातेव भजते प्रणते मानवे दयाम्॥

अनन्तेति। अनन्तेन महिम्ना व्याप्तं विश्वं यया तादृशीं दुर्गां वेधाः ब्रह्मापि न वेद तत्त्वतो न जानाति। या च प्रणते मानवे मनुष्ये दयां भजत इत्यन्वयः ॥११॥

यदानतोऽयदानतो न यात्ययं नयात्ययम्।
शिवे हितां शिवेहितां स्मरामि तां स्मरामिताम्॥

यदानत इति। यस्यां दुर्गायामानतोऽयं जनाः विश्वम्[१६]। नयस्यात्ययम्। नीतिनाशं न याति न प्राप्नोति। कुतः? अयदानतः। अयस्य शुभावहविधेस्तयैव दानतः दानात्। यद्वा अयस्य दानतः खण्डनाद्यो नयात्यय इति योज्यम्। तां शिवे कल्याणनिमित्तं स्मरामि। कीदृशीम्? शिवेन शम्भुना ईहितामर्थिताम्[१७]। हितामनुकूलाम्। शिवे कल्याणे हितमिति वा। तया स्मरेण कन्दर्पेणामितामपरिच्छिन्नामित्यर्थः ॥१२॥

सरस्वति प्रसादं मे स्थितिं चित्तसरस्वति।
सरस्वति कुरु क्षेत्र कुरुक्षेत्रसरस्वति॥

सरस्वतीति। हे सरस्वति! वाग्देवि! स्वस्ति सुष्ठु अतिशयेन प्रसादं सर गच्छ। प्रसन्ना भवेत्यर्थः। मे मम चित्तरूपे सरस्वति समुद्रे, स्थितिं कुरु। सरस्वतीशब्दस्य नदीसामान्येऽपि

१६. 'विश्वम्' 'ख' मातृकायां नास्ति।
१७. 'अर्थितां हिताम्' 'ख' मातृकायां नास्ति।

शक्ततया श्लेषेण तस्याः समुद्रे स्थित्यभिधानम्। कथम्भूते। क्षेत्रं शरीरमेव कुरुक्षेत्रं तत्र सरस्वति सरस्वत्याख्यनदीरूप इत्यर्थः ॥१३॥

ससार साकं दर्पेण कंदर्पेण ससारसा।
शरन्नवाना विभ्राणा नाविभ्राणा शरं नवा॥

ससारेति। शरत् ऋतुः कंदर्पेण साकं[१८] दर्पेण गर्वेण ससार आजगाम। कीदृशी? सारसं पद्मं सारसः पक्षिविशेषो वा तत्सहिता। नवानि अनांसि शकटानि यस्यां सा नवानाः शरं काण्डं विभ्राणा पोषयन्ती परिपाकं प्रापयन्तीत्यर्थः। शरं काशमित्यन्ये। न विद्यते वीनां पक्षिणां भ्राणः शब्दो यस्यां सा अविभ्राणा। एवंभूता न पक्षिशब्दसहितेत्यर्थः। नवा नूतना ॥१४॥

मधुपराजिपराजितमानिनीजनमनः सुमनः सुरभिश्रियम्।
अमृत वारितवारिजविप्लवं स्फुटितताम्रतताम्रवणं जगत्॥

मधुपेति। जगत्कर्तृश्रियं शोभां अमृताधारयत्। कीदृशम्? मधुपानां राज्या भ्रमरपङ्क्त्या पराजितानि धैर्याच्च्यावितानि मानिनीजनमनांसि याभिस्तादृशीभिः सुमनोभिः पुष्पैः सुरभि। वारितो निवारितः वारिजानां कमलानां विप्लवो नाशो यत्र तत्। स्फुटितानि विकसितानि ताम्राणि आरक्तानि ततानि विस्तीर्णानि अम्राणां वनानि यत्र तत्। अन्ये तु, एवम्भूताः सुमनसो यत्र तादृशस्य सुरभेर्वसन्तस्य श्रियमित्येकपदतया व्याचक्षते। तादृशसुमनसां सुरभि श्रियं सौरभसम्पदमिति तु न युक्तम्। सुरभिपदस्य सौरभविशिष्टे द्रव्य, एव काव्ये प्रयोग-दर्शनात्। न तु सौरभगुणे इति दीपिकायाम् ॥१५॥

अलंकारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गी भृङ्गी वसु च वृष एको बहुवयाः।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी॥

अलंकार इति। विधौ चन्द्र एव विधौ दैवे वक्रे कुटिल एव वक्रे प्रतिकूले मूर्ध्नि मस्तके स्थितवति सति सर्वामरगुरोः सर्वदेवश्रेष्ठस्य स्थाणोर्महादेवस्यापीयमवस्था भवति। अमी मानुषा वयं पुनः के। कस्यां गणनायामित्यर्थः। अवस्थामाह-अलंकार इति। शङ्काकरं भयजनकं नरकपालमेवालंकारः। विशीर्णाङ्गो। भृङ्गी परिजनः एकः सोऽपि बहु वयो यस्य तथा भूतोऽति जीर्णो वृषः। वसु धनमिति अत्र विधावित्युवर्णेवर्णयोः श्लेषः ॥१६॥

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम्॥

पृथ्विति। पदश्लेषोदाहरणं सप्तमे व्याख्यातम् ॥१७॥

भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीतेहितप्राप्तये।

---

१८. 'साकं दर्पेण' 'ख' मातृकायां बारं द्वयम्।

लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥

भक्तीति। हरेर्नेत्रे तनुर्वा युष्माकं भवस्य संसारस्यार्तेः पीडायाः शमनं कुरुतामित्यन्वयः। किम्भूते नेत्रे। भक्तिप्रह्वाः भक्तिनम्रास्तत्कर्मके विलोकने प्रणयो ययोस्ते। नीलोत्पलस्पर्धायुते।[१९] समाधिनिरतैर्हितप्राप्तये ध्यानेनालोकनं ययोस्तत्तां नीते प्रापिते। लावण्यस्य महानिधिरूपे। लक्ष्मीदृशोः रसिकतां तन्वती कुर्वाणे। तनुपक्षे तु- भक्तिप्रह्वैर्यद्विलोकनं तत्प्रणयिनी। नीलोत्पलस्पर्धाशीला। ताच्छील्ययोर्णिनिः। तनोर्नीलत्वात्स्पर्द्धा। ईहितस्येष्टस्य प्राप्तये ध्यानालोकनतां नीताः महानिधिरिति च्छेदः। ढ्रलोपः इति दीर्घः। कुरुतामित्यात्मनेपदे लोडेकवचनम्। नेत्रपक्षे परस्मैपदे तद्द्विवचनमिति। सोऽयं नपुंसकस्त्रीलिङ्गयोर्द्विवचनैकवचनयोश्च श्लेषः ॥१८॥

महदे सुरसंधं मे तमव समासङ्गमागमाहरणे।
हर बहुसरणं तं चित्तमोहमवसर उमे सहसा ॥

महदे इति। संस्कृतपक्षे- हे उमे! गौरि! मम आगमाहरणे विद्योपार्जने तं समासङ्गमव रक्ष। अवसरे तं चित्तमोहं सहसा हर। आगमहरणे कीदृशे? महदे उत्सवदायके। सम्बोधनविशेषणं वैतत्। कीदृशं समासङ्गम्? सुरैः देवैः सन्धा सन्धानं मिलनं यस्मात्तादृशम्। कीदृशं चित्तमोहं बहु अनेकधा सरणं प्रसरणं यस्य तम्। बहु सरणं संसारो यस्मादिति वार्थः। प्राकृतपक्षे तु-

''मह्यं देहि रसं धर्मे तमोवशामाशां गमागमाद्धर नः।
हरवधु शरणं त्वं चित्तमोहोऽपसरतु मे सहस'' इति संस्कृतम्।

रसं[२०] प्रीतिम्। तमोवशाम्। तमोगुणायत्ताम् गमागमात्संसारात्। शरणं त्वं भवसीति शेषः। अयं संस्कृतप्राकृतरूपभाषाश्लेषः ॥१९॥

अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥

अयमिति। सामर्थ्यं कृन्तति करोतीति च सामर्थ्यकृत्। वक्ष्यतीति। हृदि धारयिष्यति। ज्ञेषु बुधेषु कथयिष्यतीति वहिवच्योर्लृटि प्रकृतिश्लेषः। तथा कृदिति कृन्ततिकरोत्योः क्विपि सः ॥२०॥

रजनिरमणमौलेः पादपद्मावलोक-
क्षणसमयपराप्तापूर्वसंपत्सहस्रम्।
प्रमथनिवहमध्ये जातुचित्त्वत्प्रसादा-
दहमुचितरुचिः स्यान्नन्दिता सा तथा मे ॥

रजनीति। रजनिरमणश्चन्द्रो मौलौ यस्य तस्य हरस्य पादपद्मावलोकनमेव क्षण

---

१९. 'यमादि' स्थाने 'समाधि' 'ख' मातृकायाम्।
२०. 'रसं' स्थाने 'सर' 'क' मातृकायाम्।

उत्सवः तत्समये परासं प्राप्तमपूर्वं सम्पत्सहस्रं यत्र तद्यथा स्यात्तथा अहं जातुचित्कदाचित् प्रमथनिवहमध्ये प्रमथाख्यगणमध्ये उचिता रुचिः प्रीतिर्यस्य उचितारुचिर्दीप्तिवा यस्य तादृशो नन्दिता नन्दकः स्यामित्याशंसा। तथा सति सा नन्दिता[२१] नन्दिनो गणविशेषस्य भावो मे मम स्यादित्यर्थः। अत्र स्यां स्यादित्युत्तमप्रथमपुरुषयोर्नन्दितेति तृच्तलोः प्रत्यययोः श्लेषः ॥२१॥

सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।
नयोपकारसांमुख्यमायासि तनुवर्तनम्॥

सर्वस्वमिति। हे हर! शम्भो! त्वं सर्वस्य सर्वस्वम्। यतो भवस्य संसारस्य च्छेदे तत्परः। नीत्युपकारयोः साम्मुख्यमानुकूल्यमायासि आगच्छसि। कीदृशं साम्मुख्यम्? तनोः शरीरस्य वर्तनं स्थितिर्येन तादृशम्। यद्वा नयोपकारयोः साम्मुख्यं यत्र तादृशं तनुवर्तनं शरीरवृत्तिमायासि[२२]। सांमुख्यं तनुवर्तनं चायासीति वार्थः[२३]। पक्षे चौरं प्रतीयमुक्तिः। त्वं सर्वस्य सर्वस्वं हर अपहर छेदनतत्परो भव। उपकारसाम्मुख्यं नयापसारय[२४]। आयासि कष्टशालि वर्तनं जीवनं तनु विस्तारयेति। अन्ये तु-सर्वस्वादिकं हृत्वा तथा तपश्चर्यादिकष्टं कारय येन मुक्तिः स्यादिति। यस्यानुग्रहमिच्छामिति रीत्या परमेश्वरं प्रत्येवेयमुक्तिरित्याहुः।

'अत्र हरेत्यादिसुप्तिङ् विभक्त्योः श्लेषः' ॥२२॥

योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते॥

योऽसकृदिति। स विबुधेन्द्रः पण्डितश्रेष्ठो राजा राजते। योऽसकृदनेकवारं परगोत्राणां शत्रुवंशानां पक्षस्य सहायवर्गस्य च्छेदे क्षणेनैव क्षमः समर्थः। छेदरूपे क्षणे उत्सव इति वा। शतकोटीर्ददातीति तथा तत्तां विभ्रद्धारयन्नित्यर्थः। इन्द्रपक्षे तु-विबुधेन्द्रो देवराजः। परगोत्राणां श्रेष्ठगिरीणां पक्षच्छेदः पतत्रच्छेदः शतकोटिना। वज्रेण द्यति खण्डयतीति तथा तत्तामित्यर्थः। अयं चाभङ्गश्लेषः ॥२३॥

स्वयं च पल्लवाताम्रभास्वत्करविराजिनी।
प्रभातसंध्येवास्वापफललुब्धे हितप्रदा॥

स्वयं चेति। न केवलं स्वामिसापेक्षतयैव फलप्रदा गौरी। किन्तु स्वयं च स्वयमपि अस्वापे दुष्प्रापे फले लुब्धानामिष्टप्रदेत्यर्थः। केव। प्रभातसन्ध्येव।[२५] पल्लवाताम्रौ नवपल्लवारुणौ भास्वन्तौ कान्तियुतौ करौ हस्तौ ताभ्यां विराजिता शोभिता। सन्ध्या तु तादृशैर्भास्वतः सूर्यस्य करैः किरणैर्विराजिता। तथा अस्वापस्तदानीं निद्राभावस्तत्फलं लक्ष्मीलाभस्तत्र लुब्धे जने हितप्रदेति ॥२४॥

---

२१. 'नन्दिता' 'क' मातृकायां नास्ति।
२२. 'शरीरं वृत्ति मायासि। सामुख्यं तनु वर्तनं' इति 'ख' मातृकायां नास्ति।
२३. 'वंकार' स्थाने 'च' कार 'क' मातृकायाम्।
२४. 'अपसारय' 'ख' मातृकायामधिकम्।
२५. 'कीदृशी' इति पदं 'क' एवं 'ख' मातृकायां नास्ति।

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।

अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥

स्तोकेनेति। उन्नतिरुच्चत्वमभिमानश्चाधोगतिरधोगमनं पादपतनादि च। तुला सुवर्णादि गुरुत्वपरिच्छेदकपदार्थः। तस्याः कोटिः शिरः शलाकेति चण्डीदासः। दण्ड इत्यन्ये। अयं च शब्दपरावृत्तिसहत्वादर्थश्लेषः कमलमिवेति। कचति[२६] दीप्यते। सकलेति। कलकलः कोलाहलः। तत्सहितं पुरम्। बिम्बं[२७] तु सकलाः कला यत्र तादृशम्॥२५॥

त्वमेव देव पातालमाशानां त्वं निबन्धनम्।

त्वं चामरमरुद्भूमिरेको लोकत्रयायसे॥

त्वमेवेति। हे देव! विष्णो त्वमेव पातालम्। आशानां दिशां निबन्धनं नियमनस्थानम्। अमराणां मरुद्रूपाभूमिः स्थितिहेतुः। देवानां वायोरुपर्येव स्थितेः लोकत्रयात्मको भुवनत्रयात्मक इत्यर्थः। राजपक्षे-अलं पाता रक्षिता। आशानां मनोरथानां निबन्धनं कारणम्। चामरसम्बन्धिपवनभाजनम्। पालकवदान्यभोक्तृलक्षणजनत्रयात्मक इति॥२६॥

अबिन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुका। इत्यादि।

अबिन्द्विति। अप्सु प्रतिबिम्बितः इन्दुरबिन्दुस्तद्वत्सुन्दरी। गलन्तो लावण्यस्य बिन्दुका यस्या इत्युत्प्रेक्षागर्भम्। अबिन्दुर्बिन्दुशून्या गलद्बिन्दुका चेति विरोधः। नाल्पः कविरिति अल्पः क्षुद्रः श्लोको यस्य[२८] श्लोको यशसि पद्ये चेति कोशः। अनुरागेति। अनुरागः स्नेहो लोहित्यञ्चेति[२९]। पुरः सरोऽग्रगामी सम्मुखश्च समागमो मिलनम्। स्त्री पुरुषसङ्गमश्च॥२७॥

आदाय चापमचलं कृत्वाहीनं गुणं विषमदृष्टिः।

यश्चित्रमच्युतशरो लक्ष्यम भाङ्क्षीन्नमस्तस्मै॥

आदायेति। यो! विषमदृष्टिस्त्रिलोचनोऽचलं हिमाद्रिस्वरूपं धनुरादाय अहीनं सर्पराजं गुणं मौर्वीं कृत्वा अच्युतो नारायणः शरो यस्य तादृशः। लक्ष्यं त्रिपुररुपं अभाङ्क्षीत्। भञ्जितवान् तस्मै नम इति मुख्योऽर्थः। अचलं चलनशून्यं धनुः हीनो जीर्णः। अथवा अहीनो धनुर्दण्डादन्यूनपरिमाणो गुणः। विषमा लक्ष्यभङ्गश्चेति विरोधाभासः॥२८॥

मारारिशक्ररामेभमुखैरासाररंहसा।

साराब्धस्तवा नित्यं तदार्तिहरणक्षमा॥

मारेति। उमा मे शं कल्याणं दिश्याद्दद्यात् इत्यन्वयः। कीदृशी? मारारिः शम्भुः। रामो बलभद्रः इभमुखो गणेशः एतैः असाररंहसा धारासम्पाततुल्यवेगेन सार उत्कृष्ट आरब्धः स्तवः स्तोत्रं यस्याः सा। अत एव तेषां नित्यमार्तिहरणे क्षमा। आनतानां जनानां माता। संघट्टेन लोकविमर्देन श्रीः सम्पत्तिर्येषां तादृशानां महिषासुरप्रभृतीनां बाधितः सम्भ्रमः

---

२६. 'कचति' स्थाने 'कथति' 'ख' मातृकायाम्।

२७. 'विम्बं तु 'स्थाने' विरतु' 'ख' मातृकायाम्।

२८. 'यस्य श्लोको' 'ख' मातृकायां नास्ति।

२९. 'चेति' स्थाने 'च' 'ख' मातृकायाम्।

संरम्भो यया। यद्वा श्रियां संघट्टः सम्मेलनस्थानम्। बाधितः[३०] सम्भ्रम उद्वेगो यस्या इत्यर्थः। मान्या रामाणां सीमा अवधिः। आदिमा पुरातनी। अद्रिजेति[३१] वा पाठः। अयं खड्गबन्धः ॥२९॥

सरलाबहुलारम्भतरलालिबलारवा।
वारला बहुलामन्दकरला बहुलामला॥

सरलेति। प्रक्रान्तवर्णना शरदत्र विशेष्यते। सरला[३२] मेघादिकौटिल्यरहिता। बहुलैरारम्भैस्तरलानामलिवलानां भ्रमरसैन्यानाम् आरवः कोलाहलो यस्यां सा। वारला हंस्यो बहुला यस्यां ताभिर्वा बहुला। अमन्दा उद्युक्ताः करं लान्ति गृह्णन्तीति करला राजानो यस्यां सा। अबहुले शुक्लपक्षेऽमला। तद्वन्निर्मला वा। अयं मुरजबन्धः ॥३०॥

भासते प्रतिभासार, रसाभाताहताविभा।
भावितात्मा शुभा वादे देवाभा बत ते सभा॥

भासत इति। हे प्रतिभासार! प्रज्ञया श्रेष्ठ राजन्! ते तव सभा भासते। कीदृशी रसेनाभाता शोभिता रसिकेत्यर्थः। हता[३३] प्रतिहता अविभाऽदीप्तिर्यस्याः सा। भावितश्चिन्तित आत्मा परमात्मा यया सा। वादे शुभा निपुणा अत एव देवाभा देवतुल्या। बत हर्षे विस्मये वा। अयं पद्मबन्धः ॥३१॥

रसासार रसा सारसायताक्षक्षतायसा।
सातावात तवातासा रक्षतस्त्वस्त्वतक्षर॥

रसासारेति। हे रसासार! पृथिव्यां श्रेष्ठ राजन्! रक्षतस्तव रसा तु, पृथिवी पुनः क्षतायान् खण्डितशुभावहविधीन्। दुर्जनान् स्यति नाशयतीति क्षतायासा। षोऽन्तकर्मणि इति धात्वनुसारात्। तथा अतासा न विद्यते तास उपक्षयो अस्तु। तसु उपक्षये धातुः। सा रसायताक्षपमायत नेत्रेति सम्बोध्य विशेषणम्। तथा सातं नाशितमवातमज्ञानं येन तादृश। वातेर्गत्यर्थतया ज्ञानार्थत्वात्। एवं तक्षं तनूकरणं राति ददातीति तक्षरः। अतादृश। तक्ष तनूकरणे। अयं सर्वतोभद्रबन्धः ॥३२॥

अरिवधदेहशरीरः सहसारथिसूततुरगपादातः।
भाति सदानत्यागः स्थिरतायामवनितलतिलकः॥

अरिबधेति। अवनितलस्य तिलको भूषणं राजा। सदानत्या सतामानत्या। सदा अनत्या क्षुद्रेष्वनम्रतया वा भातीत्यन्वयः। कीदृशः? अरिवधदा ईहा चेष्टा येषां तान् शरिणः शरयुक्तान् योधान् ईरयति प्रेरयतीति तथा। अरिवधदेहं शरीरमस्येति व्याख्यानमयुक्तम्। तथा सति

---

३०. 'वाधितः' स्थाने 'वाविधः' 'ख' मातृकायाम्।
३१. 'अद्रिजेति' स्थाने 'अद्रितीति' 'ख' मातृकायाम्।
३२. 'सरला स्थाने' सरत्वा 'क' मातृकायाम्।
३३. 'हता प्रतिहता' स्थाने अहता अप्रतिहता 'ख' मातृकायाम्।

शरीरपदस्य परिवृत्तिसहत्वेन देहपदस्य तदसहत्वेन चोभयालंकारापत्त्या शब्दमात्रालंकारोदाहरणत्वानुपपत्तेः प्रसङ्गात्। सहसा शीघ्रं रथिभिः रथारूढैः सुष्ठैः उतं प्रोतम् सम्बद्धमिति यावत्। तुरगपादातं यस्य सः। स्थिरतायामगः पर्वतः। अत्र देहशरीर इत्यादिषु पुनरुक्तवदाभासोऽलंकारः ॥३३॥

चकासत्यङ्गनारामाः कौतुकानन्दहेतवः।
तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः॥

चकासतीति। शोभनमनसस्तस्य राज्ञः पार्श्ववर्त्तिनो विबुधाः पण्डिताश्चकासति शोभन्ते। कीदृशाः ? अङ्गनासु रमन्ते इत्यङ्गनारामाः विरहशून्या इत्यर्थः। अङ्गने[३४] अजिरे आरामाः क्रीडावनानि येषामिति वा। कौतुकमुत्सवविशेषस्तद्रुपानन्ददाः। कौतुकेन विवाहसूत्रेण य आनन्दस्तद्धेतव इति वा ॥३४॥

तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।
तेजो धाम महः पृथुमनसामिन्द्रो हरिर्जिष्णुः॥

तनुवपुरिति। असौ हरिः सिंहोऽजघन्यः सर्वसिंहेषु श्रेष्ठभूत इत्यर्थः। कीदृशः ? तनु कृशं वपुर्यस्य सः। करिकुञ्जराणां राजश्रेष्ठानां रुधिरेण रक्ता लोहिताः खरा तीक्ष्णा नखरा यस्य तादृशः। तेजसो धाम स्थानम्। महसा बलेन पृथुमनसां विपुलान्तः करणानामिन्द्रः श्रेष्ठः जिष्णुर्जयशीलः। अत्र तनुवपुरित्यादौ पुनरुक्तवदाभासः स्पष्ट इति शिवम् ॥३५॥

॥ इति श्री वैद्यनाथसूरिविरचितयामुदाहरणचन्द्रिकायां नवमोल्लासः[३५] ॥

---

३४. अङ्गने 'स्थाने' अनगिने 'क' मातृकायाम्।

३५. इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सद्रामभट्टात्मज वैद्यनाथ सूरि रचितायामुदाहरणचन्द्रिकायां नवम उल्लासः॥ इति 'क' एवं 'ख' मातृकायामधिकम्।

श्रीः[१]

(अथ दशमोल्लासः)[२]

लीलाकलितनीलाभमनोहरकलेवरम्।
राधानयनसर्वस्वमाश्रये यदुनन्दनम्॥
स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा॥

स्वप्नेऽपीति। प्रभावस्य प्रभवमुत्पत्तिहेतुं त्वामित्यन्वयः। कान्तं कमनीयं यथेत्यनन्तरं न मुञ्चतीत्यनुषङ्गः॥१॥

चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति।
सरसिजमिदमाननं च तस्याः सममिति चेतसि सम्मदं विधत्ते॥

चकितेति। चकितस्त्रस्तः। एवम्भूतयास्तस्याः प्रक्रान्तनायिकायाः क्रुधि क्रोधे सति तरुणारुणवत्तारा उद्भटा हारिणी मनोहरणशीला कान्तिर्यस्यैवम्भूतमिदमाननं सरसिजं च सममिति संमदं हर्षं नायकश्चेतसि विधत्ते इति सखीं प्रति सखीसौभाग्यं कयापि निवेद्यते॥२॥

अत्यायतैर्नियमकारिभिरुद्धतानां
दिव्यैः प्रभाभिरनपायमयैरुपायैः।
शौरिभुजैरिव चतुर्भिरदः सदा यो
लक्ष्मीविलासभवनैर्भुवनं बभार॥

अत्यायतैरिति। यो राजा चतुर्भिरूपायैः सामादिभिरदः एतद्भुवनं बभार पालयामासेत्यन्वयः। शौरिः श्रीकृष्णः। भुजैरित्यत्रापि चतुर्भिरिति योज्यम्। कीदृशैः। अत्यायतैः दूरदृष्ट्या प्रयोजितैः। आजानुलम्बिभिश्च। दिव्यैः श्रेष्ठैः दिविभवैश्च। प्रभाभिरुपलक्षितैः। अनपायमयैरपायशून्यैः [३]लक्ष्मीविलासस्थानत्वमुपायानां तत्प्रयोजकत्वाद्बोध्यम्॥३॥

अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर, न कस्य॥

अवितथेति। सफलमनोरथमार्गसम्पादनेषु प्रकृष्टगुणगरिम्णा गीता[४] श्रीर्यस्य सः कस्य नाभिलषणीयः स्पृहणीय इति[५] सम्बन्धः॥४॥

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्।
दुरालोकः स समरे निदाघाम्बररत्नवत्॥

---

१. 'श्रीः' स्थाने श्री गणेशाय नमः 'क' मातृकायां एवं ''श्रीः'' 'ख' मातृकायां नास्ति।
२. मया योजितम्।
३. 'विलास' स्थाने 'निवास' 'क' मातृकायाम्।
४. 'गरिम्णा' स्थाने गणिम्णा 'क' मातृकायाम्।
५. 'इति सम्बन्धः' 'क' मातृकायां नास्ति।

गाम्भीर्येति। गङ्गाभुजंगः समुद्रस्तस्येवेत्यर्थः। तत्र तस्येव इतीवार्थे वतिः। निदाघे ग्रीष्मकाले यदम्बररत्नं सूर्यस्तेन तुल्यं तदवत्। तेन तुल्यं क्रियाचेद्वतिरिति तुल्यार्थे वति ॥५॥

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः।

करणीयं वचश्चेतः सत्यं तस्यामृतं यथा॥

धन्यस्येति। अनन्यसामान्योऽसाधारण इत्युत्कर्षम्। विशेषणम्। हे चेतस्तस्य सत्यं वचः करणीयमित्यन्वयः। अमृतं यथेति अमृतवत्परिणामसुरसमित्यर्थः॥६॥

आकृष्टकरवालोऽसौ सम्पराये परिभ्रमन्।

प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः॥

आकृष्टेति। करवालः खड्गः। सम्पराये सङ्ग्रामे। अत्र क्रूरत्वादिकं यमसाधर्म्यं न त्वाकृष्टेत्यादि। तस्य दण्डायुधत्वेनैव प्रसिद्धेरिति॥७॥

करवाल इवाचारस्तस्य वागमृतोपमा।

विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे॥

करवाल इति। आचार आचरणम्। विषकल्पम्। विषादीषन्न्यूनम्। तत्सदृशमित्यर्थः। ईषदसमाप्तौ कल्पप्रत्ययः। यदि जीवसि तत्तदा वेत्सि। तत्समीपावस्थाने तव जीवनमेव दुर्लभमिति भावः॥८॥

सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य।

दृश्यतेऽथवा निशाम्यते सदृशमंशांशमात्रेणेति संस्कृतम्।

स अलेति। सरसकाव्यस्यांशांशमात्रेणापि सदृशं न दृश्यते अथवा निशाम्यते श्रूयत इत्यन्वयः। कीदृशम्। सकलकरणानामिन्द्रियाणां परमविश्रान्तिलक्ष्मीदायकम्। तथा च सरसकाव्यमेवैवंविधं नान्यदिति भावः॥९॥

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना।

नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता॥

तत इति। गण्ड इव पाण्डुर्गण्डपाण्डुः उपमानानि सामान्यवचनैरिति समासः। माहेन्द्री दिक् प्राची॥१०॥

असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्णचारः।

पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत्॥

असितेति। प्रतिभटानां शत्रूणां विक्रमस्य दर्शने सतिं अयं नृप ईदृश आसीदित्यन्वयः। असिः खड्ग एव पत्रमसिपत्रम्। रुहरुहिकया[६] रभसोत्कण्ठया आहितः कृतश्चित्ते तूर्णं शीघ्रं चारः संचारो यस्य सः। उत्कटा अरुणा कपोलकान्तिर्यस्य स तादृशः॥११॥

पौरं सुतीयति जनं समरान्तरेऽसा-

वन्तः पुरीयति विचित्रचरित्रचुञ्चुः।

---

६. 'रुहहि' स्थाने 'रुहरुहि' 'क' मातृकायाम्।

नारीयते समरसीम्नि कृपाणपाणे-

रालोकस्य तस्य चरितानि सपत्नसेना ॥

पौरमिति। असौ नृपः पौरं जनं सुतमिवाचरति। उपमानादाचारे इति कर्मभूतादुपमानात्क्यच्। समरस्यान्तरे मध्ये अन्तःपुरीयति। अन्तःपुर इवाचरति। अत्राधिकरणाच्च्येत्यनेन क्यच्। विचित्रेत्यादि। विचित्रेण चरित्रेण वित्त इत्यर्थः। तेन वित्तश्चुञ्चुप्चणपौ इत्यनुशासनात्। नारीयत इति नारीवाचरतीत्यर्थः। कर्त्तुः क्यङ्सलोपश्चेत्यनेन क्यङ्॥१२॥

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे।

सः पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः॥

मृध इति। मृधे सङ्ग्रामे निदाधेत्यादिनिदाघघर्मांशुमिव पश्यन्तीत्यर्थः। उपमाने कर्मणि चेति कर्मण्युपपदे णमुल् चकारात्पार्थसंचारमित्यत्र कर्त्तरि। पार्थ इव संचरतीत्यर्थात्। उभयत्रानुशासनिको यथाविध्यनुप्रयोगः ॥१३॥

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः।

यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि॥

सवितेति। मनसि सुखदुःखाभ्यां वशीकृते सति यथाक्रमं सवित्रादिकं विध्यादिवदाचरतीत्यर्थः। सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः इत्याचारे क्विप्॥१४॥

परिपन्थिमनोराज्यशतैरपि दुराक्रमः।

सम्परायप्रवृत्तोऽसौ राजते राजकुञ्जरः॥

परिपन्थीति। परिपन्थिनां शत्रूणां मनोराज्यं मनोरथः। राजकुञ्जर इति कुञ्जर इव राज्ञेत्यर्थः "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति समासः ॥१५॥

अन्विष्यमाणमरिष्यसि कण्टककलितानि केतकीवनानि।

मालतीकुसुमसदृशं भ्रमर भ्रमन्नपि न प्राप्स्यसीति संस्कृतम्।

ढुण्ढुजन्तेति। ढुण्ढुजमिति शब्दं कुर्वाणेत्यर्थः इति केचित्। तन्मते वनानि भ्रमन्नित्यन्वयः। ढुण्ढुजन्त भ्रमणेत्यर्थ इत्यन्ये ॥१६॥

अरातिविक्रमालोकविकस्वरविलोचनः।

कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति॥

अरातीति। वैरिविक्रमालोकनेन विकासशालिनेत्रः। कृपाणेनोदग्र उद्भटो दोर्दण्डो यस्य तादृशः स नृपः सहस्रमायुधानि यस्य तमिवात्मानमाचरति। यथा तं दुर्जयं मन्यते तथात्मानमपीत्यर्थः। आयुधसहस्रकृत्यस्यैकेन कृपाणेन निर्वहणादुत्कर्षः। अत्र कर्मत्वेनोपमेयस्यात्मनस्तत्त्वेनैवानुपादानमिति बोध्यम्। केचित्तु उपमेयोपादानप्रसङ्गभयात्सहस्रेत्येकपदतया व्याचक्षते। सहस्रेणायुधैः, सह वर्तत इति ससहस्रायुध इति। अन्ये[७] तु सहस्रारायुधीयति इत्यपठन्। सहस्रारं चक्रमायुधं यस्येति तदर्थः ॥१७॥

---

७. 'अन्येतु सहस्रारायुधीः सह वर्तत इति स सहस्रा युध इति' 'ख' मातृकायां बारं द्वयम्।

तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा।

स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मन:।।

तरुणिमनीति। तरुणिमनि सति मनोहरतीति सम्बन्ध:। तरुणिमनि विषये कृतमवलोकनं ययेति वा। तेन वय: सन्धिलाभ:। ललितविलासेभ्यो विलब्धो दत्तौ विग्रह: शरीरं यया सा। विसर: समूहसतेनाचितं व्याप्तमान्तरं मनो यस्या: सा। विशरुतेतिपाठे शरैर्विशीर्णतान्तरे यस्या: सेत्यर्थ: ।।१८।।

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता।

मम्लौ साऽथ विषादेन पद्मिनीव हिमाम्भसा।।

अनयेनेति। सा प्रकृता नायिका विषादेन मम्लौ म्लानिं प्राप्तवती। अनयादिना राज्यलक्ष्म्यादिरिवेति मालोपमा। अनयो नीतिविरह: ।।१९।।

ज्योत्स्नेव नयनानन्द: सुरेव मदकारणम्।

प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी।।

ज्योत्स्नेवेति। समाकृष्टा: वशीकृता:। अत्र ज्योत्स्नादिनिरूपितं नयनानन्दत्वादि साधर्म्यं भित्रं भिन्नमिति भेद: ।।२०।।

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततते:।

भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला।।

अनवरतेति। हे राजन्! अनवरतं कनकस्य वितरणेन ये जललवास्तैर्भृते पूर्णे करे तरङ्गिता तरङ्गवत् श्रेणीभूय पूर्वपश्चाद्भावेन सन्ततमिलिता अर्थिनां तति:[८] पङ्क्तिर्यस्य तादृशस्य तव मत्यादि: भणित्यादिवदतिविमलेति पूर्वपूर्वस्योत्तरोत्तरमुपमानत्वाद्रशनोपमा। भणितिरुक्ति:। सर्वत्र विमलत्वमेकं साधर्म्यम् ।।२१।।

मतिरिव मूर्त्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता।

तस्य सभेव जयश्री: शक्या जेतुं नृपस्य न परेषाम्।।

मतिरिति। तस्य नृपस्य मूर्त्यादिर्मत्यादिवन्माधुर्यादिमतीत्यन्वय:। प्रभावचित्ता। प्रभावव्याप्ता। परेषां जेतुं न शक्येत्यन्वय:। अत्र मुधरत्वादिसाधर्म्यं भिन्नम् ।।२२।।

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव।

यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासा:।।

न केवलमिति। एवकारो भिन्नक्रम:। सा नितम्बिन्येव केवलं नितम्बिनीव नितान्तकान्तिर्भातीति न। यावत्। अपिस्त्वर्थे। तेऽनुभवैकगोचरास्तस्या विलासास्तद्विलासा इव भान्तीति वचनविपरिणामेनान्वय:। कीदृशा? विलासायुधस्य कामस्य लासो नृत्यं तस्य वासा निवासभूता:। नितम्बिनी सैव नितम्बिनीव। तन्मात्रनितम्बिनीसदृशीति वार्थ:। तेन स्फुटतया व्यक्त्यैक्यलाभ:। एवञ्च तत्रैव तदुपमानेनान्वेतीत्यनन्वयोऽलङ्कारस्तत्फलञ्च निरुपमत्वबोध: ।।२३।।

---

८. 'तति' स्थाने 'तात:' 'ख' मातृकायाम्।

कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति वत यस्य ॥

कमलेवेति। कमला लक्ष्मीः। विभा कान्तिः। धृतिर्धैर्यम्। वत हर्षे। यस्य राज्ञो मतिकलादिकमन्योन्यसदृशं विभातीति निर्गलितान्वयः। सेयं तृतीयसदृशव्यवच्छेदफला उपमेयोपमा ॥२४॥

उन्मेषं यो मम न सहते जातिवैरी निशाया-
मिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षा-
ल्लग्ना मन्ये ललिततनु, ते पादयोः पद्मलक्ष्मीः ॥

उन्मेषमिति। हे ललिततनु! पद्मलक्ष्मीः मन्ये इति हर्षात्तव पादयोर्लग्नेति सम्बन्धः। तेन हर्षरूपहेतूत्प्रेक्षेयम्। इति किम्? यो मम पद्मलक्ष्म्या जातिवैरी सहजशत्रुर्निशायामुन्मेषमुदयं न सहते तस्येन्दोः सौन्दर्यदर्पः। अनयेंदीवरदलदृशा कर्तृभूतया वक्रकान्त्या करणभूतया प्रसभं बलाच्छान्ति नीत इति ॥२५॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥

लीम्पतीवेति। गाढान्धकारवर्णनमिदम्। तमः कर्तृ। अङ्गानि लिम्पतीवेती व्यापनस्य लेपनत्वेनोत्प्रेक्षा। एवं नभःकर्तृकाञ्जनवृष्टित्वेनापीति ॥२६॥

अयं मार्तण्डः किं ? स खलु तुरगैः सप्तभिरितः
कृशानुः किं ? सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं ? साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥

अयमिति। हे राजन्! त्वामाजौ रणे चिरं निपुणं समालोक्य प्रतिभटाः शत्रव इति विकल्पान्संशयान्विदधति कुर्वन्तीत्यन्वयः। चिरं विदधतीति वा। तिरः इति पाठे तिर्यगित्यर्थः। तेन त्रासध्वननमिति। कीदृक्? तत्राह–अयमित्यादि। इतो युक्तः एष कृशानुः नियतं निश्चितं सर्वा दिशो न प्रसरतीत्येवं वैधर्म्योक्तिघटितो मार्तण्डत्वादि संशयः ॥२७॥

इन्दुः किं क्व कलङ्कः सरसिजमेतत्किमम्बु कुत्र गतम्।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि, निश्चितं परतः ॥

इन्दुरिति[१]। अत्रेति प्राक्सन्दिग्धमिति पूर्वार्द्धशेषो बोध्यः। ललितानि च तानि सविलासानि चेति विग्रहः परतः पश्चात ॥२८॥

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो न कान्तिप्रदः
श्रृङ्गारैकसः स्वयं नु मदनो मासो नु पुष्पाकरः।

---

१. 'इन्दुरिति' 'ख' मातृकायां बारं द्वयम्।

वेदाभ्यासजडः कथन्नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रुपं पुराणो मुनिः ॥

अस्या इति । विक्रमोर्वशीये। उर्वशीं प्रति पुरुरवस इयमुक्तिः । अस्याः सर्गविधौ यः प्रजापतिरभूत्स कान्तिप्रदश्चन्द्रो नु इत्येवं चन्द्रत्वादिकोटिकः । संशयः । पुष्पाकरो मासो मधुमासः। सन्देहे कारणमाह-वेदेत्यादि। विषयेभ्यो व्यावृत्तं कौतूहलं यस्य स पुराणो मुनिर्ब्रह्मा। इदं रूपं कथं नु निर्मातुं प्रभवेदित्यन्वयः। तथा च साधारणस्रष्टुरसम्भवात्सन्देह इति भावः ॥२९ ॥

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्द्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ॥

ज्योत्स्नेति । इयं रात्रिरेव कापालिकी योगिनीति प्रधानरूपकम् । एतन्निर्वाहकाण्यपराणि । चन्द्ररूपे मुद्राकपाले न्यस्तं लाञ्छनस्य च्छलेन सिद्धाञ्जनस्य परिमलं चूर्णं दधती धारयन्ती । दीक्षाकालगृहीतोपकरणेषु मुद्रोपनाम्ना पाखण्डानां व्यवहारः इति चण्डीदासः । मुद्रापरिमलशब्दौ प्रशंसार्थावित्यन्ये । मुद्रा चिह्नं तद्रूपे कपाल इति वा । ज्योत्स्नारूपेण भस्मना छुरणमङ्गलेपस्तेन धवला। तारकारूपाण्यस्थीनि बीभ्रति। अन्तर्द्धानस्य व्यसने कौतुके रसिकेति ॥३० ॥

यस्य[१०] रणान्तःपुरे करे कुर्वतो मण्डलाग्रलताम् ।
रससंमुख्यपि सहसा पराङ्मुखी भवति रिपुसेनेति संस्कृतम् ॥

जस्सेति । मण्डलाग्रलतां खड्गलतां करे कुर्वतो धारयतः युद्धार्थं रतार्थं च । अन्तः-पुरत्वारोपसामर्थ्याल्लतताया नायिकात्वावगमात् । रसेन वीररसेन शृङ्गारेण च सम्मुखी युयुत्सू-रिरंसुश्च । पराङ्मुखी भवति । भयात् युद्धान्निवर्त्तते । कोपात्प्रियसंगमाच्च ॥३१ ॥

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥

कुरङ्गीति । यत् । यस्मात् गीतध्वनिषु सत्सु अङ्गानि स्तिमितयति निश्चेष्टानि करोति । तथा श्रुतमपि कान्तस्योदन्तं वृत्तान्तं[११] सखीं प्रति पुनः प्रश्नविषयं करोति । तथा[१२] श्रुतमपि कान्तस्योदन्तं वृत्तान्तं सखीं प्रति पुनः प्रश्नविषयं करोति । यस्माच्चानिद्रं नेत्रमुद्रणादिशून्यं

१०. 'यस्य रणान्तः पुरे' स्थाने 'यस्यान्तः पुरे' 'क' मातृकायाम् ।

११. 'वृत्तान्तं' 'ख' मातृकायां नास्ति ।

१२. 'तथा श्रुतमपि कान्तस्योदन्तं वृत्तान्तं सखीं प्रति पुनः प्रश्नविषयं करोति' इति 'मूल' मातृकायां बारं द्वयम् ।

यथा स्यात्तथा अन्तः स्वपिति। कान्तैकतानान्तःकरणतया विषयान्न गृह्णाति। अहो! इति सम्बोधने। हे सखि! तत्तस्मान्मनसिजः। अस्या हृदि उद्गतामिति शेषः। अभिनवां प्रेमरूपां लतिकां सेक्तुं प्रवृत्त इति वेद्मीत्यन्वयः। अभिनवेति सेकौचित्यसूचनम्॥३२॥

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावास भूः।
विद्या वक्रगिरां विधेरनवविधप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया॥

सौन्दर्यस्येति। तरङ्गिणी नदी। सौन्दर्यस्य तरङ्गवत्त्वावगमेनोत्तरोत्तरविच्छेद लाभः। हर्षोद्गमश्च योग्यस्थानलाभात्। कार्मणकर्म वशीकरणम्। नर्मरहसां क्रीडारहस्यानाम्। उल्लासनाया विजृम्भणस्य वासस्थानम्। वक्रोक्तीनां विद्या शिक्षाशास्त्रम्। विधेर्ब्रह्मणो निरवधिनिपुणतायाः साक्षात्कारः। सा प्रियेत्येकस्यां प्रियायां बहूनामारोपान्मालारूपकम्। पञ्चशिलीमुखः कामः॥३३॥

विद्वन्मानसहंस, वैरिकमलासङ्कोचदीप्तद्युते,
दुर्गामार्गणनीललोहित, समित्स्वीकारवैश्वानर।
सत्यप्रीतिविधानदक्ष, विजयप्राग्भावभीम, प्रभो,
साम्राज्यं वरवीर, वत्सरशतं वैरञ्चमुच्चैः क्रियाः॥

विद्वदिति। हे वरवीर। प्रभो। त्वं वैरिञ्चं बाह्यं वत्सरशतमुच्चैः साम्राज्यं क्रिया इत्याख्यातपदम्। कीदृशं विदुषां मानसमेव मानसं सरस्तत्र हंसरूपेति हंसत्वारोपे श्लेषबलान्मनसि सरोविशेषारोपस्य हेतुत्वात्परम्परितरूपकम्। एवमग्रेऽपि वैरिकमलायाः संकोच एव कमलानामसंकोचस्तेन। दीप्तद्युते सूर्य। दुर्गाणाममार्गणमेव दुर्गाया मार्गणमन्वेषणं तेन नीललोहित शिव। समितां सङ्ग्रामाणां स्वीकार एव समिधां स्वीकारस्तेन वह्ने। सत्ये प्रीतिरेव सत्यां दक्षकन्यायामप्रीतिस्तद्विधाने कुशल एव दक्षप्रजापतिरूप। विजयः परपराभव एव विजयोऽर्जुनस्तत्प्राग्भावः प्राक्सत्त्वमग्रजत्वं च तेन भीम भीषण भीमसेन चेति॥३४॥

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः।
संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन्, राजति वीरवैरिवनितावैधव्यदस्ते भुजः॥

आलानमिति। जय एव कुञ्जरो हस्ती तस्यालानं बन्धनस्तम्भ इति। भुजे आलानत्वारोपे जये कुञ्जरत्वारोपो हेतुः। एवमग्रेऽपि। विपद्रूपसमुद्रस्य वारिधेः पाषाणसेतुः। तदुत्तारणक्षमत्वात्। करवालः खड्ग[१३] एव चण्डमहाः[१४] सूर्यस्तस्य पूर्वाद्रिरूदयाचलः।

---

१३. 'खड्ग' 'क' मातृकायाम् नास्ति।
१४. 'चण्ड एव' 'ख' मातृकायामधिकम्।

लीलासुखस्वापस्तत्रोपधानं शिरोनिधानं तूलपटः। सङ्ग्राम एवामृतसागरः। वीराणां वैरिणां या वनितास्तासां वैधव्यपदः ॥३५॥

अलौकिकमहालोकप्रकाशितजगत्त्रयः।

स्तूयते देव, सद्वंशमुक्तारत्नं न कैर्भवान्॥

अलौकिकेति। अलौकिकस्य महस्योत्सवस्यालोको दर्शनं तेन प्रकाशितं जगत्त्रयं येनेति राजपक्षे। मुक्तामणिपक्षे तु–महालोको महादीप्तिः सद्वंशो महाकुलमेव महावेणुस्तत्र मुक्तारत्नम्। वंशोद्भवमुक्ताया बहुमूल्यत्वाद्रत्नत्वोक्तिः। भवान्कैर्न स्तूयत इत्यन्वयः। स्तूयसे इत्यपपाठः। युष्मद्युपपदे इत्यत्रार्थग्रहणाभावात्॥३६॥

निरवधि च निराश्रयं च यस्य स्थितमनिवर्त्तितकौतुकप्रपञ्चम्।

प्रथम इह भवान् स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः॥

निरवधीति। स प्रथम आद्यः कूर्ममूर्तिर्भवान् जयतीति विष्णुं प्रति भक्तोक्तिः। यस्य स्थितं स्थितिः निरवधि कालपरिच्छेदशून्यम्। सर्वाधःस्थित्वादाश्रयशून्यं च। अत एवानिवर्तितः कौतुकस्याश्चर्यस्य प्रपञ्चो विस्तारो येन तत्। कीदृशः कूर्ममूर्तिश्चतुर्दशश्लोकरूपा या वल्लेः कन्दभूतः॥३७॥

किसलयकरैर्लतानां करकमलैः कामिनां मनो जयति।

नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः॥

किसलयेति[१५]। मदनः कामिनां[१६] मनो जयतीत्यन्वयः। कैस्तत्राह–किसलयेत्यादि। लतानां पल्लवरूपैः करैः करकमलैर्मुखेन्दुभिरित्युभयत्रापि योषितामित्यन्वयः। अत्र पूर्वमारोप्यमाणस्य करादेरुत्तरत्रारोपविषयत्वाद्रशनारूपकम्॥३८॥

आवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये,

कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि।

अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे

रतिश्रान्ता शेते रजनिरमणी गाढमुरसि॥

अवाप्त इति। परिणतरुचः[१७] पूर्णकान्तेः शशाङ्कस्य तत्त्वेन पराभिमतस्य वपुषि प्रागल्भ्यं प्रकटतां प्राप्तोऽयं कलङ्को नैव विलसतीत्यपह्नुतिः। तर्हि किं तत्राह–अमुष्य चन्द्रस्य विगलदमृतप्रवाहशीतले उरसि गाढं रतिश्रान्ता इयं रजनीरूपा रमणी शेत इति मन्ये इति॥३९॥

बत सखि, कियदेतत् पश्य वैरं स्मरस्य

प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि।

उपवनसहकारोद्भासिभृङ्गच्छलेन

प्रतिविशिखमनेनोट्टङ्कितं कालकूटम्॥

---

१५. 'किसलयेति' 'क' मातृकायां नास्ति।

१६. 'कामिनां' स्थाने 'वमेनां' 'क' मातृकायाम्।

१७. 'रुचः' स्थाने 'चरुः' 'ख' मातृकायाम्।

बतेति। बत खेदे। अस्मिन्मादृशे रागिलोके अनुरक्तजने क्रियदपरिमितं एतद्वैरमस्तीति शेषः। पश्येति तथाहीत्यनन्तरं योज्यम्। उपवनेषु सहकारा आम्रास्तेषूद्भासिनो भृङ्गा भ्रमरास्तद्व्याजेन प्रतिबाणमनेन स्मरेण कालकूटमुट्टङ्कितं प्रकाशितं लापितमिति यावत्॥४०॥

अमुष्मिल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः॥

अमुष्मिन्निति। शर्वेण हरेण प्लुष्टो दग्धः स्मरः लावण्यरूपामृतसरोवरभूते मृगदृशोऽस्मिन्महति जघनप्रदेशे नूनं निपतितः। यस्य कामस्याङ्गान्येवाङ्गारास्तेषां प्रशमस्य निर्वाणतायाः पिशुना सूचिका इयं धूमस्य शिखा। नाभिबिले रोमावलिमूर्तिः[१८] परिणमति। नेयं रोमावलिः किं तु धूमशिखैवेयं तदाकारेण परिणतेत्यर्थगम्याया अपह्नुतेरुदाहरणद्वयं दर्शितम्॥४१॥

उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्त्तयति क्रियाः।
रचयतितरां स्वैराचारप्रवर्त्तनकर्त्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः॥

उदयमिति। विभाकरनामा राजविशेषः सूर्यश्च। उदयं उदयाचलं समृद्धिञ्च अयते। प्राप्नोति। दिशां मालिन्यं अन्धकारः। तत्तद्दिग्गतदुष्टसामन्ताद्युपद्रवश्च। दिग्गतजनानां दारिद्र्येण कुवेषतेत्यन्ये। निद्रया मुद्रा मुद्रणं चक्षुषः। निद्रामुद्रा निद्रासदृशी अवस्था आलस्यरूपा च। निधनं नाशम्। क्रिया अग्निहोत्राद्याः पक्षद्वयेऽपि। स्वैराचारप्रवर्तनम्। अभिसारादि। विधिनिषेधातिक्रमश्च। तत्खण्डनं निवृत्तिं रचयति। हर्षातिशयाद्बतबतेति द्विरुक्तिः। तेजः-पुञ्जो रश्मिसमूहः कान्तिसमूहश्चेति श्लेषालंकारः॥४२॥

लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः।
जयलक्ष्मीस्तव विरहे न खलूज्वला दुर्बला[१९] ननु सेति संस्कृतम्।

लहिऊणेति। अत्र बाहुस्पर्शलाभप्रयुक्तोल्लासादिसाधारणविशेषणबलाज्जयलक्ष्मी-वृत्तान्तो नायिकावृत्तान्तरूपतया गम्यत इति समासोक्तिरलंकारः॥४३॥

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

क्व सूर्येति। स्पष्टम्। अत्रोडुपेन सागरतरणवन्मदीयमत्या सूर्यवंशवर्णनमसम्भावित-

---

१८. 'बलिमूर्ति' स्थाने 'वलि तर्त्तिः' 'क' मातृकायाम्।
१९. 'दुर्बला' 'क' मातृकायां नास्ति।

मित्युपमायां पर्यवसानान्निदर्शनालंकारः ।।४४।।

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्।।

उदयतीति। माघे रैवतकवर्णनम्। वितता विस्तृता ऊर्ध्वा रश्मय एव रज्जवो[२०] यस्य तादृशे अहिमरुचौ सूर्ये उदयति सति हिमधाम्नि चन्द्रे चास्तं याति सत्ययं रैवतकगिरिरुभयतो विलम्बिघण्टाद्वयपरिवारितस्य वारणेन्द्रस्य गजश्रेष्ठस्य लीलां शोभां वहतीत्यन्वयः। अत्रान्यलीलाया अन्यत्रारोपः लीलासदृशीं लीलामित्युपमां गमयति। तत्र चन्द्रसूर्ययोर्घण्टयोश्च विम्बप्रतिबिम्बभावस्तत्समर्थनाय च रश्मिषु रज्जुत्वारोप इति बोध्यम्।।४५।।

दोर्भ्यां तितीर्षति तरङ्गवतीभूजङ्ग-
मादातुमिच्छति करे हरिणाङ्कबिम्बम्।
मेरुं लिलङ्घयिषति ध्रुवमत्र देव
यस्ते गुणान्गदितुमुद्यममादधाति।।

दोर्भ्यामिति।तरङ्गवतीभुजङ्गः समुद्रः लिलङ्घयिषति[२१]। लङ्घयितुमिच्छति। दोर्भ्यां सागरतरणादिवत्त्वद्गुणभाषणमशक्यमित्यनेकोपमाकल्पनान्मालारूपेयं[२२] निदर्शना।।४६।।

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन्।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः।।

उन्नतमिति।दृषत्कणः पाषाणकणः[२३]। चारुणा मन्देनापि मारुतेन धुतः कम्पितोऽधः पतति। किं कुर्वन्। यो लघुः स उन्नतं पदमवाप्य हेलयैव पतेदिति ब्रुवन्स्वदृष्टान्तेन कथयन्। उन्नतंपदमुत्कर्षः उच्चस्थलं च। लघुरल्पबुद्धिः अल्पपरिमाणश्च। पतनमुत्कर्षहानिः। अधः संयोगश्च।।४७।।

याताः किन्न मिलन्ति सुन्दरी, पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशाऽसि कथयत्येवं सवाष्पे मयि।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः।।

याता इति। याताः प्रस्थिताः किं पुनर्न मिलन्त्यपि तु मिलन्त्येवेति काकुः। मत्कृते मदर्थं अतिकार्श्यदर्शनादनिष्टाशङ्कया सवाष्पत्वम्। मदीया गमनानिच्छाज्ञातेति[२४] लज्जया मन्थरा स्तब्धा तारका कनीनिका[२५] यस्य तेन। तथा निपतत्पीतमशकुनभयात्संहृतमश्रु येन

---

२०. 'रज्जवो' स्थाने 'रकवो' 'क' मातृकायाम्।
२१. 'लिलङ्घयिषति' 'क' मातृकायां नास्ति।
२२. 'कोपमाकल्पना' स्थाने नोपमा कोपना 'इति' 'ख' मातृकायाम्।
२३. 'पाषाणकणः' स्थाने 'षाण कणः' 'क' मातृकायाम्।
२४. 'निच्छाज्ञातेति' स्थाने 'निष्छासनेति' 'क' मातृकायाम्।
२५. 'कनीनिका' स्थाने 'कनीका' 'ख' मातृकायाम्।

तादृशेन चक्षुषा। हसितेनेति। एवं किलास्याभिप्रायो यदियं मद्विरहे प्राणान् धारयिष्यतीति प्रहासरूपेणेत्यर्थः। भाविन्यावश्यके मरणे उत्साहः। स च वियोगदुःखशान्तिवाञ्छयेति ज्ञेयम्। इयं च प्रस्थाननिवृत्तिरूपे कार्ये प्रस्तुते कारणोक्तिरूपाऽप्रस्तुतप्रशंसा ॥४८॥

राजन्, राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे, भोजय मां कुमार, सचिवैर्नाद्यापि किं भुज्यते।
इत्थं नाथ, शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरात्
चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते॥

राजन्निति। राज्ञः शत्रुभूतस्य शुकस्तवारिभवने शून्यायां वलभौ भित्तौ चित्रस्थानवलोक्यैकैकं प्रतीत्थमाभाषते इत्यन्वयः। कीदृक्। तत्राह–राजन्नित्यादि कुब्ज[२६] इति। तादृश्या भोजिकायाः सम्बोधनम्। कुमारसहितैः सचिवैरद्यापि किं न भुज्यत इति काकुः। अत्र शत्रुपलायने कारणे प्रस्तुते तत्कार्यवचनरूपा ॥४९॥

एतत्तस्य मुखात्कियत् कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा॥

एतदिति। कस्यचिन्मूर्खस्य वृत्तान्तं कुतश्चिदाकर्ण्य विस्मयेन भाषमाणं[२७] कंचित्प्रति कस्यचिदुक्तिरियम्। मुखादित्यनन्तरं श्रुतमिति शेषः। तस्य मुखाच्छ्रुतमेतत्कियत्। अल्पमित्यर्थः। अपाये वा पञ्चमी। मुखादपगतमित्यर्थः। किं तदित्याह–स जडो मूर्खः कमलिनीपत्रे स्थितं वारिणः कणं बिन्दुं मुक्तामणिरित्यमंस्तेति यत्। अस्मादन्यदपि शृणु। शनैरादीयमाने गृह्यमाणे कणे अङ्गुल्यग्रस्य लघुक्रिययाल्पचेष्टया प्रविलयिनि विलीने सति मम मुक्तामणिः कुत्रोड्डीय गत इत्यनुदिनमन्तःशोकेन न निद्रातीति। अत्र जडसामान्यप्रस्तावे तद्विशेषाभिधानरूपा ॥५०॥

सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः।
स एव पूज्यः स पुमान् स नीतिमान् सुजीवितं तस्य स भाजनं श्रियः॥

सुहृदिति। श्रीकृष्णेन नरकासुरे हते तत्सुहृदं प्रति तन्मन्त्रिण इयमुक्तिः। प्रतियातनं प्रतिक्रिया। भाजनं पात्रम्। अत्र विशेषे प्रस्तुते सामान्याभिधानरूपा ॥५१॥

पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि
यायाद्यदि प्रणयने न महानपि स्यात्।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन॥

---

२६. 'कुब्जे' स्थाने कुब्ज्वे 'क' मातृकायाम्।
२७. 'भाषामाणं' स्थाने 'भाषणं' 'ख' मातृकायाम्।

पुंस्त्वादिति। प्रणयने इति सप्तमी। अत्र पुरुषोत्तमेन विष्णुना दैत्यमोहने[२८] स्त्रीरूपतापत्त्या वाराहमूर्त्या पातालप्रवेशरूपाधोगमनेन बलिप्रणयने प्रार्थने वामनताप्राप्त्या च त्रिभुवनरक्षणादेवं[२९] प्रकारेणापि विश्वोद्धरणं कार्यमिति[३०] दिङ् मार्गः प्रकटितः इत्यप्रस्तुतस्योपमानभूतस्य विष्णोरभिधानात्ततुल्यप्रकृतपुरुषश्रेष्ठप्रतीतिः। तत्र च पुंस्त्वात्प्रचलनम्। पुरुषार्थहानिः। अधोयानं स्वपदभ्रन्शः। अमहत्त्वं गौरवहानिः। विश्वं सर्वजनमित्यर्थो बोध्यः। प्रणयनेनापूर्वोत्कर्षप्राप्त्या महान् त्रिविक्रमतया महाकायः उच्चपदस्थश्चेत्यर्थः इति चण्डीदासः॥५२॥

येनास्यभ्युदितेन चन्द्र, गमितः क्लान्ति रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मना-
गस्त्येव जडधामता तु भवतो यद्व्योम्नि विस्फूर्जसे॥

येनेति। क्लान्तिं गमितः[३१] प्रापितोऽसीत्यन्वयः। क्लान्तिर्निष्प्रभता। तत्र रवौ विषये पादो रश्मिश्चरणश्च। पुनरिति त्वर्थे। एतत्पादग्रहणम्। मनाक् ईषत्। जडधामता। शीतलप्रभता। पक्षे भाव प्राधान्यान्मूर्खत्वास्पदता। विस्फूर्जसे सगर्वमुदेषीत्यर्थः॥५३॥

आदाय बारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन दुर्णवेन।
क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च॥

आदायेति। मुखं वदनम्। नदीसंगमस्थानं च। दुर्णवेन दुष्टेनार्णवेन[३२] वडवादहने वडवानले पातालमेव कुक्षिकुहरमिति विग्रहः। अत्रापव्ययकारिपुरुषप्रतीतिः॥५४॥

अब्धेरर्णःस्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इह हि बहवो लङ्घनेऽपि क्षमन्ते।
आहो रिक्तः कथमपि भवेदेष दैवात्तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः॥

अब्धेरिति। अर्णो जलं तेन स्थगित आच्छादितः भुवनाभोगस्य पातालरूपः कुक्षिर्येनेति विग्रहः। पोत उपायः साधनं येषां तादृशाः पुरुषाः। यदीत्यर्थे आहोइत्यव्ययम्[३३]। कथमपीत्यस्य

---

२८. 'मोहने' स्थाने 'मारणे' 'क' मातृकायाम्।
२९. 'त्रिभुवन' स्थाने 'भुवन' 'क' एवं 'ख' मातृकायाम्।
३०. 'कार्यमिति' स्थाने 'कर्त्तव्यमिति' 'क' एवं 'ख' मातृकायाम्।
३१. 'क्लान्ति' स्थाने 'अन्ति' 'क' मातृकायाम्।
३२. 'दुष्टेनार्णवेन' इति 'ख' मातृकायां नास्ति।
३३. 'व्ययम्' 'क' मातृकायां नास्ति।

कल्प इति व्यवहितेनान्वयः। अवटो[३४] गर्तः कुहरं तस्यैव गम्भीरप्रदेशः तदवलोकनेऽपि को नाम कथमपि कल्पः समर्थः स्यादित्यर्थः। लङ्घनस्य कैव कथेत्यपि शब्दार्थः। अत्र प्रभोः पूर्णत्वमेव वरं न रिक्तत्वमिति तुल्यप्रतीतिः ॥५५॥

कस्त्वं भोः ? कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायाऽपि परोपकारकरणे मार्गस्थितस्यापि मे॥

कस्त्वमिति। शाखोटकं भूतावासवृक्षविशेषं[३५] प्रति कस्यचित्प्रश्नः। कथयामीत्यादि तत्प्रतिवचनम्। वैराग्येत्यादि पुनः पूर्वस्य प्रश्नः। वक्षि वदसि। साध्विति पुनस्तरोर्वचनम्। कस्मादिति पुनः पूर्वस्य प्रश्नः। इदं वैराग्यम्। कथ्यत इत्यारभ्य पुनः शाखोटकोक्तिः। वामेन वामपार्श्वेन लक्षितः। प्रतिकूलाचरणेन च। सर्वात्मना छायोपसेवनादिना। शाखोटकच्छायानाश्रयणे भूतावासत्वं हेतुः। मार्गो रथ्या। सदाचारश्चेति। अत्र[३६] प्रतीयमानपुरुषाध्यारोपेण शाखोटकस्य सम्बोध्यत्वादिसंगतिः ॥५६॥

सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा।
सर्वं विस्मृतवानसि भ्रमर हे, यद्वारणोऽद्याप्यसौ
अन्तः शून्यकरो निषेव्यत इति भ्रातः, क एष ग्रहः॥

सोऽपूर्व इति। रसनाविपर्ययः। अग्निशापात्करिणां जिह्वापरिवृत्तिः। अन्यत्र पूर्वविपरीताभिधानम्। कर्णचापलं निरन्तरं[३७] चपलता[३८]। परवचनप्रतार्यत्वं च[३९]। मदः करिणां प्रसिद्धः गर्वश्च। तेन विस्मृता स्वपरयोर्दिक् मार्गः आत्मानात्मविभागश्च यया तादृशी दृष्टिः[४०]। वारणो गजः वारकश्च। अन्तर्मध्ये शून्यः सरन्ध्रः धनरहितश्च। करः शुण्डा हस्तश्च। ग्रहं आग्रहः। अत्र प्रतीयमानपुरुषाध्यारोपेण मदरसनाविपर्ययोर्भ्रमरस्य गजासेवने हेतुत्वसङ्गतिः ॥५७॥

अन्यत्सौकुमार्यमन्यैव कापि वर्त्तनच्छाया।
श्यामा सामान्यप्रजापते रेखैव न भवतीति संस्कृतम्।

अण्णमिति। लडहशब्दः सौकुमार्ये देशी। वर्त्तते जीवतीति वर्त्तनं शरीरं तस्य। च्छाया

---

३४. 'अवटो' स्थाने 'अवस' 'क' मातृकायाम्।
३५. 'वृक्ष' 'क' मातृकायां नास्ति।
३६. 'अत्र प्रतीयमान पुरुषाध्यारोपेण शाखोटकस्य सम्बोध्यत्वादि सङ्गतिः' इति 'क' मातृकायां नास्ति।
३७. 'कर्ण' 'क' मातृकायामित्यधिकम्।
३८. 'चपलता' स्थाने चापलम् 'क' मातृकायाम्।
३९. 'परवचन प्रतार्यत्व च' इति 'ख' मातृकायाम् नास्ति।
४०. 'तादृशी' 'क' मातृकायां नास्ति।

कान्तिः। श्यामा षोडशवर्षा स्त्री। सामान्यः सर्वसाधारणः। रेखैवेति। निर्माणपरिपाटी रेखामात्रेणापि नास्तीति भावः। इयमन्यत्ववर्णनरूपातिशयोक्तिः ॥५८॥

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम्।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्॥

कमलमिति। अनम्भसि अनुदके[४१] सुकुमारा मृद्वी चासौ सुभगासुन्दरी। अत्र कमलकुवलयकनकलतिकापदैर्मुखनेत्रकामिनीनां कमलत्वादिनाध्यवसानादतिशयोक्तिः ॥५९॥

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात्॥

राकायामिति[४२]। राका पूर्णचन्द्रा पूर्णिमा। साम्यमेव पराभवः। अपकर्षः एषा यद्यर्थातिशयोक्तिः ॥६०॥

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन।
चरमं रमणीबल्लभ लोचनविषयं त्वया भजता॥

हृदयमिति। मालतीनाम्नी काचिन्नायिका। अधिष्ठितमाक्रान्तम्। चरमं पश्चात्। लोचनविषयं तद्गोचरतां प्राप्तवता त्वयाधिष्ठितमित्यनुषङ्गः। इयं कार्यकारणयोः पौर्वापर्यविपर्ययरुपेति ॥६१॥

देवीभावं गमिता परिवारपदं कथं भजत्वेषा।
न खलु परिभोगयोग्यं दैवतरुपाङ्कितं रत्नम्॥

देवीभावमिति। देवीभावम्[४३]। देवीत्वम्। देवी कृताभिषेकायामित्यमरः[४४]। गमिता, प्रापिता, परिवारः साधारणकलत्रम्। पदं स्थानं शब्दो वा। परिभोगो भूषणाद्यर्थमुपादानम्[४५]। दैवतरुपेणाङ्कितं चिन्हितम्। उल्लिखितदैवताकारमित्यर्थः। अत्र द्वयोर्वाक्यार्थयोरनौचित्यरूप एक एव साधारणधर्मः कथं न खल्विति भिन्नशब्दोपात्त इति प्रतिवस्तूपमालंकारः ॥६२॥

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किन्ततः।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता॥

यदीति। सप्तमे व्याख्यातम्।

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम्।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः॥

---

४१. 'अनुदके' स्थाने अनदुके 'क' मातृकायाम्।
४२. 'यामिति राका' 'ख' मातृकायामित्यधिकम्।
४३. 'देवीत्वम्' 'क' मातृकायां नास्ति।
४४. 'मित्यमरः' स्थाने षात्यमरः इति 'ख' मातृकायाम्।
४५. 'मुपादानम्' स्थाने सुपादानम् 'क' मातृकायाम्।

त्वयीति। अत्र मनःकुमुदयोर्विकासनिर्वाणयोश्च बिम्बप्रतिबिम्बभावेन[४६] दृष्टान्तालङ्कारः ॥६३ ॥

तवाहवे साहसकर्मशर्मणः करे कृपाणान्तिकमानिनीषतः।
भट्या परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांसवः॥

तवेति। साहसकर्मणा शर्म सुखमस्येति विग्रहः। कृपाणान्तिकं खड्गसमीपम्। आनिनीषतो नेतुमिच्छतो, न तु नीतवतः। तवाहवे रणे परेषां शत्रूणां भटोयोद्धारः विशरारुतां विशीर्णतामगुः प्रापुः। विशरारुतामहिंसकतामित्यन्ये। हि यतः अवाते। वातशून्ये देशे इति वैधर्म्यदृष्टान्तः। वाते तु न दधतीति व्यतिरेके[४७] साधर्म्ये पर्यवसानात् ॥६४ ॥

कृपणानां धनं नागानां फणामणिः केसराणि सिंहानाम्।
कुलपालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानामिति संस्कृतम्।

किवणेति। केसराणि स्कन्धलोमानि। कुलपालिकानां कुलवधूनाम्। अमृतानामिति सकलषष्ठ्यन्तविशेषणम्। अत्र वर्ण्यत्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेनाप्रकृता-नामन्येषां च कुतः संस्पृश्यन्त इति सकृद्धर्मोपादानाद्दीपकालंकारः ॥६५ ॥

स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक्।
अन्तर्नन्दति चुम्बितुमिच्छतिनवपरिणया वधूः शयने॥

स्विद्यतीति। नवोढा वधूः शयने तल्पे स्वेदं भजते। कूणति संकोचमालम्बते। सवितर्कं वीक्षत इति चण्डीदासः। वेल्लति परिवृत्य शेते। विवलति विशेषतश्चञ्चला भवति। निमिषति निद्राव्याजेन नेत्रे मुद्रयति। अन्तर्नन्दति हृष्यति। नवोढात्वेन बाह्यतो हर्षाप्रकाशनात्। अत एव चुम्बितुमिच्छति, न तु चुम्बतीत्यनेकासु क्रियासु वधूरूपकर्तृकारकस्य सकृद्वृत्तिः ॥६६ ॥

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम्।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्त्तिरतुला कीर्त्या च लोकत्रयम्॥

सङ्ग्रामेति। सप्तमे व्याख्यातम्। अत्र कोदण्डादिभिः पूर्वपूर्वैरुत्तरोत्तरेषामासादनेन लोकत्रयव्यापिकीर्तिलाभानुकूल्यरूपोपकारसम्पादनान्मालादीपकम् ॥६७ ॥

पाण्डुक्षामं वदनं सरसं हृदयं तवालसं च वपुः।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः॥

पाण्ड्विति। सप्तमे व्याख्यातम्। अत्र प्रकृतानामेव वनादीनामावेदनाख्य एको धर्म इति तुल्ययोगितालंकारः ॥६८ ॥

कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य॥

---

४६. 'भावने' स्थाने 'भावेन' 'ख' मातृकायाम्।
४७. 'व्यतिरेके' स्थाने 'रेके' 'क' मातृकायाम्।

कुमुदेति। नीलं च तन्नीरजं च तेषामालिः पंक्तिरिति विग्रहः। का कः पदार्थ इत्यर्थः[४८]। आननस्येत्यत्र पुर इत्यनुषङ्गः। एकपदे युगपत्। अत्र कामिनीनयनाननोपमानत्वेनाप्रकृतानामेव कुमुदादीनां पूर्वार्द्धे कापदद्योत्य आक्षेपः उत्तरार्द्धे प्रतिहतत्वं चैको धर्म उक्त इत्यपरो भेदः ॥६९॥

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते नितराम्।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥

क्षीण इति। विरमेत्यस्य मानादिति शेषः। यातं गतं यौवनं त्वित्यन्वयः। अनिवर्ति अपरावृत्तिशीलम्। अत्र यौवनस्यास्थिरतायामुपमानाश्चन्द्रादाधिक्यमिति व्यतिरेकालंकारः ॥७०॥

असिमात्रसहायस्य प्रभूतारिपराभवे।
अन्यतुच्छजनस्येव न स्मयोऽस्य महामतेः ॥

असीति। प्रभूता बहवश्च तेऽरयश्च तेषां पराभवे सति। स्मयो गर्वः ॥७१॥

इयं सुनयना दासीकृततामरसश्रिया।
आननेनाकलङ्केन निन्दतीन्दुं कलङ्किनम् ॥

इयमिति। दासीकृता। तामरसस्य ताम्रकाञ्चनस्य श्रीर्येनेत्याननविशेषणम्। स्मृतं तामरसं पद्मताम्रकाञ्चनयोरपीति विश्वः ॥७२॥

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः।
अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः ॥

जितेन्द्रियेति। अब्जवत्कमलस्येव गुणाः पाण्डित्यादयस्तन्तवश्च ॥७३॥

अखण्डमण्डलः श्रीमान्पश्यैष पृथिवीपतिः।
न निशाकरवज्जातु कलावैकल्यमागतः ॥

अखण्डेति। मण्डलं राष्ट्रं बिम्बं च। श्रीः सम्पत्। शोभा च। कला कौशलं चन्द्रषोडशांशश्च। जातु कदाचित् ॥७४॥

हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः।
रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि ॥

हरवदिति। हे विभो! हरवत् विषमदृष्टिः कदाचिन्नासीदित्याद्यन्वयः। विषमदृष्टिस्त्रिलोचनः। सर्वाननुकूलदृष्टिश्च। विधूतः क्षिप्तो विततो वृषः असुरविशेषो धर्मश्च। करो राजग्राह्यधनम्। किरणश्च। तापिता। उद्वेजिता। सन्तापिता च। भूर्भूमिः। तद्गतजनश्च। अयं मालारूपो व्यतिरेकः ॥७५॥

नित्योदितप्रतापेन त्रियामामीलितप्रभः।
भास्वतानेन भूपेन भास्वानेष विनिर्जितः ॥

---

४८. 'इत्यर्थः' 'ख' मातृकायां नास्ति।

नित्योदितेति। प्रतापः पराक्रमः प्रकृष्टतापश्च। भास्वता दीप्तिमता। भास्वान् सूर्यः ॥७६॥

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं
बिम्बप्रभाधरमकृत्रिमगन्धहृद्यम्।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु नाननमङ्गनानाम्॥

स्वच्छेति। आननपक्षे स्वच्छस्वरूपताख्यगुणेन समुल्लसितं पूर्णमिन्दुबिम्बमिति रूपकम्। बिम्बप्रभोऽधरो यत्र तादृशम्। मधुपक्षे स्वछात्मना गुणेन समुल्लसितं प्रतिबिम्बितमिन्दुबिम्बं यत्र तादृशम्। आननपक्षेऽप्ययमेवार्थ इत्यन्ये। बिम्बप्रभामाधारकं जीर्णमधुनो रक्तत्वात्। यत्र नगर्याम् ॥७७॥

ए एहि किमपि कस्या अपि कृते निष्कृप भणाम्यलमथवा।
अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्ये। इति संस्कृतम्॥

ए एहीति। ए इत्यव्ययं सानुनयसम्बोधने। एहि। आगच्छ। एह्णिविति पाठे इदानीमपीत्यर्थः। अथवेति पूर्वाक्षेपे। अलम्। न भणिष्यामीत्यर्थः। खेदातिशयात्पुनरुक्तिः। अलं व्यर्थमिति वा। अविचारितेति। स्वभावमनालोच्यानुरागवर्द्धनपरेत्यर्थः। अत्र विरहदुर्दशातिशयो वक्ष्यमाणो वक्तुमशक्यतया निषिद्ध इत्याक्षेपालंकारः ॥७८॥

ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः।
अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे॥

ज्योत्स्नेति। शीतांशुकान्तद्रवश्चन्द्रकान्तद्रवः। मृणालस्य वलयानि कङ्कणानि अन्तर्मानसम्। मानसाभ्यन्तरे प्रभवता प्रकर्षेण[४९] स्थितवता त्वया हेतुभूतेन ज्योत्स्नादयस्तस्या नायिकायाः स्फुलिङ्गोत्करस्य अग्निकणसमूहस्य व्यापारो दाहोत्पादनं तस्मै तदर्थं भवन्ति। आः इति। प्रकोपेऽव्ययम्। हन्त विषादे। अनेनोक्तेन किं न ब्रूमहे। अतिप्रसिद्धत्वादित्याशयः। अयमुक्तविषयो निषेधः ॥७९॥

कुसुमितलताभिरहताप्यधत्त रुजमलिकुलैरदष्टापि।
परिवर्तते स्म नलिनीलहरीभिरलोलिताप्यघूर्णत सा॥

कुसुमितेति। कुसुमानि संजातानि यासां ताः कुसुमिताः[५०]। रुजम् पीडाम्। अधृतवती[५१] परिवर्त्तते स्म। परावृत्त्य वर्त्तते स्म। नलिनियुक्ताभिर्लहरीभिः। नलिनीपरम्पराभिर्वा। नलिनीति

---

४९. 'समूहस्य व्यापार' इति 'ख' मातृकायामधिकम्।

५०. 'कुसुमिताः' 'ख' मातृकायां नास्ति।

५१. 'अधृतवती' स्थाने अधृत धृतवती 'क' मातृकायाम्।

नायिकाख्येत्यन्ये। अलोलितापि अचालितापि। अत्राघातादिरूपकारणाभावेऽपि पीडादिरूपं तत्कार्यकथनाद्विभावनालंकारः। सौकुमार्यातिशयस्याप्रसिद्धहेतोर्विभावनात् ॥८०॥

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा॥

निद्रेति। द्युरत्ने सूर्ये। भुजंगोपनायकः[५२]। अत्र सूर्योदयादिकारणसत्त्वेऽपि आलिङ्गन परित्यागरूपकार्याभावोक्तेर्विशेषोक्तिः। सा च तन्निमित्तस्यानुरागातिशयस्यानुक्तेरनुक्ते[५३] निमित्ता। रतश्रमादत्तक्षमत्वं निमित्तमिति चण्डीदासः ॥८१॥

कर्पूर इव दग्धोऽपि शक्तिमान्यो जने जने।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे॥

कर्पूर इवेति। शक्तिर्घ्राणस्य मनसश्चाकर्षकता। कर्पूरस्यापीषद्दग्धस्य सौरभातिशयात् दृष्टान्तत्वम्। तथा च श्रीहर्षः-

''भ्रूभ्यां[५४] प्रियाया भवता मनोभूचापेन चापे घनसारभावः।
निजां यदप्लोषदशामपेक्ष्य सम्प्रत्यनेनाधिकवीर्यतार्जीति॥''

इयं चावार्यवीर्यत्वरूपोक्तनिमित्ता ॥८२॥

एकस्त्रिधा वससि चेतसि चित्रमत्र
देव द्विषां च विदुषां च मृगीदृशां च।
तापं च संमदरसं च रतिं च पुष्ण-
ञ्शौर्योष्मणा च विनयेन च लीलया च॥

एक इति। हे देव! एकस्त्वं द्विषां विदुषां मृगीदृशां च चेतसि त्रिधा त्रिभिः प्रकारैर्वससि। अत्र विषये चित्रमाश्चर्यमित्यन्वयः। किं कुर्वन्। शौर्यस्य प्रतापस्योष्मणा विनयेन लीलया विलासेन च यथासंख्यं तापं सम्मदस्य हर्षस्य रसं रतिञ्च पुष्णन्निति प्रकारत्रयप्रदर्शनम्। सोऽयं यथासंख्यालंकारः ॥८३॥

स एकस्त्रीणी जगति जगन्ति कुसुमायुधः।
हरतापि तनुं यस्य शंभुना न हृतं बलम्॥

स एक इति। त्रीणि जगन्ति भुवनानि। अत्र तनुहरणेऽपि बलाहरणे निमित्तमचिन्त्य-मित्यचिन्त्यनिमित्तेति[५५] ॥८४॥

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥

निजेति। आवृतमाक्रान्तम्। एवकारोऽप्यर्थे सुन्दरमपीत्यर्थः। शशिशुभ्रमपि शंखं पीतं

---

५२. 'नायकः' स्थाने 'उपनायकः' 'क' मातृकायाम्।
५३. 'रक्ते' 'क' मातृकायां नास्ति।
५४. ....
५५. किं कुर्वन्। शौर्यस्य प्रतापस्योश्च चितय 'इति ख' मातृकायामाधिकम्।

पश्यतीत्यन्वयः। अयं विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥८५॥

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः॥

सुसितेति। सप्तमे व्याख्यातम्। अत्र क्व नासि शुदप्रद इति सामान्येन पूर्वोक्तविशेषसमर्थनरूपः ॥८६॥

गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः॥

गुणानामिति। दौरात्म्यादपराधात्। धुरि अनन्यसाध्यकार्यभारे। धुर्यस्तद्वहन्[५६] क्षमः। संजातः किणो घर्षणव्रणचिह्नं यस्य स तथा। पश्चान्नञ्समासेनतादृशः स्कन्धो यस्य सः। गलिः कुत्सितगलो गोर्बलीवर्दः। गले बलादासञ्जितं युगं यः पातयति स गलिरिति केचित्। अत्र वैधर्म्येण सामान्यसमर्थनम् ॥८७॥

अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम्।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः॥

अहो इति। कश्चिदापन्नं सुहृदं प्रति तदवस्थोचितमप्रियं वक्तुकामः खेदातिशयात् स्वजीवितं निन्दति। हि विषादे। यत् यद्यस्मादेवंविधस्याप्रियस्य कदाप्यनुक्तत्वात्। अहो! इत्याश्चर्ये। त एव[५७] जगति धन्या इति सम्बन्धः। पराभव आपत्तिः। अत्र विशेष[५८] समर्थनम् ॥८८॥

अभिनवनलिनीकिसलयमृणालवलयादि दवदहनराशिः।
सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते॥

अभिनवेति। हे सुभग! विधवशतो दैववशतो वियोग एव पविर्वज्रं तस्य पाते सति नूतननलिन्यादिकं दावानलराशिरूपं भवतीति शेषपूरणेनान्वयः। अत्र नलिनीत्वादिजातीनां दहनत्वजात्या विरोधस्य विरहोद्दीपकतया दहनत्वोपचारेण परिहारात्तदाभासोऽलंकार ॥८९॥

गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगम्भीराः।
विश्वम्भराऽप्यतिलघुर्नरनाथ तवान्तिके नियतम्॥

गिरय इति। अनुन्नतिरुच्चत्वाभावः। अबलो बलशून्यः। अत्र गिरित्वादिजातीनामुच्चत्वाभावादिभिर्गुणैर्विरोधः। राजगतौन्नत्याद्यतिशयविवक्षया तत्परिहारः। एवमग्रिमोदाहरणेष्वपि विरोधतत्परिहारावूहनीयौ। यत्त्वभावस्य गुणत्वाभावादल्पार्थो नञिति व्याख्यानम्। तदयुक्तम्। चतुष्टयी शब्दानां प्रवृत्तिरिति नये जातिक्रियाद्रव्यातिरिक्तस्यैव

५६. 'द्वहन' स्थाने 'हन' क मातृकायाम्।
५७. 'त एव' 'क' मातृकायां नास्ति।
५८. 'वैधर्म्येण' 'क' एवं 'ख' मातृकायामित्यधिकम्।

गुणपदेनोपादानात्। अन्यथा अभावादिविरोधस्यासंग्रहेण विभागन्यूनत्वापत्तेरिति ॥९०॥

येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च।
तेषां संगरसङ्गसक्तमनसां राज्ञां त्वया भूपते
पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम्॥

येषामिति। कण्ठपरिग्रहे या प्रणयिता[५९] प्रणयशीलता ताम्। धाराधरः खड्गः तीक्ष्णः तीक्ष्णधारः परुषश्च। अनुरज्यतेऽनुरक्तो भवति। लोहितश्च। स्नेहं प्रीतिं चैक्कण्यं च। पराप्नोति प्राप्नोति। संगरस्य युद्धस्य सङ्गे सक्तं मनो येषां ते। पटलैः समूहैः। प्रसाधनविधिः भूषाविधिः। कौतुकमिति क्रियाविशेषणम्। एतत्कौतुकमिति वा ॥९१॥

सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम्।
अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम्॥

सृजतीति। अवति रक्षति। हेलया अनायासेन सोऽपि जनार्दनः। अवसरवशाच्छफरो मत्स्यो जात इति शेषः ॥९२॥

सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः॥

सततमिति। घटना सम्पादनं तेन कठिनाः कराः। भवति त्वयि सति सरोजवत्सुकुमाराः जाता इति शेषः ॥९३॥

पेलवमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम्।
परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति॥

पेलवमिति। पेलवं कोमलम्। सतत्त्वतत्त्व[६०] शब्दौ पर्यायौ मलयजं चन्दनम् ॥९४॥

क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽसौ यन्मार्गणानर्गलशातपाते।
अभून्नवाम्भोजदलाभिजातः सः भार्गवः सत्यमपूर्वसर्गः॥

क्रौञ्चेति। उद्दामैः उद्भटैः दृषद्भिः पाषाणैर्दृढः। यस्य मार्गणानां वाणानामनर्गलेस[६१] अविच्छिन्ने शाते तीक्ष्णे पतने सति नवाम्भोजदलवदभिजातः कोमलोऽभूत्। भार्गवः परशुरामोऽपूर्वः सर्गः सृष्टिर्यस्य। यत्कर्मको यत्कर्तृको वेति सत्यमित्यन्वयः ॥९५॥

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्।
विवेकप्रद्ध्वंसादुचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते॥

परीति। चतुर्थे व्याख्यातम् ॥९६॥

---

५९. 'प्रणयिता' स्थाने प्रयिता 'ख' मातृकायाम्।

६०. 'सतत्वतत्वशब्दौ' स्थाने सतत शब्दौ 'क' मातृकायाम्।

६१. 'वाणानाम्' 'क' मातृकायां नास्ति।

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः।
इदं को जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः॥

अयमिति। वारां जलानां निलयः स्थानमिति हेतोस्तृष्णाक्रान्तमनोभिरस्माभिर्जलनिधिः श्रित आश्रितः। मुनिरगस्त्यः एनं समुद्रं क्षणादासमन्तात्पास्यतीदं को जानीते इत्यन्वयः। कीदृशं निजा करपुटी[६२]। करसम्पुटं तदेव कोटरं बिलं तद्गतम्। ताम्यन्तः ग्लायन्तस्तिमयो मत्स्या मकराश्च यत्र तादृशम्॥९७॥

समदमतङ्गजमदजलनिष्यन्दतरङ्गिणीपरिष्वङ्गात्।
क्षितितिलक त्वयि तटजुषि शंकरचूडापगापि कालिन्दी॥

समदेति[६३]। हे क्षितितिलक[६४]! त्वयि तटजुषि तीरगते सति शंकरस्य चूडा मस्तकं तद्गता आपगा[६५] गङ्गापि कालिन्दी[६६] भवति। कुतस्तत्राह–समदेत्यादि। मतङ्गजाः करिणः तेषां मदजलनिष्यन्द एव तरङ्गिणी नदी तत्परिष्वङ्गात्सम्बन्धात्। मदजलस्य श्यामवर्णत्वं प्रसिद्धम्॥९८॥

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण॥

पश्चादिति[६७]। शयनादुत्थितस्तुरङ्गोऽश्वश्च भूमिं खुरेण विलिखति[६८]। उत्किरतीत्यन्वयः। अनवरतं चलत्प्रोथो नासिका तुण्डं च यस्य सः। किं कृत्वेत्यत्राह– पश्चादित्यादि। अङ्घ्री चरणौ त्रिकस्य पृष्ठवंशाधरभागस्य नत्या नम्रतया विततं विस्तृतमङ्गं, द्राघयित्वा दीर्घीकृत्य। आभुग्नो वक्रः कण्ठो यस्य तादृशः मुखमुरसि आसज्येति सम्बन्धः। सटाः स्कन्धकेशावलिः। पृष्ठवंशाधरे त्रिकमित्यमरः। प्रोथोऽध्वगेऽश्वघोणायांमिति[६९] विश्वः। अत्राश्वजातिवर्णनात्स्वभावोक्तिरलंकारः॥९९॥

हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते।

---

६२. 'पुटी' स्थाने सम्पुटी 'ख' मातृकायाम्।
६३. 'समदेति' 'क' मातृकायां नास्ति।
६४. 'तिलक' स्थाने 'तलक' 'ख' मातृकायाम्।
६५. 'नदी' 'क' एवं 'ख' मातृकायामधिकम्।
६६. 'यमुना' 'क' एवं 'ख' मातृकायामित्यधिकम्।
६७. 'पश्चादिति' 'क' एवं 'ख' मातृकायामधिकम्।
६८. 'लिखति' 'ख' मातृकायां नास्ति।
६९. 'घोषायामिति' स्थाने श्रोणयामिति 'ख' मातृकायाम्।

यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रिताया: श्रियः

प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥

हित्वेति। हे राजन! त्वां हित्वा परोऽन्यः उपरोधेनानुरोधेन बन्ध्यं शून्यं मनो येषां तादृशानां मौलिः श्रेष्ठो नास्तीति मन्ये। तथा रमां लक्ष्मीमन्तरेण विनाऽन्यत्र लज्जाया[७०] वर्जनमभावो न संदृश्यत इत्यन्वयः। कथं तत्राह-य इत्यादि। यो भवान् मुखशतैरूपायशतैरेत्यागत्येत्यर्थः। त्यागकृतमवमाननं प्राप्यापीति सम्बन्धः। इयं निन्दापूर्विका व्याजस्तुतिः ॥१००॥

हे हेलाजितवोधिसत्त्व वचसां किं विस्तरैस्तोयधे

नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः।

तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-

भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥

हे इति। हेलया जिता बोधिसत्त्वा बौद्धा येन सः। अतिकारुणिकेत्यर्थः। तोयधे समुद्र। परोऽन्यः। तृष्यतां पान्थजनानामुपकारस्य घटनायां सम्पादने वैमुख्येन पराङ्मुखत्वेन लब्धं यदयशः तद्भारस्य प्रोद्वहनेन मरोर्देशस्य कृपया साहायकं करोषीति स्तुतिपूर्विकेयं व्याजस्तुतिर्निन्दापर्यवसायिनी ॥१०१॥

सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः सह मणिवलयैर्बाष्पधारा गलन्ति।

तव सुभग! वियोगे तस्या उद्वेगशीलायाः सह च तनुलतया[७१] दुर्बला जीविताशेति संस्कृतम्।

सहेति। दूत्या नायकं प्रतीयमुक्तिः। श्वासानां घनप्रचुरतया दण्डत्वेन रूपणम्। कार्श्यान्मणिकङ्कणगलनम्। आशाया दुर्बलत्वं कादाचित्कत्वम्। अत्र सहोक्तिरलंकारः ॥१०२॥

अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः।

उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनीः ॥

अरुचिरिति। अरुचिर्दीप्तिशून्यः। शशिना विना सापि निशापि महदुत्कटं तमोऽन्धकार इति रूपकम्। उभयेन चन्द्रनिशाभ्याम्। स्फुरितम्। विलसितम्। चकास्ति शोभते ॥१०३॥

मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः।

अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसुनुः ॥

मृगेति। नरेन्द्रसूनुः राजपुत्रः। विचित्रेषु व्यवहारेषु या प्रतिभायाः स्फूर्तेः प्रभा। प्रकाशस्तेन प्रगल्भः। मृगनयनासक्तस्तु नैवम्भूत इत्यर्थः। अनेन दुष्टप्रकृतिना[७२]।

---

७०. 'लज्जाया वर्जनमभावो' स्थाने लज्कायावनिमभावो 'क' मातृकायाम्।

७१. 'लतया' स्थाने 'लताया' 'क' मातृकायाम्।

७२. 'प्रकृतिना' स्थाने 'प्रतिकृता' 'क' मातृकायाम्।

अमृतद्युतिश्चन्द्रस्तद्वत्सुन्दरः स्वच्छः आशयोऽन्तरःकरणं यस्य। उदाहरणद्वये विनोक्तिरलंकारः। पूर्वत्रान्येन विनाऽशोभनत्वमिह तु शोभनत्वमिति भेदः ॥१०४॥

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्त्वा श्रयति भृशमामोदमसमम्।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम्॥

लतानामिति। अयं मरुद्वायुः। लतानामसममनुपममामोदं परिमलं श्रयतीत्यन्वयः। मतं मनोरमं लास्यं नृत्यं दत्त्वा अर्थात् लताभ्यः। अध्वन्यानां पान्थानाम्। अहह इति खेदे। आधिर्मनःपीडा। व्याधिः प्रसिद्धः। भ्रमिः दिक्‌भ्रमणदर्शको विकारः। रुदितं रोदनम्। मोहो निश्चेष्टता। एषां व्यतिकरं समूहम् ॥१०५॥

नानाविधप्रहरणैर्नृप संप्रहारे स्वीकृत्य दारुणनिनादवतः प्रहारान्।
दृप्तारिवीरविसरेण वसुंधरेयं निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा॥

नानेति। हे नृप! सम्प्रहारे युद्धे प्रहरणैरायुधैर्दारुणशब्दयुक्तान्प्रहारान्स्वीकृत्य दर्पयुक्तेनारिसमूहेनेयं[७३] वसुधा वितीर्णाऽर्थात्तुभ्यम्[७४]। कीदृक् निर्विप्रलम्भो वियोगशून्यः परिरम्भस्यालिङ्गनस्य स्वस्वामिभावसम्बन्धस्येति यावत्। विधिर्यस्यास्तादृशी। अत्रोदाहरणद्वयेऽपि यथायोगमुत्तममध्यमाधमानां विनिमयोक्तेः परिवृत्तिरलंकारः ॥१०६॥

आसीदञ्जनमत्रेति पश्यामि तव लोचने।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम्॥

आसिदिति। भावी भूषणानां सम्भारः समूहो यत्र तथाभूताम्। अत्र भूतभाविनोरञ्जन-भूषणसम्भारयोः प्रत्यक्षतयाभिधानाद्भाविकं नामालंकारः ॥१०७॥

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे नैवाहं क्वचिदपि भवन्तं प्रणतवान्।
नमन्मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिमा-
न्महेश क्षन्तव्यं तदिदमपराधद्वयमपि॥

वपुरिति। हे पुरारे! शिव! पुरा पूर्वस्मिन्क्वचिदपि जन्मनि प्रायो भवन्तमहं न प्रणतवान्। इदं वपुः[७५] प्रादुर्भावादनुमितं प्रणामे सति मुक्तिलाभेन तदसम्भवात्। अतएवाह-सम्प्रति नमन्मुक्तः अतनुः शरीरशून्योऽहमग्रेऽपि। अनतिभाक् नतिरहितः। तत्तस्मात्पूर्वापरकालीना-नमनादिदमपराधद्वयं प्रत्यवायरूपं क्षन्तव्यमित्यपराधहेतो-र्वाक्यार्थभूतस्या नमनस्योपादानात्काव्यलिङ्गालंकारः ॥१०८॥

---

७३. 'नारी' स्थाने 'अरि' 'ख' मातृकायाम्।
७४. 'ऽर्थातुभ्यम्' स्थाने दत्तार्थातुभ्यम् 'ख' मातृकायाम्।
७५. वपुः 'स्थाने' वपुषः 'ख' मातृकायाम्।

प्रणयिसखिसलीलपरिहासरताधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः॥

प्रणयीति। मालतीमाधवे। मालतीं हन्तुमुद्यतमघोरघण्टं कापालिकं प्रति माधवस्योक्तिः। तत्र तस्मिन्वपुषि शस्त्रमुपक्षिपतस्तव शिरसि अकाण्डेऽनवसरे यमदण्ड इवैष मद्भुजः पतत्वित्यन्वयः। तत्किं यद्वपुः प्रणयिनीनां[७६] सलीलं परिहासरसास्तैरधिगतैः प्राप्तैर्ललितशिरीषपुष्पताडनैरपि ताम्यति ग्लायति। अत्र भुजपाते[७८] शस्त्रमुपक्षिपत इत्यनेकपदार्थो हेतुः॥१०९॥

भस्मोद्धूलन, भद्रमस्तु भवते रुद्राक्षमाले, शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालङ्कृतिम्।
अद्याराधनतोषितेन विभुना युष्मत्यसपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे॥

भस्मेति। गिरिसुता कान्तस्य शिवस्यालयः प्रासादस्तदलंकारभूतां सोपानपङ्क्तिं हा शोचामीत्यर्थः। अभितः-इत्यादिना हाशब्दयोगे द्वितीया। युष्माकं या सपर्या पूजा तत्सुखस्यालोकः प्रकाशस्तदुच्छेदके निधीयामहे वयमिति शेषः। अत्र महामोहत्वे सुखालोकोच्छेदकत्वं समस्तपदार्थो हेतुरिति॥११०॥

यं प्रेक्ष्य चिररुढाऽपि निवासप्रीतिरुज्झिता।
मदेनैरावणमुखे मानेन हृदये हरेः॥

यमिति। यं रावणं प्रेक्ष्य मदेनैरावणस्येन्द्रगजस्य मुखे मानेनाभिमानेन च हरेरिन्द्रस्य हृदये चिरेण रुढा वृद्धिं प्राप्तापि निवासप्रीतिरुज्झिता त्यक्तेत्येवं ऐरावतेन्द्रौ यदमानशून्यौ जातावित्यर्थस्य व्यङ्ग्यस्यैव भङ्ग्यन्तरेणाभिधानात्पर्यायोक्तमलंकारः॥१११॥

मुक्ताः केलिविसूत्रहारगलिताः सम्मार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत् त्यागलीलायितम्॥

मुक्ता इति। विदुषां भवनेषु केलौ विसूत्राच्छिन्नसूत्राद्हाराद्गलिताः सम्मार्जनीभिर्हृता अपसारिता अङ्गणसीम्नि मन्थरं[७९] मन्दं चलन्तीनां बालानां वनितानां चरणलाक्षया अरुणा आरक्ता मुक्ताः कर्मभूताः दूराद्दाडिमबीजेषु शङ्किता धीर्येषां ते केलीशुकाः कर्त्तृभूताः

---

७६. 'गय दिम' इति 'क' मातृकायां पाठः।
७७. 'सखीनां' 'ख' मातृकायामित्यधिकम्।
७८. 'शस्त्र' स्थाने 'शास्त्र' 'क' मातृकायाम्।
७९. 'मन्थरं' 'ख' मातृकायां नास्ति।

कर्षन्तीति यत्तद्भोजनृपतेर्दानलीलायितमित्यन्वयः। अत्रोत्कटसमृद्धिवर्णनादुदात्तालंकारः॥११२॥

तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः॥

तदिदमिति। यस्मिन्नरण्ये निवसन्रामो बाहुमात्रसहायो रक्षसां क्षयं चकार तदिदमरण्यमिति महतः श्रीरामस्यारण्योत्कर्षकतया तदङ्गभावादपर उदात्त भेदः॥११३॥

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम्।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथन्नु विरहः सोढव्य इत्थं शठः॥

दुर्वारा इति। मार्गणाः शराः मन्मथसुहृत्कालो वसन्तः। स एव कृतान्तोऽक्षमः क्षमाशून्यः। अथवा कृतान्तो यमोऽक्षमः। अकाले प्राणानपहर्तुमसमर्थ[80] इत्यर्थः। चतुरा विरहविनोदेने कुशलाः। इत्थं सति शठो मर्मभेदी विरहः कथं नु सोढव्य इत्यर्थः। अत्र दुर्वारत्वेनाशोभनानां तादृशैरेव प्रियतमादिभिर्विरहासहत्वरूपकार्ये समुच्चय इति स एवालंकारः। नववयःप्रभृतीनां शोभनत्वेऽपि विरहोद्दीपकत्वेनात्राशोभनत्वं बोध्यम्॥११४॥

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम्।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजन्, त एव तवाङ्कुशाः॥

कुलमिति। भद्रा शोभना। मूर्तिराकृतिः। श्रुतिः शास्त्रश्रवणं वेदो वा। अलं पर्याप्तम्। स्फीता विस्तृता। प्रकृत्या सुभगाः शोभनाः। अयं दृश्यमानो जनः। अमीभिः कुलादिभिः सुतरां[81] गर्वं व्रजति। तव तु त्वङ्कुशाः विनयहेतव इत्यर्थः। अत्र दर्पाख्ये कार्ये शोभनानामेव समुच्चयः॥११५॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे॥

शशीति। स्वाकृतेः शोभनाकृतेः। दुर्गतो दरिद्रः। अत्र शशिनः स्वतः शोभनस्यापि दिवसधूसरत्वादशोभनत्वेन शोभनाशोभनरूपस्य तादृशैरेव कामिनीप्रभृतिभिः[82] समुच्चयः। तदुक्तं वृत्तिकृता–शशिनि धूसरे शल्ये शल्यान्तराणीति। सदसद्योग इत्यस्य सदसद्रूपाणामने–

८०. 'असमर्थ' स्थाने 'समर्थ' 'ख' मातृकायाम्।

८१. 'दर्पम्' 'ख' मातृकायामित्यधिकम्।

८२. 'प्रभृतिभिः' स्थाने 'प्रभृतिः' 'ख' मातृकायाम्।

केषां योग इत्यर्थः, न तु सतोऽसता योग इति। तथा सति सहचराभिन्नत्वरूपार्थदोषेणालंकारत्वा-सम्भवात्। अत एव नृपाङ्गणगतः खल इत्यत्र नृपाङ्गणगतत्वेन शोभनत्वं खलत्वेन चाशोभनत्वमिति समर्थनेऽपि सहचरभिन्नत्वात्तदंशमुपेक्ष्यैवालंकारोदाहरणतया प्रामाणिकैरुक्ता। एवं विशेष्यस्य शोभनत्वं विशेषणस्य त्वशोभनत्वमिति प्रक्रान्तम्। इह त्वन्यथेति प्रक्रमभङ्गोऽप्यत्र ज्ञेयः। ननु दुर्वारा इत्याद्योदाहरणेऽपि कथं न सद्योग इति चेत्। अत्रोच्यते- इह शोभनस्य सतः अशोभनत्वमिति विवक्षा। तत्र त्वशोभनमेवैतदित विवक्षितं न तु शोभनत्वमपीति न सदसद्योगप्रसक्तिः। अत एवात्र मनसि शल्यानीत्युपसंहृतम्। सुन्दरत्वेनान्तः प्रविष्टानामपि व्यथाहेतुत्वात्। तत्र तु सर्वथा दुष्टत्वाभिप्रायेण कथं सोढव्य इतति निरवद्यम्॥११६॥

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च।
प्रखलमुखानि नराधिप, मलिनानि च तानि जातानि॥

विदलितेति। विदलितं खण्डितं सकलानामरीणां कुलं येन तत् बलं सैन्यम्। प्रखलाः[८३] प्रकृष्टखलाः। अत्र विमलत्वमलिनत्वयोर्गुणयोस्तुल्यकालतारूपः समुच्चयश्चकारद्वयगम्यः॥११७॥

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः॥

अयमिति। विक्रमोर्वशीये पुरुरवसो वचनम्। तया प्रियया उर्वश्या। एकपदे एककाले भवितव्यमिति[८४] सम्बन्धः। निरातपत्वेनातपराहित्येन रम्यैरहोभिः दिवसैः कर्तृभिः। अत्रोपगमभवनयोः क्रिययोः समुच्चयः॥११८॥

कलुषं च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः।
पतितं च महीपतीन्द्र, तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥

कलुषमिति। तव चषुः चक्षुः प्रकृत्या श्वेतकमलसदृशकान्ति। अहितेषु शत्रुविषये कलुषं अर्थात्कोपेनारुणं च। तेषां शत्रूणां वपुषि। आपदां कटाक्षैः कर्त्तृभिः पतितं चेति कलुषत्वपतनयोर्गुणक्रिययोः समुच्चयः॥११९॥

श्रोणीभार इति। कुत्वसचिवतां कुचसहितत्वम्। अद्वितीयत्वम्। निरूपमत्वं द्वितीयराहित्यं चैकत्वेनाध्यवसितम्। अत्र तनुतादेरेकैकस्यानेकत्रस्थितैः पर्यायालंकारः। धत्ते वक्ष इत्यत्रापि पूर्वं वक्षसोद्वितीयत्वावगमादलंकारसम्भवो बोध्यः॥१२०॥

नन्वाश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ,
कण्ठेऽधुना वससि वाचि पुनःखलानाम्॥

---

८३. 'प्रखलाः' स्थाने 'प्रकरा' 'ख' मातृकायाम्।

८४. ''भवितव्यं इति सम्बंधः ''स्थाने'' भविमिति सञ्चयाः'' 'ख' मातृकायाम्।

नन्विति। हे कालकूट! विष! उत्तरोत्तरं विशिष्टमुत्कृष्टं पदं यस्यां तादृशी इयमाश्रयस्थितिस्तव केनोपदिष्टेत्यन्वयः। तदेव दर्शयति–प्रागिति। हृदयेऽभ्यन्तरे। अवस इति शेषः। अथानन्तरम्। वृषलक्ष्मणो हरस्य। अधुना पुनरिति सम्बन्धः। अत्रैकस्यैव कालकूटस्यानेकत्रस्थितिम्[८५] ॥१२१॥

बिम्बोष्ठ एव रागस्ते तन्वि, पूर्वमदृश्यत।
अधुना हृदयेऽप्येष मृगशावाक्षि, लक्ष्यते॥

बिम्बोष्ठ एवेति। बिम्बसदृश ओष्ठो बिम्बोष्ठः। ओत्वोष्ठयोरिति पररूपम्। ओष्ठे रागो लौहित्यम्। हृदये तु स्नेहः। अत्र श्लेषेणाभेदाध्यवसायादेको रागपदार्थः क्रमेणानेकत्रोक्तः॥१२२॥

तत्तेषां श्री सहोदररत्नाभरणे हृदयमेकरसम्।
बिम्बाधरे प्रियाणां निवेशितं कुसुमवाणेनेति संस्कृतम्।

तं ताणेति। श्रीसहोदररत्नं कौस्तुभ आभरणं यस्य तस्मिन् श्रीविष्णौ। एकरसमेकतानम्। तत्तेषां पातालवासिनामसुराणामिति चण्डीदासः। हृदयं कुसुमबाणेन प्रियाणां कान्तानां बिम्बसदृशेऽधरे विनिवेशितमित्यनेकत्र स्थितौ प्रयोजकनिर्देशाद्भेदः॥१२३॥

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति।
अथ कथयति मोहहेतुमन्तर्गतमिव हालाहलं विषं तदेव॥

मधुरिमेति। मधुरिम्णा रुचिरं खलानां वचनम्। प्रथमं पृथु बहुलममृतं[८६]प्रकाशयति। अथ विचारानन्तरं तदेव खलवचनं मोहहेतुभूतमन्तर्गतं हालाहलाख्यं विषं कथयति। अहो आश्चर्यम्। अत्रैकस्मिन्खलवचने क्रमेणामृतविषयोः स्थितिरितः पूर्वविपरीतिः पर्यायः॥१२४॥

तद्गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः।
स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषिता-
माश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः॥

तद्गेहमिति[८७]। अयं द्विजः दिवसैः कर्त्तृभिरियतीं भूमिं समृद्धिसीमां समारोपित इत्याश्चर्यम्। तदेव दर्शयति–तद्गेहमिति। तत्पूर्वं दृष्टम्। नताः खर्वात्तभित्तयो यस्य तत्। दिवोऽन्तरिक्षात्। जरती जीर्णा घनाभाः मेघतुल्याः घटाः श्रेणयः। कलं मधुरस्वरम्। अत्रैकस्मिन्द्विजे तद्गेहमन्दिरादीनामनेकेषां क्रमेण स्थितौ दिवसैरिति प्रयोजकनिर्देश इति भेदः॥१२५॥

---

८५. 'क्रमेणा' 'ख' मातृकायामित्यधिकम्।
८६. 'व्यनक्ति' 'ख' मातृकायामित्यधिकम्।
८७. 'तद्गेहमिति' 'क' मातृकायां नास्ति।

यत्रैतालहरीचलाचलदृशो व्यापारयन्ति भ्रवं
यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदाऽऽसां स्मरः॥

यत्रैता इति। यत्र जने एताः कामिन्यः लहरीवच्चलाश्चपला दृशो यासां ताः। अमी अनुभूयमानाः मार्गणाः शराः यत् यस्मात्, तत् तस्मात् स्मरः। आसां कामिनीनामग्रत एव सदा मण्डलीकृतचापं[८८] यथा स्यात्तथा धावतीति सत्यम्। कीदृक् स्मरः। अञ्चिते योजिते शरे प्रेङ्खन् चपलः करो यस्य सः। शासनमाज्ञा तद्धारकः। अत्र पूर्वार्द्धोक्तहेतुना ग्रतस्तादृशमदनधावनस्य साध्यस्य साधनादनुमानालंकारः। प्रयोगस्तु-एताः पुरोधावत्तथाविधमदना मर्मभेदिवाणपातव्याप्यभ्रूव्यापारकत्वादिति बोध्यः ॥१२६॥

महौजसो मानधनाधनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्॥

महौजस इति। धनुर्भृतो धनुर्धरा भटाः तस्य सुयोधनस्य प्रियाणि असुभिः प्राणैः समीहितुं कर्तुं वाञ्छन्तीत्यन्वयः। अत्र महौजः शालित्वेनानाक्रमणीयत्वम्। मानधनत्वेन युद्धे पलायनाभावः। धनपूजितत्वेनोपेक्षाराहित्यम्। सङ्ग्रामे लब्धकीर्त्तित्वेनोत्साहः प्रतापशलित्वं च। असंहतत्वेन सहायानपेक्षत्वम्। अभेदवृत्तित्वेन प्रभुप्रयोजनैकपरत्वं च व्यज्यत इत्युक्तविशेषणानां साभिप्रायत्वात्परिकरालंकारः ॥१२७॥

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंस्थुलाखिलविधिव्यासङ्गभङ्गाकुलः।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तः पुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः॥

शैलेन्द्रेति। शिवो वः युष्मानवताद्रक्षतु। कीदृशः। शैलेन्द्रेण हिमवता प्रतिपाद्यमाना दीयमाना या गिरिजा तद्धस्तस्योपगूढमाश्लेषः। भावे क्तः। तेनोल्लसद्भीरोमाञ्चादिभिर्वि-संस्थुलो व्यग्रश्चासावखिलस्य विधिव्यासङ्गमस्य भङ्गेनाकुलः। ततश्च सात्त्विकभावगोपनाय तुहिनाचलस्य करयोर्हा शैत्यमित्यूचिवान्। हा इति विस्मये। शैलान्तःपुरं च मातृणां ब्राह्म्यादीनां मण्डलं समूहश्च गणाश्च तैरिति विग्रहः। सस्मितं दृष्टः। अत्र सात्त्विकभावस्य रोमाञ्चादेर्हिमवत्करस्पर्शनिमित्तकत्वेन गोपनाद्व्याजोक्तिरलंकारः ॥१२८॥

किमासेव्यं पुंसां सविधमनवधं द्युसरितः
किमेकान्तेध्येयं चरणयुगलं कौस्तुभभृतः।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति॥

---

८८. 'चापं' 'ख' मातृकायां नास्ति।

किमिति। आसेव्यं सेवनीयम्। द्युसरितः गङ्गायाः। सविधं तीरम्। अनवद्यमुत्तमम्। येषु द्युसरित्सविधादिष्वासत्तया। निरवधिर्या विमुक्तिः सायुज्यरूपा तदर्थम्। अत्र सेव्यत्वेनावगतस्यैव गङ्गासविधादेः पुनः कीर्तनमितरपरिसंख्यार्थमिति सैवालंकारः ॥१२९॥

किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम्॥

किमिति। अत्र लोके आर्यैश्चरितमाचरितं सुकृतं पुण्यकर्म दोषो व्यभिचारादिः धिषणा बुद्धिः। अभिमतोत्तरदानादाह–जानातीत्यादि। अत्र व्यवच्छेद्यं वाच्यमिति भेदः ॥१३०॥

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति॥

कौटिल्यमिति। कौटिल्यं कपटं कुञ्चितत्वं च। रागः पक्षपातः रक्तिमा च। काठिन्यं निर्दयत्वं दृढता च। तरलत्वमविचार्यकार्यकारित्वं चपलता च। अत्र हृदयादौ नेति व्यवच्छेदः प्रतीयते। प्रश्नाभावात्पूर्वस्माद्भेदः ॥१३१॥

भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम्॥

भक्तिरिति। भक्तिरासक्तिः। भवे शिवे। व्यसनं रुचिः। युवतिरेव कामास्त्रमिति विग्रहः। अत्र व्यवच्छेद्यं वाच्यमिति विशेषः ॥१३२॥

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः॥

जितेन्द्रियत्वमिति। सप्तमे व्याख्यातम्। पूर्वपूर्वस्योत्तरोत्तरं प्रति हेतुत्वात्कारण-मालालंकारः ॥१३३॥

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः॥

अविरलेति। अविरलं निरन्तरं कमलानां विकासरूप इत्यर्थः। आयुर्घृतमितिवत्कार्य कारणयोरभेदेनाभिधानम्। एवमग्रेऽपि। अयं च हेत्वलंकार इति भट्टोद्भटप्रभृतयः[८९] ॥१३४॥

हंसानां सरोभिः श्रीः सारीक्रियतेऽथ सरसां हंसैः।
अन्योन्यमेवैते आत्मानं केवलं गुरुकुर्वन्तीति संस्कृतम्।

हंसाणेति। श्रीः शोभा सारीकरणं श्रेष्ठतासम्पादनम्। अत्र सरोहंसयोःपरस्परं शोभासारीकरणरूपोपकारजनकत्वादन्योन्यं नामालंकारः ॥१३५॥

वाणिजकहस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च।
यावल्लुलितालकमुखी गृहे परिसर्पति स्नुषेति संस्कृतम्॥

---

८९. 'प्रभृतयः' स्थाने 'मम' 'ख' मातृकायाम्।

वाणिएति। एषा[९०] क्रेतारं वणिजं प्रति जरद्व्याधस्योक्तिः। वणि क्वेति स्वार्थिक कप्रत्ययान्तं सम्बोधनपदम्। कृत्तयश्चर्माणि। लुलिता अलका यत्र तादृशं मुखं यस्या इति विग्रहः। परिसंक्रमते परिभ्रति। तथा च पुत्रस्य स्वकान्तायामासक्ततया हस्तिव्याघ्रहननपाटवाभावादस्मद्गृहे दन्तकृत्तिविरह इति भावः। अत्रोक्तरूपेणोत्तरेण त्वद्गृहे हस्तिदन्तव्याघ्रकृत्तयः सन्तीति क्रेतुः प्रश्नोन्नयनादुत्तरालंकारः ॥१३६॥

का विषमा दैवगतिः किं लब्धं यज्जनो गुणग्राही।

किं सौख्यं सुकलत्रं किं दुःखं यत्खलो लोकः।। इति संस्कृतम्।

केति। स्पष्टम्। अत्र चमत्कृतस्य लोकाप्रसिद्धस्य वोत्तरस्यासकृदुक्तिर्द्वितीयो भेदः ॥१३७॥

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे।

पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख॥

वक्त्रेति। कण्ठे स्थितं कुङ्कुमं वक्त्रात्स्यन्दिभिर्गलद्भिः स्वेदबिन्दूनां प्रबंधैः पङ्क्तिभिर्भिन्नं सभिन्नं दृष्ट्वा कापि वयस्या सखी स्मित्वा हसित्वा तन्व्याः पुंस्त्वं पुरुषायितं व्यञ्जयन्ती सती पाणौ खड्गलेखां लिखितवती। पुंसामेव पाणौ तस्या उचितत्वात्। अत्राकारेण लक्षितं सुबुद्धिवेद्यतया सूक्ष्मं पुरुषायितं पाणौ खड्गलेखनेन प्रकाशितमिति सूक्ष्मालंकारः ॥१३८॥

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।

ईषन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥

सङ्केतेति। विटं जारसङ्केतकाले मनो यस्य तज्जिज्ञासुमित्यर्थः। अत एव हसद्भ्यां नेत्राभ्यामर्पितं सूचितमाकूतं रहस्यं येन तादृशं ज्ञात्वा विदग्धया नायिकया लीलासम्बन्धिपद्मं निमीलितमित्यन्वयः। अत्र नेत्रेङ्गितेन लक्षितः सूक्ष्मोऽभिप्रायः। कामिन्या निशासूचकेन पद्मनिमीलनेन प्रकाशितः ॥१३९॥

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम्।

सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम्॥

राज्य इति। सौधं सुधागृहम्। अनङ्गसर्वस्वमिति रूपकम्। अत्र पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्कर्षश्चरमस्य सर्वोत्कृष्टत्वपर्यवसन्नः सारालंकारः ॥१४०॥

यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम्।

दन्तक्षतं कपोले वध्वा वेदना सपत्नीनामिति संस्कृतम्।

जस्सेअ इति। वेदनेति यज्जनो भणति वदति तदलीकमित्यन्वयः। अत्र वेदनादन्तक्षतयोः कार्यकारणयोर्वैयधिकरण्यरूपाऽसंगतिरलंकारः ॥१४१॥

मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः।

उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम्॥

---

९०. 'एषा' स्थाने 'एषाहि' 'ख' मातृकायाम्।

मानमिति। दिष्ट्या भाग्येन। उदीर्णमुद्गतम्। अत्र घनगर्जितरूपकारणान्तरयोगेन मानापगमरूपकार्यस्य सुकरत्वात्समाधिरलंकार: ॥१४२॥

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रुपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य।
जातं दैवात्सदृशमनयोः सङ्गतं यत्तदेतत्
श्रृंङ्गारस्योपतनमधुना राज्यमेकातपत्रम्॥

धातुरिति। शिल्पं कौशलं तदतिशयस्य निकषस्थानं परीक्षास्थलमिति मृगाक्षीविशेषणम्। रूपे रूपविषये। दत्तपत्र इति विजयायेत्यादिः संगतमिति भावेक्तः समागम इत्यर्थः। दैवादित्यस्य वोपनतमित्यनेनान्वयः। अत्रोचितयोगवर्णनात्समालंकारः ॥१४३॥

चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः॥

चित्रमिति। अत्र चित्रबतशब्दयोर्वीप्सा विस्मयातिशयद्योतनाय। परिणतं पक्वम्। स्फीतिः समृद्धिः। एतस्याः फलसमृद्धेः कवलनकला भक्षणचातुरी तत्र कोविदः पण्डितः[९१]। अत्र द्वयोरपि निकृष्टतयोचितर्योग इति भेदः ॥१४४॥

शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः॥

शिरीषेति। शिरीषात् शिरीषपुष्पात्। कुकूलाग्निः कुम्भकाररचितो घटादिपचनाग्निः। अत्र क्वशब्दोक्तं द्वयोरत्यन्तवैलक्षण्यं विषमालंकारः ॥१४५॥

सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः॥

सिंहिकेति। सिंही[९२] राहुमाता च। तत्सुतः सिंहो राहुश्च जग्रसे कवलितवान्। अत्रेष्टसाधने प्रवृत्तस्य विपरीतानर्थ[९३] प्राप्तिरूपो विषमभेदः ॥१४६॥

सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते॥

सद्य इति। तमालवन्नीला कृपाणस्यलेखा यस्य राज्ञः करस्पर्शमवाप्य सद्यस्तत्कालं रणे रणे प्रतिसङ्ग्रामं शरदिन्दुवत् पाण्डु शुभ्रं यशः प्रसूते। एतत्। चित्रमित्यन्वयः। अत्र कार्यकारणयोर्विरुद्धगुणत्वरूपो[९४] विषमः ॥१४७॥

---

९१. 'पण्डितः' 'ख' मातृकायां नास्ति।
९२. 'कासिंही' 'ख' मातृकायामित्यधिकम्।
९३. 'विपरीतार्थ' स्थाने 'विपरितानर्थ' 'क' मातृकायाम्।
९४. 'विरुद्ध' स्थाने 'विलक्षण' 'क' मातृकायाम्।

आनन्दममन्दमिमं कुवलयदललोचने, ददासि त्वम्।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे॥

आनन्देति। अमन्दमनल्पम्। अत्र कार्यकारणयोरानन्ददानतापनक्रिये विरुद्धे इति चतुर्थो विषमः ॥१४८॥

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये।
मदविभ्रमासकलया पपे पुनः सः पुरस्त्रियैकतमयैकया दृशा।

विपुलेति। सागरे शेत इति सागरशयस्तादृशस्य विष्णोः विपुलेन। विस्मृतेन कुक्षिणा युगक्षये भुवनानि पपिरे पीतानि। स पुनः सोऽपीत्यर्थः। एकतमया कयाचिन्नगरकामिन्या मदेन विभ्रमो विलासो यस्यां सा चासावसकला असम्पूर्णा च तथाभूतयैकया दृशा पपे सादरमवलोकित एव पीत इत्यभेदाध्यवसानम्। अत्रा वयवावयविनोः पानकर्तृकर्मतारूपं वैषम्यमित्याद्यनन्तभेदोऽयं सुधीभिरुहनीयः ॥१४९॥

अहो विशालं भूपाल, भुवनत्रितयोदरम्।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते॥

अहो इति। मातीति अवकाशं लभत इत्यर्थः। अत्र कविविवक्षावशेन महतो यशोराशेराधेयात्तनुरपि त्रिभुवनरूप आधारो महत्त्वेनोक्त इत्यधिकमलंकारः ॥१५०॥

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः॥

युगान्तेति। युगान्तकाले प्रतिसंहृत आत्मा स्वात्मभूतः प्रपञ्चो येन तस्य कैटभद्विषः श्रीविष्णोर्यस्यां तनौ जगन्ति भुवनानि सविकाशं सावकाशमासत उपविशन्ति स्म। तत्र तस्यां तनौ तपोधनस्य नारदस्याभ्यागमसम्भवा मुदः प्रीतयो न ममुर्नावकाशं प्राप्तवत्य[९५] इत्यन्वयः। अत्राधेयानां मुदां महत्त्वोक्तिरित्यपरो भेदः ॥१५१॥

त्वं विनिर्जितमनोभवरुपः सा च सुन्दर, भवत्यनुरक्ता।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः॥

त्वमिति। अनुशयात् द्वेषात्। भवेदनुशयो द्वेषे इति विश्वः। अत्र स्वशत्रुं नायकं जेतुमशक्तेन कामेन तत्प्रतिनिधित्वेन तदीयकामिनीपीडनात्प्रत्यनीकालंकारः ॥१५२॥

यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनाऽपि बाधते॥

यस्येति। यस्य श्रीकृणस्य कायस्य निग्रहो वधस्तेन गृहीतः स्वीकृतो विग्रहो वैरं येन सः। कान्तेत्यत्र यस्येत्यनुषज्यते। कृती वैरनिर्यातने कुशलः। अत्र श्रीकृष्णचन्द्रयोः परम्परया सम्बन्धित्वमिति विशेषः ॥१५३॥

---

९५. 'प्राप्तव्य' स्थाने 'प्राप्ता' 'क' मातृकायाम्।

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम्।
इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते॥

अपाङ्गेति। अपाङ्गस्तरलो ययोस्ते इति विग्रहः। मधुराश्च ते वक्रा वक्रोक्तिसमर्पका वर्णा यासु ता गिर उक्तयः। इति प्रकारेण मृगदृशामङ्गके लीलया कत्र्या स्वतः स्वभावतः स्फुरितम्। तत्तस्मादत्र कृतं पदं स्थानं येन तादृशोऽपि मदस्य मधुपानजन्यस्योदयो न लक्ष्यत इत्यन्वयः। अत्र मदसाधारणैरङ्गस्य स्वाभाविकैरपाङ्गतरलत्वादिचिह्नैर्मदस्य गोपनान्मीलितालंकारः॥१५४॥

ये कन्दरासु निवसन्ति सदा हिमाद्रे-
स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते।
अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः॥

य इति। ते तव ये द्विषस्त्वत्पाते त्वदागमने शङ्किता धीर्येषां तादृशाः सन्तो हिमाद्रेः कन्दरासु निवसन्ति। उद्गतरोमाञ्चं कम्पसहितमङ्गमुद्वहतामपि तेषां भयानां बुधः पण्डितोऽपि नाभिज्ञ इत्यन्वयः। अत्र रोमाञ्चकम्पयोरागन्तुकयोर्भयसाधारणचिह्नयोर्भयतिरोधायकत्वम्[९६] ॥१५५॥

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य॥

पुराणीति। यस्यां दिशि रूपेण परिष्कृतं भूषितमङ्गं यासां ताः विलासाः कुसुमायुधस्यास्त्रमिति रूपकम्। अत्र पूर्वपूर्वस्मिन् उत्तरोत्तरविधानरूपैकावल्यलंकारः॥१५६॥

न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं पद्मदलीनषट्पदम्।
न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहार यन्मनः॥

न तज्जलमिति। न लीनः षट्पदो भ्रमरो यत्र तत्। कलं कलस्वरयुतं यथा स्यात्। अत्र तादृशनिषेधरूपैकावली॥१५७॥

निम्नानाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः।
तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम्॥

निम्नेति। चलदृशां गम्भीरनाभिविलेषु लहरीभिर्जलक्रीडायां यदम्भः प्लावितं संचारितं तद्भवैः कुहुरुतैः कुहुकुहुशब्दैः सुरनार्योऽप्सरसः सुरतसम्बन्धिकण्ठरुतानां स्मारिता इति कर्मणि षष्ठी। अत्र सदृशदर्शनजन्यं स्मरणमलंकारः॥१५८॥

---

९६. 'रागन्तुकयो' 'ख' मातृकायां नास्ति।

करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य[९७]।

संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चमिति संस्कृतम्।।

करजुएति। स्तनयोर्मुखमिति विग्रहः। पाञ्चजन्यः श्रीकृष्णस्य शङ्खः। अत्र जन्मान्तरानुभूतस्मरणमिति भेदः ॥१५९॥

कपाले मार्जारः पय इति करान् लेढि शशिनः

तरुच्छिद्रप्रोतान् बिसमिति करी संकलयति।

रतान्ते तल्पस्थान् हरति वनिताऽप्यंशुकमिति

प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति॥

कपाल इति[९८]। सर्वत्रेति शब्दोत्तरं बुध्येति शेषो बोध्यः। कपाले स्थितानिति शेषः। लेढि आस्वादयति। तरुणां छिद्रेषु प्रोतान्प्रविष्टान्। संकलयति गृह्णाति रतान्ते हरतीति सम्बन्धः। प्रभया मत्तस्तदतिशयशाली। अत्र सदृशदर्शनजन्या भ्रान्तिरलंकारः ॥१६०॥

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां

देव, त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा।

इन्दुः किं घटितः किमेष विहितः पूषां किमुत्पादितं

चिन्तारत्नमदो मुधैव किममी सृष्टाः कुलक्ष्माभृतः॥

लावण्येति। ओको गृहम्। गरिमा गौरवम्। त्यागिनां दातृणामग्रेसरेऽग्रगण्ये। अवनीभरे क्षमः। समर्थो भुजो यस्यैवम्भूते त्वयि वेधसा निष्पादिते सति। किं किमर्थमित्यर्थः। पूषा सूर्यः। चिन्तारत्नं चिन्तामणिः। मुधैव वृथैव। कुलक्ष्माभृतः कुलपर्वताः। अत्रोपमानाक्षेपरूपं प्रतीपमलंकारः। यथासंख्यसत्त्वेऽप्याक्षेपप्राधान्यात्तदुदाहरणत्वम्[९९] ॥१६१॥

अये एहि तावत्सुन्दरी कर्णं दत्त्वा श्रृणुष्व वचनीयम्।

तव मुखेन कृशोदरि चन्द्र उपमीयते[१००] जनेनेति संस्कृतम्॥

ए एहीति[१०१]। वचनीयम् निन्दितम्। अत्रोपमानस्योपमेयत्वकल्पनमपरं प्रतीपम् ॥१६२॥

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे।

सन्तीदृशानि दिशि दिशि सरःसु ननु नलीननलिनानि॥

गर्वमिति। असम्वाह्यं सम्वहनायोग्यम्। अपरिमितमिति यावत्। भद्रे शोभने। पूर्वत्र वचनीयत्वोक्त्या उपमितेरपर्यवसानमिह तु निष्पन्ना सा तिरस्कारहेतुरिति भेदः ॥१६३॥

अहमेव गुरुः सुदारुणानामिति हालाहल, तात, मास्म दृप्यः।

ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम्॥

---

९७. 'कप्यश्रकमिति प्रभात्तमश्चन्द्री जगदि दमहो लेति' इति 'क' मातृकायामधिकम्।

९८. 'कपाल इति' 'क' मातृकायां नास्ति।

९९. 'गर्वमिति' 'ख' मातृकायामित्यधिकम्।

१००. 'उपमीयते' स्थाने 'उपते' 'ख' मातृकायाम्।

१०१. 'अपिसहिति' 'ख' मातृकायामित्यधिकम्।

अहमेवेति। तातेति सानुकम्पसम्बोधने। तातोऽनुकम्प्ये जनके इति विश्वः। मा स्म दृप्यः गर्वं मा कृथाः। अत्र निरूपमत्वेन गर्वायमाणस्योपमानताकल्पनरूपं प्रतीपम्॥१६४॥

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः॥

मलयजेति। मलयजं चन्दनम्। सिततरं शुभ्रतरं दन्तपत्रं दन्तनिर्मितं ताटङ्कम् तेन कृता वक्रेरुक् दीप्तिर्यासां ताः। विस्तृतं धाम तेजो यस्य तस्मिन् धरां पृथ्वीं धवलयति सति अविभाव्यतामलक्ष्यताम्। अत्र प्रस्तुताप्रस्तुतयोरभिसारिकाचन्द्रिकयोर्वैवक्षिकगुणसाम्येनै-कात्मता। वर्णनात्सामान्यमलङ्कारः॥१६५॥

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि।
भृङ्गाः सहेलं यदि नापतिष्यन् कोऽवेदयिष्यन्नवचम्पकानि॥

वेत्रेति। वेत्रत्वचः पीतवर्णतयोपमानता। कर्णाग्रतः कर्णाग्रात्। गण्डतले आगतानीति नीलवर्णकेशसान्निध्यप्रयुक्ताभिव्यक्तिवारणाय। भृङ्गा भ्रमराः क्रोऽवेदयिष्यत् अज्ञास्यत्। भृङ्गपातेन लक्षितानीत्यर्थः। अत्रोत्तरकाले विवेकेन पूर्वमेकात्मताप्रतीत्युन्नयना-दुदाहरणत्वम्॥१६६॥

दिवमप्युपयातानामाकल्पगुणगणा येषाम्।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः॥

दिवमपीति। दिवं स्वर्गम्। आकल्पं कल्पपर्यन्तम्। अनल्पेति गिरां विशेषणम्। येषां गिरो जगन्ति रमयन्तीति सम्बन्धः। अत्र कविरुपप्रसिद्धाधारं विनाधेयभूतानां गिरामवस्थितिवर्णनादेको विशेषालंकारः॥१६७॥

सा वसति तव हृदये सैवाक्ष्णोः सा च वचनेषु।
अस्मादृशीनां सुन्दराavकाशो नास्ति पापानामिति संस्कृतम्।

सेति। चकारोऽवधारणे। सैवेत्यर्थः। अत्रैकस्याः कामिन्या एकरूपेण युगपदनेकत्रस्थिति वर्णनादपरो भेदः॥१६८॥

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजताऽनवद्यविद्यम्।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च॥

स्फुरदिति। हे राजन्! त्वां सृजता विधिना भुवि नवो मनोभवादिः ससृज इति सत्यमित्यन्वयः। एतदेवोपपादयितुं यथा क्रमं विशिनष्टि–स्फुरदित्यादि। अत्रैकं कार्यं कुर्वता तेनैव यत्नेनाशक्यकार्यान्तरकरणातृतीयो भेदः॥१६९॥

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना हरता त्वां बत किं न मे हृतम्॥

गृहिणीति। इन्दुमतीं शोचतोऽजस्येयमुक्तिः। मिथो रहसि ललिते कामकलाविधौ विषये प्रियभूता शिष्या। मिथोऽन्योन्यं रहस्यपीत्यमरः। अत्र सचिवादिसर्वहरणरूप-कार्यान्तरकरणं व्यङ्ग्यमिति भेदः ॥१७० ॥

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥

विभिन्नेति। माघे रैवतकवर्णनम्। गरुडस्याग्रजेनारूणेन विभिन्नवर्णाः सूर्यस्य रथ्या अश्वाः। यत्र रैवतकगिरौ। वंशाङ्कुरवन्नीलै रत्नैः परितः स्फुरन्त्या रुचा कान्त्या स्वां रुचिं नीलद्युतिमानिन्यिरे आनीता इत्यन्वयः। गरुडाग्रजेन परितः स्फुरन्त्या रुचा विभिन्न वर्णा इति वा। अत्राश्वानां स्वीयगुणत्यागेनाप्रस्तुतारुणगुणानुहरणवर्णनात्तद्गुणालंकारः ॥१७१ ॥

धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम्।
रागभरितेऽपि हृदये सुभग निहितो न रक्तोऽसीति ॥ संस्कृतम्।

धवल इति। धवलो निर्मलः श्वेतश्च। रागो लौहित्यमनुरागश्च। धवलपदस्य वृषभपरत्वमपि केचिदाहुः। अत्रोत्तरार्द्धेऽप्रस्तुतेन गायकेन निवेदनीयवृत्तान्ततया प्रकृतस्य हृदयस्य[१०२] गुणाननुहरणादतद्गुणोऽलंकारः ॥१७२ ॥

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः।
राजहंस, तव सैव शुभ्रता चीयते न च न चापचीयते ॥

गाङ्गमिति। यमुनासम्बन्धि यामुनम्। अम्बु जलं न चीयते न वर्द्धते। नापचीयते। नापक्षीयते। अत्र प्रस्तुतेन हंसेनाप्रस्तुतगुणाननुहरणाद्भेदः ॥१७३ ॥

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरुपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥

दृशेति। विरुपाक्षः शिवः। अत्र हरेण दृशा दग्धस्य कामस्य हरजिगीषुभिः कामिनीभिर्दाहहेतुभूतया दृशैव तद्विपरीतजीवनसम्पादनात् व्याघातोऽलंकारः ॥१७४ ॥

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशाऽन्यया ॥

वदनेति। माघे ऋतुवर्णने पद्यमिदम्। अन्यया कयापि वनितया चलितया कलस्वरो मेखलायाः काञ्च्याः कलकलः कोलाहलो विदधे। किम्भूतया। वदनसौरभलोभेन परिभ्रमतां भ्रमराणां सम्भ्रमेण त्वराविशेषेण सम्भृता समृद्धा शोभा यस्याः सा। अलका लोला यस्यां तादृशी दृक् यस्यास्तथाभूतयेति। अत्रानुप्रासयमकयोः परस्परनिरपेक्षयोर्योगात्संसृष्टिः ॥१७५ ॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥

लिम्पतीति। व्याख्यातम्। अत्रोत्प्रेक्षोपमयोः संसृष्टिः ॥१७६ ॥

---

१०२. 'हृदयस्य' 'ख' मातृकायां नास्ति।

स नास्त्यत्र ग्रामे य एतां स्फुरल्लावण्याम्।
तरुणानां हृदयलुण्ठनं परिसर्णन्क्रामंतीं निवारयतीति संस्कृतम्।

सो णत्थीति। हृदयलुण्ठनमिति रुपकम्। आयुर्घृतमितिवत्। पूर्वार्द्धे त्वनुप्रासः। एवं च शब्दार्थालंकारयोः संसृष्टिरियम्॥१७७॥

आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते।
शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन् गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति॥

आत्त इति। हे राजन्! अरण्ये इत्वरीणां भयादितस्ततो गमनशीलानां त्वदरिमृगदृशां सीमन्तरत्ने शिरोभूषणे आत्ते गृहीते। मरकतमणिशालिनि हेम्नस्ताटङ्कपत्रे कर्णाभरणेऽपहृते। मेखलायां लुप्तायामाच्छिन्नायाम्। मणिघटिते तुलाकोटियुग्मे नूपूरयुगले झटिति गृहीते च सति। बिम्बसदृशौष्ठकान्त्या शोणमारक्तं मुक्ताहारं गुञ्जाफलानां स्रज इति बुध्या शबरा व्याधानैव हरन्तीत्यन्वयः। अत्र बिम्बोष्ठकान्त्या शोणमिति तद्गुणालंकारस्य गुञ्जाफलभ्रान्त्यलंकाराङ्गत्वात्तयोरङ्गाङ्गिभावलक्षणः संकरः१७८॥

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः।
परिप्रेङ्खत्तारापरिकरकपालाङ्कितत्तले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति॥

जटेति। शशी पितृवने श्मशान इव व्योम्नि आकाशे चरति संचरतीत्यन्वयः। कीदृशः जटाभाभिर्जटासदृशीभिर्भाभिः किरणैरुपलक्षितः। करे धृतं कलङ्क एवाक्षवलयं रुद्राक्षवलयं येन सः। करो रश्मिः पाणिश्च। वियोक्तुं शीलं येषां ते वियोगिनो विषया विरहिणश्च तेषां व्यापत्तेर्नाशादिव कलितं स्वीकृतं यद्वैराग्यं प्रसिद्धं विगतरक्तिमत्वं च तेन विशदः पाण्डुरः शुद्धचित्तश्च। भस्मेवापाण्डुरः भस्मना आपाण्डुश्च। कीदृशे व्योम्नि। परिप्रेङ्खन् चपलो यस्ताराणां परिकरः समूहः स एव कपालानि तैरङ्कितं चिह्नितं तलं यस्य तादृशे। तलपदं स्वरुपार्थकम्। अधःस्वरुपयोरस्त्री तलमित्यमरात्। अत्रोपमारुपकोत्प्रेक्षाश्लेषाणामङ्गाङ्गिभावः सुधीभिरुहनीयः। महाव्रतिवृत्तान्तस्य चन्द्रवृत्तान्ते समारोपात्समासोक्तिः[१०३] प्रधानभूतेति ज्ञेयम्॥१७८॥

राजति तटीयमभिहतदानवरासाऽतिपातिसारावनदा।
गजता च यूथमविरतदानवरा साऽतिपाति सारा वनदा॥

राजतीति। इयं तटी स्थली राजतीत्यन्वयः। किम्भूता। अभिहतोऽभिघातं प्राप्तः दानवानां

---

१०३. अधः स्वरूपयोरस्त्रीतलमित्यमरात्। अत्रोपमारूपं कोत्प्रेक्षा श्लेषाणामङ्गाङ्गिभावः सुधीभिरुहनीय प्रहाव इति 'ख' मातृकायामधिकम्।

रासः सिंहनादो यस्यां सा। अतिपाती[१०४] वेगवान्। सारावः सशब्दो नदो यस्यां तथाभूता। एवं सा प्रसिद्धा गजता गजसमूहश्च। यूथं कुलमतिशयेन पाति रक्षति। कीदृशी। अविरतेन दानेन मदजलेन[१०५] वरा श्रेष्ठा। सारा स्थिरा। वनदा वनखण्डिका। अत्र यमकानुलोमविलोमयोः संकरः ॥१८०॥

यथा गम्भीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः।
तत्किं विधिनैष सुरसपानीयो जलनिधिर्न कृतः इति संस्कृतम्॥

जहेति। रत्ननिर्भरः रत्नपूर्णः। अत्र समासोक्त्यप्रस्तुतप्रशंसयोः सन्देहरूप संकरः। एकसाधकापरबाधकप्रमाणाभावात्॥१८१॥

नयनानन्ददायीन्दोर्बिम्बमेतत्प्रसीदति।
अधुनापि निरुद्धाशमविशीर्णमिदन्तमः॥

नयनेति। नयनानामानन्ददानशीलमेतदिन्दोर्बिम्बं प्रसीदति प्रकटीभवति। निरुद्धा आशा दिशो येनेति तमसो विशेषणम्। अत्र रुपकातिशयोक्त्यादीनां बहूनां सन्देह इति भेदः॥१८२॥

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्ब-
विस्तीर्णकर्णिकमथो दिवसारविन्दम्।
शिलष्टाष्टदिग्दलकलापमुखावतार-
बद्धान्धकारमधुपावलिः संचुकोच॥

स्पष्टेति। अथोऽनन्तरं दिवसरूपमरविन्दं कमलं संचुकोच संकोचं प्राप्तमित्यन्वयः। कीदृशम्। स्पष्टमुल्लसन्तः किरणा एव केसराणि यस्यास्तथाभूता सूर्यबिम्बमेव विस्तीर्णा कर्णिका केसरो यस्य तत्। तथा शिलष्टाः प्रकाशाभावेन परस्परं मिलिता अष्टदिश एव दलानां कलापः समूहः। तत्र सुखेनावतारो यस्य स चासौ बद्धान्धकारश्च। स एव मधुपाबलिर्यत्र तादृशम्। अत्र रूपकानुप्रासयोरेकपदानुप्रवेशरूपः संकरः॥१८३॥

चक्री चक्रारपङ्क्तिं हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजाग्रा-
नक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः।
रहःसङ्घः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः॥

चक्रीति। सः अहिमरुचेः सूर्यस्य स्यन्दनो रथः। वः। अवतात् रक्षतु। स कः। जगतामुपकृतये नित्ययुक्तस्य यस्य चक्रारपङ्क्तिं चक्रगतानामराणां कीलानां पङ्क्तिं चक्री विष्णुः। अन्वहं प्रतिदिनं प्रीत्या। प्रसन्नः सन्स्तौति। एवमग्रेऽपि कर्त्तृकर्मभावेनान्वयो बोध्यः। हरिरिन्द्रः। हरीनश्वान्। धूः रथमुखम्। तद्गतान्ध्वजाग्रान्। धूः स्त्री क्लीवे यानमुखमित्यमरः। अक्षं चक्रम्। नक्षत्रनाथश्चन्द्रः। अरुणं सारथिम्। कूबरांग्र युगं धराग्रहम्। रंहः वेगम्।

१०४. 'अतिपाती वेगवान्। सारावः स शब्दो नदी यस्या' इति 'ख' मातृकायां बारं द्वयम्।
१०५. 'मदजलेन' 'ख' मातृकायां नास्ति।
१०६. 'प्राप्त व' इति यावदेव क मातृकायामुपलब्धाः।

सुराणां सङ्घ इत्यन्वयः। अत्र च त्रयादीनां कर्तृकर्मणां नियततया निबद्धस्य स्तव्यस्तावकभावस्येतिहासादिषु प्रसिद्ध्यभावोऽनुप्रासदोषः ॥१८४॥

भण तरुणि, रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।
यदि सल्लीलोल्लापिनि गच्छसि तत् किं त्वदीयं मे॥
अनणु रणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥

भणेति। पद्यद्वयात्मकं युग्मम्। हे तरुणि! यदि रमणस्य मन्दिरं गच्छसि। तत्तदा त्वदीयं परिसरणं गमनम्। मे मम। अकारणं निमित्तं विना रणरणकम्। उत्कण्ठाम्। किं कुतः कुरुते। तत् भण वदेत्यन्वयः। रमणमन्दिरं रतिमन्दिरमिति वार्थः। आनन्दस्यन्दी सुन्दरो य इन्दुः स एव मुखं यस्यास्तथाभूते। सतीर्लीला उल्लासयितुं शीलं यस्याः। उल्लापिनीति पाठे सतीभिर्लीलाभिरुल्लपितुं शीलं यस्या इत्यर्थः। अरुणौ रक्तौ चरणौ यस्यास्तथाभूते। कीदृक् परिसरणम्। अनणु अनल्पम्। रणन्ति मणिमेखला यत्र तत्। अविरतं सिञ्जानं शब्दायमानं मञ्जु सुन्दरं मञ्जीरं नूपुरं यत्र तादृशम्। अत्रार्थस्याऽचमत्कृतत्वाद्वैफल्य-मनुप्रासदोषः ॥१८५॥

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि, माम्।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्त्तिमुद्धर॥

अकुण्ठेति। सप्तमे व्याख्यातम्। अत्र माधुर्यव्यञ्जकवृत्तिविरोधोऽनुप्रासदोषः ॥१८६॥

भुजङ्गमस्येव मणिः सदम्भा ग्राहावकीर्णेव नदी सदम्भाः।
दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रसभं सदम्भाः॥

भुजङ्गेति। सदम्भाः दम्भयुक्ताः खलाः स्वीयां दुरन्ततां परिणामदुष्टतां निश्चितवतोऽपि जन्तोश्चेतः प्रमुखे आपाततः कर्षन्तीत्यन्वयः। प्रसभमिति वा पाठः। क इव सत् विद्यमान-मम्भस्तेजोविशेषो यत्र तादृशो भुजंगमस्य मणिरिव। तथा ग्राहैरवकीर्णा व्याप्ता सत्समीचीनमम्भ उदकं यस्यास्तथाभूता नदीवेत्युपमाद्वयम्। अत्र यमकस्य पादत्रयमात्रगतत्वं दोषः। तथा कविभिरप्रयोगात् ॥१८७॥

अयं पद्मासनासीनश्चक्रवाको विराजते।
युगादौ भगवान्वेधा विनिर्मित्सुरिव प्रजाः॥

अयमिति। पद्मेवासनं तत्रासीनः उपविष्टः युगादौ प्रजा विनिर्मित्सुर्निर्मातुमिच्छुर्भगवान् स्रष्टा ब्रह्मेवेति जात्योपमानमधिकम् ॥१८८॥

पातालमिव ते नाभिः स्तनौ क्षितिधरोपमौ।
वेणीदण्डः पुनरयं कालिन्दीपातसन्निभः॥

पातालमिति। कालिन्दीपातो यमुनाप्रवाहः। अत्र परिमाणत उपमानाधिक्यम् ॥१८९॥

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन्।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान्॥

स मुनिरिति। मौञ्ज्या लाञ्छितश्चिह्नितः। कृष्णाजिनरूपं पटं वहन् स मुनिर्नारदः। नीलेन जीमूतभागेन मेघखण्डेनाश्लिष्टोऽशुमानिव व्यराजदित्यन्वयः। अत्र मौञ्जीस्थानीयः तडिद्रूपो धर्मो नोक्त इति धर्मन्यूनतादोषः ॥१९०॥

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराय कृष्णः।
शतह्रदेन्द्रा युधवान्निशायां संसृज्यमानः शशिनेव मेघः॥

स इति। पीतवर्णं वासो वस्त्रं यस्य सः। प्रगृहीतं शार्ङ्गं धनुर्येन स श्रीकृष्णः। मनोज्ञं सुन्दरं तद्भीमं वपुराप प्राप। क इव। शतह्रदा विद्युत् इन्द्रायुधमिन्द्रधनुश्च तद्वान निशायां शशिना संसृज्यमानो मेघ इव। अत्रोपमेये शंखस्यानुक्तेस्तत्स्थानीयस्य चन्द्रस्योपमाने ग्रहणमधिकमिति धर्माधिक्यं दोषः ॥१९१॥

चिन्तारत्नमिव च्युतोऽपि करतो धिङ् मन्दभाग्यस्य मे॥

चिन्तारत्नमित्यादि। पद्यखण्डानि स्पष्टार्थानि। तत्राद्यद्वये क्रमेण लिङ्गवचनभेदो दोषः। अन्त्ये लिङ्गभेदस्यादोषत्वम् ॥१९२॥

तद्वेषो ददृशेऽन्याभिः स्त्रीभिर्मधुरताभृतः।
दधते स्म परां शोभां तदीया विभ्रमा इव॥

तद्वेष इति। तस्याः प्रकृतनायिकाया वेषः भूषणाम्बरादिधारणपरिपाटी तदीयाविभ्रमा विलासा इव परां शोभां दधते स्म। कीदृशः? अन्याभिः स्त्रीभिरसदृशः। विभ्रमपक्षे सदृक्शब्दस्य बहुवचनम्। मधुरतया भृतः पूर्णः। पक्षे मधुरतां विभ्रतीति तथाभूताः दधतित्येकवचनं बहुवचनसाधारणमतो नात्र वचनभेदो दोषः ॥१९३॥

अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती।
पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना॥

अतिथिमिति। काकुत्स्थाद्राज्ञः कुमुद्वती तत्पत्नी अतिथिं नाम पुत्रमाप प्रासवती। का कस्मात्कमिव। पश्चिमाच्चरमाद्यामिन्या निशाया यामाच्चेतना चैतन्यं प्रसादमुद्बोधमिवेत्यर्थः। अत्र यथा चेतना प्रसादं प्राप्नोति तथा सा पुत्रमापेति कालभेददोषः ॥१९४॥

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः कौसुम्भरागरुचिरस्फुरदंशुकान्ता।
विभ्राजसे मकरकेतनमर्चयन्ती बालप्रवालविटपप्रभवा लतेव॥

प्रत्यग्रेति। प्रत्यग्रमचिरकृतं मज्जनं स्नानमासेचनं च। तेन विशेषतः विविक्ता शुद्धा मूर्तिः शरीरं यस्याः सा। कौसुम्भेन रागेण रुचिरः स्फुरन्नंशुकस्यान्तः प्रान्तो यस्यास्तादृशी। पक्षे कुसुम्भमेव कौसुम्भं पुष्पम्। स्वार्थेऽण्प्रत्ययस्तद्वत। रागो लौहित्यं तेन रुचिरा चासौ। स्फुरद्भिरंशुभिः पुष्पधूलिभिः[१०७] कान्ता रमणीया। मकरकेतनं काममर्चयन्ती त्वं बालाः प्रवालाः पल्लवा यस्य तादृशः विटपः शाखा सम्भव उत्पत्तिस्थानं यस्याः सा लतेव विभ्राजसे शोभसे इत्यन्वयः। अत्र लता विभ्राजते त्वं विभ्राजसे इति प्रथममध्यमरूपपुरुषभेदः ॥१९५॥

---

१०७. 'पुष्प धूलिभिः' 'ख' मातृकायां नास्ति।

निपेतुरास्यादिव तस्य दीप्ताः शरा धुनर्मण्डलमध्यभाजः।

जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात्॥

निपेतुरिति। धनुर्मण्डलमध्यगतस्य तस्य आस्यादिव दीप्ताः शरा निपेतुः दिनार्धभाजः परिवेषशालिनोऽर्कात्सूर्याज्जाज्वल्यमाना वारिधारा इवेत्युपमानाप्रसिद्धिदोषः ॥१९६॥

उद्ययाविति। दीर्घिका वापी तन्मध्यात्। मुकुलरूपं मेचकोत्पलं नीलोत्पलमुद्गतम्। नारीलोचनचातुर्यस्य यथाशब्दस्यावाचकत्वदोषः ॥१९७॥

दिवाकराद्रक्षति यो गुहासु लीनं दिवा भीतमिवान्धकारम्।

क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव॥

दिवाकरादिति। यो गिरिः दिवा दिवसे। दिवाकरात् सूर्यात् भीतम्। अत एव गुहासु लीनमन्धकारं रक्षति। अर्थान्तरं न्यस्यति-नूनं निश्चितं क्षुद्रेऽपि शरणं प्राप्ते उच्चैः शिरो येषां तादृशानां महतामतीव ममत्वं भवतीतिशेषः अत्रोत्प्रेक्षाविषयस्य तमसो भयस्यालीकतया तन्मूलस्यार्थान्तरन्यासस्य निर्विषयत्वं दोषः ॥१९८॥

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया।

अतनुमानपरिग्रहया स्थितं रुचिरया चिरयापि दिनश्रिया॥

स्पृशतीति। तिग्मरुचौ सूर्ये करैः ककुभो दिशः स्पृशति सति विजृम्भिततापया विवृद्धतापया दयितयेव दिनश्रिया ग्रीष्मदिनशोभया अतनुर्दीर्घो मानपरिग्रहो यस्यास्तथाभूतया स्थितमित्यन्वयः। किम्भूतया? चिरयापि चिरकालीनयापि रुचिरया मनोरमया। करा रश्मयः हस्ताश्च। ताप उष्णता खेदश्च। मानोऽभिमानः मानं परिमाणं च। अत्र समासोक्तौ श्लिष्ट-विशेषणबलात् लिङ्गवशेन[१०८] च तिग्मरुचेर्नायकतया ककुभां च नायिकात्वेनाभिव्यक्तिव-द्दिनश्रियोऽपि प्रतिनायिकात्वेनाभिव्यक्तिसम्भवात्। दयितयेत्युपुष्टार्थम् ॥१९९॥

स्वयं च पल्लवाताम्रभास्वत्करविराजिता।

प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा॥

स्वयं चेति। नवमे व्याख्यातम्। अत्र प्रभातसन्ध्याया अनुक्तौ न स्फुटा प्रतीतिरित्य-दोषः ॥२००॥

आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते

मध्येवारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम्।

खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां

धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम्॥

आहूतेष्विति। विहायसा गच्छन्तीति विहंगमाः पक्षिणस्तेष्वाहूतेषु पुरोऽग्रे आयात् नागच्छन् मशको न वार्यते, तस्यापि विहंगमत्वात्। मध्येवारिधि वारिधेर्मध्ये वा वसन्निति

---

१०८. 'लिङ्गवशेन च तिरुचेनार्यग्मकतया ककुभा च नायिकात्वेनाभिव्यक्तिवद्दिना श्रेयोऽपि प्रतिनायिका-त्वेनाभिव्यक्किसम्भवात्। दयितयेत्य' इति 'ख' मातृकायां नास्ति।

यङ्लुकि रूपम्। निवसन्नित्यर्थः तादृशस्तृणमणिर्महतां[१०९] मणीनां रूचं धत्ते। तृणाकर्षको मणिविशेषस्तृणमणिरिति केचित्। क्षुद्रमणिरित्यन्ये खद्योतोऽपि तेजस्विनामपि मध्ये प्रचलितुं गन्तुं न कम्पते न विभेति। अतोऽचेतनं विवेकशून्यम्। अत एवानामृष्टमना-लोचितं तत्त्वान्तरं स्वरूपतारतम्यं येन तत्सामान्यं साम्यं विहंगत्वादिरूपं धिक्। कमिव? तादृशं प्रभुमिवेति। अत्र तादृशं सामान्यं धिगित्येतावतैवाविवेकिनः प्रभोरवगतिसम्भवात् पुनस्तदुक्तिरयक्तेत्य-पुष्टार्थत्वमप्रस्तुतप्रशंसायां दोषः ॥२०१॥

एवमन्येऽप्येवंविधा यथासम्भवमलङ्कारदोषा उक्तरीत्या पूर्वोक्तदोषेष्वन्तर्भवन्तीति पूर्णमिदमुदाहरणविवरणं विद्वांसो विदां-कुर्वन्तु।

नवघनकान्तिकलापं नमत मुकुन्दं कलालापम्।
अनल्पकविकल्पिताखिलसदर्थमञ्जूषिकां
सदन्वयविबोधिकां विबुधसंशयोच्छेदिकाम्।
उदाहरणयोजनाजननसज्जनाह्लादिका-
मुदाहरणचन्द्रिकां भजत वैद्यनाथोदिताम्॥
वियद्वेदमुनिक्ष्माभिर्मितेऽशब्दे कार्तिके सिते।
बुधाष्टम्यामिमं ग्रन्थं वैद्यनाथोभ्यपूरयत्[११०]॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञधर्मशास्त्रपारावारीणतत्सद्विट्ठलमदात्मज-श्रीराम भट्टसूरिसूनुना वैद्यनाथेन रचितायां काव्यप्रकाशोदाहरणविवृतावुदाहरणचन्द्रिकाख्यायां दशमोल्लासः सम्पूर्णः।

॥ श्री साम्बशिवार्पण-मस्तु ॥

॥समाप्तश्चाऽयं ग्रन्थः॥

---

१०९. 'महतां मणीनां रुचं धत्ते तृणाकर्षको मणिविशेषस्तृणमणि' इति 'ख' मातृकायां नास्ति।

११०. **दुर्वारा इति**- तत्सत्त्वेऽपि पतिसन्निध्ये स्मरमार्गणाः सोढव्या एवेत्यत आह-प्रियतम इति। तर्हि मन एवानुत्कण्ठितं कुर्वित्यत आह-मन इति। अनिवार्यमित्यर्थः प्रेमत्यागेनैव निवारणं शक्यमित्यत्राह।
गाढमिति- प्रेमसत्वेऽपि यौवननिवृतावत्कण्ठानिवृत्तिरित्यत आह-नवमिति। तर्हि मर्तुमेव चेष्टाग्रतामित्यत्राह-अतिकठिना इति तर्हि विषभक्षणादीनामियतां व्यभिचारो वा क्रियतामित्यन्तमाह।
कुलमिति। आत्महत्यया व्यभिचारेण वा कुला कलङ्कः स्यादित्यर्थः। तर्हि धैर्यमेवावलम्ब्यतामित्यत्राह-स्त्रीत्वमिति कालविशेषे स्त्रीणामपि धैर्यं स्यादित्यत्राह॥
मन्मथेति। वसन्त इत्यर्थः। दैवानुकल्पे सर्वमिदमकिञ्चित्करमित्यमाह॥
कृतान्त इति। कृतान्तौ दैवं अक्षमः क्षमा रहितः नित्यमुद्वेजक इत्यर्थः। सखीप्रत्युक्ते। परैर्विरह दुःखमुपशमयेत्यमाह-नो सख्या इति।
इति 'ख' मातृकायामधिकम्।

समीक्षात्मको -द्वितीयः खण्डः

प्रथमोऽध्यायः

काव्यस्वरूपसमीक्षा

काव्यविषयकं कविकर्म काव्यम्। यथा अस्माकं मानवादीनां पाञ्चभौतिकं शरीरं समवलोक्यते तथैव काव्यस्यापि शब्दार्थात्मकं शरीरं भवति। यथा स्थूलभूते शरीरे मनोबुद्धिरहङ्कारप्रभृतयः पदार्थाः सन्ति तथैव काव्यस्यापि अभिधालक्षणाव्यञ्जनाप्रभृतीनि तत्त्वानि भवन्ति। एवमेव यथा शरीरावयवसंघटनं विद्यते तथैव काव्यस्य लाट्यादिरीतयो भवन्ति। यथा च शरीरसौन्दर्यवर्धकानि वस्त्राभूषणानि भवन्ति तथैव काव्यस्यापि शब्दार्थोभय भेदभिन्ना अलङ्काराः सुप्रसिद्धाः सन्ति। एवमेवाऽस्माकं केचन दोषाः भवन्ति केचन च गुणाः भवन्ति। तथैव काव्येऽपि रसापकर्षकाः दोषाः भवन्ति, तथा गुणाधायका गुणा अपि। यथा मानवादिशरीरे सर्वावयवभिन्नः सर्वप्रधानभूतः आत्मा भवति तथैव काव्यस्यापि कश्चिदात्मा वर्तते। तत्र शब्दार्थरीतिगुणालङ्कारादिषु कञ्चिदपि आत्मत्वेन स्वीकर्तुं न शक्यते तर्हि काव्यस्यात्माक इति जिज्ञासायां रस एव काव्यस्यात्मा इति वदन्ति काव्यमर्मज्ञाः। अतएव तैत्तिरीयोपनिषदि उक्तं रसो वै[1] स इति।

कवेः प्रलापं काव्यं इत्यपि केचिदाधुनिकाः प्रलपन्ति। कविः सृष्टेः सौन्दर्यस्य मर्मज्ञः उपभोक्ता च भवति। यदा कविरुन्मत्तो भवति तदा तस्य प्रलाप-स्वरूपे उन्मत्ततायाः कश्चिद् प्रसादः सहृदयैरुपलभ्यते। शब्दस्य नित्यत्त्वात् कविर्न शब्दनिर्माता भवितुमर्हति अपितु शब्दानां लालित्ययुक्तं गुम्फमेव विदधाति। सा एव ललितगुम्फनयुक्तपदावली कवेः कर्म काव्यशब्देनाभिधीयते। कस्यापि विषयस्य चमत्कारपूर्णं सहृदयहृदयसंवेद्यवर्णनं येन शब्दसमूहेन स्यात् तदैव काव्यमिति तेषां समीहा। अस्माकं भारतीयकाव्यविचारणायां तल्लक्षणमधारीकृत्यानेके प्रश्नाः समुत्थिताः भवन्ति। तत्रापि कारणभूत आत्मैव सारवस्तु प्रतिभाति। कश्चिच्च आत्मानं विहाय केवलं स्वतन्त्ररूपेण काव्यस्य परिभाषां कुर्वन्ति। अत्रापि पक्षद्वयं दरीदृश्यते। अनुभूतिः भावपक्षः प्रथमः। अभिव्यक्तिः कलापक्षश्च द्वितीयः। काव्ये पक्षयोरुभयोः सममहत्त्वं अनुभूयते। अथवा परस्परं एकोऽपरस्य पूरक इति, तथापि भावपक्षः प्रामुख्यं भजते। येषां मते रस एव काव्यस्यात्मा, तेषां मते भावपक्षस्य प्राधान्यं भवति। ये चाचार्याः अलङ्कारस्य रीतेर्वा काव्यस्यात्मत्वेन प्रतिपादनं कुर्वान्ति, तेषां मते अभिव्यक्तेः अर्थात् कलापक्षस्यैव प्राधान्यं भवति। यथा केचित् शरीरमेवात्मानं स्वीकुर्वन्ति, केचन च तद्भिन्नः कश्चिदात्मा भवतीति वदन्ति। उभयोश्च महान् भेदः। आत्मा न शरीरं

---

१. तैत्तिरीयोपनिषद २/७

शरीरञ्च नात्मेति। यद्यपि ध्वनिवादिनः वक्रोक्तिवादिनश्च भावपक्षमेव स्वीकुर्वन्तोऽपि अभिव्यक्तिपक्ष एवाग्रहग्रहिलाः प्रतीयन्ते। काव्यलक्षणविषये तत्तद्ग्रन्थेषु विविधानि मतानि समुपलभ्यन्ते। कानिचिदिह निर्दिष्यन्ते स्पष्टावगतये-

१. ''कविर्मनीषी परिभूः स्वयम्भूः कवेः कृतिः काव्यम्''।[२]

२. 'संक्षेपात् काव्यमिष्टार्थव्यवच्छिन्ना पदावली।
''काव्यं स्फुटमलंकारं गुणवद् दोष वर्जितम्''॥[३]

३. 'शरीरन्तावदिष्टार्थव्यवच्छिन्ना पदावली काव्यम्'[४] दण्डी।

४. शब्दार्थौ सहितौ काव्यम्'[५] भामहः।

५. 'ननु शब्दार्थौ काव्यम्'[६] रूद्रटः।

६. 'रीतिरात्मा काव्यस्य'[७] वामनः।

७. 'काव्यस्यात्मा ध्वनिः'[८] आनन्दवर्धनः।

८. गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ काव्यम्।[९] वाग्भट्टः प्रथमः।

९. 'शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ काव्यम्[१०]।' वाग्भट्टः द्वितीयः।

१०. 'अलङ्कारस्त्वलङ्कारा गुणाः एवं गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्॥'[११]

११. 'अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।'[१२]
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति॥ भोजराजः।

१२. ''तददोषौ शब्दार्थौ सगुणावनलङ्कृति पुनः[१३] क्वापि''। मम्मटः।

१३. 'वक्रोक्तिः काव्यजीवितम्[१४]।' कुन्तकः।

१४. 'निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।

---

२. शुक्लयजुर्वेदः।
३. अग्निपुराणम्-अ. ३३६/६७
४. काव्यदर्शः परि.१/१०
५. काव्यालङ्कारः- १-१६
६. काव्यालङ्कारः- ३-१
७. काव्यालङ्कारसूत्रवृत्तिः २/६
८. ध्वन्यालोकः १/१
९. प्रतापरूद्रयशोभूषणम्।
१०. काव्यानुशासनम्।
११. औचित्यविचारचर्चा,श्लोक सं. ५।
१२. सरस्वतीकण्ठाभरणम्।
१३. काव्यप्रकाशः प्र.उ. १/४
१४. वक्रोक्तिजीवितम् पृ. १६

सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्[15]।' जयदेवः।

१५. 'अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्[16]।' हेमचन्द्रः।

१६. निर्दोषं गुणालङ्काररीतिवृत्तं काव्यम्। पीयूषवर्षः।

१७. 'रसालङ्कारात्मकं वाक्यं काव्यम्'[18]। केशवमिश्रः।

१८. 'रसादिमत् काव्यम्[19]।' शौद्धोदनिः।

१९. 'वाक्यं रसात्मकं काव्यम्।' विश्वनाथः।

२०. 'ध्वनिः काव्यस्य जीवितं काव्यम्[21]।' अभिनवगुप्तः।

२१. 'शब्दार्थयोर्यथावत् सहभावेन मिश्रा साहित्यविधा[22]।' राजशेखरः।

२२. 'गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ।
काव्यं काव्यविदो विदुः[23]।' विद्यानाथः।

२३. 'कविव्यापा रोहि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यम्।' महिमभट्टः।

२४. 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्। ' जगन्नाथः।

२५. 'आस्वादजीवातुः पदसम्बन्धः काव्यम्।' चण्डीदासः।

२६.'तत्र निर्दोषशब्दार्थगुणवत्त्वे सति स्फुटम्।
गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम्॥ अच्युतरायः।'

२७. 'सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितौ।' धर्मसूरिः।

२८. 'गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावगौ।'
नित्यं दोषविनिर्मुक्तौ काव्यमित्यभिधीयते॥ न्यायवागीशः।

उपर्युक्तकाव्यलक्षणानां परिशीलनेन सुस्पष्टरूपेणेदं प्रतिभाति, यदालङ्कारिकाचार्येषु पक्षत्रयं वर्त्तते। शब्दार्थोभयं काव्यमिति प्रथमः पक्षः। शब्दप्रधानं काव्यमिति द्वितीयः पक्षः। रसान्वितं काव्यमिति तृतीयः पक्षः। अत्र शब्दः अर्थः शब्दार्थौ वा काव्यस्यात्मा भवितुं नार्हति। आत्मा व्यापकः निराकारश्च भवति। शब्दः अर्थः शब्दार्थौ वा न तथेति मन्महे। अत्र सर्वेषां लक्षणानां विवेचनं परिहाय केषाञ्चिदेव प्रधानभूतानां लक्षणानां प्रस्तूयते विचारः।

---

१५. चन्द्रालोकः १/७
१६. काव्यानुशासनम्।
१७. साहित्यदर्पणः पृष्ठः २१
१८. लोचनम्।
१९. काव्यमीमांसा अ.-२ पृष्ठ ५
२०. प्रतापरूद्रयशोभूषणम्।
२१. व्यक्तिविवेकः पृ.९५
२२. रसगङ्गाधर पृ.-४
२३. दीपिका (काव्यप्रकाशटीका)

अत्र शब्दार्थोभयं काव्यमिति प्रतिपादयितृषु भामहाचार्यः चिरन्तनोऽस्ति। तस्य मतं यत् 'शब्दार्थौ सहितौ काव्यम्[२४]'। अत्र सहितपदस्य सहभावापन्नोऽर्थः। यत्र शब्दः अर्थश्च तुल्यकोटिकौ भवतः तत्काव्यमिति। इदमेव तत्त्वं काव्यमितिहासादितः पृथक् करोति। इतिहासादात्रर्थप्रतीतये शब्दः प्रयुज्यते। तत्रार्थस्यैव प्राधान्यं भवति शब्दस्तु गौण एव। काव्ये तु शब्दार्थयोरुभयोरपि समानं महत्त्वं विद्यते। यतश्चोभावपि तुल्यरूपेण गुणदोषालङ्काराणामाधायकौ स्तः। अत एवानयोर्न मुख्यगौणभावः, अपि तु सदा सहभाव एव चान्यशास्त्रेभ्यः काव्यं भिन्नं भवति। अत एव च रुद्रटेन- 'ननु शब्दार्थौ काव्यम्'[२५] इति प्रतिपाद्य स्वकीयाभिप्रायं प्रकाशयति यत "उभयपदार्थप्रधानो द्वन्द्वः" इति लक्षणेन 'शब्दश्चार्थश्चेति' विग्रहेण चोभयपदार्थस्य प्राधान्ये लब्धे तद्बोधकद्विवचनमात्रेण च परेषामपि बोधे सम्पन्ने तदर्थं सहितौ इति विशेषणमपि नावश्यकम्। वेदादिशास्त्रेषु शब्दस्य इतिहासादावर्थस्य च यथा प्राधान्यं तथा काव्ये नास्ति। काव्ये उभयोः प्राधान्यमभीष्टम्। अत एव रुद्रटेन स्वकीयकाव्यलक्षणे 'ननु' शब्दं प्रयुज्य भामहकृत-काव्यलक्षणे सहितौ' इति पदप्रयोगं प्रति अरुचिः प्रदर्शिता, यतश्च लक्षणवाक्यं सूत्रवद् भवति। तत्रानावश्यकशब्दप्रयोगो नोचितः। आनन्दवर्धनाचार्येणापि स्वकीयध्वनिकाव्यलक्षणे प्रतिपादितं यत् तत्र शब्दः स्वकीयार्थं अर्थौ वा आत्मानं गौणं विधाय तथाभूतस्यार्थस्याभि-व्यक्तिं कुर्यात् यः वाच्यार्थोपेक्षयाऽधिकचमत्कारपूर्णो भवेत्। अनेन काव्य-व्यञ्जकशब्दार्थयोः प्राधान्यं प्रतिपादितम्। वक्रोक्तिजीवितकारेण कुन्तकेनापि भामहस्य सरणिमवलम्ब्य प्रतिपादितं यत् सहभावापन्नः शब्दार्थयुगल एव यदा कवेः वक्रोक्तिमयव्यापारयुक्तबन्धने व्यवस्थितो भवति तदा काव्यं कथ्यते। एवं तज्ज्ञातृणां कृतेऽऽह्लादकारकं भवति[२७]।

साहित्यविद्यानां शब्दार्थयोः यथावत् सहभावेन सम्पन्ना विद्येति काव्यमीमांसायां राजशेखरः प्रतिपादितवान्[२८]। सगुणः दोषरहितः यथासम्भवालङ्कारयुक्तः शब्दार्थयुगलः काव्यमिति अलङ्कारशास्त्रस्य मूर्धन्यः आचार्यमम्मटः प्रतिपादितवान्[२९]। अत्रालङ्कारस्य वैकल्पिकतां प्रदर्श्य तस्मिन् गौणता प्रतिपादिता। जैनाचार्यहेमचन्द्रेणापि मम्मटसरणिमवलम्ब्यैव स्वकीयकाव्यलक्षणे दोषरहितौ गुणालङ्कारयुक्तौ शब्दार्थौ काव्यमिति प्रतिपादितम्[३०]। एवमेव वाग्भट्ट-विद्यानाथादय तत्परवर्तिन आचार्या

---

२४. काव्यालङ्कार (भामह) १-१६

२५. काव्यालङ्कार (रूद्रट) ३-१

२६. 'यत्रार्थः शब्दो वा तमर्थ सूरिभिः कथितः।' ध्वन्यालोकः १/१

२७. "शब्दार्थौ सहितौ वक्रकविव्यापार...... कारिणी।" वक्रोक्ति जीवितम् पृ.-२१७

२८. "शब्दार्थयोयर्थावत्...विद्या।" काव्यमीमांसा अ. २ पृ.५

२९. "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।" काव्य प्रकाशः प्र.अ. १/४

३०. "अदोषौसगुणौसालङ्कारौ च शब्दार्थौ काव्यम्।" काव्यानुशासन पृ. १६।

शब्दार्थयुगलं काव्यमिति स्वीकुर्वन्ति। राजानकरुय्यककृतालङ्कारसर्वस्वस्य कश्चित्टीकाकारः समुद्रबन्धः विशिष्टशब्दार्थौ काव्यमिति कथितवान्[३१]। शब्दार्थयोः विशिष्टतायाः आधायकः धर्मःव्यापारः एव व्यङ्ग्यो भवति। तत्र धर्मपक्षेविशिष्टतायाः आधानं गुणैः अलङ्कारैश्च भवति। व्यापारपक्षे भणितिवैचित्र्येण भोगव्यापारेण च विशेषणानामाधानं भवति। व्यङ्ग्यपक्षे विशिष्टताधायकः व्यङ्ग्यजन्यचमत्कार एवास्ति। अथवा व्यञ्जनावृत्तिः। अत्राचार्यवामनः गुणात्मकधर्मविशिष्टशब्दार्थौ काव्यमिति भामहदण्डिउद्भट्टादय आलङ्कारिकाचार्याः अलङ्कारादिधर्मविशिष्टशब्दार्थौ काव्यमिति च कथयन्ति। भणितिवैचित्र्यव्यापारस्य विशेषतां कुन्तकः स्वीकरोति। भोग-भोजकत्व व्यापारस्य विशेषतया रस एव काव्यस्य सर्वस्वमिति 'भट्टनायकः' प्रतिपादयति। व्यङ्ग्यस्य विशेषतायाः प्रतिपादकाः आनन्दवर्धनादयोऽभूवन् इत्थं शब्दार्थयुगलस्य विशेषतामवलम्ब्यालङ्कारशास्त्रे पञ्चपक्षाः प्रतिपादिताः। ते एवालङ्कारशास्त्रस्य पञ्च मुख्यसम्प्रदायाः सन्ति।

काव्यलक्षणे शब्दप्रधानमूलककाव्यलक्षणमिति। द्वितीयः प्रकारोऽपि उपलभ्यते। तत्र अग्निपुराणे यथा दोषरहितालङ्कारसहितकविविवक्षिताभिप्राययुक्तपदावली काव्यमिति। दण्डिनः काव्यलक्षणे अग्निपुराणीयलक्षणतः साम्यं कामयते। तथा हि विवक्षितार्थपदावली काव्यमिति। चन्द्रालोककारो जयदेवः-

'निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।'

सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्[३२]। इति कथितवान्। शब्द एव काव्यस्य प्रवृत्तिनिमित्तमिति प्रतिपादयन् पण्डितराजजगन्नाथोऽपि रमणीयार्थप्रतिपादकशब्दस्यैव काव्यतां स्वीचकार[३३]। शब्दार्थयुगलस्य काव्यत्वस्वीकर्तृणां खण्डनमपि विहितवान्[३४]। काव्यलक्षणे शब्दस्यैव प्राधान्यमिति स्वीकर्तृषु पण्डितराजजगन्नाथोऽन्तिमः आचार्योऽस्ति।

एतद्भिन्नाः कतिपयाचार्या अभूवन् ये शब्दार्थापेक्षया रसमेव काव्यस्य परमाधायकतत्वमिति स्वीचक्रुः। अत-एव काव्यलक्षणे तेषामपि उल्लेखः आवश्यकः।

काव्यस्य रसात्मकलक्षणप्रतिपादकेषु महिमभट्टभोजशौद्धोदनिचण्डीदासविश्वनाथादयः मुख्याः आचार्या अभूवन्। तत्र महिमभट्टस्य कथनं यत् कवेः विभावादिसंयोजनात्मकः सव्यापार एव काव्यम्, यत्र रसाभिव्यक्तिरनिवार्यरूपेण भवेत्। तथा च तल्लक्षणं

---

३१. इह विशिष्टौशब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यंधर्ममुखेन. व्यापार... पंचमआनन्दवर्धनेन-अलङ्कारसर्वस्वटीका पृ. ४

३२. चन्द्रालोकः १७

३३. रमणीयार्थप्रतिपादकः शब्दः काव्यम्। रसगङ्गाधरः पृ.-६

३४. यत्तु प्राञ्च-''अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्'' इत्याहुः तत्र विचार्यते...शब्दार्थयुगलं...पदार्थत्वप्रतिपत्तेश्च। रसगङ्गाधरः पृ.६

व्यक्तिविवेके 'कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यम्[३५]।' यद्यपि लक्षणस्यास्य विशदा व्याख्यापेक्षितास्ति, तथापि संक्षेपेण कविव्यापार एव काव्यमिति। अत्र कविपदसान्निध्यात् व्यापारशब्दः काव्यात्मकव्यापारविशेषस्यैव बोधकः, न विहरणादिव्यापारसामान्यस्य।

काव्यात्मकव्यापारश्च शब्दार्थमादायैव सम्भवति। अतः कविव्यापारपदेन काव्ये शब्दार्थसत्ता स्वतः सिद्धा भवति। इत्थं कवेः शब्दार्थविषयकव्यापार एव काव्यमिति फलितम्। कविव्यापारकथनेन धर्म-दर्शन-पुराणेतिहासादिगतशब्दार्थविषयकव्यापारेण कविव्यापारः सर्वथा भिन्नो भवति। यतः धर्मशास्त्रादौ अर्थमात्रस्य प्राधान्यमन्यत्र पुनः शब्दार्थयोः साम्यमेवेति। अतः शब्दार्थौ काव्यमिति प्रतिपादनापेक्षया कविकर्म कविव्यापारो वा काव्यमिति प्रतिपादनं काव्यलक्षणदृष्ट्योपयुक्ततरमवगम्यते। अत एव काव्यप्रकाशस्य प्रसिद्धटीकाकारः झलकीकरवामनः महिमभट्टस्य सरणिमवलम्ब्य 'कविकर्म काव्यमिति प्रतिपादितवान्।' लोकोत्तरवर्णना-निपुणः कविरिति कवेः परिभाषां विहितवान्। शब्दार्थविषयकाः न कवेः सर्वे व्यापाराभिप्रेताः अपि तु स एव व्यापारोऽभिप्रेतः, यस्मिन् रसाभिव्यक्तौ व्यभिचारो न भवेदिति। अत एव 'रसाभिव्यक्त्यव्यभिचारी' इति विशेषणं विहितवान्।

'व्यभिचारिपदस्य' क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिरित्यर्थकत्वेन कुत्रचित् रसोपेता रचना स्यात् कुत्रचिच्च रसापेताऽपि रचना सम्भवति। यतश्च रसः विभावादिजीवितावधिर्भवति। एवञ्च यावत् विभावादिः तिष्ठति तावत् रसोऽपि तिष्ठति। अपगते विभावादौ रसोऽपि अपगतो भवति। अतः विभावादीनामुचितरूपेण संयोजनमावश्यकम्। इत्थञ्च विभावादीनां तथा संयोजनमावश्यकं येन रसनिष्पत्तिर्भवेदेवेति कविव्यापारोऽभीष्टोऽस्ति। अत एव विभावादिसंयोजनात्मा 'रसाभिव्यक्त्यव्यभिचारि' इति पदद्वयं कविव्यापारे विशेषणम्।

अनौचित्यातिरिक्तं न किमपि रसभङ्गे अन्यत्[३६] कारणम्। अनौचित्यञ्च दोषापरपर्यायामस्ति। महिमभट्टस्यापि इदमेवाभिमतं यत् काव्यस्यात्मा रस एवास्ति[३७]। रसस्य अनिवार्यसत्ताया काव्ये गुणानां विद्यमानत्वं सुतरां सिद्ध्यति। एवञ्च गुणस्य विशेषणत्वेनोपादानात् गौरवमपि लक्षणे नायाति। अतः कविव्यापारो हि विभावादिसंयोजनात्मा, रसाभिव्यक्त्यव्यभिचारी काव्यमिति[३८] लक्षणं प्रतिपादितवान्।

न च यत्रापि रसाभिव्यक्तिस्तत्र विभावादिः स्थास्यत्येव, यतः विभावादिं विना रसाभिव्यक्तेरसम्भवात्। एवञ्च काव्यलक्षणे विभावादिविशेषणं व्यर्थमिति वाच्यम्। विभावादिविशेषणं विना रसाभिव्यक्तेरेवाऽसम्भवात्। तथा हि-कवेः व्यापारस्य साक्षात् सम्बन्धः न रसेन, अपि तु विभावादिवर्णनमात्रेण भवति। कविः केवलं विभावादि संयोजनं

---

३५. व्यक्तिविवेकः पृ.९५

३६. अनौचित्यादृतेनान्यद्रसभंगस्य कारणम्। ध्वन्यालोक पृ.१५९

३७. काव्यस्यात्मनि संज्ञिनि रसादिरूपेण कस्यचिद्विमतिः। व्य. का. १/२६

३८. व्यक्तिविवेक पृ. ९५

तद् वर्णनं वा कर्तुं शक्नोति। रसाभिव्यक्तिस्तु तस्मिन्नन्तर्निहितं तिष्ठति। कविना रसो न क्रियते स स्वयमभिव्यक्तो भवति। रसो न काव्यमिति प्रायः सर्वैराचार्यैः स्वीक्रियत एव। महिमभट्टस्तु रसाभिव्यक्तिप्रक्रियायां श्रीशङ्कुकस्यानुयायी अस्ति। यः रसमनुमेयं प्रतिपादितवान्। रसानुभूतेः प्रयोजकाः नटप्रकाशिताः कविवर्णितनायकनायिकागतविभावादय एव भवन्ति। अतो न कवेः व्यापारः रसाभिव्यक्तिपरकः सम्भवति, अपि तु विभावादिसर्जन-परक एव।

किञ्च विभावादिसंयोजनाभावे रसाभिव्यक्त्यव्यभिचारिपदस्य कविव्यापारशब्देनाऽन्वयोऽपि न सम्भवति। यतश्च कविव्यापारः विभावादि संयोजनात्मक एव सम्भवति। रसानुभूतिस्तु तस्य परिणाममात्रमस्ति, यः सहृदयैः विभावादिपरामर्शेन स्वतः अनुभूयते। अतः कविव्यापारपदस्य रसाभिव्यक्त्यव्यभिचारिपदेन विशेष्यविशेषण-भावेनाऽन्वयार्थं विभावादिसंयोजनात्मा इतिविशेषणन्नितान्तमपेक्षितं सर्वथा सार्थकञ्चास्ति।

अपि च शब्दार्थसंयोजनात्मपदापेक्षया विभावादिसंयोजनात्मपदस्य सन्निवेशेऽपि कश्चिदभिप्रायविशेषोऽस्ति। एकस्त्वयमेव यत् तत्पदमपेक्षाकृतमधिकमहत्त्वपूर्णमस्ति। विभावादिसंज्ञातः कारणादेवलौकिकता एव एकमात्रकाव्यानुगुणतायाः स्वतः ग्रहणं भवति। द्वितीयस्तु संयोजनात्मकपदे सम्पूर्वकस्य युज्धातोः ल्युटि संयोजनेति सम्पद्यते। तस्यार्थस्तु औचित्यात्मकयोजनेति। स चार्थः विभावादेव सम्भवति नान्यत्र। इत्थं काव्यलक्षणे विभावादिसंयोजनात्मेति पदं सर्वथायुक्तियुक्तं साभिप्रायञ्च प्रयुक्तमस्ति। अत एव एकस्मिन् स्थले कस्यापि काव्यलक्षणं प्रसङ्गवशादुद्धृत्य तस्मिन् विभावादि वर्णनमेव काव्यमिति प्रतिपादितवान्[३९]। महिमभट्टः तेन तत्र स्पष्टमेवोक्तं यत् गुणालङ्कारसंस्कृतशब्दमात्रमेव न काव्यमस्ति। यतः रसात्मकताया अभावे मुख्यवृत्त्या तत्काव्यमेव न स्यात्। रसात्मनि काव्ये वस्तुमात्रेण विशेषताया आधानं कथमपि न सम्भवति। यतः विभावादि संग्रन्थनरूपेणैव रसाभिव्यक्तेः प्रयोजको भवति[४०]।

इत्थञ्च काव्ये रसस्याव्यभिचरितोपस्थितिस्तु 'विभावादिसंयोजनात्मेति विशेषणे-नैव सम्भवेन पुनः' रसाभिव्यक्त्यव्यभिचारीति विशेषणं व्यर्थमिति। यतश्च सर्वे रसवादिनः आचार्याः विभावादिसंयोगेनैव रसनिष्पत्तिरिति स्वीकुर्वन्ति। रसश्च विभावादिजीविता-वधिरिति च। एवञ्च यावत् विभावादेः स्थितिः तावत् रसनिष्पत्तिः। विभावादेः स्थित्यभावे रसनिष्पत्त्यभाव इत्यन्वयव्यतिरेकेण विभावादिरेव रसनिष्पत्तेः साधकः। तथा च विभावादि संयोजनात्मेति विशेषणेनैव निर्वाहे पुनः रसाभिव्यक्त्यव्यभिचारीति द्वितीयविशेषणं व्यर्थमिति।

इदमत्रावधेयम्-यत् विभावादिसत्तायां रसनिष्पत्तिः, तदभावे तदभावः इत्यन्वयव्यतिरेके सत्यमपि स्थायिभावादिविद्यमानतायामपि दोषविशेषसत्त्वे वा रसनिष्पत्तिर्न भवति। तथा

---

३९. "अनुभावविभावानां वर्णना काव्यमुच्यते।" व्य. वि. पृ.९६

४०. अत एव च गुणालङ्कारसंस्कृत-मात्र... हेतुत्वोपगमात्। व्य. वि.पृ. ९८

हि-रसदोषप्रसङ्गेऽवस्थाविशेषे विभावादौ सत्यपि रसनिष्पत्तिर्न भवति[४१]। आनन्दवर्धनेन स्पष्टतया प्रतिपादितं यत् सत्यपि सामग्रीसमुदाये औचित्याभावे रसपरिपाको न भवति[४२]। रसरहितरचना न काव्यमिति अपि तु रसोपेतरचनैव काव्यमिति आचार्यस्याभिप्राय:। अत: 'विभावादि संयोजनात्मा' इति विशेषणसत्त्वेऽपि रसाभिव्यक्त्यव्यभिचारी इति द्वितीयविशेषणं विहितमाचार्येण। अत एव आचार्य रूय्यकेन व्यक्तिविवेकव्याख्याने काव्यलक्षणप्रसङ्गे प्रतिपादितं यदत्र कविव्यापारो न सामान्यरूपेणाभीष्ट:। अपितु विभावादि-घटनानुरूप:, अत एव नियमेन रसापेक्ष्यापि[४३]।

अत एव आचार्यमहिमभट्टेन स्पष्टतयोद्घोषितं यत् रसविरहितं ध्वनिपदेनाऽप्यभिहितं काव्यं न काव्यमिति। उद्धृता च ध्वन्यालोकस्य पंक्ति:-यत्र काव्यात्मकत्वेन रसो गृहीतोऽस्ति। रसाभावे काव्यस्यैवा भावेन तत: कृत्याकृत्यव्युत्पत्तिरूपफलकामनापेक्षया तदनारम्य एव श्रेयस्कर इति[४५]।

यत्तु रसपरककाव्यलक्षणं सामान्यं तत्राव्याप्तिदोषग्रस्तमिति। तथा हि काव्ये रसस्याव्यभिचारितोपस्थितिस्वीकारे वाल्मीकिव्यासाद्युत्कृष्टकविकृतोत्कृष्टकृतिषु यो भाग: नि:संदिग्धतया न रसोद्बोधक:, एवञ्च वस्त्वलङ्कारादिभिश्चमत्काराधायकोऽस्ति, स काव्यकोटौ नागच्छेत्। तथा च काव्यविषय: स्वल्पतमो भवेत्। यदि च तासु रचनास्वपि यथाकथञ्चित् रसस्य लेशमात्रं स्वीकृत्य काव्यता स्वीक्रियते तदा 'अद्रावत्र प्रज्वलत्यग्निरूच्चै: प्राज्य: प्राद्यन्नुल्लसन्येषु धूम:' इत्यादिस्थलेऽतिव्याप्ति: दुर्वारा स्यात्। इत्थञ्च कूपपतनं विहाय घोरतमगर्त्ते पतनमिव स्यात्।

पण्डितराजजगन्नाथ: 'रसगंगाधरे' साहित्यदर्पणकारस्य कविराजविश्वनाथस्य रसपरककाव्यलक्षणस्य "वाक्यं रसात्मकं काव्यम्" इत्यस्याऽनिर्णीतमिति प्रतिपाद्य तत्खण्डनं विहितवान्। यत: रसवद्वाक्यस्यैव काव्यत्वस्वीकारे वस्त्वलंकारप्रधानकाव्ये रसविरहात्काव्यत्वं न स्यादिति। एवञ्च महाकविसम्प्रदायस्यैवोच्छेद: स्यात्। यथा वाल्मीकिव्यासकालिदासादयो महाकवय: स्वरचनासु स्थाने-स्थाने प्रसंगात् जलप्रवाहनिपतनोत्पतनभ्रमण-कपिबालादीनां चरितवर्णनं कृतवन्त: सन्ति। तत्सर्वमकाव्यं स्यात्। यदि च यथाकथञ्चित् परम्परया तत्रापि रसस्पर्शं स्वीकृत्य काव्यत्वं स्वीक्रियते तदा "गौश्चलति" 'मृगो धावति' इत्यादावपि अतिप्रसक्ति: स्यादेवेति। रसान्वितं काव्यलक्षणं

---

४१. "रसस्योक्ति: स्वशब्देन स्थायिसंचारिणोरपि।" सा.द.पृ. १/१२-१५

४२. "औचित्योपनिबंधस्तु रसस्योपनिषत्परा।" ध्वन्यालोक तृतीय उ.पृ. २५

४३. "कविव्यापारभाव: न सामान्येन किन्तु विभावादि घटनास्वभाव: अत एव नियमेन रसापेक्षि।" व्य. वि. व्याख्यान पृ. ९५

.४४. "काव्यमात्रस्य ध्वनिव्यपदेशविषयत्वे...यत् स एवाह-काव्यस्यात्मा स एवार्थ... श्लोकत्वगमाद्।" व्य. वि. पृ. ९२-९३

४५. तदभावे (रसाभावे) चास्य...प्रेक्षावता स्यात् बैफल्यात्। व्य. वि. पृ. ९५

न कथमपि सम्भवतीति[४६]।

तन्न युक्तिसहम्-तथाहि-साहित्यदर्पणकारस्य रसान्वितकाव्यलक्षणे एवाव्याप्त्यतिव्याप्तिदोषौ स्तः नान्यत्रेति इति न। अपि तु मम्मटस्य पण्डितराजजगन्नाथस्यापि काव्यलक्षणे स दोषः तदवस्थ एव। यथा मम्मटस्य काव्यलक्षणे शब्दार्थौ इत्यस्य विशेषणत्वेन सगुणौ इति पदमस्ति। गुणश्च काव्यात्मरसस्य धर्मोऽस्ति। तस्य परम्परया शब्दार्थयोः विद्यमानतापि सम्भवति। परन्तु गुणस्तु तत्रैव तिष्ठेत् यत्र रसो भवेत्। अतः परोक्षरूपेण मम्मटेनाऽपि स्वीक्रियत एव यत् रसः तत्तत्वं यत् काव्ये सर्वत्र व्याप्तमस्ति।

पण्डितराजजगन्नाथस्य "रमणीयार्थप्रतिपादकः शब्दः [४७]काव्यम्" इति लक्षणमपि रसपरकमेवेति। तेन बहुविचारपूर्वकमेव लक्षणमिदं विहितम्। का रमणीयता इति विचारे यदि अर्थसौष्ठवं स्वीक्रियते तदा रमणीयता अव्यवस्थिता स्यात्। यतो हि भिन्नरूचिर्हि लोको भवति। रूचिभेदेन सौष्ठवं भिन्नं स्यात्। योऽर्थः कस्यापि मते सुष्ठु विद्यते स एव अन्यमते असुष्ठु भवति। अतः पण्डितराजेन स्वयमेव निर्वचनं विहितम्। तथा च लोकोत्तरानन्दानुभूतिर्यतो भवेत् स रमणीयः[४८]। लोकोत्तरत्वं यदि सातिशयत्वं स्यात्तर्हि रुचिभेदेन व्यक्तिभेदेन च आनन्दमात्रं लोकोत्तरं स्यात्। एवञ्च न कश्चिल्लाभः, अपितु अव्यवस्था तदवस्थैव। यदि चानन्दगतलोकोत्तरत्वं निरतिशयत्वं अर्थात् यतोऽधिको द्वितीयो नास्ति तदा ब्रह्मानन्दातिरिक्तः आनन्दो न स्यात्। अतः लोकोत्तरत्वमानन्दगतजाति-विशेषोऽस्ति। यस्य चमत्कारत्वमिति नामान्तरमस्ति[४९]। तत्सत्तायां सहृदयानामनुभव एव प्रमाणमस्ति। तथा च यस्मिन् आनन्दे लोकोत्तरोऽयमिति अनुभवो भवेत् स एव लोकोत्तरोऽऽह्लादोऽस्ति। लोकोत्तरानन्दे धारावाहिकभावनाविशेषः शब्दबोधात्मकानुभव एव कारणमिति निर्देशो विहितः 'आनन्दोऽयम्'। अत एव लोकोत्तरो यतः 'तव गृहे पुत्रो जातः' तुभ्यमहं धनं दास्यामि' इत्यादि वाक्यैरुत्पद्यमानभावनातः सर्वथा भिन्नोऽस्ति[५०]। अयं लोकोत्तराह्लादः न रसानुभूतेर्भिन्नः, अपि तु रसानुभूतिरेवास्ति। कविराजविश्वनाथादयः सर्वेऽऽचार्याः रसानुभूतेः स्वरूपमेव कथितवन्तः रसानुभूतावपि सहृदयानुभव एव प्रमाणमस्ति[५१]।

---

४६. 'यत्तु रसवदेव काव्यम्' इति साहित्यदर्पणे निर्णीतं तन्न। वस्त्वलंकारप्रधानानां काव्यायानां काव्यत्वानापत्तेः। न चेष्टापत्तिः। महाकविसम्प्रदायस्य... 'गौश्चलति मृगो धावति।' इत्यादावतिप्रसंगत्वेनाप्रायोजकत्वात्। रसगंगाधर पृ.२३।

४७. रसगंगाधर पृ. ४

४८. "रमणीयताचलोकोत्तराह्लादजनकज्ञानगोचरता।" रसगंगाधर-पृ. ४

४९. लोकोत्तरत्वं चाह्लादश्चमत्कारत्वापरपर्यायो अनुभवसाक्षिको जातिविशेषः। रसगंगाधर पृ. ५

५०. कारणंचात्र दतावच्छिन्ने भावना विशेषः पुनः पुनरनुसन्धानात्मा। 'पुत्रस्तेजातः' धनद्वतेदास्यामि इति वाक्यार्थ...काव्यत्वप्रसक्तिः। रसगंगाधर पृ.५

५१. सचेतसामनुभवः प्रमाणस्तत्र केवलम्। साहित्य दर्पण प्र.प. ३/३

अस्माकं मतमितो भिन्नम्। 'प्राञ्चः' इत्यनेन पण्डितराजः मम्मटभट्टमेव न लक्षयति, प्रत्युत "शब्दार्थौ काव्यम्," 'ननु शब्दार्थौ काव्यम्' तथा 'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते' इति काव्यलक्षणानि प्रस्तुतवतां भामहरूद्रटवामनादीनां च संकेतमुपस्थापयति, यतः यदि केवलं मम्मट एव तस्यालोचनापथपथिकः अभविष्यत् तदा तस्य 'अनलंकृति पुनः क्वापि' इति कथनस्यापि विभिन्नाभिः प्रबलयुक्तिभिः खण्डनं तेन कृतमभविष्यत्। किन्तु जगन्नाथस्य शब्दावल्याः सूक्ष्मावलोकनेन ज्ञायते यत् कोऽपि आचार्यविशेषः तस्य तीव्रालोचनाप्रहारस्य विषयः। अयमाचार्यः अस्माकं मते जैनाचार्यः हेमचन्द्रः यः स्वकीयकाव्यानुशासने 'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्' इति काव्यलक्षणं प्रस्तौति। अस्यैव अभिधया अर्थात् साक्षात्पंक्तिग्रहणेन खण्डनं कृतवान् आचार्यजगन्नाथः, न तु मम्मटस्य। यतो हि 'लक्षणे गुणालङ्कारादिनिवेशोऽपि न युक्तः' इत्येव न कथयित्वा 'सगुणौ', 'अनलंकृती पुनः क्वापि' इत्युभयविवादास्पदयोः पदयोः खण्डनं तेन कृतं स्यात्। स्वालोचनाक्रमे पण्डितराजः कथयति विमतवाक्यं त्वश्रद्धेयमेव, अत्र निश्चितरूपेण अनादरभावः परिलक्ष्यते। जगन्नाथसदृशः विशिष्टः विद्वान्, व्यङ्ग्यवचनस्य मर्मज्ञः वाग्देवतावतारोपाधिविशिष्टाय मम्मटसदृशाय विदुषे 'अश्रद्धेय' पदस्य प्रस्तावनां कुर्यादिति कथमपि नौचित्यं भजते। अपरञ्च यदि मम्मटाचार्य एव तस्य लक्ष्यभूतः आसीत् तदा 'यत्तु रसवदेव काव्यम्' इति सहित्यदर्पणे निर्णीतम्, तन्न वस्त्वलङ्कारप्रधानानां काव्यानामकाव्यत्वापत्तेः, इति कथयित्वा कविराजविश्वनाथकृतस्य साहित्यदर्पणस्य तेन रसगंगाधरे खण्डनं कृतम, तथैव कथं न मम्मटस्य काव्यप्रकाशस्य नाम गृहीत्वा तेन खण्डनं कृतम्। यथा महता कण्ठेन तेन साहित्यदर्पणस्य नामोच्चारितं तथा कथं न मम्मटस्यापि नाम गृहीतम्। 'दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः इत्यादिगर्वोक्तेः प्रख्यापकः अकुतोभयः जगन्नाथाचार्यः तत्त्वतः मम्मटाचार्यमतं न खण्डितवान्। वस्तुतः तेन हेमचन्द्रस्य मतं तिरस्कृतम्। वयं जानीमः यत् तदानीन्तने काले सनातनधर्मावलम्बिनां जैनधर्मावलम्बिनां मध्ये कटुविवादः तिष्ठति स्म। 'न गच्छेत् जैनमन्दिरम्' इतिवत् जैनस्य नामग्रहणेऽपि दोषाशङ्काकारणात् प्रायः आचार्यः, हेमचन्द्रस्य नाम न गृहीतवान् किन्तु तस्य लक्षणं तस्यैव शब्दावल्यामुपस्थाप्य तस्य खण्डनं च विधाय 'विमतवाक्यम्'- जैनवाक्यम्- अश्रद्धेयमेवेति प्रोवाच पण्डितराजः।

प्रकृतमनुसरामः। मम्मटेन यत्काव्यलक्षणं "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति विहितम्, तस्य मूलं भामहकृतं शब्दार्थौ सहितौ काव्यम्" तथा वामनकृतं "काव्यं ग्राह्यमलङ्कारात्" इति पूर्वाचार्य काव्यलक्षणमेव प्रतिभाति। मम्मटः न कञ्चित् सम्प्रदायविशेषमनुसरति, अपितु स्वकीयया प्रतिभया सामञ्जस्यपूर्णं काव्यलक्षणं उपस्थापयति। तत्र अदोषावित्यस्य दोषरहितत्वमर्थः सगुणावित्यस्य गुणविशिष्टत्वमर्थः

---

५२. रसगंगाधरः पृ. २२

तथा 'अनलङ्कृती' इत्यस्य साधारणतया अलङ्कारसहितत्वेऽपि कुत्रचित् अलङ्काररहितावपि शब्दार्थौ काव्यमिति। अन्ये टीकाकार अपि एवमेव व्याख्यान्ति। तच्छब्दस्य काव्यमर्थः। अतएव विवेक-सङ्केतकाव्यप्रदीपप्रभृतिषु टीकासु समानताऽत्र दृष्यते। तथाचोक्तम्-काव्यमितिव्यवहर्तौ। यथा जातिव्यक्तयोः भिन्नता प्रत्यक्षमेव प्रतीयते तथापि उभयोः पार्थक्येन ज्ञानं न सम्भवं तथैव शब्दार्थयोः भिन्नत्वेऽपि एकत्वेनैव जायते प्रतीतिः। तथा चोक्तं[५३] सङ्केतटीकायाम्-तदिति। काव्यम। शब्दार्थौ मिलितौ जातिव्यक्तिवदन्योन्याव्यभिचारित्वेन। एतेन शब्दार्थयोर्भेदवादिनः प्रत्युक्ताः। तैर्ह्युक्तम्मुखे शब्दमुपलभामहे भूमावर्थमिति। एतेन कविनिर्मितकमनीयतातिशयिनोः शब्दार्थयोः प्रत्येकं काव्यत्वमिति पक्षद्वयमपि निराकृतम्। काव्यप्रदीपे च केवलं[५४] शब्दार्थौ तत्काव्यं इति व्यवहारतव्यौ इत्येवोक्तम्। अन्येषां आचार्याणां लक्षणं इदमधिकृत्य ये ये आक्षेपाः सन्ति। तेषां समाधानं नागेशवैद्यनाथौ स्वकीयायां टीकायां कृतम्। रसगंगाधरे यदुक्तम्-जगन्नाथेन[५५] अपि च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तम्? प्रत्येकपर्यातं वा? नाद्यः, "एको न द्वौ", इति व्यवहारस्येव "श्लोकवाक्यं न काव्यम्" इति व्यवहारस्यापत्तेः। न द्वितीयः एकस्मिन् काव्ये काव्यद्वयव्यवहारापत्तेः। मतं इदममालोचयामास स्वटीकायां नागेशः। तेषां अयं अभिप्रायः। काव्यं तावत् यद्यपि व्यासज्यवृत्तिधर्मः तथापि केवलेशब्देऽर्थे वापि काव्यत्वं सम्भवति। अतः एव 'तदधीते तद्वेद" इति पाणिनीयं सूत्रमपि सङ्गच्छते। शब्दस्य अध्ययनं भवति। अर्थस्य च वेदनम्। तथाचोक्तं रसगंगाधर मर्मप्रकाश व्याख्यायाम्।[५६] आस्वादव्यञ्जकत्वस्योभयत्राप्यविशेषात् चमत्कारिबोधजनकज्ञानविषयतावच्छेदक-धर्मत्वरूपस्यानुपहनीयकाव्यलक्षणस्य प्रकाशद्युक्तलक्ष्यतावच्छेदकस्योभयवृत्तित्वाच्च काव्यं पठितं श्रुतं काव्यं बुद्धं काव्यमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृत्तिनिमित्तं व्यासज्यवृत्ति। अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादकः[५७] "तदधीते" तद्वेद" इति सूत्रस्थो भगवान् पतञ्जलिः सङ्गच्छते। लक्षणयान्यतरस्मिन्नपि तत्त्वात्। एको न द्वौ" इतिवत् न तदापत्तिः। तेनानुपहनीयकाव्यलक्षणं प्रकाशोक्तं निर्बाधम्[५८]। वैद्यनाथेनापि प्रभायामुक्तम्। वैदिके लौकिके वा शब्दप्रयोगे शब्दार्थयोः भवत्येव संश्लेषः। रघुवंशेप्युक्तं "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये" इति यथा शिवपार्वत्योः अतीव संशश्लेषः तथैव शब्दार्थयोरपीत्यर्थः। अनेन मम्मटस्य सिद्धान्तः परिपुष्टो भवति। तत्रेदमपि विचारितं यत् सौन्दर्यं शब्देऽर्थे अथवा उभयोः संश्लेषे तिष्ठति। अत्र नागेशमनुश्रृत्य वैद्यनाथोऽपि "एको

---

५३. संकेत, पृ. ६

५४. काव्यप्रदीप पृ. ८

५५. रसगंगाधर पृ.१६

५६. मर्मप्रकाशव्याख्या, रसगंगाधर, पृ.१८

५७. पा.सू.४/२/५९

५८. प्रभातीटीका पृ. ८

न द्वौ'' इति वचनं उदाहृत्य शब्दार्थयोः संश्लेषे सौन्दर्यमिति प्रतिपादयति। अतः ''शब्दार्थयोः काव्यत्वम्'' इति।

लक्षणघटकीभूतस्य अदोषा इति शब्दस्य न दोषस्य अत्यन्ताभावः अपितु प्रबलदोषाणामेव अभावोऽभिप्रेतः। दोषाः रसाऽपकर्षकाः भवन्ति। अतएव दोषरहितत्वं निर्दोष पदार्थः इति येषां मतं तत्खण्डितम्। माणिक्यचन्द्रनरसिंहसरस्वतीतीर्थवत्स-लाञ्छनभट्टाचार्यादि-प्रभृतयोः आचार्याः अदोष शब्दार्थः न सर्वथा दोष-रहितः अपितु रसाऽपकर्षका एव अभिप्रायविषयीभूता। तथा चोक्तं[५९] सङ्केतटीकायां श्रुति कटुप्रभृत्योः नित्या दोषा माधुर्यादयो नित्या गुणा रसस्यापकर्षोत्कर्षहेतवः। उभयोर्ग्रहणेऽपि श्रुतिकटुत्वादिदोषयुक्तं ''कार्तार्थ्यमित्यादावतिव्याप्तिः''। यद्यपि विश्वनाथेन मम्मटलक्षणं सर्वथादोष रहिताभिप्रायकम्'' इति विवेचितं स्वग्रन्थे। तस्य खण्डनं प्रदीपटीकायां कृतम्। दोषरहितयोः शब्दार्थयुगलयोः काव्यत्वं स्वीकृत्य न कुत्रापि लक्षणं संघटिष्यते। तदर्थं ''वाक्यं रसात्मकं काव्यम्'' इति काव्यलक्षणं कृतम्। तन्मतं अर्वाचीनास्तु[६०] यथोक्तस्य काव्यलक्षणत्वे काव्यपदं निर्विषयं प्रविरलविषयं वा स्यात्। दोषाणां दुर्वारत्वात्। तस्मात् ''वाक्यं रसात्मकं काव्यम्'' इति तल्लक्षणम्। तथा च दुष्टेऽपि रसाऽपगमे काव्यत्वमस्त्येव। परं त्वपकर्षमात्रम् तदुक्तं कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः इति। एवञ्चालङ्कारादिसत्त्वे उत्कर्षमात्रं निरासे तु चित्रादौ काव्यव्यवहारो गौण इत्याहुः। तन्न समीचीनमिति काव्यप्रदीपकारः। ''अदोषौ'' इत्यत्र नञर्थस्य ईषदर्थः। यथा कथञ्चित् ईषद् दोषवत्त्वेपि काव्यत्वं सम्भवत्येव। यद्यपि न दोषो आवश्यकः अपितु यथाकथञ्चित्दोषसत्त्वे न काव्यत्व हानिः। अत एव उद्देश्यप्रतीति प्रतिबन्धकत्वं दोषत्वं इति प्रभायामुक्तम्[६१]। ते च श्रुतिकटुप्रभृतयो नित्या दोषा एव दोषा भवन्ति। नञर्थस्य अल्पतैवार्थः तदुक्तम्[६२] ''तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः प्रकीर्त्तिताः'' इति। तस्मात् अल्पत्वमेवात्र नञर्थ इति।

तदनन्तरञ्च सगुणात्वित्युक्तम्। अर्थात् माधुर्यादयो नित्यगुणाः काव्योत्कर्षहेतवः ये भवन्ति तत्सहितावित्यर्थः। अत्रापि विश्वनाथेनोक्तम् ''शब्दार्थयोः[६३] सगुणत्वविशेषणम-नुपपन्नम्'' इत्यादि। पुनश्चोक्तं ननुशब्दार्थौ गुणइत्यनेन गुणाभि व्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्राय इति चेत्? न। गुणाभिव्यञ्जक शब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्रा-धायकत्वम्, न तु स्वरूपाधायकत्वमिति। तदपि न मनोहरम्। शब्दार्थयोः गुणानामस्थितेः

---

५९. सङ्केतटीका पृष्ठ-६। बालबोधिनी, पृ.९

६०. काव्यप्रदीप, पृ.१३

६१. प्रभाटीका पृ. ११

६२. परमलघुमञ्जुषा पृ. १३।

६३. साहित्य दर्पण, पृ. १९-११

गौणत्वात्। गौण रूपेण इव तेषां स्थितिः स्वीकार्या भवति। तथाचोक्तं[६४] काव्यप्रकाशे- "गुणवृत्त्यापुनस्तेषां वृत्तिः शब्दार्थयोर्मता" इति। प्रदीपकारः गुणाः रसनिष्ठाः भवन्ति इति स्वीकुर्वन्ति। तथाचोक्तम् "गुणस्य[६५] रसनिष्ठत्वेपि तदव्यञ्जकपरं गुणपदम्" इति।

एवमेव प्रभायामपि व्याख्याति वैद्यनाथः तथाहि-[६६] "श्रुतिकटुप्रभृतयो नित्या दोषा माधुर्यादयो नित्या गुणा रसस्यापकर्षोत्कर्षहेतवः। ते चान्वयव्यतिरेकानुविधानाद्रसश्रयास्तद्धर्माश्च। भक्त्या तु तदुपकारिणोः शब्दार्थयोः" इति।

उद्योतटीकायामपि[६७] "मूर्ध्नि वर्गान्त्यगां इत्यादिना वक्ष्यमाणवर्णघटनादीत्यर्थः। तेन नीरसेऽव्याप्तिरपि नेति बोध्यम्" इति। अयमर्थः गुण-शब्दः गुणाभिव्यञ्जक शब्दार्थ परः। अत एव नीरसेऽपि काव्ये संघटते लक्षणम्। नीरसकाव्येऽपि गुणाभिव्यंजक-शब्दार्थयोः विद्यमानत्वात्। केवलं रसाभावात् माधुर्यादिगुणानां अभावमात्रमिति।

तददोषाविति मम्मटीये काव्यलक्षणे तृतीयं विशेषणं "अनलङ्कृति पुनः क्वापि" इति वर्तते। अत्रापि अनलङ्कृति इत्यत्र न नञर्थोऽभावः। अर्थात् अलङ्काराभाव-विशिष्टं काव्यमित्यत्र न तात्पर्यं मम्मटस्य। अपितु स्फुटाऽलङ्कार रहितत्वेऽपि न काव्यत्वहानिः। अतएवोक्तं[६८] वृत्तौ क्वचित्तु स्फुटालङ्कार-विरहेऽपि न काव्यत्वहानिः। अतोऽनेन ग्रन्थकारस्य मतं स्फुटीभवति। विशेषणमिदमधिकृत्य जयदेवविश्वनाथाभ्यामालोचनं प्रस्तुतम्। तयोरयमभिप्रायः यत् अलङ्कारविशिष्टौ शब्दार्थौ न काव्यस्वरूपम्। अलङ्काराणां काव्योत्कर्षाधायकत्वमेवमेवानयोरभावः अर्थः इति स्वीकृत्य जयदेवोऽपि अनलङ्कृति इति पदस्य अलङ्कार शून्यत्वमर्थः इति प्रतिपादयति। यदि अलङ्कारशून्यशब्दार्थयोः काव्यत्वं स्थास्यति तर्हि उष्णतारहितत्वमग्नेः स्वरूपं कथं न स्यात्। तथा चोक्तं विश्वनाथेन- "एतेन[६९] अनलङ्कृति पुनः क्वापि" इति यदुक्तं तदपि परास्तम्। अस्यार्थः-सर्वत्र सालङ्कारौ क्वचित्त्वस्फुटाऽलङ्कारावपि शब्दार्थौ काव्यमिति। तत्र साऽलङ्कारशब्दयोरपि काव्ये उत्कर्षाधायकत्वात्। एवमेव जयदेवोऽपि वक्ति "अङ्गीकरोति[७०] यः काव्यं शब्दाऽर्थावनलङ्कृती। असौ न मन्यते कस्मादनुष्णमलङ्कृती" इति। अन्ये चाचार्याः "अनलङ्कृती" इति पदस्य अल्पतायां तात्पर्यमुपवर्णयन्ति। तथाहि "सङ्केतटीकायां अनलङ्कृतिपदस्थस्य नञः अल्पतायां तात्पर्यम्, न तु निरलङ्कारे। स्फुटालङ्काराभावेऽपि न काव्यत्यहानिः। काव्यं किमिति जिज्ञासायामुक्तं कविकर्म काव्यमिति। तथा चोक्तं

---

६४. काव्य प्रकाश, ८/९५

६५. काव्यप्रदीप, पृ. ८

६६. संकेत पृ. २८०

६७. उद्योत पृ.१।

६८. काव्य प्रकाश, पृ. १९

६९. साहित्य दर्पण पृ. १३

७०. चन्द्रालोक, १/८

तेनैव-[७१] अनलङ्कृति इत्यत्र नञोऽल्पार्थकतया क्वाप्यस्फुटालंकृती" इति ज्ञेयम्, न तु सर्वथा निरलंकृती। निर्दोषसगुणकाव्यस्यालंकारतामात्राव्यभिचारात्। अत एव स्फुटालंकारविरहेऽपीति ब्रूयात्। विरहशब्दोऽपि सर्वथा नाभावं सूचयति। न काव्यत्वहानिरिति। अत्र कवे: कर्म काव्यम्, तस्य भाव: काव्यत्वमिति व्युत्पत्ति:। एवमेव दीपिकायामपि अल्पत्वमेवार्थ:। यथा चोक्तम्-[७२]स्फुटेत्यादिना। नञोऽल्पार्थता सूचिता। काव्यप्रदीपेऽपि नञोऽल्पार्थत्वात् इति वचनेन नञ: [७३]अल्पतायामेव तात्पर्यमिति वर्णितम्। प्रदीपकारोऽत्र ध्वनिकारमनुसरति। अत एवोदाहृतं ध्वनिकारोक्तं वचनम्- अत एव ध्वनिकारेणोक्तम्- अत एव रसानुगुणार्थविशेषनिबन्धनमलङ्कारविरहेऽपि छायाऽतिशयं पुष्णाति। यथा-

"मुनिर्जयति योगिन्द्रो महात्मा कुम्भसम्भव:।
येनैकचुल्के दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ"।

अत्र ह्यद्भुतरसानुगुणमेकचुल्के मत्स्यकच्छपदर्शनं छायातिशयं पुष्णाति। प्रदीपकार: रसाऽलङ्कारयो: कस्याप्येकस्य सत्तां स्वीकरोति। रससत्त्वेऽलङ्कारशून्येपि काव्यत्वं तिष्ठत्येव। बालबोधिन्यां काव्यस्यावस्थाषट्कं समुपवर्णितं दृष्यते। यथा-सरसं स्फुटाऽलङ्कार सहितमिति प्रथम:, सरसं अस्फुटाऽलङ्कार सहितमिति द्वितीय:, सरसं अलङ्कारशून्यमिति तृतीया:, नीरसं स्फुटाऽलङ्कार सहितमिति चतुर्थ:, नीरसं अस्फुटाऽलङ्कार सहितमिति पञ्चम:, नीरसं अलङ्कारशून्यमिति षष्ठ: पक्ष:। मम्मटानुसारं तृतीये षष्ठे च न काव्यत्वम्। प्रदीपकारानुसारं पञ्चमे षष्ठे च न काव्यत्वमिति विशेष:। मम्मटप्रदीपकारयो: मते नीरसत्वे सति अलङ्कारशून्यत्वं न काव्यत्वम्। परन्तु ठक्कुरमते रससत्त्वे अलङ्कारशून्येऽपि काव्यत्वम्। मम्मटमते चालङ्काराणां स्फुटत्वं अस्फुटत्वं वावश्यमेवेति मतभेद:। नीरसत्वे सति अस्फुटाऽलङ्कारसहितं काव्यमिति झलकीकरस्य पञ्चम: पक्षो न मम्मटसम्मत:। नीरसे काव्ये अस्फुटाऽलङ्कारस्य नैवोल्लेख: कुत्र चित्। अपितु "य: कौमार-हर:" इत्युदाहरणे अस्फुटाऽलङ्कारस्य सत्त्वे विप्रलम्भ-श्रृङ्गाररसस्य प्राधान्यमपि स्वीकरोति। नीरसेप्यस्फुटाऽलङ्कारे काव्यत्वमिष्टमेवेति ऋजु: पन्था इति वचनेन ठक्कुर: मम्मटमाक्षिपतीव प्रतिभाति।[७४]विश्वनाथ: "य: कौमार-हर:" इत्यत्र विभावनाविशेषोक्त्यो: सन्देहसङ्कराऽलङ्कारस्य स्फुटत्वं स्वीकरोति। मतमिदं ठक्कुरेण नागेशेन च खण्डितम्। मम्मट: स्वयमेव कथयति यदत्र स्फुटो न कश्चिदऽलङ्कार: रसस्य च प्राधान्यान्नाऽलङ्कारता इति। अत: आक्षेपेण हठमात्रप्रदर्शनं इत्यनयो: मतम्। एवमेव सङ्केतटीकायामपि "य: कौमार-हर:" इत्यत्र विभावनाया: विशेषोक्तेश्च खण्डनं विहितम् । स्वयमेव मम्मटेनोक्तं

---

७१. संकेत, पृ. ७

७२. दीपिका पृ. १४

७३. काव्यप्रदीप, पृ.८

७४. अत्र हि विभावानाविशेषोक्त्य मूलस्य सन्देहसङ्करस्य स्फुरत्वम्। साहित्य दर्पण, पृ. १४

यत्त क्रियायां[75]प्रतिषेधेऽपि फलव्यक्तिर्दृष्यते, तत्र भवति विभावनाऽलङ्कारः। तथा च [76]अखण्डेषु कारणेषु फलवचनता विशेषोक्तिः। यद्यपि रूय्यकः[77] "यः कौमार-हरः" इत्यत्र विभावनायाः विशेषोक्तेश्च सन्देहात् सन्देहसङ्कराऽलङ्कारं स्वीकरोति तथापि माणिक्यचन्द्रेण [78]सङ्केतटीकायां चण्डीदासेन च दीपिकायां मतमिदं खण्डितम्। [80]काव्यप्रदीपकारेण "यः कौमारहरः" इत्यत्र रूपकदीपकतुल्योगितासमुच्चयप्रभृतीनाम-लङ्काराणां सम्भावनापि न स्वीकृता। अनेकाश्च युक्तयः प्रदर्शिता। विभावनायाः[81] विशेषोक्तेश्च अस्फुटतैव साधिता। सन्देहसङ्करोऽपि न स्फुटाऽलङ्कारः।[83]अत्र स्पष्टरूपेण विप्रलम्भश्रृङ्गारस्य समुपवर्णनात् रसस्य प्राधान्यवत् न रसवदलङ्कारोऽपि। तस्माल्लक्षणमिदं सम्यगेवाभिहितमिति सुस्थम्।

"यः कौमारहरः" स एव हि वरः इत्यत्र अन्येषां व्याख्यातृणां मतान्युपस्थाप्य समालोचयामास वैद्यनाथः उदाहरणचन्द्रिकायाम्। तत्र कौमारं नवयौवनमिति व्याख्यातं केनचित्। तन्न मनोरममिति वैद्यनाथः। कुत इति चेत्, निषिद्धलक्षणापत्त्येति ब्रूमः। यद्यपि वसन्तकाले कदम्बाभावात् प्रौढाकदम्बानिलाः इति वचनं न समीचीनं प्रतिभाति। तथापि वसन्ते सर्वेषां कुसुमानां वर्णनं सम्प्रदायसिद्धमिति न कश्चिद्विरोध इति केषाञ्चिन्मतम्। चण्डीदासमते बसन्तघनसमययोः द्वयोरपि ऋतुराजवसन्तस्यैव ग्रहणमिति सम्प्रदायः। वसन्त-कदम्बयोः विरोधस्य समाधानमपश्यतां चैत्रस्थाने भाद्रेति पाठः कल्पितः। कश्चिद् च वर्षतौ नदीतीरे निकुञ्जे सुरतवर्णनमयुक्तमिति, तदपि न समीचीनम्। कच्छनिकुञ्जे तदनौचित्येऽपि तीरनिकुञ्जे सुरतवर्णनस्यानौचित्याभावात्। "मेघैर्मेदुरं" इत्यादौ दृष्टत्वादिति दीपिकाकारो व्याख्याति। 'चेतः समुत्कण्ठते' इत्यत्र केषाञ्चिन् मते विभावनाऽलङ्कारः। उत्कण्ठारूपस्य कार्यस्य कारणाभावेऽपि प्रतिपादनात्। आत्मनः प्रकृतिविशेषो बहुकालव्यवधानं वारयति उत्कण्ठया विभावनीयमिति दीपिकाकारेणोक्तम्। केचित्तु तत्र इत्यस्य स्थानसमयानुभूतोऽर्थ इति वर्णयन्ति। अतः रेवातीरस्यानुपभुक्तत्वात् अत्यन्तोपादेयत्वेनोत्कण्ठैवास्वाद्यते इति। केचिच्च काचिद् रेवातीरे परेण पुरुषेण कृतसङ्केतात् दूतीं गोपयन्ती सखीं आहेति इति तात्पर्यं वर्णयन्ति। तदपि न समीचीनम्।

---

७५. काव्यप्रकाश, पृ. ५३२

७६. काव्य प्रकाश पृ. ५३३

७७. अलङ्कारसर्वस्व, पृ. १८०–१८१

७८. सङ्केतटीका, पृ. ७

७९. दीपिका, पृ. १४–१५

८०. काव्यप्रदीप, पृ. १०

८१. तस्मादस्फुटत्वं यस्याः तथा अतोयस्यां अप्यस्फुटत्वमेव। काव्यप्रदीप, पृ. १०

८२. अनयोरस्फुटत्वे च संदेहरूपसङ्करोप्यस्फुट इति विभावनीयम्। काव्यप्रदीप पृ. ११

८३. भृङ्गाररूपरसस्य स्फुटत्वात् रसवदऽलङ्कारः स्फुटेति चेन्न। रसस्यात्र प्राधान्यात्। अप्राधान्येव तस्यालङ्कारत्वोपगमात्। काव्यप्रदीप, पृ. ११

विप्रलम्भस्वादतात्पर्यस्य स्वारसिकस्योलङ्घनेन तद्भिन्नतात्पर्यकल्पने प्रमाणाभावात्। विधिरिति विशेषाभावाच्चेति वैद्यनाथ:।

काव्यभेदसमीक्षणम्।

तत्र गद्यपद्यभेदेन काव्यं द्विप्रकारं तथा भाषामधिकृत्य संस्कृतप्राकृताऽपभ्रंसभेदेन काव्यं त्रिप्रकारमिति भामहाचार्य:[१]। गद्यं पद्यं मिश्रमिति त्रिप्रकारं काव्यमिति दण्डी[२]। गद्यपद्यभेदेन काव्यस्य भेदद्वयमिति रूद्रट:। ध्वनिकाव्यं गुणीभूतव्यङ्ग्यकाव्यं चित्रकाव्यमिति काव्यस्य भेदत्रयं स्वीकरोति आनन्दवर्धन:[३]। आनन्दवर्धनमनुसृत्यैव मम्मटोऽपि[४] काव्यस्य भेदत्रयं प्रतिपादयति। उत्तमं काव्यम्, मध्यमं काव्यम्, अधमं काव्यमिति।

उत्तमकाव्यम्:- यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य अतिशयचमत्काराधायकत्वं भवति, तत्रैव ध्वनिकाव्यत्वं स्वीकुर्वन्ति। उदाहृतं च ''नि:शेषच्युतचन्दनम्'' इत्यादि। माणिकचन्द्र-श्रीवत्सलांक्षन गोविन्दप्रभृतय: ध्वनिकाव्यैवोदाहरणमिति स्वीकुर्वन्ति। अत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य चमत्काराध्यायकत्वं सर्वसम्मतम्। अस्मिन् पद्ये अधमपदस्य व्यञ्जकत्वं अन्यनायिकासम्भोगरूपविप्रलम्भस्योद्दीपकत्वेन वाच्यार्थापेक्षया व्यङ्ग्यार्थस्याधिक-चमत्कारयुक्तता प्रतीयते। इदमेव 'अधम' पदे प्राधान्यम्। अत: ध्वनिकाव्यापरपर्यायोत्तम-काव्यस्योदाहरणमिति। संकेतटीकाकारेणात्र[५] अर्थशक्तिमूलध्वनि: स्वीकृत:। तथा च उपमेयोपमाऽलङ्कार: स्वीकृत:। स एव व्यङ्ग्य:। भ्रम धार्मिक इति इत्युदाहरणमपि दत्तं तेन। अत्र च वाच्यार्थ: विधिपरक: व्यङ्ग्यार्थस्य निषेधपरकत्वमिति। वापीगमनं तदन्तिके न गमनं च इति वाच्यार्थ:। वाप्यां न गमनं तदन्तिके च गमनमिति लक्ष्यार्थ:। तद्रमणं व्यङ्ग्यार्थ:। अत एव विपरीतलक्षणा सिद्ध्यति इति केषाञ्चिन् मतम्। तन्न समीचीनमिति गोविन्दठक्कुर:। मम्मटानुसार वापीगमनं तदन्तिके च न गमनमिति वाच्यार्थ:। तदन्तिकमेव रन्तुं गमनमिति व्यङ्ग्यार्थ:। अत: लक्षणानावश्यकी। अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यत इति स्वयमेव[६] मम्मटेनोक्तम्। एवमेव नागेशोऽपि स्वकृतायामुद्योतटीकायां अधमपदस्य दु:खदायककर्मकर्तृत्वं वाच्यार्थ:, अन्यनायिकासम्भोग-

---

१. भामह-'शब्दार्थौ सहितौ काव्यम्, गद्यं पद्यं च तद् द्विधा। संस्कृतं प्राकृतं चान्यदपभ्रश इति त्रिधा।' काव्यालङ्कार।

२. दण्डी -'गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम्।' काव्यदर्श।

३. आनन्दवर्धन:- (क) 'यत्रार्थ: शब्दो वा समर्थमुपसर्जनीकृतस्वार्थौ। व्यक्त: काव्यविशेष: स ध्वनिरिति सूरिभि: कथित:।'

(ख) प्रकारोऽन्यो गुणीभूतव्यङ्ग्य: काव्यस्य दृश्यते। यत्र व्यङ्ग्यान्वये वाच्यचारूत्वं स्यात् प्रकर्षवत्।

(ग) 'गुण-प्रधानभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते:। काव्ये उभे ततोऽन्यत् तच्चित्रमभिधीयते।' ध्वन्यालोक।

४. मम्मट-काव्यप्रकाश, पृ. ११-१४

५. संकेतटीक, पृ. ९

६. काव्य प्रकाश, पृ. १२

द्वारा वेदनोत्पादकत्वं व्यङ्ग्यार्थं इति प्रतिपादयति। तस्मादिदं उत्तम काव्यस्योदाहरणं समीचीनमिति।

मध्यमकाव्यम्। यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य नाधिकचमत्काराधायकत्वं भवति। तत्रैव गुणीभूतव्यङ्ग्यं नाम काव्यं भवति। तदेव मम्मटमते मध्यमं काव्यमिति। उदाहरणं, यथा-ग्रामतरूणं तरूण्येत्यादि। वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य अतिशयार्थप्रतिपादकभावे एव अतादृशि शब्दार्थः। अत एव तरूणं तरूण्या इति पदद्वयेन परस्परानुरागनिष्ठोत्कर्षाभिव्यतिर्भवति। दत्तसङ्केता मञ्जुललतागृहे नागतेति व्यङ्ग्यं गुणीभूतं जातम्। तदपेक्षया च वाच्यार्थस्यैव चमत्काराधायकत्वात्। सारबोधिन्यामुक्तं[७] यत् अतादृशि पदविशेषणेनैव चित्रकाव्ये नातिव्याप्तिः। व्यङ्ग्यार्थस्य स्फुटत्वेन नाधमकाव्ये समावेशः। व्यङ्ग्यस्यास्फुटत्वे[८] गुणीभूतव्यङ्ग्यकाव्यम्। अस्फुटतरत्वे च स्फुटतरत्वे चाधमकाव्ये समावेशः। गुणीभूतव्यङ्ग्यकाव्यस्य उदाहरणानि प्रतिपादितानि सन्ति। अगूढः अपरास्यङ्गं वाच्यसिध्यङ्गं स्फुटं अस्फुटं सन्दिग्धप्राधान्यं तुल्यप्राधान्यं काक्वाक्षिप्तमसुन्दरमिति सर्वेषामेतेषामुदाहरणान्यपि विवेचितानि सन्ति।

अधमकाव्यम्। आनन्दवर्धनस्य चित्रकाव्यमेव मम्मटस्य अधमकाव्यमिति। यत्र काव्ये व्यङ्ग्यार्थस्य प्रतीतिर्न भवति तद् अधमं काव्यमिति। गुणाऽलङ्कारयोः सत्त्वेऽपि स्पष्टरूपेण व्यङ्ग्यार्थरहितत्वमवर काव्यम्। तस्य च भेदद्वयं वर्त्तते। शब्दचित्रं अर्थचित्रं च। शब्द- चित्रस्योदाहरणम्-'स्वच्छन्दोच्छल,' अर्थचित्रस्य चोदारणं विनिर्गतं मानदमात्ममन्दिरात्'' इत्यादि। प्रथमे शब्दाऽलङ्कारानुप्रासजन्यचमत्कारः, द्वितीये च उत्प्रेक्षाऽलङ्कारस्य प्रदर्शनेन रसादिव्यंग्यतासत्त्वेऽपि तिरोहितत्वात् व्यङ्ग्यरहितं काव्यमिदम्। अव्यङ्ग्य[९] इत्यस्य न व्यङ्ग्यरहितत्वमर्थः। अपि तु इषदर्थकेन नञा समासात् अत्यल्पव्यङ्ग्यार्थत्वात् न तस्य प्रतीतिः। परन्तु व्यङ्ग्यार्थस्तु तिष्ठति तत्र। प्रदीपकारोऽपि[१०] एवमेव स्वीकरोति। यत्र स्पष्टरूपेण न व्यङ्ग्यार्थः प्रतीयते। माधुर्यादिगुणानां व्यञ्जकः शब्दः तथा अलङ्कारयुक्तः शब्दार्थयोः योजना भवेत्। तदेव चित्रकाव्यमिति दीपिकाकारः सारबोधिनिकारश्च। नैतादृशं[११] काव्यं भवति। यत्र व्यङ्ग्यार्थस्यत्यन्ताभावः।

उदारणचन्द्रिकायां ''निःशेष'' इत्यादि पद्यं सम्यक् व्याख्यातम्। तत्र दीक्षितमतमुपस्थापितं यथा अधमत्वं अपकृष्टत्वम्। तच्च जात्या कर्मणा वा भवति इत्यादिना उपस्थाप्य सम्यक् समाहितम्। तदनन्तरं अत्र वदन्ति इत्यादिग्रन्थेन निःशेषेत्याद्यवान्तर वाक्यार्थानां स्नानव्यावृत्तिद्वारेण व्यङ्ग्यासाधारण्यसम्पादनमित्यादिना केषाञ्चिन्मतमुपस्थाप्य

---

७. अत्र चित्रान्यत्वेसति इति विशेषण देयम्। तेन चित्रेनाति व्याप्तिः। सारबोधिनी, पृ. १४

८. काव्यप्रदीप, पृ. १४।

९. संकेतटीका, पृ. ९

१०. काव्यप्रदीप, पृ. १५

११. काव्यप्रदीप, पृ. १६

खण्डितं व्यञ्जनानुकूलं व्याप्त्यऽपरपर्यायस्यासाधारणस्यानुमानानुकूलतया व्यक्ति प्रतिकूलत्वादित्यादिना। स्नानव्यावृत्तत्वे विरुद्धलक्षणापत्त्या तदन्तिकं गतासीत्यंशस्य व्यङ्गताहानिरिति केषाञ्चिन्मतं, तदपि स्यादेवं यदि स्नानव्यावृत्तिर्वाच्यार्थदशायामवगम्यत वाक्यार्थप्रतीत्यऽनन्तरन्तु प्रतीतया तया व्यङ्ग्योन्मेष इति न लक्षणावकाश इत्यनेन खण्डितम्। यत्तु फलांशस्यापि न व्यङ्ग्यत्वसम्भवः इत्यादि। तदपि न। न द्वयधमत्वमपकृष्टत्वं इत्यादिना ग्रन्थेन सम्भोगं विनाऽधमत्वस्यानुपपत्तेरित्यादि। यत्तु उपनायकं आनेतुं प्रेषितां तदुपभोगलुप्तचन्दनादिकं स्नानव्याजेन गोपयन्तीं दूतीं प्रति नायिकायामियमुक्तिरिति, तदपि न। एवं सति दूत्या अभ्युपगतत्वेन तदुपपादकनिःशेषेत्यादिवाक्यस्यासङ्गत्यापत्तेः। एवं सम्यक् समीक्षितं वैद्यनाथेनेति मन्ये।

'ग्रामतरूणं' इति पद्ये ग्रामेति विशेषणे न निरन्तरसन्निधानात् सङ्केतदानयोग्यता स्नेहातिशयो वा ध्वन्यत इति दीपिकाकारस्य मतमुपस्थाप्य समीक्षितम्। तथा एवं सति दिनान्तरेऽपि सम्भोग प्रत्याशाऽनुवृत्तौ विप्रलम्भस्यैव लघुत्वापत्तेः। ग्रामे एकं तरूणं तेन दुर्लभत्वसूचनमेव ज्यायः। केषाञ्चिच्च मतं ग्रामस्य स्त्रीसमूहस्य सम्बन्धे तरुणः ग्रामतरूण इत्यर्थः। अनेनापि अनेकनारीप्रार्थ्यत्वं सूच्यत इति। केषाञ्चिन्मते तत्रैव निवासेन परिचितत्वात्। मुहुर्दर्शनेऽपि शङ्कानुदयाय ग्रामेति विशेषणम्। अत्र अतिशयोक्त्यलङ्कारः। केषाञ्चिन्मते केचिन्मुहु इत्यस्य मलिना भवति इत्यनेनान्वयमिच्छन्ति तेन च तदनुसन्धानसमयेऽनुतापोत्कर्षान्मुखमालिन्यप्रकर्ष इति ग्रन्थस्वरसः। एवं सम्यक् समीक्ष्य स्वमतमुपपादितम्।

'स्वच्छन्दे' इत्यादि पद्ये छातं अल्पमिति केषाञ्चिदर्थः। तन्न। सम्यक् इति वैद्यनाथः। 'स्वच्छन्दोच्छल' इत्यनेनैव बाहुल्यलाभात्। अत्रापि दीपिकाकारादीनां मतान्युपस्थाप्य खण्डनमण्डनपूर्वकं स्वमतं सुस्थापितम्।

काव्यप्रयोजनसमीक्षा

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति भट्टकारिकामाश्रित्य शास्त्रे प्रेक्षावतां प्रवृतिसम्पादनाय प्रयोजनकथनमावश्यकं वर्त्तते। अत एव प्राचीनाचार्याः स्वग्रन्थे प्रयोजनं प्रतिपादयिष्यन्तः दृश्यन्ते। अतएवाऽलङ्कारशास्त्रेडपि भरतभामहप्रभृतआचार्याः काव्यप्रयोजनं प्रतिपादितवन्तः। तत्र दृश्यश्रव्यभेदेन काव्यं द्विविधं भवति। अत एव काव्यशब्देन नाट्यानामपि भवति सङ्ग्रहः। ये जनाः दुःखार्त्ताः श्रमार्त्ताः[१] शोकार्त्ता वा भवन्ति। तेषां तपस्विनां विश्रामजननं नाट्यादिकाव्यं भवति। तथा धर्मसम्पादनाय यशः प्राप्तये आयुर्विवृद्ध्यर्थं हितसाधनाय बुद्धिसम्बर्द्धनाय लोकानामुपदेशाय च काव्यं प्रवर्त्तते। एवमेव धर्मेऽर्थे[२] कामे मोक्षे तथाऽनेकासु कलासु वैचक्षण्यसम्पादनाय काव्यशास्त्रमावश्यकम्। अनेन साधुकाव्यनिषेवणेन कीर्त्तिं प्रीतिं च प्राप्नोति जनः। काव्यस्य[३] दृष्टादृष्टार्थप्रीतिकीर्त्तिहेतुत्वमपि समुपवर्णयन्ति काव्यशास्त्रानुशीलनतत्त्वज्ञाः। सरसं काव्यं[४] कुर्वन् महाकविः अस्फुटमाकल्पमनल्पं परस्यापि यशः प्राप्नोति। एवमेव सहृदयमनः[५] प्रीतिहेतुतया काव्यं भवति। तथा च काव्यं धर्मादिसाधनभूतं[६] सुकुमारमतीनामऽपि अनायासेन शास्त्रज्ञानाय तथा अभिजातानां हृदयाह्लादसम्पादनाय काव्यमावश्यकं भवति। दोषरहितगुणाऽलङ्कारविशिष्टं[७] रससंयुक्तं काव्यं कुर्वन् कविः कीर्त्तिं प्रीतिं च विन्दति। तस्मादेतैः काव्यस्यानेकानि प्रयोजनानि प्रतिभान्ति। अस्यामेव परम्परायां मम्मटोऽपि काव्यप्रयोजनमाह। यथा–

काव्यं[८] यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे॥

काव्यं लोकोत्तरवर्णनानिपुणस्वरूपस्य कवेरसाधारणं तादृग् वर्णनात्मकं कर्म। उद्योतटीकायां[९] च लोकोत्तरशब्दस्य चमत्कारिबोधजनकेत्यर्थः। 'वर्णना' इत्यस्य मुखादेः

---

१. दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्। विश्रामजननं लोके नाट्यमेतद् भविष्यति। और 'धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्। लोकोपदेशजननं नाट्यमेतद् भविष्यति।' (नाट्यशास्त्र)

२. धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्तिं प्रीतिं च साधु काव्यनिषेवणम् (काव्यालङ्कार)

३. 'काव्यं सद्दृष्टार्थप्रीतिकीर्तिहेतुत्वात्।' (काव्यालङ्कारसूत्रवृत्ति)

४. 'ज्वलदुज्जवलवाक्यप्रसरः सरसं कुर्वन् महाकविः काव्यम्। स्फुटमाकल्पमनल्पं प्रतनोति यशः परस्यापि।' (काव्यालङ्कार)

५. 'तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्।' (ध्वन्यालोक)

६. 'धर्मादिसाधनोपायः सुकुमारक्रमोदितः। काव्यबंधोऽभिजातानां हृदयाह्लादकारकः।' (वक्रोक्तिजीवित)

७. 'अदोषं गुणवत्काव्यमलंकारैरलंकृतम्। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति।' (सरस्वतीकण्ठाभरण)

८. काव्यप्रदीप, पृ. ५

९. उद्योतटीका, पृ. ७

कमलत्वादिरूपेण कथनादिति वर्णितम्।

काव्यं यशसे-

यशः प्राप्यर्थं काव्यनिर्माणम्। यथा कालिदासादीनामिव[१०] यशः। कालिदासस्य[११] पित्रादिकुलं न कश्चिद् जानाति स्म। न वा तेषां धनिकत्वेन दानादिकं प्रसिद्धम्। येन तादृशं यशः स्यात्। परन्तु उत्तमकाव्यनिर्माणेनैव यशः प्राप्तिः प्रत्यक्षमेवाऽवगम्यते।

अर्थकृते- काव्यनिर्माणेन धनप्राप्तिरपि भवति। यथा- रत्नावलीनाटिकां निर्माय कश्चिद् धावकः विद्वान् हर्षेण राज्ञा प्रभूतं धनं लब्धवान्। एतच्च प्रभाटीकायां[१२] सम्यग् उपस्थापितो वर्त्तते। अतः एतदर्थमपि काव्यं करणीयम्।

व्यवहारविदे- राजादीनां प्रजापालनायोचितानुचितव्यवहारज्ञानाय काव्यमावश्यकम्। तदुक्तं काव्यप्रदीपेऽपि[१३]-राजादिगतपृथ्वीपालनादि समुचिताचारपरिज्ञानम्। प्रयोजनमित्यर्थः। बालबोधिन्यां[१४] आदिपदेन मंत्रिगुरुप्रभृतीनामपि समुचिताचारज्ञानाय काव्यमावश्यकमिति प्रतिपादितम्। यथा अनुचिताचारव्यावर्त्तनाय उचितेति।

शिवेतरक्षतये- शिवं मङ्गलं तदितरमङ्गलं तस्य क्षतये निर्वृत्तये काव्यम्। कस्यचिद् मयूरकवेः आदित्यस्तवनेन अनर्थनिवारणं अर्थात् कुष्ठरोगस्य निवृत्तिः संजातेति श्रूयते। काव्येप्रदीपेऽपि[१५] मयूरशर्मादीनामीवानिष्टनिवारणं च करोति इत्युक्तम्।

सद्यः परनिर्वृत्तये- सद्यः त्वरितमेव स्वयमानन्दाऽनुभूतिपूर्वकं परेषामपि आनन्दानुभूति कारयितुं काव्यम्। आनन्दानुभूतिरेव मुख्यं प्रयोजनम्। अन्यानि चानुषङ्गिकानि प्रयोजनानि। काव्यश्रवणानन्तरं रसास्वादनं आविर्भवति। तत्र चान्यारोपपदार्थातिरोहिताः भवन्ति। विवेकटीकायां[१६] अलौकिकानन्दानुभूतिरेव काव्यस्य मुख्यं प्रयोजनमिति प्रतिपादितम्। रसास्वादनमेव अनुभूतेर्बीजम्। रसास्वादनप्राप्तानन्देव ब्रह्मास्वादसहोदरशब्देनोच्यते। अत्र च वैषयिकसुखात् वैलक्षण्यमपि वर्त्तते। सारबोधिन्यां[१७] उक्तम्-यत् रसः आस्वाद्यते प्रकाश्यते अनेनेति रसास्वादनम्। विभावादिसंयोजनम्। तेन समुद्भूतं प्रादुर्भूतमिति। रसः कः पदार्थः रसः आस्वाद्यते। स्वप्रकाशानन्दः इत्युक्तम्। काव्यप्रदीपे[१८] प्रतिपादितम्-यत् सहृदयस्य तु काव्यश्रवणानन्तरमेव सकलप्रयोजनेषूत्तमं स्थायिभावास्वादसमुद्भूतं वेद्यान्तरसम्पर्कशून्यं रसास्वादनरूपमानन्दम्। काव्यास्वादनकाले कवेरपि सहृदयान्तः-पातितया रसास्वाद इति।

---

१०. काव्य प्रकाश, पृ. ५

११. सुधासागर, पृ. ११

१२. प्रभाटीका, पृ. ५

१३. काव्यप्रदीप, पृ. ५

१४. बालबोधिनी, पृ. ८

१५. काव्यप्रदीप, पृ. ५

१६. विवेकटीका, पृ. ५-६

१७. सारबोधिनी, पृ. ७

१८. काव्यप्रदीप, पृ. ५

कान्तासम्मिततयोपदेशयुजे- अन्तिममिदं प्रयोजनं काव्यस्य। उपदेशस्य प्रकारत्रयं अभिहितं मम्मटेन। प्रभुसम्मितोपदेशो यथा वेदशास्त्रादिः। तत्र शासनस्य प्राधान्यं भवति। आज्ञाप्रदायकत्वात्। मित्रसम्मितोपदेशः द्वितीयः। पुराणेतिहासप्रभृतयः। मित्रमिव प्रेम्णा सन्मार्गमुपदिशति। तृतीयश्च कान्तासम्मितोपदेशः। अत्र कान्तेव सरसतासम्पादनेन समुखीकृत्य रामादिवद् वर्त्तितव्यं न रावणादिवत् इत्युपदिशति। संकेतटीकायां[१९] वेदशास्त्रादि-शब्दस्थ आदिशब्देन मानवधर्म-चिकित्सादिशास्त्राणामपि सङ्ग्रह इत्युक्तम्। विवेकटीकायामपि मनुष्यइव शास्त्राण्यपि आज्ञापयन्ति इत्युक्तम्। नागेश्वरीटीकायामितिहासस्य लक्षणमपि निर्दिष्टं यथा-

धर्मार्थकाममोक्षाणां उपदेशसमन्वितम्।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते॥

यत्र शब्दस्य प्राधान्यं[२०] तत्र शास्त्रत्वम्। अर्थेन युक्ते तु आख्यानम्। उभयगुणयुक्तव्यापार प्राधान्ये काव्यत्वम्। तस्मात् काव्यस्य प्रयोजनं वर्त्तते। अतः काव्यं करणीयं पठनीयञ्चेति।

काव्यकारणसमीक्षा- कारणं विना कार्यं नोत्पद्यते इति सार्वजनीना प्रतीतिः। काव्यमपि कविकर्म रूपं वर्त्तते। अतः तस्यापि किमपि कारणमवश्यमेव भवेत्। तत्र स्वयमेव मम्मटेनोक्तम्-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इतिहेतुस्तदुद्भवे॥ इति।

काव्यनिर्माणे शक्तिः सर्वप्रधानभूता। शक्तिरेव प्रतिभारूपेण समुपवर्णिता पूर्वाचार्यैः। तथाहि-भट्टतौतः कथयति-

प्रज्ञानवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाज्जीवद्वर्णननिपुणः कविः॥

वामनेनोक्तं जन्मान्तरसंस्कारप्रेक्षिणी सहजा। इति।

रूद्रटः कथयति-

मनसिसदासुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिनि पदानि च विभान्ति यस्यामसौ शक्तिः॥

अपूर्ववस्तु निर्माणक्षमा प्रतिभेति अभिनवगुप्तः।

शक्तिः[२१] कवित्वबीजरूपः संस्कारविशेषः इति मम्मटः। संकेतटीकाया[२२] प्रतिभासंस्काररूपा। सा च वर्ण्यपदार्थविषयकनवनवोल्लेखशालिनि भवति। तल्लक्षणो

---

१९. संकेतटीका पृ. ४

२०. 'शब्दप्राधान्यमाश्रित्य तत्रशास्त्रं पृथग्विदुः।' अर्थे तत्त्वेन युक्ते तु वदन्त्याख्यानमेतयोः। द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत्। (संकेत, पृ. ४)

२१. काव्यप्रकाशवृत्ति, पृ. १४

२२. संकेतटीका, पृ. ५

विशेषः काव्यस्य च हेतुः प्रतिभैव। प्रतिभां विना चारूकाव्यकरणक्षमता न भवति। एवमेव विवेकटीकायां श्रीधरेणोक्तम् -अक्लिष्टानेकापदार्थज्ञानं शक्तिरिर्ति। दीपिकायां[२३] देवाद्यनुग्रहजनितः संस्कारः। स एव प्रतिभारूपः। यथा कविसहृदयानन्दहेतुः काव्यं तस्यांकुरस्येव कालान्तरे प्रादुर्भविष्यतो बीजरूपः। संसक्रियते विशिष्टकार्यभाजनीक्रियते प्रमाणेनेति संस्कारः प्राचीनवासना। देवताद्यनुग्रहजनितः......षण्डसम्भोगन्यायेन कञ्चनास्वादलेशमनुभूय व्युत्पन्नस्तन्मात्राविष्कारकतया सम्भाव्यमानञ्चेत्यर्थः। सम्प्रदायप्रकाशिन्यामुक्तम्-

स्मृति-व्यतीतविषयामतीरागामीगोचरा।
बुद्धिस्तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकी मता॥
प्रज्ञां नवनवोन्मेषशालिनीप्रतिभां विदुः। इति।

प्रभायां काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभा इत्युक्तम्। प्रतिभां विना प्रसृतमपि काव्यमुपहसनीयं स्यात्। तस्मात् काव्यनिर्माणाय शक्तिरावश्यकी।

निपुणताः- नैपुण्यं द्वितीयं काव्यकारणं समुद्दिष्टं वर्त्तते। कारिकायां स्थावरजङ्गमात्मकस्य लोकवृत्तस्य ज्ञानेन छन्दोव्याकरणाभिधानादिशास्त्राणां पौनः पुन्येनावेक्षणात् पूर्वेषां महाकवीनां काव्यानां पठनात्। इतिवृत्तप्रतिपादकानां ग्रन्थानां विमर्शनात् व्युत्पत्तिः। व्युत्पत्तिरेव च नैपुण्यम्। वामनेनोक्तम्-शब्दस्मृत्यभिधानकोशछन्दोविरचितकलाकामशास्त्रदण्डनीतिपूर्वाविद्या। रूद्रटेनोक्तम्- छन्दोव्याकरणकलालोकस्थिति पदपदार्थविज्ञानात् युक्तायुक्तविवेको व्युत्पत्तिरियं समासेनेति। शक्तिः प्रतिभानं वर्णनीयवस्तुविषयकनूतनोल्लेखशालित्वम्। व्युत्पत्तिस्तदुपयोगिसमस्तवस्तुपौर्वापर्यपरामर्शकौशलम्-इत्यानन्दवर्धनः। शब्दधर्मार्थकामादि शास्त्रेष्वाम्नायपूर्विकाप्रति-पत्तिसामान्याव्युत्पत्तिरभिधीयते॥ इति वाग्भट्टः। एतैश्च नैपुण्यं वर्धते कविषु।

अभ्यासः- काव्यं कर्त्तुं ये जानन्ति तेषामुपदेशेन बारम्बारं काव्यनिर्माणाय प्रयत्नमभ्यासः। तत्र भामहेनोक्तम्-

'शब्दाभिधेये विज्ञाय कृत्वा तत्त्वविदुपाशनम्।
विलोक्याऽन्यनिबन्धाश्च काव्यः काव्यसमादरः।।'

वामनो वदति-

आधानोद्धरणे तावत् यावत् दोलायते मनः
पदस्य स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती।
यत्पदानि व्यञ्जन्त्येव परिवृत्तिसहिष्णुतां
तं शब्दन्यासनिष्णाता शब्दपाकं प्रचक्षते॥

राजशेखरोऽप्यत्र कथयति- अविच्छिन्नशीलमभ्यासः। स हि सर्वगामी सर्वत्र निरतिशयं कौशलमाधत्ते। एवं येषां काव्यानुशीलनाभ्यासवशात् विषदीभूते मनोमुकुरे वर्णनीयतन्मयी

२३. दीपिका टीका, पृ. १०

भवनयोग्यता ते सहृदयसम्वादभाजः सहृदया इति अभिनव-गुप्तः। संकेतटीकायां[२४] काव्यं कर्त्तुं जानन्ति ये तदुपदेशेन करणे निष्पादने च ये काव्यं विचारयितुं जानन्ति तदुपदेशेन योजने विचारणे, इत्यादि। विवेके[२५] चोक्तम्-द्वौ कवी भवतः। सहृदयाः काव्यज्ञा इति। काव्यप्रदीपे काव्यशिक्षा[२६] काव्यं कर्त्तुं रसानुगुणतया प्रबन्धादौ घटयितुं च ये जानन्ति तदुपदेशः।. करणं काव्यस्वरूपनिष्पत्तिः कवित्वशिक्षया। योजनं पूर्वपराविरूद्धतया[२७] रसाभिव्यक्ति क्षमत्वेन प्रबन्धावयवविन्यास, इति दीपिकाकारः। तस्मादेतानि काव्यनिर्माणकारणानि भवन्तीति। कारिकायां[२८] इति हेतुस्तदुदभवे इत्यत्र हेतावेकवचनं प्रयुक्तं न तु बहुवचनम्। वृत्तौ चोक्तं त्रयः समुदिताः न तु व्यस्ताः, तस्य काव्यस्य उद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः। अत्र दण्ड-चक्रचीवरन्यायेन समुदितेषु हेतुत्वं तिष्ठति। न तु पार्थक्येन हेतुत्वम्। एवमेव सर्वे आचार्याः व्याख्यान्ति। अत एव कारिकास्थं इतिपदमपि सार्थकम्। तथा च लिखति प्रदीपकारः[२९]- इति शब्दो मिलितोपस्थापनाय। अन्यथा तद्वैयर्थयमेव स्यात्। सारबोधिन्यां[३०] चोक्तम्-समुदिता दण्डचक्रादिन्यायेन परस्परसापेक्षाः। व्यस्ताः तृणारणिमणिन्यायेन प्रत्येकं कार्य-जनकाः। हेतुरित्येकवचनोपादानेनैतल्लभ्यत इति भावः। अयमेवानयोर्विशेषः। अयं भावः- घटादिनिर्माणं प्रति दण्डचक्रादीनां सम्भूय कारणता वर्त्तते। नैकं विनापि घटादिनिर्माणरूपं कार्यं सम्पत्स्यते। तृणारणिमणिन्याये च सर्वेषां तृणादीनां स्वतन्त्ररूपेणान्यानिरपेक्षरूपेण दाहादिकं प्रति कारणता वर्त्तते। तृणेन स्वतन्त्ररूपेणाग्निरूत्पत्तिर्भवति। न तदर्थं मण्यादीनामावश्यकता भवति। तथैव मण्यादिना यदि दाहकता जायते तत्र न तृणादीनामावश्यकता। तस्मात्तृणादीनां दाहादिकं प्रति स्वतन्त्रकारणता सिद्धयति। तथैवाभ्यासादीनां न स्वतन्त्रकारणता अपि तु समुदितानां काव्यरूपकार्यहेतुता वर्त्तते। अर्थात् काव्यनिष्ठकार्यतानिरूपिता कारणताभ्यासादिसमुदायनिष्ठा, न त्वभ्यासादिप्रत्येकनिष्ठेति सम्प्रदायसिद्धोऽर्थः।

इति प्रथमोऽध्यायः।

---

२४. संकेतटीका पृ. ६
२५. विवेकटीका, पृ. ९
२६. काव्यप्रदीप, पृ. ७
२७. दीपिका, पृ. ११
२८. काव्यप्रकाश, पृ. ६-७
२९. काव्य प्रदीप पृ. ७
३०. सारबोधिनी, पृ. ९

अथ द्वितीयोऽध्यायः

(वृत्तिविवेचनात्मकः)

वृत्त्या[1] पदजन्यपदार्थोपस्थितिरेव शाब्दबोधे कारणम्। अतोऽत्राध्याये वृत्तिनिरूपणमारभते। वृत्तित्वं च स्वनिरुपितशक्तिशून्यत्वे सति स्वसम्बन्धिविषयबोधजनकत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यतावत्त्वसम्बन्धेनेति। वृत्त्येति पदाऽनुपादाने घटशब्दोच्चारिते सति समवायसम्बन्धेन आकाशस्यापि स्मरणे सञ्जाते तस्यापि, शाब्दबोधे भानापत्तिः। परन्तु तस्य वृत्त्योपस्थितत्वाभावान्न शाब्दबोधे समावेशः। सा च वृत्तिः शक्तिलक्षणान्यतररूपा। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धरूपः। स च[2] इदं पदं इममर्थबोधयितु अथवा अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः। 'एकादशेऽहनि पिता नाम कुर्यात्' इति शास्त्रीवचनस्यापीश्वरेच्छारूपत्वात् आधुनिके नाम्नि देवदत्तादावपि शक्तिरस्त्येवेति न बोधाभावरूपः। स्वेच्छया डित्थडवित्थादिनामकरणे न शक्तिरिति। बोधस्तु शक्तिभ्रमादेव जायते इति प्राचां मतम्। नव्यमते नेश्वरेच्छा शक्तिः अपि तु इच्छैव शक्तिरिति। अतः आधुनिक सङ्केतितेऽप्यर्थे शक्तिः वर्तत एव। अपभ्रंशशब्दाच्च शक्तिभ्रमादेव बोध इति उभयसम्मतः। वैयाकरणमते वृत्तिस्त्रिविधा[3] शक्तिर्लक्षणाव्यजञ्ना च। मीमांसक[4] मते च शक्तिर्लक्षणागौणीभेदात् वृत्तिस्त्रिविधा। तात्पर्यावृत्तिरपि केचन् मीमांसकाः स्वीकुर्वन्ति।

तत्र शब्दार्थयोः स्वरूपं निरूपयिष्यन् मम्मटोप्याह–स्याद्[5] वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा। अर्थात् वाचकलाक्षणिकव्यजञ्कभेदात् शब्दस्त्रिविधः शक्यलक्ष्यव्यङ्ग्यभेदात् अर्थोऽपि त्रिविधः। तत्र वाचकशब्द एवाभिधाशब्देनोच्यते। तथोक्तमपि– "वाच्यादयस्तदर्था स्युः" इति। वाच्यवाचकयोः शब्दार्थयोः शक्तिरेव नियामिका। शक्तिश्च भिन्ना भिन्नेति पूर्वमुक्तम्। पदपदार्थयोः सम्बन्धान्तररूपा शक्तिः वैयाकरणमते। सा च वाच्यवाचकरूपा। तस्य ग्राहकं इतरेतराध्यासमूलकं तादात्म्यम्। शक्तिनिष्ठकार्यजनकतायाः नियामकोऽपि सम्बन्ध एव भवति। यथा दीपे प्रकाशकत्वरूपा शक्तिः तिष्ठति तथापि प्रकाशेन सह विषयस्य सम्बन्धाभावे न तत्र प्रकाशकत्वं भवति। स च सम्बन्धः उपकार्योपकारकबोधस्वभावः। अतएवोक्तम्–भर्तृहरिणा उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते। शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः इति। न्यायभाष्यकारेणाप्युक्तं समयज्ञानार्थं चेदं पदलक्षणायाः वाचोऽन्वाख्यानं व्याकरणमित्यादि। तस्मादितरेतराध्यासः

---

१. न्या. सि.मु. पृ. ३३

२. शक्तिवाद, पृ. १-२

३. परमलघुमंजुषा, पृ. १३

४. मी. कौ. पृ. ८०

५. काव्यप्रकाश, पृ. १७

सङ्केतः। तन्मूलकं तादात्म्यं च सम्बन्धः। अत एव 'ॐ इत्येकाक्षरं ब्रह्म,' 'रामेति द्वयक्षरं नाम मानभङ्गः पिनाकिनः' इत्यादि सङ्गच्छते। तादात्म्यं च भेदाभेदसमनीयतम्। लक्षयन्ति च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। यद्यपि भेदाभेदयोः समत्वेन नियतत्वं व्यापकत्वं तथापि भेदस्यैव वास्तविकत्वमभेदस्य अध्यस्तत्वमेव आरोपितत्वमेवेति न तयोर्भेदाभेदयोर्विरोधः किन्तु विरोधाभास इति तात्पर्यम्। वैयाकरण भूषणसारे[६] अनादिर्योग्यतारूपा शक्तिः स्वीकृता। भाट्टमीमांसकमतेऽपि[७] शक्तिरनादिरूपा। सा च पदार्थान्तररूपा इच्छायाः सम्बन्धत्वादर्शनात्, नेच्छायाः शक्तित्वं भवितुमर्हति। प्रभाकरमीमांसकमते[८]-सर्वभावेषु पदार्थेषु अतीन्द्रियाशक्तिः कार्येणऽनुमीयते। यथा वन्हावेव दाहकता वर्त्तते परन्तु मणिमन्त्रौषधिप्रयोगे न दृश्यतेदाहः, पुनश्च तदपाकरणे दृश्यते दाहः। अतः अतीन्द्रिय शक्तिसामर्थ्यादि पदवाच्यं शक्तिस्वरूपं कार्यानुमेयम्। कार्यानुत्पत्तौ गतिद्वयं दृश्यते। अभिभवो वा विनाशो वा। यत्र न पुनः कार्यं जन्यते। तत्र विनाशोऽनुमीयते। यत्र च पुनः कार्यमुत्पद्यते तत्राभिभवः स्वीक्रियते। अतः कार्यानुमेयमेव शक्तिस्वरूपम्।

शक्त्यार्थबोधकत्वमेव शब्दानां वाचकत्वम्। शक्तिरेवाभिधा यः शब्दः व्यवधानादिरहितत्वेन स्वसङ्केतितमर्थमभिधत्ते स एव अभिधायको वा वाचको वा शब्दो भवति। अतएवोक्तं मम्मटेन-

साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचक इति। स्वयमेव विवृतमपि वृत्तौ इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहायेवशब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतोगृह्यते स तस्य वाचक इति। शब्दस्य[९] साक्षात् सङ्केतित एव अर्थः मुख्यार्थः। तस्य मुख्यार्थस्य बोधजननरूपो यो व्यापारः स एव अभिधाशब्देनोच्यते। शब्दार्थयोः शक्तिग्राहकप्रमाणानि प्रतिपादितानि सन्ति। यथा-

"शक्तिग्रहं व्याकरणोपमान कोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥[१०]"

अभिहितान्वयवादः- वाक्यार्थबोधे मीमांसकानां प्रथमं स्थानं वर्त्तते। तत्र भाट्टमीमांसकानां मतमिदम्। अभिहितान्वयपदे च शब्दद्वयं वर्त्तते। अभिहितः अन्वयश्च। अभिहितः शक्त्यादिवृत्त्या प्रतिपादितानां पदजन्यपदार्थानां अन्वयः। आकांक्षायोग्यतादि वाक्यमर्यादावशात् भवति। पदानि च अभिधेयपदार्थबोधकानि। लौकिके वाक्ये वक्तुः तात्पर्याविरोधेन पदानां परस्परं जायते सम्बन्धः। तदनन्तरं च भवति वाक्यार्थबोधः। मतमिदमेवाभिहिताऽन्वयवादशब्देनोच्यते। भाट्टमते एव न्यायसुधाकारस्य सोमेश्वरस्य

---

६. वै.भू.सा., पृ.
७. मी.कौ.वृ. ८०
८. तन्त्ररहस्यम्, पृ. २०
९. काव्यप्रकाश, पृ. २६
१०. काव्यप्रकाश, पृ. १७

मते पदार्थानां परस्परं सम्बन्धः। तत्र वक्तुः तात्पर्यमेव प्रधानभूतम्। स एव सम्बन्धः संसर्गो वा तात्पर्यार्थः। स एव च वाक्यार्थः। लौकिके वाक्ये प्रयोक्तुः पुरुषस्य तात्पर्यं भवति। वैदिके च वाक्ये तत्र पुरुषाभावात् शब्दस्यैव तात्पर्यं कल्प्यते। इयं वाक्यार्थबोधशक्तिः तात्पर्याख्यावृत्तिशब्देनोच्यते। मीमासकाः व्यञ्जनां न स्वीकुर्वन्ति। गौणीं च स्वीकुर्वन्ति। अतः तात्पर्यवृत्त्या सह चतस्रः वृत्तयः एतेषां मते। अत्र[१०] मम्मटेनाप्युक्तम्- "तात्पर्यार्थोऽपि केषुचिद्" इति। विवृतं च वृत्तौ-आकांक्षायोग्यतासन्निधिवशात् पदार्थानां समन्वये तात्पर्यार्थो विशेषवक्तुरपदार्थोऽपि वाक्यार्थः समुल्लसति इत्यादि। वृत्यजन्यत्वात् तात्पर्यस्य अपदार्थोऽपीत्युक्तम्।

अन्विताभिधानवादः- मतमिदं गुरोः प्रभाकरस्य वर्त्तते। मतेऽस्मिन् पदान्येव वाक्यम्। पदार्थे एव वाक्यार्थः। पदपदार्थयोश्च पदान्येव प्रमाणभूतानि। अर्थान्तरान्वितस्वार्थे एव पदानां शक्तिग्रहः। लोके कश्चिद् ब्रूते देवदत्त गामानय इति। वाक्यमिदं श्रुत्वा प्रवर्तते ऽन्यः। ततश्च तत्र तटस्थः कश्चिदेवं विचारयति यदस्य प्रवृत्तिः ज्ञानपूर्विका प्रवृत्तित्वाद् मदीयप्रवृत्तिवत् इति। एतच्च ज्ञानं वाक्यजन्यं भवति। वाक्यश्रवणानन्तरं जायमानत्वात्। पौनःपुन्येन अस्य वाक्यस्य प्रयोगात्। इयं व्युत्पत्तिर्जायते। यदस्य वाक्यस्य गवानयन रूपोऽर्थः। पुनश्च गोपदं परिवर्त्त्य अश्वपदं संयुज्य 'अश्वमानय' इत्युक्ते अश्वपदस्य गोपदस्य च भिन्ना-भिन्ना व्युत्पत्तिः। ततश्च प्रत्यायकमिदं पदमिति निश्चिनोति। एतच्च प्रत्यायकत्वं शक्तिग्रहणाधीनम्। तद्ग्रहश्च वृद्धव्यवहाराद् भवति। एतस्मादेव शब्दार्थ-सम्बन्धस्य ज्ञानं जायते। तच्च शब्दानां वाच्यवाचकभावात्मकं ज्ञानं व्युत्पत्यपेक्षं न सङ्केतकृतम्। सा च शक्तिग्रहाधीना तद्ग्रहश्च प्रयोज्यवृद्धव्यवहारात्। स च विशिष्टार्थज्ञानमूलः। तच्च ज्ञानं वाचकशक्तिमूलमिति विशिष्टविषये एव शक्तिरुन्नीयते। शब्दानां आवापोद्वापौ चान्वितगोचरौ। तदनन्तरं 'गामानय' इत्युक्ते सति गोपदं 'आनय' इति पदेन अन्वितस्वार्थ बोधकं भवति। 'आनय' पदमपि गोपदान्वितमर्थं वक्ति। ततश्च अन्विते शक्तिग्रहात् अन्विताभिधायित्वं पदानां प्रसिद्ध्यति। इदमेव अन्विताभिधानम्। इदमेव मतं निर्दिष्टं मम्मटेनः[११]-

वाच्य एव वाक्यार्थः इत्यऽन्विताभिधानवादिनः।

लक्षणासमीक्षा:- यत्र[१२] मुख्यार्थः बाधितो भवति तथा मुख्यार्थेन सह सम्बद्धः कश्चिद् अन्यपदार्थस्य रूढ्या प्रयोजनवशाद् वा प्रतीतिर्जायते तत्र लक्षणा भवति। यथा- कर्मणि कुशलः। एवं गङ्गायां घोषः। गङ्गायां घोषः इत्यत्र भगीरथरथखातावच्छिन्नः गङ्गापदार्थः। तत्र घोषस्य असम्भवात् मुख्यार्थबाधे गङ्गातीरे लक्षणा भवति। प्रयोजनञ्च शैत्यपावनत्वादिप्रतीतिः। अतः मुख्यार्थबाधे प्रयोजनवत्त्वे सति भवति लक्षणा। सा च द्विविधा भवति शुद्धा लक्षणा। गौणी लक्षणा च। शुद्धाऽपि उपादान लक्षणा, लक्षणलक्षणाभेदात्

---

११. काव्यप्रकाश, पृ. १७

१२. काव्यप्रकाश, पृ. २६

द्विविधा। प्रकारान्तरेण[१३] शुद्धायाः चत्वारो भेदाः भवन्ति। यथा–उपादानलक्षणा, लक्षणलक्षणा, सारोपा लक्षणा, साध्यवसाना च। एवमेव गौण्यापि सारोपा, साध्यवसाना भेदद्वयम्। तथा च लक्षणापट्टः–

लक्षणा

शुद्धा — **गौणी**

उपादान (कुन्ताः प्रविशन्ति) | लक्षण (गंगायां घोषः). | सारोपा (आयुर्घृतम्) | साध्यवसाना (आयुः इदम्) | सारोपा (गौर्वाहीकः) | साध्यवसाना (गौरयम्)

मुकुलभट्टोऽपि लक्षणायाः भेदषट्कं स्वीकुर्वन्ति। परन्तु तत्र उपचारमिश्रा लक्षणा भिन्ना स्वीकुर्वन्ति। तेषाममते लक्षणा बोधकपट्टः–

शुद्धा — **उपचार मिश्रा**

उपादान (गौरऽनुबन्ध्यः) पीनो देवदत्तो दिवा न भुङ्क्ते इति वा[१४]। | **लक्षण** (गङ्गायां घोषः) | **शुद्धोपचार**: सारोपा (आयुर्घृतम्), साध्यवसाना (आयुः इदम्) | **गौणोपचार**: सारोपा (आयुर्घृतम्), साध्यवसाना (आयुः इदम्)

पण्डितराज–जगन्नाथेन मम्मटकृतमेव विभाजनं स्वीकृतम्। परन्तु लक्षण–लक्षणा स्थाने जहत्स्वार्थः उपादानलक्षणास्थाने अजहत्स्वार्थाः शब्दस्य प्रयोगो दृश्यते। एवमेव नागेशेनापि[१४] भेदः प्रतिपादितः। तथा च 'सर्वे सर्वार्थवाचकाः सति तात्पर्ये' इति भाष्यवचनेन नास्ति लक्षणेति प्रतीयते। शक्तिरेव द्विविधा वर्तते। प्रसिद्धा, अप्रसिद्धा च। प्रसिद्धात्वं च आमन्दबुद्धिवेद्यात्वम्। सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वमिति। यद्यपि लक्षणायां कारणद्वयं वदन्ति। तथापि अन्वयानुपपत्तिं परित्यज्य तात्पर्यानुपत्तिरेव लक्षणाबीजं सर्वे संमामनन्ति। बालचित्तानुरञ्जनीटीकायामपि[१५] उक्तं–तेन षड्विधा उपादानलक्षणा इत्यादि। काव्यप्रदीपकारेणपि[१६] षड्विधा लक्षणा स्वीकृता। तथा च तेषां मते लक्षणा पट्टः–

लक्षणा

शुद्धा — **गौणी**

उपादान लक्षणा: सारोपा उ.ल. (कुन्ताः पुरुषाः प्रविशन्ति) | साध्यवसाना (कुन्ताः प्रविशन्ति)

लक्षण–लक्षणा: सारोप ल. (आयुर्घृतम्) | साध्यवसाना ल. (आयुरेवेदम्)

सारोपा (गौर्वाहीकः) | साध्यवसाना (गौरयम्)

---

१३. काव्यप्रकाश, पृ. ७३

१४. परम लघुमंजुषा, पृ. ५०–५१

१५. बालचित्तानुरंजनी, पृ. ३५

१६. काव्यप्रदीप, पृ. ३६

मम्मटेन[१७] सह प्रदीपकारस्य नास्ति कश्चिद्विशेषः। मम्मटः सारोपा-साध्यवसाना च स्वीकरोति। काव्यप्रदीपकारः उपादानलक्षणां, लक्षणलक्षणां च स्वीकारोति। चण्डीदासश्च रूढि-प्रयोजन-उपादान-लक्षण-सारोपा-साध्यवसानापाधि भिन्नाः षड्विधा इति स्वीकरोति। नागेश्वरीटीकायां[१८] शुद्धागौणीभेदेन लक्षणा द्विविधा। शुद्धायाः उपादानलक्षणा, लक्षणलक्षणा, सारोपा, साध्यवसानलक्षणेति चत्वारो भेदाः। गौण्याश्च सारोपा-साध्यवसाना भेदद्वयम्। मम्मटः[१९] व्यङ्ग्यदृश्ट्यापि लक्षणायाः भेदद्वयं प्रतिपादयति। यथा व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने इति। सव्यङ्ग्यायां लक्षणायां व्यङ्ग्यार्थस्य प्रकारद्वयम्। गूढव्यङ्ग्यः, अगूढ व्यङ्ग्यश्च। अनेन प्रकारेण अव्यङ्ग्या, गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति भेदात् त्रिविधेति वक्तुं शक्यते। एतेषां सर्वेषां भेदानामुदाहरणानि उदाहरणचिन्द्रकायां नैव दृश्यन्ते। तथापि येषामुदाहरणानां विवेचनं वर्त्तते। तेषां समीक्षणं क्रियते। तथाहि-मातर्गृहोपकरणमद्य खलुनास्ति। नास्तीत्यत्र काचिद् उपनायकसङ्गमार्थिनी शाकेन्धनाद्यानयनव्याजेन बहिर्गन्तुं मातरं प्रत्याहेति उदाहरणचन्द्रिकाकारस्य अवतरणिका। केषाञ्चित् मते प्रत्यहं गृहकार्यव्यापृततया स्वैर्विहारं कर्त्तुमक्षमा काचिद् मातरं प्रत्याह इति अवतरणिका। परन्तु इदं तु तदा सङ्गच्छेत इत्यादि ग्रन्थेन खण्डितं तन्मतं ग्रन्थकारेण। 'साधयन्ती सखी सुभगं' इत्यत्र शासति इति पाठः चण्डिदासेन स्वीकृतः। केचिच्च सद्भावस्य करणीयं स्नेहसदृशमिति योजयन्ति। 'पश्य निश्चलनिष्पन्दा' इत्यत्र निरूपमत्वसिद्धिरिति केचिद् स्वीकुर्वन्ति। केचित्तु नायिका विरहवेदनां कामुकं प्रति निगूढं निवेदयन्त्या सख्येयमुक्तिः। अनेन च विप्रलम्भातिशयो व्यङ्ग्यः। इन्दुवदनायाः अति पद्ये न वैमत्यं दृश्यते। मनोहारित्वमेव अत्र व्यङ्ग्यम्। श्रीपरिचयादिति पद्ये च ललितज्ञाने अनायासो व्यङ्ग्य इति केचित्। तन्न समीचीनम्। तस्यामदेवइत्येवकारवाच्यत्वाद् इति ग्रन्थकारः। प्रयोजनं च सहृदयहृदयवेद्यत्वम्। 'एतावन्मात्रस्तनिके' इति पद्ये नास्ति मतवैभिन्नयम्। केचित् प्रेषितं प्रति तत्कलत्रावस्था कथनमिदमिति स्वीकुर्वन्ति, परन्तु दिवससंख्याकथनासामञ्जस्यात् तन्न समीचीनमिति ग्रन्थकारः। 'भद्रात्मन' इति पद्ये नास्ति कश्चिद् व्याख्यानभेदः। अत्र प्रकरणवशात् राजवृत्तान्तो वाच्यो भवति। गजवृत्तान्तस्तु व्यङ्ग्य इति ग्रन्थकारः।

---

१७. काव्यप्रदीप, पृ. ३६

१८. नागेश्वरीटीका, पृ. १९

१९. काव्यप्रकाश, पृ. १०

व्यञ्जनासमीक्षा

लाक्षणिक शब्देभ्योपि व्यङ्ग्यार्थप्रतीतिर्जायते। तत्र व्यङ्ग्यार्थं प्रकटयितुं यः शब्दस्य व्यापारः सह व्यञ्जनारूपः। यत्र प्रयोजनप्रतीतिसम्पादयितुं लक्षणया शब्दः प्रयुज्यते तत्र तस्य प्रयोजनस्य नानुमानादिना प्रतीतिः। अपि तु फलं बोधयितुं लाक्षणिकशब्दमात्रस्य विषयः न व्यञ्जनां विना अन्यस्य कस्यचित् व्यापारः। अतएवोक्तं मम्मटेन-नाभिधा समयाभावादिति। अर्थात् सङ्केतं विना प्रयोजन प्रतीत्यर्थं न शब्द व्यापारः समर्थः। एवमेव हेतुं विनाऽपि लक्षणापि न समर्था। तथा चोक्तं हेत्वभावान्न लक्षणेति। यद्यपि लक्षणावृत्तिद्वारा प्रयोजनप्रतीतिर्भवितुमर्हति। तथापि अनवस्थादोषग्रस्तत्वान्न स्वीकर्तुं शक्यते। तथा चोक्तं- ज्ञानस्य विषयो ह्यन्यः फलं अन्यदुदाहृतम्। प्रयोजनं ज्ञानार्थं अभिधालक्षणां परित्यज्य शब्दस्य काचिद् वृत्तिरस्ति। शब्दस्यायमेव व्यापारः व्यजञ्जनद्योतनध्वननादिशब्देन कथ्यते। व्यञ्जना द्विविधा भवति। यथा शाब्दी व्यञ्जना आर्थी व्यञ्जना च। शाब्दी व्यञ्जनापि अभिधामूला व्यञ्जना लक्षणामूला व्यञ्जनेति। यद्यपि अभिधामूलाव्यञ्जनायाः मुख्यवृत्तित्वेन प्राथम्यमुचितम्। तथापि लक्षणामूला व्यञ्जनायाः प्रथमं निरूपणं कृतम्। लक्षणामूला- व्यञ्जनायाः प्रकृतत्वात् प्रसिद्धितरत्वाच्च लाक्षणिकशब्देभ्यः व्यङ्ग्यार्थप्रतीतिसम्पादनाय शब्दस्य यो व्यापार स एव लक्षणामूला व्यञ्जना। शैत्यपावनत्वादिफलं प्रतिपादयितुम्। लक्षणाश्रितः शब्दः प्रयोगः। तत्र न शब्दान्तरेण प्रमाणान्तरेण वा तस्य बोधः। मुख्यार्थबाधे तद्योगे रूढि प्रयोजनाऽन्यतरदिति त्रयं लक्षणाहेतुः। हेतुत्रयं विना न भवति लक्षणा। एतच्च गङ्गायां घोषः इत्यादौ सुस्पष्टम्। न प्रयोजनमेव लक्ष्यम्। अनवस्थादोषग्रस्तत्वात्। अनवस्था च मूलकक्षयकारिणी भवति। तदुक्तं मम्मटेन- 'एवमऽप्यन्वस्था स्यात् मूलकक्षयकारिणी' ज्ञानस्य विषयो ह्यन्यः इत्यत्र प्रत्यक्षादिज्ञानविषयः नीलादिः तस्य फलं च मीमांसकमते ज्ञातता भवति नैयायिकमते चानुव्यवसायः। अनेन ज्ञायते यत् प्रयोजनविशिष्टे एव भवति लक्षणा। 'अयं घटः' इत्याकारकप्रत्यक्षप्रमाणेन घटज्ञाने जाते पश्चात् 'घटमहं जानामि' इति ज्ञानं भवति। इदमेव ज्ञानं अनुव्यवसायशब्देनोच्यते नैयायिकमते। मीमांसक मते प्रत्यक्षप्रमाणेन 'अयं घट' इति ज्ञाने जाते पश्चात् मया घटो ज्ञातः इति भवति प्रतीतिः। यद् विषयकं ज्ञानं भवति तद् विषयीभूते घटादौ किञ्चित् वैशिष्ट्यमुत्पद्यते। इदं वैशिष्ट्यं धर्मरूपो वा गुणरूपो वा भवतु। अयमेव ज्ञातताशब्देनोच्यते। इयमेव सम्वित्तिरिति मम्मटः। प्रत्यक्षज्ञानस्य विषयः घटः फलञ्च ज्ञाततासम्वित्तिर्वा अनुव्यवसायो वा। अनेन प्रकारेणेदं निश्चीयते- प्रयोजनप्रतीत्यर्थं अभिधातात्पर्यलक्षणावृत्तिभ्योऽतिरिक्ता कश्चिदन्यः शब्दव्यापारो वर्त्तते। स एव व्यापारः व्यञ्जनाशब्देनोच्यते। अभिधामूला व्यञ्जना- लक्षणामूलकव्यञ्जना निरूपणानन्तरं प्रसङ्गसङ्गत्या अभिधामूलकव्यञ्जनां निरूपयति ग्रन्थकारः। तथा चोक्तं-

"अनेकार्थस्य[1] शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैर्वाच्यार्थधीकृतव्यावृत्तिरञ्जनम्॥"

अयं भावः- शब्दाऽनेकार्थाः भवन्ति। तथापि संयोगादिद्वारा वाच्यार्थस्य भवति निर्णयः। ततः वाच्यर्थादन्यस्य अर्थस्य बोधं कारयितुं व्यञ्जना व्यापृता भवति। अर्थात् संयोगादिभ्यः हेतुभ्यः वाच्यार्थस्य निर्धारणं भवति। अत्र भर्तृहरिणोक्तमेव न्यायमनुसरति मम्मटः। तथा च-

संयोगो विप्रयोगश्च[2] साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यं औचितीदेशः कालो व्यक्तिस्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृति हेतवः॥

संयोगः- सशंखचक्रो हरिः। अत्र हरिशब्दस्य अनेकार्थत्वेऽपि शंखचक्रसंयोगेन विष्णु रूप एव अर्थः निश्चीयते।

विप्रयोगः- तादृशसम्बन्धध्वंसो विप्रयोगशब्दार्थः अशंख चक्रो हरिः। अत्रापि विप्रयोगात् हरि शब्दस्य विष्णुरेवार्थः।

साहचर्यम्- अनेनापि शब्दार्थनिर्णयो भवति। यथा रामलक्ष्मणौ। यद्यपि रामशब्देन बलरामस्य परशुरामस्य चापि भवति बोधः तथापि लक्ष्मणपदसाहचर्यात् दशरथपुत्र एव राम शब्दार्थः।

विरोधः- सहानवस्थान एव विरोधः। 'रामार्जुनगतिस्तयोः' इत्यत्र परस्परविरोधात् रामशब्देन परशुरामः अर्जुनशब्देन च कार्त्तवीर्यरूपोऽर्थः। न तु कुन्तीपुत्रः।

अर्थः- अर्थशब्दस्यात्र प्रयोजनमऽर्थः। स्थाणुंभज भवच्छिदे इत्यत्र स्थाणुशब्दस्यानेकार्थत्वेऽपि भवबाधाहरणरूपप्रयोजनसानिध्याच्छिव एव स्थाणुशब्दार्थः।

प्रकरणम्-'सैन्धवमानय' इत्यत्र प्रयुक्तस्य सैन्धवपदस्य लवणे अश्वे च शक्तत्वेऽपि भोजनप्रसङ्गे लवणस्य यात्राप्रसङ्गे अश्वस्य च बोधः।

लिङ्गम्- अक्ताः शर्करा उपदधाति। अत्र यद्यपि अक्तपदं सामान्यतः उपादानात् तैलघृतोभयाभ्यञ्जनपरकं तथापि 'तेजोवै घृतम्' इति वाक्येन घृतस्यैव ग्रहणं भवति।

शब्दस्यान्यस्य सन्निधिः- रामोजामदग्न्यः। इत्यत्र जामदग्न्य पदसन्निधानात् रामः परशुरामः न तु दाशरथिहलधरौ।

सामर्थ्यम्- अभिरूपाय कन्या देया इत्यत्र कन्या देये इति कथने नैव वराय सुन्दराय इति प्राप्ते अभिरूपपदसामर्थ्यात् अतिसुन्दराय वराय कन्या देयेत्यर्थः।

औचितिः- यस्य निम्बं परशुना यश्चैनं मधुसर्पिषा।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः॥

अयं भावः- यश्च कश्चिद् जनः निम्बवृक्षं परशुना छिनत्ति। यश्च कश्चिद् जनः निम्बवृक्षं मधुसर्पिषा सिञ्चति यश्च जनः निम्बवृक्षं गन्धमाल्याद्यैः पूजयति। तेषां सर्वेषां

---

१. काव्य प्रकाश, २/१९
२. काव्य प्रकाश, पृ. ८९

कृते निम्बवृक्षः कटुरेव भवति। अत्र औचित्यादेव छेदनार्थत्वादीनां भवति बोधः।

देशः- 'भात्यत्र परमेश्वरः' इत्यत्र परमेश्वरपदस्य ईश्वरादावपि प्रयोगदर्शनात् राजधानीरूपदेशस्य सम्बन्धात् परमेश्वरशब्दः राजपरः, नेश्वर परः।

कालः- चित्रभानुर्भाति। चित्रभानुर्विरोचनः। चित्रभानुविभावसु इति कोश बलात् चित्रभानुपदं यद्यप्यग्निसूर्योभयत्र शक्तं तथापि रात्रिरूपकालसम्बन्धात् अग्नेर्बोधकम्। एवं दिवारूपकालसम्बन्धात् सूर्यबोधकम्।

व्यक्तिः-'मित्रो भाति मित्रं भाति' इत्यत्र मित्रपदं यद्यपि उभयार्थकं तथापि पुल्लिङ्ग निर्देशात् सूर्यार्थबोधकं नपुंसकलिङ्गनिर्देशाच्च सुहृद् बोधकम्।

स्वरः- स्थूलपृषती। अत्र पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थनिर्णयः। अन्तोदात्तस्वरेण तत्पुरुषार्थनिर्णयः।

आर्थीव्यञ्जना- वक्ताबोद्धाकाकुवाक्यवाच्यान्यसन्निधिप्रस्तावदेशकालान्य-विद्यादिवैशिष्ट्येन सहृदयानामर्थान्तरप्रतीतिजनकार्थस्य यो व्यापारः, सा आर्थीव्यञ्जना। एतेषामुदाहरणानि प्रस्तोष्ये 'बोधव्य' इत्यस्य प्रतिपाद्योऽर्थः। काकुर्ध्वनेर्विकारः। प्रस्तावः प्रकरणम्। अर्थः वाच्यलक्ष्यव्यङ्ग्यात्मकः।

वक्ता-'अतिपृथुलं जलकुम्भं' इत्यत्र वक्तुः उक्तिवैचित्रयात् चौर्यरतगोपनं गम्यते।

बोधव्य- औन्निद्रयं दौर्बल्यं इत्यत्र दूत्याः तत्कामुकोपभोगो व्यज्यते।

काकुवैशिष्ट्यम्-'तथाभूतां दृष्ट्वा' इत्यत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते।

वाक्यम्-'तदा मम गण्डस्थल निमग्नां' इत्यत्र मम सखिं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिर्नैव भूत इत्यादिना प्रच्छन्नकामुकत्वं व्यज्यते।

वाच्यवैशिष्ट्यम्-'उद्देशोऽयं सरसकदलीश्रेणीशोभातिशायी' इत्यत्र उक्तिवैशिष्ट्येन रतार्थ प्रविशेति इत्यर्थः व्यङ्ग्यम्।

अन्यसन्निधिः-'नूदत्याद्रमनाः' इत्यत्र सायंकालरूपसमयः सङ्केतकालः इति तटस्थं पुरुषं प्रति कयाचित् द्योत्यते।

प्रस्तावः- प्रस्तावश्च प्रकरणरूपः। 'श्रूयते समागष्यिति' इत्यत्र उपपतिं प्रति गन्तुं प्रस्तुता काचिन्नायिका तां न युक्तमिति कृत्वा कयाचिन्निवार्यते।

देशः-'अन्यत्र यूयं कुसुमावचायं' इत्यत्र देशस्य विविक्तत्वेन हे प्रछन्न कामुकः। त्वयाऽभिसार्यतां इत्याश्वस्तां प्रति कयाचिन्निवेद्यते।

कालः- 'गुरुजनपरवशप्रिय' इत्यत्र वसन्तसमये 'यदि गच्छसि त्वं तर्हि गच्छ। स्वयमेव श्रोष्यसि करणीयं' इत्यनेन जीवनाभावो व्यज्यते।

अन्यविधः-'द्वारोपान्तनिरन्तरे' इत्यत्र प्रछन्नकान्तविषयकाऽभिप्रायविशेषो व्यङ्ग्यः।

स्वरुपभेदात् वाच्यव्यङ्ग्ययोः भवति भेदः। तथाहि स्वरूपभेदः, कालभेदः, आश्रयभेदः, निमित्तभेदः, कार्यभेदः, संख्याभेदः, विषयभेदश्च।

स्वरूपभेदः- स्वरूपभेदस्योदाहरणत्रयं वर्त्तते। यथा-

निःशेषच्यूतचन्दनेत्यादि प्रथमः। अत्र वाच्यः निषेधरूपः। व्यङ्ग्यश्च विधिरूपः। मात्सर्यमुत्सार्य विलासिनीनामिति द्वितीयः। अत्र वाच्यः संशयरूपः। व्यङ्ग्यार्थश्च शान्तरूपः, श्रृङ्गाररूपो वा। कथं वाऽवनिप इति तृतीयस्योदाहरणम्। अत्र वाच्यार्थः निन्दारूपः, व्यङ्ग्यार्थश्च स्तुतिरूपः।

कालभेदः- पूर्वं तावत् वाच्यस्य प्रतीतिर्भवति पश्चात् व्यङ्ग्यार्थस्य। उक्तमपि- पूर्वं हि वाच्यः प्रतीयते पश्चात्तु व्यङ्ग्य इति।

आश्रयभेदः- वाच्यार्थः शब्दाश्रितः। व्यङ्ग्यार्थश्च शब्दाशब्दः शब्दैकदेशाश्रितः, शब्दार्थाश्रितः, वर्णाश्रितः इत्यादि। अयमेव आश्रयभेदः।

निमित्तभेदः- व्याकरणकोशादिना वाच्यार्थस्य भवति बोधः। परन्तु निर्मलप्रतिभाविशिष्टसहृदयकाव्यतत्त्वज्ञानामेव बोधो भवति।

कार्यभेदः[४]- यस्य वाच्यार्थबोधो भवति स केवलं बोद्धा शब्देनोच्यते। यस्य च व्यङ्ग्यार्थज्ञानमपि भवति स बोद्धृत्वे सति सहृदयशब्देनोच्यते। वाच्यार्थः केवलं प्रत्यायकः न तु चमत्कृतिजनकः। व्यङ्ग्यार्थस्तु प्रत्यायकत्वे सति चमत्कृतिजनकताविशिष्टोऽपि भवति।

संख्याभेदः- संख्यामाश्रित्य वाच्यार्थः नियतः तथा एकैव भवति। व्यङ्ग्यार्थस्तव नियत अनेकश्च।

विषयभेदः-'कस्या वा' इति पद्यमुदाहरणरूपम्। वाच्यार्थः सर्वेभ्यः समानः। परन्तु व्यङ्ग्यार्थः वक्तृभेदात् श्रोतृभेदाच्च भिन्नो भवति।

लक्षणामूलकध्वनौ व्यञ्जकतायाः अनिवार्यता-

ध्वनेः प्रकारत्रयं प्रदर्शितं वर्त्तते। यथा-रसादिध्वनिः, वस्तुध्वनिः अलङ्कारध्वनिश्च। अत्र रसभावरसाभासभाव। भावभावोदयभावसन्धिभावशबलताभावशान्तिप्रभृत्यऽर्थाः न कदापि अभिधायाः लक्षणायाः वा विषयाः। अपि तु सदैव व्यङ्ग्यभूताः भवन्ति। रसश्रृङ्गारादिशब्दानां रसप्रतीतये अनावश्यकत्वात्। वस्तुध्वनौ अर्थात् अर्थान्तरसङ्क्रमित ध्वनौ, अत्यन्ततिरस्कृतध्वनौ च। वस्तुरूपव्यङ्ग्यं विना लक्षणाऽपि भवितुं नार्हति। व्यङ्ग्यरूपप्रयोजनप्रतीतिः अभिधया लक्षणया वा न भवति।

अभिधामूलकध्वनौ व्यञ्जकतायाः अनिवार्यता-

अलङ्कारध्वनौ शब्दशक्त्युद्भवनामकभेदे संयोगादिना अभिधायाः नियन्त्रितत्वात् अभिधया अन्यार्थस्य प्रतीतिर्न भवति। अतः व्यञ्जना आवश्यकी। अर्थशक्तिमूलकध्वनौ

---

३. काव्यप्रकाश, ५/१३३

४. काव्यप्रकाश, पृ. २६०

वस्तुनः अलङ्कारस्य वा व्यञ्जनयैव प्रतीतिर्भवति नाभिधया।

व्यञ्जनायाः स्थापना-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥

अत्र प्रतीयमानशब्देन व्यञ्जनायाः प्राथम्यम्। आनन्दवर्धनेन काव्यास्यात्मा ध्वनिरिति कथयित्वा सर्वप्रथमं ध्वनिस्थापनं कृतम्। तत एव नूतनः ध्वनिसम्प्रदायः प्रचलित इति।

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

रसनिष्पत्तिप्रक्रियासमीक्षणम्

''तददोषौ शब्दार्थौ सगुणावनलङ्कृति पुनः क्वापि'' इति काव्यलक्षणं प्रथमं कृतम्। लक्षणे ऽस्मिन् शब्दार्थाविति विशेष्यपदम्, अवशिष्टं च विशेषणपदम्। द्वितीये उल्लासे शब्दार्थयोः स्वरूपमुक्तम्। प्रसङ्गवशाच्च वाच्यलक्ष्यव्यङ्ग्यानां स्वरूपमपि प्रतिपादितम्। अन्ते च भेदसहितां शाब्दीव्यञ्जनां प्रतिपाद्य तृतीये आर्थी व्यञ्जनायाः निरूपणं कृतम्। अर्थात् लक्षणस्थशब्दार्थाविति पदस्य व्याख्यानं तृतीयोल्लासे परिसमाप्तम्। तदनन्तरं अदोषाविति पदस्य व्याख्यानं समुचितमासीत्। तथापि अदोषौ सगुणाविति अवयवभूतं काव्यस्य। अतोऽवयवनिरूपणं परित्यज्य अवयवीनिरूपणमेव चतुर्थे उल्लासे प्रारभते ग्रन्थकारः। गुणदोषाऽलङ्काराः काव्यधर्माः धर्मी च काव्यम्। अतः धर्मिणः काव्यस्य पूर्णं ज्ञानं विना धर्माणां स्वरूपमपि हेयोपादेयार्थं नावश्यकम्। अतः काव्यलक्षणं कृतम्। अत्र ध्वनिकाव्यस्य विवेचनं वर्तते। ध्वनिकाव्यस्य भेदद्वयमस्ति। अविवक्षितवाच्यध्वनिः प्रथमः। द्वितीयश्च विवक्षितवाच्यध्वनिः। अनयोर्लक्षणामूलाध्वनिशब्देन तथा अभिधामूलाध्वनिशब्देनापि भवति व्यवहारः। लक्षणामूलध्वनौ वाच्यार्थविवक्षा न भवति। अत एव अविवक्षितवाच्यध्वनिशब्देनोच्यते। अस्यापि पुनः प्रकारद्वयं वर्त्तते। अर्थान्तरसंक्रमित वाच्यं प्रथमम्। अत्यन्ततिरस्कृत वाच्यं द्वितीयम्। तदुक्तं[१] काव्यप्रकाशकारेण-

अविवक्षितवाच्यो य स तत्र वाच्य भवेत् ध्वनौ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम॥ इति।

अविवक्षितवाच्यध्वनौ वाच्यार्थः अर्थान्तरे संक्रमितो भवति। अथवा अत्यन्ततिरस्कृतः। अतो विवक्षितवाच्यध्वनेः भेदद्वयं फलति। अर्थान्तरसङ्क्रमितवाच्यः, अत्यन्ततिरस्कृत-वाच्यश्च। अविवक्षितवाच्यध्वनिलक्षणामूलध्वन्योश्च नास्ति भेदः। यत्र लक्षणामूलगूढव्यङ्ग्यध्वनेः प्राधान्यं भवति। तत्रैव वाच्यं अविवक्षितं भवति। अतो विवक्षितवाच्यध्वनिरेव प्रकार इति वक्तुं शक्यते। अर्थान्तरसङ्क्रमितवाच्यस्योदाहरणम्- 'त्वामस्मि वच्मि विदुषां' इति पद्यम्। अत्र 'वच्मि' इति पदस्य साधारणोऽर्थः कथनम्। तच्चात्रऽनुपयुक्तम्। अत एव उपदेशार्थे परिणमति। अतः अर्थान्तरसङ्क्रमितवाच्यध्वनेरिद्-मुदाहरणमिति। अत्यन्ततिरस्कृतवाच्यध्वनेरूदाहरणम्- 'उपकृतं बहु तत्र किमुच्यते' इति। अत्र अपकारिणं प्रति विपरीतलक्षणया कश्चिद् वदति। यत्र वाच्यार्थस्य वाच्यतावच्छेदकरूपेण नान्वयः सङ्गच्छते, तत्र शब्दः स्वसामान्यमर्थं परित्यज्य स्वसम्बद्धं काञ्चित् विशिष्टार्थ प्रतिपादयति। तत्रैवात्यन्ततिरस्कृत वाच्यध्वनिर्भवति।

विवक्षितवाच्यध्वनेरपि भेदद्वयं दृश्यते। असंलक्ष्यक्रमव्यङ्ग्यः प्रथमः।

---
१. काव्यप्रकाश सूत्र-४९

संलक्ष्यक्रमव्यङ्ग्यश्च द्वितीयः। रसादिध्वनौ असंलक्ष्यक्रमव्यङ्ग्यस्य भवति व्यवहारः। यद्यपि अनेके भेदोपभेदाः सन्ति, तथापि विस्तरभयात् तेषां प्रतिपादनं न कृतम्। अतः एक एव सः। संलक्ष्यक्रमव्यङ्ग्यस्य भेदत्रयं वर्त्तते। शब्दशक्त्युत्थ, अर्थशक्त्युथः, उभयशक्त्युथश्च। शब्दशक्त्युत्थध्वनेः पुनः भेदद्वयं वर्त्तते। वस्तुध्वनिः, अलङ्कारध्वनिश्च। अर्थशक्त्युत्थध्वनेः द्वादशभेदाः सन्ति। उभयशक्त्युत्थध्वनिरेकैव। यत्र वाच्यार्थस्य विवक्षितत्वेऽपि व्यङ्ग्यनिष्ठत्वं भवति। तत्र विवक्षितान्यपरवाच्यध्वनिः, अर्थात् अभिधामूलध्वनिशब्दस्य भवति व्यवहारः। असंलक्ष्यक्रमव्यङ्ग्यस्याष्ट विधत्वं प्रतिपादितं मम्मटेन–

रसभाव[२] तदाभासभावशान्त्यादिरक्रमः।
भिन्नो रसाद्यलंङ्कारादलङ्कार्यतया स्थितिः॥

रसः, भावः, भावाभासः, रसाभासः, भावशान्तिः, भावोदयः, भावसन्धि, भावशबलतेति। ध्वनिप्राधान्येन अलङ्कार्या भवन्ति। रसवत् अलङ्कारात् भिन्ना भवन्ति। यत्र रसादयः गुणीभूतव्यङ्ग्यत्वेन भासन्ते तत्र रसवत् प्रेय उर्जस्विन् तथा समाहितेत्यादि चत्वारोऽलङ्काराः भवन्ति।

यथा– **'अयं स रसनोत्कर्षी'** इत्यत्र रसस्याङ्गत्वेन रसवद् अलङ्कारः। यत्र भावः अङ्गतां प्राप्नोति तत्र प्रेया अलङ्कारः। यत्र च रसाभासः भावाभासो वा अङ्गतां प्राप्नोति तत्र उर्जस्विन् अलङ्कारः। यत्र भावशान्तिः अङ्गत्वेन प्रतीयते तत्र समाहिता अलङ्कारः। असंलक्ष्यक्रमव्यङ्ग्यादौ रसस्य प्राधान्यं भवति। अतः रसनिरूपणमावश्यकम्। लोकव्यवहारे रत्यादिस्थायिभावस्य अर्थात् चित्वृत्तिविशेषस्य कारणकार्य सहकारिभावाः भवन्ति। तेषां वर्णनं नाट्यशास्त्रे, काव्यशास्त्रे वा विभावानुभावसञ्चारीशब्देन वर्ण्यते। सञ्चारिभाव एव व्यभिचारीभावः। विभावादि[३] संज्ञा च विभावनादि व्यापारयोगात्। अर्थात् यः विभावयति वासनारूपेण स्थितानां रत्यादिस्थायिभावानां रसास्वादनयोग्यतां सम्पादयतीति विभावः। स च द्विविधः। आलम्बनविभावः उद्दीपनविभावश्च। आलम्बनविभावेन स्थायिभावः रसोन्मुखी भवति। उद्दीपनविभावेन च स्थायिभावाः रसोत्कर्षाधायकत्वं प्राप्नुवन्ति। अर्थात् उद्दीपनविभावद्वारा स्थायिभावः प्रदीप्तः सञ्जायते। अनुभावः अनुभावयन्ति च तानि इत्यनुभावाः। अनुभावनकारिणीभूताः भवन्ति।

स्वेदस्तम्भोऽथ[४] रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका मताः॥

विभावः बाह्यं कारणम्। अनुभावश्च आन्तरं कारणम्। इत्यपि वक्तुं शक्यते। तथा चोक्तं विश्वनाथेन–

---

२. काव्यप्रकाश सूत्र-४२
३. काव्य प्रदीप, पृ. ६१
४. काव्य प्रदीप, पृ. ६१

उद्बुद्धं[५] कारणैः स्वैर्बहिर्भावं प्रकाशयन्।

लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥

अनु पश्चात् भावयन्तीति अनुभावाः। अर्थात् रसानुभूतेः कार्यस्वरूपं भवति। तथापि अनुभावशब्देन उच्यन्ते।

व्यभिचारीभावः- विभावानुभावैऽनुभावैरूद्बुद्धान् स्थायिभावान् परिपुष्णाति रसास्वादनयोग्यान् करोतीति व्यभिचारीभावः। विविधं आभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः इति व्युत्पत्तेः। स्थायिभावाश्चाष्टौ भवन्ति। तथा च मम्मटः-

रतिर्हासश्चशोकश्च[६] क्रोधोत्साहोभयं तथा।

जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्तिताः॥

एवमेव शान्तरूपस्य नवमरसस्य निर्वेदः स्थायिभावः। तथा चोक्तं तेनैव- निर्वेदस्थायिभावो[७]ऽस्ति शान्तोऽपि नवमोरस इति। रसाअपि नव संख्याकाः भवन्ति। तथा चोक्तं तेनैव-

श्रृङ्गारहास्यकरूणारौद्रवीरभयानकाः[८]।

वीभत्साऽद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसा स्मृताः॥

व्यभिचारीभावा अपि त्रयस्त्रिंशत् परिगणिताः सन्ति। तथा चोक्तं ग्रन्थकारेणैव-

निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः[९]।

आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः।।

व्रीडा चपलता हर्ष आवेगो जडता तथा।

गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च।।

सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।

मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।

त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः।।

तेषां स्वरूपमित्थं तत्त्वज्ञानादिना स्वावमाननं निर्वेदः। मनस्तापादिना निष्प्राणतायाः उत्साहहीनतायाः वा हेतुभूतः चित्रवृत्तिविशेषो ग्लानिः। आत्मदोषादिना ऽनर्थ चिन्तनं शङ्का। परगुणासहिष्णुताऽसूया। सम्मोहानन्दयोः सम्मिश्रणरूपः चित्तवृत्तिविशेषः मदः। ग्लानिरूत्पादिका चित्तवृत्तिः श्रमः। परिश्रमादिना समुत्पन्ना उद्योगशून्यताविशिष्ट मनोदशा आलस्यम्। दुर्गति प्रभृतिना मनसः ओजस्विताहानिः दैन्यम्। हितसंसाधने ध्यानैकतानता

५. साहित्य दर्पण।

६. काव्यप्रकाश सूत्र-४५

७. काव्यप्रकाश सूत्र-४७

८. काव्यप्रकाश सूत्र-४४

९. काव्यप्रकाश सूत्र-४६

चिन्ता। दु:खादिचिन्तनेन चित्तशून्यता मोहः। सदृशाऽनुभवादिना पूर्वानुभूतवस्तुनः ज्ञानं स्मृतिः। अभिष्टार्थप्राप्तौ स्पृहानिवृत्तिः धृतिः। चित्तस्य सङ्कोचात्मिकाउक्तिः ब्रीडा। द्वेषादिकारणेन चित्तस्यास्थिरता चपलता। अभीष्टवस्तुनः प्रापणेन मनसः प्रसन्नता हर्षः। अनर्थाधिक्येन चित्सम्भ्रमः आवेगः। चिन्ता विना कार्यपाटवासहिष्णुता जडता। स्वप्रभावादिना अन्यावज्ञा गर्वः। कायादिनैस्फल्याद् सत्वक्षयः विषादः। अभिलषित वस्तुनः प्राप्तौ विलम्बासहिष्णुता औत्सुक्यम्। परिश्रमादिना इन्द्रियाणां व्यापारशून्यता निद्रा। मनोव्यथादिना स्मृत्यभावोऽपस्मारः। निद्रावस्थायां विषयाऽनुभवाभावः सूक्तः। निद्रानन्तरं चैतन्योपलब्धेः प्रबोधः। स्थिरतरक्रोधः अमर्षः। लज्जादिना प्रसन्नतागोपनं अवहित्था। अधिकक्षेयापमानादिना चित्तस्य प्रचण्डता उग्रता। शास्त्रोपदेशेन मन्त्रादिना वा सदर्थनिर्धारणम् मतिः। विरहादिना मनस्तापः व्याधिः। चित्तविभ्रमः उन्मादः। जीवस्योदगमनारम्भः अथवा मूर्च्छा मरणम्। उत्पातजन्यः मनःक्षोभः त्रासः। सन्देहानन्तरं विचारो वितर्कः इति।

रसनिष्पत्तिप्रकारः– रसनिष्पत्तौ भरतमुनेः काव्यसूत्रमेव सर्वेषां कृते प्रमाणभूतम्। तस्यैव सूत्रस्य व्याख्याभेदाच्चत्वारो मतभेदाः समुपस्थापिताः सन्ति। तथा च भरतसूत्रम्– 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' अर्थात् एतेषां संयोगादेव रसो निष्पद्यते उत्पद्यते इत्यर्थः। अत्रैव आचार्याणां मतभेदः।

भट्टलोल्लटस्योत्पत्तिवादः– रसविषये लोल्लटस्योत्पत्तिवादः प्रसिद्धः। विभावानुभावव्यभिचारिसंयोगाद् रामादावनुकार्ये रस उत्पद्यते। त्रिविधभावेष्वपि सीताद्यालम्बनविभावः रसस्य मुख्योत्पादकः। उत्पन्नस्य रसस्य बोधनमभावः कारयति। व्यभिचारिभावश्च तं रसं परिपुष्णाति। अतः रत्यादि स्थायिभावेन सः विभावानामुत्पाद्योत्पादकभावः सम्बन्धः। अनुभावानां च स्थायिभावेन सह गम्यगमकभावः सम्बन्धः। व्याभिचारिभावानां च स्थायिभावेन सह पोष्यपोषकभावः सम्बन्धः। अत एव रससूत्रस्थसंयोगशब्दस्याप्यर्थत्रयं भवति। विभावै सह संयोगः अर्थात् उत्पाद्योउत्पादकभावः सम्बन्धः। अनुभावै सह संयोगः अर्थात् गम्यगमकभावः सम्बन्धः। व्यभिचारिभावै सह संयोगः अर्थात् पोष्यपोषकभावः सम्बन्धः। संयोगशब्दस्य एतेऽर्थाः भवन्ति भट्टलोल्लटमते। अतएवोक्तं मम्मटेन–विभावैः ललनोद्यानादिभिरित्यादि। अयं भावः– ललनाद्यालम्बनविभावैः रत्यादिस्थायिभावः समुत्पद्यते। तत उद्यानाद्युद्दीपनविभावैः उद्दीप्यते। तदनन्तरं कार्यस्वरूपकटाक्षभुजाक्षेपादिभिरवनुभावैः रतिरूपस्थायिभावं प्रतीतियोग्यतां सम्पादयति। तदनन्तरञ्च सहकारिभिः निर्वेदादिव्यभिचारीविभावैः परिपुष्टतां गमयति। तथा मुख्यरूपेण अनुकार्यरूपे रामे तथा तत्स्वरूपानुकरण क्षमे नटे प्रतीयमान आरोप्यमाणः रतिरुपस्थायिभावः रसरूपेण समुत्पद्यते। उत्पाद्योत्पादकभावादिसम्बन्धमेव मनसि कृत्वा रससूत्रविवरणे क्रमशः जनितः प्रतीतियोग्यः कृतः उपचित इति पदानां

प्रयोगः कृतः लोल्लटेन। मुख्यरूपेण अनुकार्य रामादौ रसस्य स्थितिः नटे च रसस्य गौणस्थितिः सामाजिकेषु न रसोत्पत्तिः। रससूत्रस्थसंयोगशब्दस्य यथा त्रयोऽर्थाः तथैव निष्पत्तिशब्दस्यापि उत्पाद्योत्पादकसम्बन्धे उत्पत्तिरर्थः। गम्यगमकभावसम्बन्धे प्रतीतिरर्थः। पोष्यपोषक- भावसम्बन्धे पुष्टिरर्थः। अयमुत्पत्तिवादः मीमांसकसम्मतः इति कथ्यते। तस्यायं भावः- मीमांसा शब्देनोत्तरमीमांसायाः ग्रहणं न तु पूर्वमीमांसायाः। उत्तरमीमांसायामेव सिद्धान्तसङ्गतिसम्भवात्। तथाहि-रज्जौ सर्पज्ञाने आध्यासिकप्रतीतिसमये तत्र सर्पाभावेऽपि तस्य प्रतीतिर्भवति। तथा तज्ज्ञानजन्यभयेकम्पाद्युत्पद्यते, तथैवाऽनुकार्यरामस्य हृदये सीताविषयकानुरागरूपा रतिः। अभिनये नटेऽविद्यमानत्वेऽपि अभ्यासकौशलादि फलस्वरुपविद्यमान इव प्रतीयते। अत एव सामाजिकहृदये चमत्कारानुभूतिरूपं कार्यमुत्पद्यते। अनेनैव साम्येनोत्पत्तिवादसिद्धान्तः मीमांसकसम्मत इति कथयन्ति जनाः। पूर्वमीमांसायां न कुत्रापि रसविवेचनं दृष्यते। भट्टलोल्लटः उत्पत्यऽभिव्यक्तिपुष्टीनामनुकार्ये रामे मुख्यत्वं नटे च गौणत्वं स्वीकरोति। परन्तु सामाजिकानां रसानुभूतिः कथं भवतीति नैव किञ्चित् विचारितम्। अपि च सम्प्रति सीतारामयोः स्थितिर्नास्ति। तर्हि तयोः हृदये रसोत्पत्तिर्न सम्भवा। तत्र रसाभावे नटेऽपि रसाभावः। सामाजिकास्तु दूरे तिष्ठन्तु। अत एव नायं सिद्धान्तः परसम्मतः।

शङ्कुकस्यानुमितिवादः- अनुकर्त्ता नटः कृत्रिमानुभावादिकं प्रदर्शयति। तदा अभ्यास कौशल्यादिभ्यः वास्तविक इव प्रतीयते। कृत्रिमत्वेऽपि नटे अविद्यमानत्वेऽपि सामाजिकाः तं दृष्ट्वा अनुमिन्वन्ति। ततः सामाजिकाः स्वस्ववासनावशीभूताः अनुमीयमानरसास्वादनं कुर्वन्ति। तथाहि-राम एवाऽयम्। अथवा अयमेव राम इत्याकारिका सम्यक् प्रतीतिः। नायं राम इति ज्ञानानन्तरं रामोऽयमिति मिथ्याप्रतीतिः। रामः स्याद् वा न वायं राम इति संशयात्मिका प्रतीतिः। रामसदृशोऽयमित्याकारिका सादृश्यप्रतीतिः। अनेन प्रकारेण चत्वारि ज्ञानानि भवन्ति। नैतैः ज्ञानैः रसानुभूतिर्भवति रसानुभूत्यै कश्चिद् पञ्चमः प्रकारो वर्त्तते। नटे ऽनुमीयमानं रसं वस्तुसौन्दर्येण तथा आस्वाद्यत्वात् अन्यानुमीयमानपदार्थ- विलक्षणपदार्थस्य स्वसंस्कारवशात् यदा स्वादनं क्रियते स एव रसः। सेयं ममाङ्गेषु सुधारसच्छटेति तथा दैवादहमद्यतथेत्यादिकाव्यानुसन्धानबलेन शिक्षाभ्यासादिभिः निष्पन्नः। अनुभाविकार्येण नटे कृत्रिमत्वेऽपि अकृत्रिम इव भासमानः विभावादिशब्देन प्रयुज्यमान कारणकार्यसहकारिकारणैः सह संयोगः अर्थात् गम्यगमकभावसम्बन्धेन चित्रतुरगन्यायप्रतीत्या पूर्वोक्ते नटेऽनुमीयमानेऽपि वस्तुनः स्वसौन्दर्येण रसनीयः। अर्थात् आस्वादविषयीभूतत्वात् अन्यानुमीयमानवस्तुनः विलक्षणः स्थायिरूपे सम्भाव्यमानरत्यादिभावे नटे वस्तुतोऽविद्यमानेऽपि सामाजिकेषु स्वसंस्कारवशात् स्वात्मगतास्वाद्यिमानः अर्थात् चर्व्यमाणो भवति। अर्थात् नटेऽनुमीयमानां रतिं सामाजिकाः स्वगतमिव ज्ञात्वा आस्वादयन्ति। अनेनेदं ज्ञायते यत् आस्वाद्यमानस्थायिभाव

एव रस इति श्रीशङ्कुक मतम्। शङ्कुकमते नटे रसानुमितिर्भवति। अर्थात् रसोऽनुमेय इति प्रथमः। रसानुमितौ चित्रतुरगन्यायेन सीतारामयोः विभावानां प्रतीतिर्भवति। किन्तु सा प्रतीतिः पूर्वोक्तसम्यक्मिथ्यासंशयसादृश्य प्रतीतिभिन्नः। अत एव विलक्षणप्रतीतिरिति। अनुमानञ्च इयं सीताः रामविषयकरतिमती। विलक्षणस्मितकटाक्षादिमत्त्वात्। यद्यपि नटे नैते यथार्थभूता तथापि शिक्षाभ्यासबलात् यथार्थ इव प्रतिभाति। नटे स्थायिभावस्यानुमानप्रकारः-

इयं सीता रामविषयकरतिमती अथवा अयं रामः सीताविषयक रतिमान् विलक्षणस्मितकटाक्षादिमत्त्वादिति। अनेनानुमानेनानुमीयमानस्थायिभाव एव रससंज्ञामाप्नोति अर्थात् सामाजिकानामानुमानिकरसानुभूतिर्भवतीति द्वितीयः। अत एव रससूत्रस्थ संयोगशब्दः गम्यगमकभावसम्बन्धबोधकः इति तृतीयः। सामाजिकाः आनुमानिकरसप्रतीतये नाश्रयभूताः। कृत्रिमस्य अकृत्रिम इव भासमानत्वात् रतेः रसस्य वा अनुमानमात्रं करोति सामाजिकः इति चतुर्थः। रसानुमितेः विलक्षणत्वात् अनुमितरसस्यापि आस्वादनं कुर्वन्ति सामाजिकाः। अनुमितिज्ञानमपि अपरोक्षमेव भवति। अत एव आस्वादयन्ति सामाजिकानामिदमेव वैशिष्ट्यमिति पञ्चमः। वस्तुतस्तु अनुमिते रसे न सामाजिके तिष्ठति न वा नटे। उभयत्राविद्यमानत्वेऽपि अनुमीयमानरसास्वादनं सामाजिकानां केवलवासनावशादेव भवतीति शङ्कुकमतम्।

अस्मिन् मते सर्वत्र कृत्रिमतायाः साम्राज्यमवलोक्यते। अतः एतादृशेनानुमानेन सामाजिकाः कथं रसानुभवं करिष्यन्ति। बुभुक्षायां प्रदीप्तायां जञ्जलादिभिरेव तस्याः शान्तिर्भवति। तेनैव च आनन्दानुभूतिर्भवति, नान्येन। अत एवोक्तम्-बुभुक्षुतैर्व्याकरणं न भुज्यते तथा पिपासितैः काव्यरसो न पीयते इति। अत्र सामाजिका अपि रसाक्षात्कारमिच्छन्ति। स च न केवलानुमानसम्भवः, तज्जन्यज्ञानस्य परोक्षत्वात्। अतोऽनुमितिवादेन रसास्वादसाक्षात्कारयोः न सङ्गतिः। अत एव नायं पक्षः समीचीन इति प्रतिभाति।

भट्टनायकस्य भुक्तिवादः- अनुकर्त्तरि नटे अथवा अनुकार्ये रामे रसानुमितिर्न भवति, तयोः तटस्थत्वात्। तत्र रसानुभूतिः स्वीक्रियते चेत्, तर्हि सामाजिकानां रसास्वादनं न भविष्यति। सामाजिकानां अन्तःकरणे रसाभिव्यक्तिरपि न स्वीकर्त्तुं शक्यते। पूर्वतः विद्यमानपदार्थस्यैव अभिव्यक्तित्वात्। रसस्त्वनुभूतिमात्रविषयः। अतो न पूर्वं स्थास्यति न पश्चात्। केवलं अनुभूति समये एव तस्य विद्यमानता। अत एव भट्टनायकेनोक्तम्- 'न प्रतीयते अर्थात् नानुमीयते' इत्यनेन अनुमितिवादस्य खण्डनं जातम्। नोत्पद्यते इत्यनेन उत्पत्त्यभावः। अनेन चोत्पत्तिवादस्य खण्डनं कृतम्। नाभिव्यज्यते इत्यनेनाभिव्यक्तिवादस्य खण्डनं कृतम्। पूर्वोक्तेन व्याख्यात्रयेण न सामाजिकानां रसास्वादनम्, अपि तु काव्ये नाटके वा सामाजिकानां रसास्वादनप्रकारः भिन्न एव। तथाहि- काव्ये नाटके वा नाभिधालक्षणानामकः शब्दव्यापारः, अपि तु तद्भिन्नविभावादीनां साधारणीकरणरूपभाव-

कत्वविलक्षणव्यापारो ऽस्ति। साधारणीकृत: रत्यादिस्थायिभावस्या स्वाद:सत्त्वगुणोद्रेकात् प्रकाशानन्दमयानुभूतिसमान: भोजकत्वव्यापार:। तेनैव च रस आस्वाद्यते। रससूत्रस्थनिष्पत्तिशब्दस्य भुक्तिरर्थ:। संयोगशब्दस्य च भोज्यभोजकभावसम्बन्धोऽर्थ:। अनुकर्त्तनुकार्यसामाजिकेषु सर्वेषां रसानुभूति: कस्यापि एकस्य वा। यद्येकस्य रसानुभूति: स्वीक्रियते तर्हि कस्य-कस्य इति प्रश्न:। तत्र भट्टनायक:- "रसनिष्पत्ति: नानुकार्ये भवति नानुकर्त्तरि" तयोरुभयो: तटस्थत्वात्। तटस्थ उदासीन:। रसानुभूतिस्तु सामाजिकानामेव भवति। तदर्थमेव अभिधालक्षणातिरिक्तभावकत्वव्यापार: कल्पित:। भावकत्वव्यापारेण अर्थपरिष्कार: स एवार्थ: सामाजिकेभ्य: उपभोगयोग्य:। भावकत्वव्यापारोऽयं उपस्थितेष्वर्थेषु वृत्तिविशेषसम्बन्धं दूरीकृत्य सर्वसाधारणेन सह सम्बध्नाति। अयमेव साधारणीकरण: परिष्काररूप:। भावकत्वव्यापारेणैवाऽयं सम्भव:। तदनन्तरं सामाजिकानां तेन नाट्येन काव्येन वा जायते सम्बन्ध:। सामाजिक: स्वसंस्कार वशात् स्वयं तस्य नाट्यस्य काव्यस्य वा पात्रत्वेन अनुभवति। तदनन्तरं स च भोजकत्वव्यापार: सामाजिकानां रससाक्षात्कारम्। अर्थात् भोगं कारयति। भावकत्वभोजकत्वव्यापारेणैव सामाजिकानां रसानुभूति:। अयमेव भट्टनायकस्य भुक्तिसिद्धान्त: साहित्यसमाजे सुप्रसिद्ध:। अस्य सिद्धान्तस्य सांख्यसिद्धान्तेन सम्मानत्वात् सांख्यमतानुयायी भट्टनायक इति वदन्ति। सामाजिकेषु रसानुभूतिसम्पादनार्थं भावकत्वभोजकत्वेति शब्दस्य नूतनव्यापारद्वयं कल्पितम्। नेयं कल्पना लोकप्रसिद्धा। लोके च अभिधालक्षणाव्यञ्जनारूप: शब्दव्यापार: प्रसिद्ध:। अपि च स्थायीभावस्य रते: भोग: सम्पादित:। स चात्रनुकार्यगत: स्थायीभावस्य भोगस्याथवा अनुकर्तृगतस्य स्थायीभवास्येति स्पष्टं वक्तुं न शक्यते। अतो नायं सिद्धान्त: रूचिकर इति प्रतीयते।

अभिनवगुप्तपादानामभिव्यक्तिवाद:- लोकव्यवहारे प्रमदादिविभावादिभि: स्थायिभावस्य निरन्तरमनुमानं भवति। तत्र कौशल्यप्राप्त: सहृदयसामाजिकानां काव्ये नाटके वा कारणत्वादिकं परित्यज्य विभावनादिव्यापारै: युक्तत्वात् अलौकिकविभावादिशब्दव्यापारेण व्यवहारतामापन्ना: ममैव एते अथवा शत्रोरेवैते अथवा तटस्थस्यैवैते अथवा न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इत्याकारकसम्बन्धविशेषस्वीकारपरिहारनियमनिश्चया भावात्साधारणरूपेण प्रतीतविभावादिभ्य एव अभिव्यज्यते। तत: स एव दर्शकसामाजिकेषु वासनारूपेण विद्यमानरत्यादिस्थायिभाव: नियतप्रमातरि स्थितत्वादपि व्यक्तिविशेषेण सह सम्बन्धं विना प्रतीतत्वात्। विभावादिसाधारणोपायबलेन तस्यैव रसानुभवसमये परिमितपरिमातृभावस्य नष्टत्वात् वेद्यान्तरसम्पर्कशून्य: अपरिमितप्रमातृभाव: समुदेति। तत: सामाजिकै: समस्तसामाजिक हृदयेन स: समानरूपेण स्वात्मसमानास्वादाभिन्नत्वादपि आस्वादविषयं भूत्वा आस्वादमात्रस्वरूपविभावादिस्थितिपर्यन्तविद्यमान: पानक-रसानुमानास्वाद्यमानसाक्षात् प्रतीतिविषयैव हृदयसमाविष्टैव समस्ताङ्गालिङ्गनकुर्वन्निव

अन्यभावतिरोभूतं कुर्वन्निव ब्रह्मसाक्षात्कारानुभवसम्पादक इव अलौकिकानन्दसम्पादकः शृङ्गारादि रसः। अयमेवाभिव्यक्तिवादः। अयं भावः–लोकव्यवहारे रतेः कारणकार्य-सहकारिकारणस्वरूपप्रमदोद्यानकटाक्षनिर्वेदादिकं पौनःपुन्येन दर्शनात् रतेरनुमानं निरन्तरं भवति। अनुमितिरपि निरन्तरं भवति। रतेः संस्कारः रसिकानां हृदये नैरन्तर्येण समुदेति। ततश्च काव्ये नाट्ये वा व्यभिचारीभावानां कविना नटेन वा प्रदर्शनद्वारा रामादिव्यक्ति-विशेषसम्बन्धितरतेः कारणकार्यसहकारिकारणरूपविभावानुभावेनापि भावकत्वव्यापारेण रामसीतादिव्यक्तिविशेषसम्बन्धं परित्यज्य रतिकारणरूपसाधारणस्त्रित्वादौ ते विभावादयः प्रतीयन्ते। अनेन प्रकारेण सर्वसाधारणजनसम्बन्धेन विभावादिद्वारा रसिकसामाजिकहृदये समुद्भूतः सन् संस्काररूपेण अवस्थिता रतिः व्यञ्जनाव्यापारेण अभिव्यनक्ति। ततः स्वरसः सामाजिका स्वादयोग्योभवति। अयमेवास्वादः रसनिष्पत्तिशब्देन व्यवह्रियते। अभ्यासपाटववतां सामाजिकानामित्यन्वयः समुचितः। अनुमानप्रकारश्चेत्थम्– अयं एतद्-विषयकरत्यादिमान्। रत्यादिकार्यरूपकटाक्षादिसहकारीरूपनिर्वेदादिमत्त्वात्। यो नैवं स नैवम्। यथा विरक्तादिः। रसिका एव रसास्वादयोग्याः भवन्ति न यतिविरक्तादिः। रसिकहृदयेषु संस्काररूपेण अर्थात् सूक्ष्मरूपेण पूर्वत एव विद्यमानत्वात्। न तथा यतयः। पूर्वतोः विद्यमान एव स्थायिरूपेण काव्यनाटकादिपठनदर्शनसमये साधारणीकृतविभावादिभ्यः आविर्भवति। अत एव "सवासनानां नाट्यादौ रसस्याऽनुभवो भवेत्। निर्वासनास्तु रङ्गान्तरवेश्मकुड्यास्मसन्निभाः॥" शठे रसो न कार्यरूपः विभावादिनिमित्तकारणानां अभावेऽपि विद्यमानत्वात्। यथा कुम्भकारमरणानन्तरमपि घटादीनां स्थितिर्भवति। न तथा ऽत्र तु निमित्तकारणानां विभावादीनां नष्टे सति न रसप्रतीतिः। अतो न रसस्य कार्यरूपता नापि रसः ज्ञाप्यः। अनुभवात् पूर्वं अविद्यमानत्वात्। अतो विभावादिव्यञ्जितः आस्वादयोग्यः रसः। अर्थात् आस्वादकाले एव स तिष्ठति नान्यदेति। रसानुभूतौ विभावादिपरामर्शस्य प्राधान्यम्। अत एव निर्विकल्पकज्ञानं न तद्ग्राहकम्। आस्वाद्यमानालौकिकानन्दमयरसस्य स्वसम्बेदन सिद्धत्वात्। अत एव सविकल्पकज्ञानमपि व तद्ग्राहकम्। अतः विरूद्धयोरे-कतरनिषेधेऽपरस्मिन् पर्यवसानम् इति न्यायेन रसस्य निर्विकल्पकसविकल्पकभिन्नत्वे सति। उभयात्मकतापि न सिद्धयति। सविकल्पक निषेधे निर्विकल्पकस्यापि निषेधः। निर्विकल्पकनिषेधे सविकल्पकस्यापि निषेधेः। अत एवालौकिकत्वं तस्य। अत एव न परस्परविरोधाशङ्का। अत्र विभावादीनां सम्भूयकारणता भवति। न तु पार्थक्येन। व्याघ्रादयो विभावाः भयानकरसैव वीराद्भुदरौद्ररसानां भवितुमर्हति। अश्रुपाताद्यनुभावः शृङ्गार इव करुणभयानकयोरपि भवितुमर्हति। चिन्तादयो व्यभिचारीभावाः शृङ्गार इव वीरकरुणभयान-करसस्यापि। अत एव एकेनैव रसेन सः निश्चितरूपेण स्थित्यभावात् अनैकान्तिकत्वेन सूत्रे सम्मिलिता एव निर्दिष्टाः सन्ति। यत्र आलम्बनविभावोद्दीपनविभावयोरेव वर्णनमस्ति।

न व्यभिचारीभावस्य तत्राप्याक्षेपेण तस्य ज्ञानं भवति। यथा- वीयदलिमलिनाम्बुगर्भ-मेघमित्यादौ। कुत्रचित् अनुभावमात्रेणैव रसाभिव्यक्तिर्भवति। यथा- परिमृदितमृणालीम्लान-मङ्गम्, इत्यादौ। क्वचित् च व्यभिचारीभावमात्रेणैव रसाभिव्यक्तिः। यथा- दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितमित्यादौ। यद्यपि उदाहरणत्रयेषु विभावादीनामुपस्थितिः दृश्यते तथापि रतिबोधने असाधारणलिङ्गत्वं बोध्यम्। अनिर्दिष्टानां आक्षेपाद् ज्ञानं भवति। अत एव न सूत्रस्य व्यभिचारः। नाट्ये अष्टौ रसाः भवन्तीति पूर्वं प्रतिपादितम्। तत्र श्रृङ्गारो द्विविधःसम्भोगोविप्रलम्भश्च। सम्भोगोऽपि द्विविधः-नायिकारब्धसम्भोग श्रुङ्गारः, नायकारब्ध सम्भोगश्रृङ्गारश्च। नायिकारब्धसम्भोगश्रृङ्गारश्च शून्यं वासग्रहं विलोक्येत्याद्युदाहरणम्। नायकारब्धसम्भोगश्रृङ्गारस्योदाहरणं 'त्वं मुग्धाक्षि विनैव कंचुलिकया धत्से मनोहारिणिम्।' विप्रलम्भश्रृङ्गारश्च अभिलाषविरहेर्ष्याप्रवासशापहेतुकः पञ्चविधः। अभिलाषहेतुकस्य विप्रलम्भस्योदाहरणम्- प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाद्रागोदयाइत्यादि। विरहहेतुकस्य विप्रलम्भस्योदाहरणम्- "अन्यत्र व्रजति" इति का खलु कथा नाप्यस्य तादृक् सुहृदं इत्यादि। येषां विरहोत्कण्ठिता। लक्षणं च तस्याः-

आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत् प्रियः।
तद्नागं दुःखार्ता विरहोकण्ठिता मता॥

ईर्ष्याहेतुकस्य विप्रलम्भस्योदाहरणम्- सा पत्युः प्रथमापराधसमये सख्योपदेशं विनेत्यादि। प्रवास हेतुकस्य विप्रलम्भस्योदाहरणम्- प्रस्थानं वलयैः कृतं प्रियसखैरैरजस्रं गतमित्यादि। शापहेतुकस्य विप्रलम्भस्योदाहरणम् "त्वामालिख्य प्रणयकुपितां धातुरागैशिलायामित्यादि। उत्तरमेघस्यायं श्लोकः। हास्य रसस्योदाहरणम्-आकुञ्चपाणिमशुचिं मम मूर्ध्नि वेश्या इत्यादि। अत्र विष्णुशर्मा आलम्बनं रोदनमुद्दीपनं रोदनाद्यनुभावः, चापल्यादि व्यभिचारिभावः, हासश्च स्थायिभावः। करुणरसस्योदाहरणम्-हा! मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वासि सः" इत्यादि। अत्र मृत् राजमाता आलम्बनरूपा दाहाद्युद्दीपनरूपः रोदनानुभावः दैन्यादि व्यभिचारिभावः, शोकः स्थायिभावः। करुणविप्रलम्भश्रृङ्गारयोः को भेदः इति जिज्ञासायामाह- विश्वनाथः[१०]।

शोकस्थायितयाभिन्नोविप्रलम्भादयं रसः।
विप्रलम्भेरतिस्थायिपुनः सम्भोगहेतुकः॥ इति।

रौद्ररसस्योदाहरणम्-

कृतमनुमतमदृष्टं वा यैरिदं गुरुपातकमित्यादि। अत्र अर्जुनादिरालम्बनविभावः पितृहन्तृत्वमुद्दीपनविभावः प्रतिज्ञानुभावरूपो गर्वः व्यभिचारिभावः। क्रोधश्च स्थायिभावः।

---
१०. साहित्य दर्पण, ३/२२६

वीररसस्योदाहरणम्-

"क्षुद्राः सन्त्रासमेते विजहदरयः क्षुण्णशक्रेभकुम्भा" इत्यादि। अत्र रामः आलम्बनविभावः। समुद्रबन्धनमुद्दीपनविभावः, रामान्वेषणमनुभावः, गर्वः व्यभिचारीभावः, उत्साहः स्थायिभावः। युद्धवीर दानवीर दयावीरभेदेन वीररसोऽपि त्रिविध इति केषाञ्चिन्मतम्। विश्वनाथश्च-दानवीरः, धर्मवीरः, युद्धवीरः, दयावीरश्चेति चतुर्विधः इति।

भयानकरसस्योदाहरणम्-

"ग्रीवाभङ्गाभिरामं मुहुररनुपतति स्यन्दने बद्धदृष्टिरित्यादि।" अत्र राजा अथवा रथः आलम्बनविभावः शरपतनभय उद्दीपनविभावः, ग्रीवाभङ्गाद्यनुभावः, त्रासश्रमाद्व्यभिचारिभावः, भयस्थायिभावः।

वीभत्सरसस्योदाहरणम्-

"उत्कृत्योत्कृत्यकृत्रिमप्रथममथ" इत्यादि। अत्र दरिद्रप्रेतः आलम्बन विभावः, मांसभोजनाद्युद्दीपनविभावः, थूत्काराद्यनुभावः, उद्वेगादिव्यभिचारिभावः, जुगुप्सा च स्थायिभावः।

अद्भुत रसस्योदाहरणम्-

"चित्रमहान् एषवतावतारः" इत्यादि। अत्र वामन आलम्बनः, गुणातिशयाद्युद्दीपनं, स्तुतिरनुभावः, हर्षः व्यभिचारीभावः, विस्मयश्च स्थायिभावः। पण्डितराजजगन्नाथोऽत्र नाद्भुतरसं स्वीकरोति। अपि तु रसवद् अलङ्कारस्यौचित्यं प्रतिपादयति।

रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम्।
वागादिवैकृताच्चेतो विकासो हास उच्यते॥

इष्टनाशादिभिश्चेतो वैक्लव्यं शोक उच्यते। प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोधसंज्ञितः। कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते। रौद्रशक्त्या तु जनितं वैक्लव्यं मनसो भयम्। जुगुप्सा गर्हणार्थानां दोषमाहात्म्यदर्शनात्। विविधेषु पदार्थेषु लोकसीमातिवर्तिषु।

विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात्।
शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्॥ इति स्थायिभावाः।

चित्तवृत्तिविशेष एव भावशब्देनोच्यते। व्यभिचारिभावाश्च पूर्वमेव प्रतिपादिताः। शान्तोऽपि[११] नवमो रसः अस्य स्थायिभावः निर्वेदः। अहौ वा हारे वा कुसुम शयने वा दृशदि वेत्याद्युदाहरणम्। अत्र जगदालम्बनविभावः तपोवनमुद्दीपनम्, सर्पमुक्ताहारयोः शमबुद्धिरनुभावः, धृतिमतिहर्षादयो व्यभिचारिभावाः, तत्त्वज्ञानजन्य निर्वेदः स्थायिभावः।

---

११. काव्यप्रकाश सूत्र- ४७

भावनिरूपणम्-

देवादिविषयकरत्यादिस्थायिभावा:[१२] व्यङ्ग्यादिव्यभिचारीभावा: भावशब्देनोच्यन्ते। आदिशब्देन मुनिगुरुनृपपुत्रादिविषया: भावा:। कान्ताविषयाव्यक्ता शृङ्गाररूप:। देवविषयकरति:, कण्ठोण विनिविष्टमिषते देवरति भावस्योदाहरणम्। मुनिविषयकरतिभावस्य च "हरत्यघं सम्प्रति हेत्यरेष्यत:" इत्युदाहरणम्। गुरुविषयकरतिर्यथाभवसागर-बान्धवाद्युपेन्द्रत्यादि। नृपविषया रति: संकल्पेऽङ्कुरितं द्विपत्रिमथेत्यादि। पुत्रादि विषयारति: एहि एहि वत्स रघुनन्दनं पूर्णचन्द्र चुम्बनमित्यादि:। जाने कोपपराङ्गमुखीप्रियतगेत्यादि। अञ्जितव्यभिचारी। अत्र विधिं प्रति असूया। रसभावयोरनुचितरूपेण[१३] यत्र वर्णनं तत्र तदाभासा: रसाभासा: भावाभासाश्च।

इति तृतीयोऽध्याय:।

---

१२. काव्यप्रकाश सूत्र-४८

१३. काव्यप्रकाश सूत्र- ४९

चतुर्थोऽध्यायः

(दोषसमीक्षणम्)

'तददोषौ[१] शब्दार्थौ सगुणावनलङ्कृति पुनः क्वापि' इति काव्यलक्षणं प्रथमेवोक्तं मम्मटेन। तत्र शब्दार्थाविति लक्षणांशस्य व्याख्यानं जातम्। सम्प्रति अदोषाविति भागस्य विवेचनं प्रारभ्यते। तत्र दोषस्य किं लक्षणमिति जिज्ञासायामुक्तम्। मुख्यार्थहतिर्दोष इति। येन मुख्यार्थस्य अपकर्षः सञ्जायते स एव दोषः। यत्र रसाभावादिमुख्यार्थः तत्र रसापकर्षकः दोषः। हतिशब्दस्यापकर्षोऽर्थः। यत्र रस, रसभाव, रसाभास, भावाभासस्य वा अपकर्षकाः भवन्ति, तेऽपि दोषा एव। कुत्रचित् चमत्कारापकर्षकत्वं कुत्रचिच्च व्यङ्ग्यार्थापकर्षकत्वम्। अर्थात् चमत्काराधायकवाक्यार्थप्रतीतौ बाधकत्वं दोष इति। रसापकर्षकाः दोषा इति विश्वनाथेनोक्तं[२] तच्च लक्षणमव्याप्तम्। काव्यालङ्कारे[३] गुणविपर्ययात् मनोदोषा इत्युक्तम्। यद्यपि आनन्दवर्धनेन[४] स्वतन्त्ररूपेण दोष सामान्यलक्षणं न कृतम्। तथापि प्रसङ्गवशात् दोषाणां प्रतिपादनं कृतम्। तथाहिद्विविधो हि दोषः कवेर्व्युत्पत्तिकृतः अशक्तिकृतश्च। तत्रापि व्युत्पत्तिकृतो दोषः शक्तितिरष्कृतत्वादेव कदाचिन् न लक्ष्यते। यस्त्वशक्तिकृतदोषः स झटिति प्रतीयते। सर्वप्रथमं पददोषानां निरुपणं कृतं आचार्येण। तत्र के पददोषा इति जिज्ञासायां दुष्टं[५] पदं श्रुतिकटुरित्याद्युक्तम्। अर्थात् श्रुतिकटुः च्युतसंस्कृतिः अप्रयुक्तत्वम्, असमर्थत्वम्, निहतार्थत्वम्, अनुचितार्थत्वम्, निरर्थकत्वम्, अवाचकत्वम्, श्लिलत्वम्, संदिग्धत्वम्, अप्रतितत्वम्, ग्राम्यत्वम्, नेयार्थत्वम्, क्लिष्टत्वम्, अविमृष्टविधेयांशत्वम्, विरुद्धमतिकृत्वम्। अत्राश्लीलत्वं व्रीडा निन्दा अमङ्गलत्वभेदेन त्रिविधः। एतेषां उदाहरणान्यपि प्रदत्तानि सन्ति। यथा आलिङ्गितः स तनवङ्ग्याः कार्तार्थ्यं लभते कदा। इत्यत्र कार्तार्थ्यं इति पदं श्रुति कटुत्वयुक्तम्। वामनेन अत्र कटुशब्दस्य प्रयोगः कृतः। तथा लक्षितं च- श्रुतिविरसं कष्टमिति। विश्वनाथेन दुःश्रवशब्दस्य प्रयोगः कृतः। श्रुतिकटुता श्रृङ्गाररसास्वादने बाधिका भवति।

"दिनं त्वामनुनाथते कुचयुगं पत्रावृत्तं मा कृथाः।" अत्र च्युतसंस्कृति नाम दोषः। अनुनाथते इति पदं व्याकरणलक्षणविरुद्धम्। अभिलाषऽर्थे एव आशिषि नाथे वार्त्तिकेन आत्मनेपदं युक्तम्। आत्मनेपदं युक्तम्। अत्र याचना रूपेऽर्थे अनुनाथति स्तनयुगम्। इति परस्मैपदस्यैव प्रयोगः समुचितः। "तथा मन्ये दैवतोष्य पिशाचो राक्षसोऽथवा" अत्र दैवतानि

---

१. काव्य प्रकाश सूत्र, ७१

२. साहित्य दर्पण-७/१

३. काव्यलङ्कार सूत्र २/७/१

४. ध्वन्यालोक-३/६

५. काव्यप्रकाश, सूत्र-७२

पुंसि वा इति कोशबलात् दैवत् शब्दस्य पुल्लिङ्गे व्यवहारः कर्त्तुं शक्यते। तथापि केनापि कविना पुल्लिङ्गे व्यवहाराभावात् अप्रयुक्तत्वं दोषः। "सुरसोतस्विनिमेषहन्ति सम्प्रति सादरम्।" अत्र हन्तिशब्दः असमर्थः। यद्यपि 'हन् हिंसागत्योः' इति धातुपाठे हन्धातु गमनोर्थकोऽपि वर्त्तते तथापि गत्यर्थप्रकटने सामर्थ्यभावात् दोषः। "यावक रसाद्रंपादप्रहारशोणित कचेना दयितेन।" अत्र शोणितशब्दस्य रुधिररूपेऽर्थे प्रसिद्धत्वात् तेनैव ईषद् रक्तिमारूपस्यार्थस्य व्यवहितत्वम्। "प्रयान्तितामासुगतिं यशस्विनो रणास्वमेधे पशुतामुपागता।" अत्र पशुपदं कातरता अभिव्यनक्ति। अतोनुचितार्थत्वम्। "उत्फुल्लकमलकेसरपरागगौरद्युतेममहि गौरि" इत्यत्र हि शब्दः निरर्थकः। पादपूरणमात्र प्रयोजनं वर्त्तते तस्य। "अमर्षशून्येन। जनस्य जन्तुना" इत्यत्र जन्तुपदं अवाचकम्। अथवा दग्धं दिनं कल्पितं इत्यत्र प्रकाशमयं इत्यस्मिन्नर्थे अवाचकं दिनपदम्। "सम्भूतामम्भोजशोभांविद्धदभिनवो दण्डपादो भवान्याः" इत्यत्र 'दधत्' इत्यर्थे विद्धति इति पदं अवाचकम्। "साधनं सो महद् यस्य" इत्यत्र साधनशब्दस्य पुरुषगुप्ताङ्गवाचकत्वात् व्रीडा रूपोऽश्लीलः। "मुग्धा कुडमलिताननेन दधति वायुमस्थिता यत्र सा" इत्यत्र वायुशब्दस्य अपानवायुवाचकत्वात् जुगुप्सा रूपोऽश्लीलः। "एवं मृदुपवनोऽपि भिन्नो मत्प्रियायाः विनाशात्" इत्यत्र विनाशशब्दस्य अमङ्गलवाचकत्वात् ऽश्लीलत्वम्। "आशिः परम्परां वन्ध्यां कर्णे कृत्वा कृपां कुरु" इत्यत्र वन्द्यां इति पदं संदिग्धतवाचकम्। "सम्यक् ज्ञानमहाज्योतिर्दलिताशयतायुषः" इत्यत्र आशयशब्दस्य अप्रतीतत्वं दोषः। योगशास्त्रे एव केवले आशयशब्दस्य वासनायां प्रयुक्तत्वात्। "कटिस्ते हरते मनः" कटिरित्यत्र ग्राम्यत्वं दोषः। करोति तेऽमुं तन्वि चपेटा पतनातिथिम्। अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते। अत्रिलोचनसम्भूत ज्योतिरुद्गं भासिभिः। अत्र क्लिष्टत्वं दोषः। अर्थप्रतिपत्तेः विरहितत्वात्। 'मिथ्या महिम्ना' इत्यत्र मिथ्यामहिमत्वं विधेयः। किन्तु न प्राधान्येन तस्य निर्देशः। अतो अविमृष्टविधेयांशदोषः। अकार्यमित्रमेकोशौ तस्य किं वर्णयामहे। अत्र प्रयोजनं विना मित्रमित्यर्थो विवक्षितः। किन्तु कुकार्ये मित्रमिति प्रतीतिः। अतः विरुद्धमतिकृतत्वम्।

पूर्वोक्तदोषे[६] केषुञ्चिद् वाक्यदोषनिरुपणत्वम्। श्रुतिकट्वादिदोषेषु च्युत् संस्कृतिमसमर्थम्। निरर्थकञ्च परित्यज्य शेषाः सर्वे दोषाः वाक्येऽपि भवन्ति। केचन् पदैकदेशेऽपि भवन्ति। यथा-

'स्वधेष्ट' इत्यादिपद्ये अधेयेष्ट, अयष्ट, व्यजेष्ट, षड्वर्गं इत्याद्यनेकपदेषु कर्णकटुत्वं वर्त्तते। स च वाक्यगतो दोषः। 'स रातु वो दुष्च्यवनः' इत्यादौ दुष्च्यवनशब्दस्य इन्द्ररूपेऽर्थे अन्यत्राप्रयोगात्। तथा वधिरमूके अनेडमूकशब्दस्य प्रयोगाभावात्। वाक्यगतः अप्रयुक्तत्वदोषः। सायक सहायवाहोरित्यादौ मकरध्वजक्षमा अवज श्लोकशब्दानां क्रमशः खड्ग, सागर, पृथ्वी, चन्द्रमा, यशसः पर्यायत्वेनात्र प्रयोगः। किन्तु वाणादि स्वार्थेषु एते

---

६. काव्यप्रकाश सूत्र-५४

प्रसिद्धाः। अतः वाक्यगतं निहतार्थत्वं दोषः।'कुविन्दस्त्वं' इत्यादौ कुविन्दशब्दः व्यञ्जनया तन्तुवायार्थकः। अत्र कुविन्देत्यादि वाक्यगताऽनुचितार्थत्वं दोषः। 'ब्राभटप्राभ्रभ्रां विष्णुधामाप्य' इत्यादौ वाक्यगतमवाचकत्वं दोषः। ''भूपतेरुपसर्पन्ति।'' अत्र उपसर्पण, प्रहरण, मोहन शब्दाः, लज्जादायित्वात् श्लीलाः। ''तेऽन्यैर्वान्तं समश्नन्ति'' इत्यत्र वाक्यगतघृणाप्रदजुगुप्सादायित्वात् श्लीलत्वम्। 'पितृवसतिमहमव्रजामि' इत्यादौ पितृवसतिशब्दस्य श्मशानार्थत्वात् अमङ्गलत्वम्।'सुरालयोल्लास परः' इत्यत्र सुरादिशब्दाः, देव, सेना, सरविभुर्त्याः अथवा मदिराद्यर्थाः इति संदेहजनकत्वात् संदिग्धत्वं दोषः। 'तस्यादिमात्रोपायस्य' इत्यत्र वाक्यगताप्रतितत्वं दोषः।'ताम्बूलधृतगल्लोयं भल्लं जल्पति मानुषः' इत्यत्र भल्लमानुषपानशब्दाः ग्राम्याः वाचकाः। अतः वाक्यगतं ग्राम्यत्वं दोषः। 'वस्त्रवैदुर्यचरणैः' इत्यत्र नेयार्थता दोषः। 'धम्मिल्लस्य न कस्यप्रेक्षे' इत्यत्र वाक्यगत क्लिष्टता दोषः।'न्यक्कारो ह्यमेव यदरयः।' इत्यत्र अविमृष्टविधेयांशवाक्यगतदोषः।'कातर्यं केवलानीतिः' इत्यादि श्लोकत्रयेषु अनपेक्षितयन्ततशब्दयोः प्रयोगः। 'करवालकरालदोः सहायो' इत्यादौ अप्रतितत्वं दोषः। 'क्षितिक्षमा रक्तभुवः' इत्यादौ विरुद्धमतिकृत् दोषः। 'अलमतिचपलत्वात्' इत्यत्र पदैकदेशगतंश्रुतिकटुत्वं दोषः।'यस्यापिसरोविभ्रममण्डनानां' इत्यत्र मत्ता इति पदैकदेशः उन्मत्तता इत्यत्र च निहतार्थत्वं दोषः।'आदावञ्जन्पुंजलिप्तवपुषां' इत्यत्र पदैक देशगतं निरर्थकत्वं दोषः। 'चापाचार्यस्यत्रिपुरविजयी' इत्यत्र कृत्यप्रत्ययस्य क्तप्रत्ययार्थे अवाचकत्वं दोषः।'अतिपेलवमतिपरिमितवर्ण' इत्यत्र व्रीडादायीऽश्लीलत्वं दोषः।'कस्मिन् कर्मणि सामर्थ्यं' इत्यत्र सन्दिग्धत्वं दोषः।'किमुच्यते यस्यभूपाल' इत्यत्र नेयार्थदोषः पदगतः। एवं श्रुतिकटुत्वादि दोषाः पदे वाक्येऽपि च भवन्ति।

वाक्यमात्रदोषाः-

प्रतिकूलवर्णादिवाक्येव रसापकर्षसम्पादको भवति। अत एव वाक्यदोषशब्देनोच्यते। ते च दोषाः एकविंशतिसंख्याकाः। यथा-प्रतिकूलवर्णः, उपहत्विसर्गः, लुप्तविसर्गः, विसन्धिः, हतवृतत्वम्, न्यूनपदत्वम्, अधिकपदत्वम्, कथितपदत्वम्, पतत्प्रकर्षः, समाप्तपुनरातत्वम्, अर्थान्तरैकवाचकत्वम्, अभवन्मतयोगः, अनभिहितवाच्यत्वम्, अपदस्थपदत्वम्, अपदस्थसमासः, सङ्किर्णत्वम्, गर्भितत्वम्, प्रसिद्धिहतत्वम्, भग्नप्रक्रमः, अक्रमः, अमत परार्थत्वम्। विश्वनाथमते सन्धिविश्लेषणत्वम्, सन्ध्यऽश्लीलत्वम्, सन्धिकष्टत्वमिति भेदत्रयेण सह त्रयोविंशति संख्या भवति।

अकुण्ठोत्कण्ठया पूर्णं आकण्ठं कलकण्ठिमा। अत्र श्रृङ्गारे ठकारादीनां बाहुल्यात् प्रतिकूलवर्णत्वं दोषः। 'देशः सोऽयमराति।' इत्यत्रापि प्रतिकूलवर्णनत्वं दोषः। 'प्राग्प्राप्तनिशुम्भसाम्भव' इत्यत्र प्रतिकूलवर्णत्वं दोषः।'धीरो विनीतो' इत्यत्र उपहत्विसर्गत्वं दोषः।'राजन्विभान्तिभवतश्चरितानि तानि' इत्यत्र विसन्धिनामकः वाक्यदोषः।'अमृतममृतं कः' इत्यत्र हतवृत्तत्वं दोषः।'तथाभूतां दृष्ट्वा' इत्यत्र न्यूनपदत्वं वाक्यदोषः।'स्फटिकाकृति

निर्मल:' अत्र अधिकपदत्वं वाक्यदोष:। अधिकरतलतल्पं इत्यत्र कथितपदत्वं वाक्यदोष:। 'क: क: कुत्र न घुर्घुरायित घुरिघारो घुरेत् सुकर:' इत्यत्र पतत्प्रकर्षरूप: वाक्यदोष:। 'क्रेन्कार: स्मर कार्मुकस्य' इत्यत्र समाप्तपुनरातत्तता वाक्यदोष:। मस्त्रिणचरणपातं गम्यतां इत्यत्र अर्थान्तरैकवाचकत्वरूपं वाक्यदोष:।'येषां तास्त्रिदशे: दान सरित:' अत्र अभवमतयोग: वाक्यदोष:। अप्राकृतस्य चरितातिशयैश्च इत्यत्र अभिहित वाच्यत्व वाक्यदोष:। प्रियेण सङ्ग्रथ्य विपक्षसन्निधावित्यत्र अपदस्थपदत्वं वाक्यदोष:। 'अद्यापि स्तनशैलदुर्गविषमे' इत्यत्र अस्थानस्थसमासरूप वाक्यदोष:। 'किमिति न पश्यसि कोपं' इत्यत्र सङ्कीर्णत्वं वाक्यदोष:।'परापकारनिरतं दुर्जनै: स: सङ्गति:।' अत्र गर्भितत्वं वाक्यदोष:।'तत्सक्तोऽयं न किञ्चित् गणयति' इत्यत्र विरुद्धमतिकृत वाक्यदोष:। 'मञ्जिरादिषु रणितप्रायं' इत्यत्र प्रसिद्धिहतत्वं वाक्यदोष:। नाधे निशाया: नियतेर्नियोगा इत्यत्र प्रकृतिप्रक्रमभङ्गारूप-वाक्यदोष:। 'द्वयं गतं सम्प्रतिशोचनीयतां' इत्यत्र अविद्यमानक्रम: वाक्यदोष:। 'राममन्मथशरेण ताडिता' अत्र अक्रमत्वरूप: वाक्यदोष:। इत्येते वाक्यदोषा:।

अर्थदोषनिरूपणम्

अर्थदोषाश्च[१] त्रयोविंशतिसंख्याकाः सन्ति। यथा- अपुष्टत्वम्, कष्टत्वम्, व्याहतत्वम्, पुंनरुक्तत्वम्, दुष्क्रमत्वम्, ग्राम्यत्वम्, संदिग्धत्वम्, निर्हेतुत्वम्, प्रसिद्धिविरुद्धत्वम्, विद्याविद्धत्वम्, अनविकृततत्वम्, सनियमपरिवृत्तत्वम्, अनियमपरिवृत्तत्वम्, विशेषपरिवृत्तत्वम्, अविशेषपरिवृत्तत्वम्, साकांक्षत्वम्, अपदयुक्तत्वम्, सहचरभिन्नत्वम्, प्रकाशितविरुद्धत्वम्, विध्ययुक्तत्वम्, अनुवादायुक्तत्वम्, व्यक्तपुनः स्वीकृतत्वम्, श्लीलार्थपुष्टत्वमिति।

'अतिविततगगनसरणि' इत्यत्र अपुष्टार्थत्वं अर्थदोषः। 'सदा मध्ये यासां' इत्यत्र कष्टत्वं दोषः। जगति जयिनस्ते ते भावा नवेन्दुकलादयः इत्यत्र व्याहतत्वमर्थदोषः। 'कृतमनुमतं' इत्यत्र च पुनरुक्तत्वमर्थदोषः। 'भूपालरत्ननिर्दैन्य' इत्यत्र दुष्क्रमत्वमर्थदोषः। स्वपित यावदयं निकटे जन इत्यत्र ग्राम्यत्वमर्थदोषः। मात्सर्यमुत्सार्य इत्यत्र संदिग्धत्वमर्थदोषः। 'गृहीतं येनासीः' इत्यत्र निर्हेतुत्वमर्थदोषः। "इदं ते केनोक्तं कथय कमलातङ्कवदने" इत्यत्र प्रसिद्धिविरुद्धत्वमर्थदोषः। 'सदा स्नात्वा निशीथिन्यां' इत्यत्र विद्याविरुद्धत्वमर्थदोषः। प्राप्ताः श्रियः सकलकामदुभास्ततः किं इत्यत्र अनवीकृतत्वमर्थदोषः। 'यत्रानुल्लिखितार्थमेव निखिलं' इत्यत्र सनियमपरिवृत्तत्वमर्थदोषः। 'वक्त्राम्भोजं सरसवत्यधिवसति' इत्यत्र अनियमपरिवृत्तत्वमर्थदोषः। 'श्यामां श्यामामलिमानमान' इत्यत्र विशेषपरिवृत्तत्वमर्थदोषः। 'कल्लोलवेल्लितदृषत्पुरुषप्रहारै' इत्यत्र अविशेषपरिवृत्तत्वमर्थदोषः। अर्थित्वे प्रकटीकृतेऽपि इत्यत्र साकांक्षत्वमर्थदोषः। 'आज्ञाशक्रशिखामणिप्रणयिनि' इत्यत्र अपदयुक्तत्वमर्थदोषः। 'श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा' इत्यत्र सहचरभिन्नत्वमर्थदोषः। 'लग्नं रागावृताङ्ग्या' इत्यत्र प्रकाशितविरुद्धत्वमर्थदोषः। 'प्रयत्नपरिबोधितः स्तुतिभिरद्य' इत्यत्र विध्ययुक्तत्वमर्थदोषः। अरे रामा हस्ताभरणं इत्यत्र अनुवादायुक्तत्वमर्थदोषः। लग्नं रागावृङ्ग्येत्यत्र व्यक्तपुनः स्वीकृतात्तत्वमर्थदोषः। हन्तुमेवप्रवृत्तस्य स्तब्धस्य विवरैषिणः इत्यत्र श्लीलत्वमर्थदोषः।

केषाञ्चिद्दोषाणां परिहारः[२]– केषाञ्चित् दोषाः परिहारयोग्याऽपि भवन्ति। यथा- 'यस्याः कर्णावतंसेन जितं सर्वं विभूषणम्' इत्यत्र अवतंसः कर्णभूषाः इत्यादि कोशवचनेन केवलस्य अवतंसशब्दस्यैव कर्णाभरणवाचकत्वेन कर्णशब्दस्य प्रयोगः कर्णादिस्थिति प्रतिपत्त्यर्थम्। कुत्रचिच्च महतां[३] प्रयोगवशात् न दोषत्वेन ख्याप्यतेऽपितु तेषां समर्थनमेव क्रियते। 'जगाद् मधुरां वाचं विशदाक्षरशालिनिं' इत्यादौ मधुरादिपदानां क्रियाविशेषणत्वेन

---

१. काव्यप्रकाश, सूत्र-७६

२. काव्य प्रकाश, सूत्र-७७

३. काव्य प्रकाश, सूत्र-७८

विवक्षितार्थप्रतीतिः भवितुमर्हति। अत एव गतार्थविशेष्यस्य विशेषणत्वेन कुत्रचित् प्रयोगः समुचित इति वामनेनोक्तम्। एवमेव चरणत्रपरित्राणरहिताभ्यामपि द्रुतम् इत्यत्र चरणत्रपदं पादविशेषणम्। प्रसिद्धे[४] पदे निर्हेतुतत्वस्य दुष्टता न भवति। यथा-

'चन्द्रं गता पद्मगुणान्न भुङ्क्ते' इत्यत्र रात्रौ पद्मस्य संकोच दिवा चन्द्रमसश्च प्रभारहितत्वं लोकप्रसिद्धमिति न भुङ्क्ते इति हेतुं नापेक्षिते। यथावत् शब्दस्याऽनुकरणेसति न श्रुतिकटुत्वादिदोषः। मृगचक्षुषमद्राक्षमित्यादि कथमयम् अत्र अनुकरणत्वात् न श्रुतिकटुत्वादिदोषः। एवमेव अन्येऽपि दोषा उदाहार्याः।

रसदोषनिरुपणम्

व्यभिचारिभावः, रसतया वाच्यत्वम्, स्थायिभावानां स्वशब्देन कथनं अनुभावस्य कष्टकल्पनयाभिव्यक्तिः विभावस्य क्लिष्टकल्पनयाभिव्यक्तिः प्रतिकूलविभावग्रहणम्, पौनः पुन्येनैकस्यैव रसस्य दीप्तिः। अनवसरे रसविस्तारः, अनवसरे विच्छेदः, अङ्गस्य प्रधानस्य वा अत्यन्तविस्तारः अङ्गित्वेन वर्णनीयस्य उपेक्षा पात्रविपर्ययः रसानुपकारकस्य वर्णनम्। एते रस दोषाः भवन्ति। उदाहरणानि यथा– स व्रीडादयितानने इत्यादौ व्रीडादीनां शब्दवाच्यत्वं दोषः। 'व्यानम्रा' इति पाठः समुचितः। 'तामनङ्गजयमङ्गलस्यि' इत्यत्र रसस्य स्वशब्देन वाच्यत्वं दोषः। आलोक्य कोमलकपोलतलाभिसिक्त। इत्यत्र श्रृङ्गारशब्द वाच्यत्वं दोषः। सम्प्रहारे प्रहरणैः इत्यत्र उत्साहरुपस्य स्थायिभावस्य स्वशब्देन कथनं दोषः। कर्पूरधूलि-धवलद्युतिपूरधौत इत्यत्र उद्दीपनालम्बनरुपाः श्रृङ्गारयोग्याः विभावाः अनुभावपर्यवसायिनः स्थिता इति कष्टकल्पना। परिहरति रतिं मतिं लुनीते। इत्यत्र रतिपरिहाराद्यनुभावानां करुण भयानकवीभत्सादौ स्थितत्वात् कामनिरुपालम्बन विभावस्य क्लिष्टकल्पनया ज्ञानं भवति। प्रमादे वर्त्तस्व प्रकटय मुदं सन्त्यजरुपं इत्यत्र प्रतिकूलविभावादिग्रहः रसदोषः। 'दीप्तिः पुनः पुनः' इत्यस्य 'अथ मोह परायणा सति' इत्यादि श्लोकेन दीप्तं करुणरसम्। अथ सापुनरेव विह्वला इत्यादिना परिपुष्णाति। तदनन्तरं तमवेक्ष्य रुरोद शाभृषं इति श्लोकेन पुनः प्रदीपयति। 'कङ्कणमोचनाय गच्छामि' इत्यत्र अकाण्डे प्रथनरुपदोषः। अत्रैव च अकाण्डे च्छेदोऽपि। हयग्रीव वर्णने अङ्गस्य। अप्रधानस्य अतिविस्तरेण वर्णनं दृश्यते। रत्नावल्यां चतुर्थेऽङ्के ब्राभव्यागमने अङ्गिनोऽननुसन्धानं दोषः। क्रोधं प्रभो सम्हर सम्हरेति यावद्गिरः खे मरुतां चरन्ति इत्यत्र पात्रविपर्ययरुपदोषः। कर्पूरमञ्जर्यां नायिका स्वात्मना च कृतं वसन्तवर्णनं अनादृत्य वन्दिवर्णितस्य राज्ञा प्रध्वंसनं अनङ्गस्य रसानुपकारकस्य वर्णनं रसदोषः। अनौचित्यमेव रसभङ्गस्य मुख्यं कारणम्। औचित्यं च रसस्योपकारकम्। तथा चोक्तं ध्वनिकृताः–

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपोनिषत्परा॥

क्वचिच्च[१] स्वपदेनोक्तावपि सञ्चारिणः न भवति दोषः। यथा औत्सुक्येन कृतत्वरा इत्यत्र औत्सुक्यशब्दैव तदनुभावो न तथा प्रतीतिकारकः।

रसदोषपरिहारोपाय निरुपणम्:[२]– आश्रयैक्येन यत्र रहस्य विरुद्धता प्रतीयते तत्र पृथक् आश्रये सन्निवेशः समुचितः। यत्र च रसाव्यवधानेन विरुद्धत्वं प्रतीयते तत्र अन्येन

१. काव्य प्रकाश सूत्र-८३
२. काव्य प्रकाश सूत्र-८५
३. काव्य प्रकाश सूत्र-८६

रसेन व्यवहितत्वं प्रतिपादनीयम्। वीरभयानकयोरेकाश्रयत्वेन विरोधः। अतः नायकस्य प्रतिपक्षिरूपे आश्रयः भयानकस्य सन्निवेशः कार्यः। शान्तश्रृङ्गारयोरव्यभितत्वेन विरोधः। अतः विरहितत्वेन वर्णनमुचितम्। यथा- शान्तस्य जीमूतवाहनस्य वर्णनम्। यस्य विरोधिरसस्य प्रधानरसेन सह स्मरणं क्रियते। अथवा यः विरोधी रसः प्रधानेन रसेन सह साम्यभावेन विवक्षितं स दोषयुक्तो न भवति। यौ रसौ प्रधानरसस्य अङ्गित्वं प्राप्नोति तेऽपि परस्परदोषरहितैव भवन्ति। यथा- 'अयं स रसनोत्कर्षी पीनस्तनविमर्दनः' अत्र पूर्वावस्थास्मरणं श्रृङ्गाराङ्गमपि करुणं परिपोषयति। एवमन्यान्यपि बहून्युदाहरणानि सन्ति।

इति चतुर्थोऽध्यायः।

अथ पञ्चमोऽध्याय:

(गुणसमीक्षणम्)

'तददोषौ शब्दार्थौ सगुणावनलङ्कृति पुन: क्वापि' इति काव्यलक्षणास्थादोषौ शब्दार्थौ इति लक्षणांशनिरुपणानन्तरं 'सगुणाविति' पदघटकीभूतस्य गुणपदस्य व्याख्यानं कर्तुं प्रवर्तते अस्मिन्नध्याये। तदर्थं च गुणाऽलङ्कारयो: भेदविवेचनमपि प्रस्तूयते। मानवशरीरे[१] यथा आत्मा प्रधानरूपेण तिष्ठति तथा सौर्यादिगुणा: जीवात्मन: धर्मा: भवन्ति नत्वचेतनस्य शरीरस्य। तथैव काव्ये गुणा: रसस्य धर्मा: भवन्ति न तु शब्दार्थयो:। अत एव शब्दार्थयुगलस्य धर्मभूता: अलङ्कारा: भिन्ना: भवन्ति गुणाश्च भिन्ना:। गुणा: रसोत्कर्षका: भवन्ति। अचलस्थितय: इत्यपरं विशेषणम्। अचलास्थितर्येषां ते तथाभूता: गुणा इत्यर्थ:। अयमभिप्राय: रसेन सह गुणानां अचला स्थिति: अर्थात् अव्यभिचारिरूपेण तिष्ठति। रसं विना न गुणानां स्थिति:। रसेन सह स्थित्वा रसोपकारका: भवन्ति। अत एव रसोत्कर्षाधायका गुणा:। नियमेन रसेन सह तिष्ठति। स्वविद्यमानत्वेन रसमुपकरोति। अत एव रसाव्यभिचारिस्थितित्वं अयोगव्यवच्छेदेन रसोपकारकत्वं सिद्धयति। ये धर्मा:[२] काव्याङ्गभूतशब्दार्थद्वारा तत्रोत्कर्षं समुत्पादयित्वा विद्यमानत्वे सति अङ्गिनं रसमुपकुर्वन्ति ते अलङ्कारा:। यथा– मानव शरीरे हारादय: स्थित्वा शरीरमलङ्करोति तथैव काव्यशरीरे स्थित्वानुप्रासोपमादयोऽलङ्कारा: काव्यशरीरे विद्यमानत्वे सति उपकारका: भवन्ति। अर्थात् समवायसम्बन्धसमनियता: गुणा: भवन्ति संयोगसम्बन्धसमनियता: अलङ्कारा: इत्युभयोर्भेद:। यथा– "अपसारय घनसारं कुरु हारं दूरमेव किं कमलै:" इत्यत्र रवर्णस्यानुप्रासालङ्कार: शब्दसौन्दर्यवृद्धिद्वारा विप्रलम्भश्रृङ्गाररसस्योत्कर्षक:। रवर्ण: विप्रलम्भश्रृङ्गारनिष्ठमाधुर्यव्यञ्जक:। वाचकमुखेनात्राऽलङ्करोति। एवमेव 'मनोरागस्तीव्रं विषमिव विसर्पत्यविरत' इत्यत्र विषमिव उपमालङ्कार: अर्थसौन्दर्यवृद्धिं द्वारा विप्रलम्भश्रृङ्गाररसमुपकरोति। विषमिव इत्युपमयानुरागाधिक्यं व्याप्नोति। अतएव विप्रलम्भोत्कर्षक:। अत्र वाच्यमुखेनालङ्कारौ रसमुपकुरुत:। चित्ते विघटते न त्रुट्यति सगुणेषु इत्यत्र टवर्णानुप्रासालङ्कार:। केवलशब्दनिष्ठोत्कर्षक:। न तु विप्रलम्भश्रृङ्गारस्य। टवर्गस्य श्रृङ्गारप्रतिकूलत्वात्। अत्रापि वाचकमुखेनैवालङ्करोति। मित्रे क्वापि गते सरोरुहवने वद्धानने ताम्यति इत्यत्र अर्गले वेत्युपमालङ्कार: केवलमर्थोत्कर्षक:। न विप्रलम्भश्रृङ्गारस्य। उपमाविप्रलम्भश्रृङ्गाररसप्रतिकूलत्वात्। एष एव च गुणालङ्कारयो: समवायवृत्त्या शौर्यादयो गुणा: संयोगवृत्त्या च हारादयोलङ्कारा:। काव्यशोभाया: कर्त्तारो धर्मा: गुणास्तदतिशयहेत्वस्तेऽलङ्कारा इति वामनमतम्। तन्न युक्तम्। किं समस्तैर्गुणै:

---

१. काव्य प्रकाश, सूत्र-८७

२. काव्य प्रकाश सूत्र-८८

काव्यव्यवहार: उत कटिपयै: इति विकल्पासहत्वात्। अत: तन्मतमपाकृत्य गुणत्रयं स्वीकृतं मम्मटेन। ते च माधुर्यौज:[३] प्रसादाख्या:। वामनमते ओज:[४] प्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारताथव्यक्तिकान्तयो बन्धगुणा:। इति वामनेन दससंख्याका: गुणा: स्वीकृत:। चित्तस्य[५] द्रुतिकारणं आह्लादकता अर्थात् आनन्दस्वरूपता स एव माधुर्यगुण:। तथा श्रृङ्गाररसे एव भवति। श्रव्यता तु ओजसि प्रसादे चापि भवति। द्रुतिकरणता केवलं श्रृङ्गारे एव समाधुर्यगुण: सम्भोगश्रृङ्गारे करुणे विप्रलम्भश्रृङ्गारे तथा शान्तरसे उत्तरोत्तरोत्कृष्टतर: भवति। क्रमश: अत्यधिक द्रुतिकारणत्वात्। दीप्तिरूपचित्तविस्तार[६]हेतुरोज:। तच्च वीररसेऽपि भवति। क्रमश: वीभत्सरसे रौद्ररसे चास्य आधिक्यं जायते। अर्थात् वीररसापेक्षया वीभत्से आधिक्यं भवति। तदपेक्षया च रौद्रे। प्रसादगुण:[७] चित्तविकासजनक:। अनेन गुणेन त्वरितमेव रस: हृदयं व्याप्नोति। यथा- शुष्केन्धने अग्नि:। स्वच्छे वस्त्रे च जलम्। तेनैव प्रकारेण सर्वेषु रसेषु काव्येषु च तिष्ठति स:। व्याट्यमिह चित्तम्। गुणवृत्त्या: शब्दार्थयो: तेषां वृत्ति:। वामनस्वीकृत गुणानां तेन[८] नार्थगुणा: वाच्या: इत्यनेन खण्डितं मम्मटेन। ये शब्दानां गुणा: निरूपिता: ते वस्तुत: वर्णानां समासा: पदघटनारूपारचना: च एव तेषां माधुर्यादीनां गुणानां व्यञ्जका: भवन्ति। ये टवर्गभिन्ना: स्पर्शवर्णा: स्वस्ववर्गस्यान्तिमं वर्णयुक्ता: तथा लघुस्वरविशिष्टा: रेफ तथा णवर्णयुक्ताल्पसमास अथवा मध्यसमासयुक्तारचना माधुर्यगुणाभिव्यञ्जिका: भवन्ति। यथा-

अनङ्गरङ्गप्रतिम तदङ्ग भङ्गिभिरङ्गि कृत मानताङ्ग्या:।
कुर्वन्ति यूनां सहसा यथैता: स्वान्तानि शान्तापरचिन्तनानि॥

अत्र गकार:तकारश्च स्ववर्गान्तिमवर्णयुक्त:। तथा ह्रस्ववर्णव्यवहित: रेफ:। अनङ्गरङ्गप्रतिमं इत्यत्र मध्यमसमास:। प्रतिमं तदङ्गं इति माधुर्ययुक्ता रचना। अत: एते विप्रलम्भश्रृङ्गारे माधुर्यगुणाभिव्यञ्जका: सन्ति। वर्गाणां प्रथमतृतीय वर्णेन सह द्वितीयचतुर्थवर्णयो: योग:। रेफेन सह कस्यापि वर्णस्य सम्बन्ध:। तुल्यवर्णानां योग:। दीर्घसमास:। तथा उद्धत्रचना यत्भवति तत्र ओजो गुण:। अर्थात् एते ओजगुणाभिव्यञ्जका:। यथा मूर्धनामुदवृत्तकृत्येत्यादौ मूर्द्धनां उपसर्पि दर्प तथा आङ्घ्रिपदे रेफस्य योग:। उद्वृत्तकृत्य इत्यत्र तुल्यवर्णतकारस्य योग:। तथा ईश इत्यत्र शकार:। दोष्णामित्यत्र च षकार:। दीर्घसमास: रचना च विकटा वर्त्तते। अत: ओजस: प्राधान्यम्। यस्य श्रवणमात्रेणैव शब्दार्थप्रतीति: तथा सर्वेषु रसेषु सर्वासुध च रचनासु समानरूपेण तिष्ठति स प्रसादव्यञ्जक: इति। यथा-

---

३. काव्य प्रकाश सूत्र-८९

४. काव्यालङ्कार, सूत्र-३/१/४

५. काव्य प्रकाश, सूत्र- ९०-९१

६. काव्य प्रकाश सूत्र-९०-९३

७. काव्य प्रकाश सूत्र-९४-९५

८. काव्य प्रकाश सूत्र-९७

'परिम्लानं पीनस्तन जघन सङ्गादुभयतः' इत्यत्र अन्वयाकाङ्क्षितानां सर्वेषां पदानां यथास्थानमेव निवेशः। श्रवणमात्रेणैवान्वयबोधः सञ्जायते। माधुर्याभिव्यञ्जकाः वर्णाः मध्यमसमासः माधुर्यगुणयुक्ता रचना च वर्तते। अतः प्रसाद गुणोऽत्र स्फुटीभवति। यद्यपि रचनावर्णसमासादिगुणाधीना अर्थात् नियतगुणाभिव्यञ्जकाः। तथापि कुत्रचित् वक्ता वाच्यप्रबन्धादीनामौचित्यमनुश्रित्य समासादीनां अन्यथात्वमपि अभीष्टं भवति। यथा– 'पन्थायस्तार्णवाम्भः' इत्यत्र न वाच्यं क्रोधाभिव्यञ्जकम्। अभिनेयार्थं च काव्यमिति तत्प्रतिकूला उद्‌भट रचनादयः। भीमसेनो ऽत्र वक्ता। क्वचिच्च वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयः भवन्ति। यथा– प्रौढच्छेदानुरूपोच्छलनस्य भवत्सैंहिकेयोपघातः इत्यत्र दीर्घसमासस्य उद्धतरचनायाश्च औचित्यं नास्ति। तथापि वर्णनीयार्थस्य औचित्यमनुसृत्य दीर्घसमासादीनां वर्त्तते व्यवहारः। क्वचिच्च वक्तृवाच्याऽन्यपेक्षाः प्रबन्धोचिताः भवन्ति। यथा– आख्यायिकायां श्रृङ्गारवर्णनेऽपि न मश्रिणवर्णानां प्रयोगः। कथायां रौद्ररसेऽपि नात्यन्तं उद्धता। नाटकादौ रौद्ररसेऽपि न दीर्घ समासादयो भवन्ति। एवं अन्यदप्यौचित्यमनुसर्तव्यमिति मम्मट सिद्धान्तः।

इति गुणाऽलङ्कार भेद निरुपणम्।

अथ षष्ठोऽध्यायः

(अलङ्कारसमीक्षणम्)

'तददोषौ शब्दार्थौ सगुणावनलङ्कृति पुनः क्वापि' इति मम्मटं काव्यलक्षणम्। तत्र गतेष्वध्यायेषु अदोषौ शब्दार्थौ सगुणावित्यन्तं विचारितम्। सम्प्रति अध्यायेऽस्मिन् प्राप्तावसरत्वात् अलङ्काराः निरुप्यन्ते। गुणादीनामिव अलङ्कारोऽपि काव्यस्य अनिवार्यरूपः धर्मः। अलङ्काराणां स्फुटत्वं नावश्यकम्। अत एव वृत्तावुक्तम्-क्वचित्तु[१] स्फुटाऽलङ्कारविरहेऽपि न काव्यत्वहानिरिति। अतः अलङ्काररहितेऽपि काव्यत्वं स्वीकरोति मम्मट इति वक्तुं न शक्यते। तथा-

'अङ्गीकरोति यः काव्यं शब्दाऽर्थावनलङ्कृतिः।
असौ न मन्यते कस्मात् अनुष्णमनलङ्कृति॥ इति'

जयदेवोक्तिरपि न सङ्गच्छते। अलङ्कारः शब्दार्थ हेतुकः। तत्राऽलङ्कारो त्रिविधः। शब्दालङ्कारः, अर्थालङ्कारः, उभयालङ्कारश्च। योऽलङ्कारः शब्दाश्रितः अर्थात् शब्दपरिवर्तनेन अलङ्काराभावः सञ्जायते स शब्दालङ्कारः। तदेव शब्दपरिवृत्यसहत्वमुच्यते। योऽलङ्कारः अर्थाश्रितो भवति शब्दपरिवर्तनेन अर्थात् पर्याय शब्दप्रक्षेपेणापि नाऽलङ्कारत्वहानिः सोऽर्थालङ्कारः। तदेव च शब्दपरिवृत्तिसहत्व-शब्देनोच्यते। योऽलङ्कारः शब्दार्थोभयाश्रितः स उभयालङ्कारः। तत्र क्रमप्राप्तत्वात् सर्वप्रथमं शब्दालङ्कारो निरुप्यते। शब्दालङ्कारश्च सोमेश्वरमतेन षटसंख्याकः वर्तते। यथा-

वक्रोक्तिरप्यऽनुप्रासो यमकं श्लेषचित्रकम्।
पुनरुक्तवदाभास शब्दालङ्कृतयस्तु षट्।।

वक्रोक्त्यलङ्कारः-

गणनायां प्रथमस्थानप्राप्तत्वात् महत्त्वपूर्णत्वाच्च वक्रोक्त्यलङ्कारः प्रथमं निरुप्यते। वक्ता[२] येनाभिप्रायेण वाक्यप्रयोगं करोति तेनैव वाक्येन श्रोता श्लेषेण काक्वा वा तद्भिन्नार्थकल्पनां करोति। तत्र वक्रोक्त्यऽलङ्कारः। अयमेव अपहनुत्यलङ्कारात् विशेषः। तत्र वक्ता एव अन्यार्थकल्पनां करोति। अत्र तु श्रोता। स च द्विविधः- श्लेषवक्रोक्तिः, काकुःवक्रोक्तिश्च। श्लेषवक्रोक्तिरपि द्विविधः- सभङ्गश्लेशः, अभङ्गश्लेषश्च। नारीणामनुकूलमाचरसि चेज्जानासिकश्चेत्तनो इति। इदं सभङ्गश्लेषस्योदाहरणम्। अत्र नारीणां इत्यस्य स्त्रीणामित्यर्थः। तथा न अरीणां इत्यप्यर्थः। नारीणां तथा अबलानां इत्यत्र सभङ्गश्लेषः। 'अहो केनेदृशि बुद्धिर्दारुणा तव निर्मिता' इत्यत्र दारुणपदं क्रुरेऽर्थः प्रयुक्तः। श्रोता च दारुशब्दात् तृतीयैकवचने दारुणेति काष्ठेनेत्यर्थः। अत्र पदानां भङ्गं विनयैव

---

१. काव्य प्रकाश सूत्र-१
२. काव्य प्रकाश सूत्र-१०३

श्लेषः। काक्वा उदाहरणम्-गुरूजनपरतन्त्रतया दूरतरं देशं उद्यतो गन्तुमिति। अत्र नैष्यति इति पदेन आगमन निषेधः प्रतीयते। परन्तु काक्वा अवश्यागमनं अर्थः कल्प्यते।

अनुप्रासालङ्कारः-

यत्र[३] स्वरभिन्नत्वेऽपि व्यञ्जनानां सादृश्यं भवति तत्रानुप्रासालङ्कारः। रसाद्यनुगतः प्रकृष्टो प्रासोऽनुप्रास इति वृत्तौ। स चानुप्रासः द्विविधः- छेकगतः, वृत्तिगतश्च। छेकः चतुरः विदग्ध इति वा। नियतवर्णेषु विद्यमानः रसव्यञ्जना सम्बन्धिव्यापारो वृत्तिगताऽनुप्रासः। यत्र अनेकव्यञ्जनानां साम्यं भवति तत्र छेकानुप्रासः। यथा-

'ततोऽरुण परिष्पन्दमन्दिकृत वपुः शशि' इत्यत्र स्पन्दमन्दि इत्यादौ व्यञ्जनानां सादृश्यम्। अतः छेकानुप्रासः। यत्र च एकस्य व्यञ्जनस्य अथवानेकस्य व्यञ्जनस्य अनेकबारं सादृश्यं भवति तत्र वृत्त्यनुप्रासः। 'अपसारय घनसारं कुरु हारं दूर एव किं कमलैः' इत्यत्र अनेकबारं वर्णानां साम्यात् वृत्त्यानुप्रासः। वामनादीनां[४] मते एताः वृत्तयः वैदर्भीगौणी पाञ्चालाख्यारीतयो मताः।

लाटानुप्रासः- अयं च शब्दगतोऽनुप्रासः। समानार्थप्रतिपादकत्वेऽपि केवलतात्पर्यभेदात् लाटानुप्रासः। लाटदेशनिवासीनां प्रियत्वात् लाटाप्रासशब्देनोच्चयते। केचित् पदानुप्रासोऽपि वदन्ति। पदानां पदस्य वा सादृश्येऽपि भवति लाटानुप्रासः। यथा- यस्य च सविधे दयितादवदहनस्तुहिनदीधितिस्तस्य। अत्र पदानामनुप्रासः। एवं वदनं वरवर्णिन्यास्तस्या सत्यं सुधाकरः सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत्' इत्यत्र एकस्मिन्नेव पदे अनुप्रासः। कुत्रचिच्च समासा समासे प्रातिपदिके वा भवत्यनुप्रासः। यथा- 'शीतकरकरुचिर्विभा विभाकराकार' इत्यत्र कर इति प्रातिपदिकस्य अनुवृत्तित्वात् अनुप्रासः। अनुप्रासो द्विविधः- वर्णानुप्रासः शब्दानुप्रासः अथवा लाटानुप्रासः। वर्णानुप्रासोऽपि द्विविधः- छेकानुप्रासः, वृत्त्यनुप्रासश्च। शब्दानुप्रासोऽपि द्विविधः-पदगतानुप्रास, नामगतानुप्रासश्च। पदगतानुप्रासोऽपि द्विविधः- तथा नामगतानुप्रासोऽपि त्रिविध इति निष्कर्षः।

यमकालङ्कारः[५]- अर्थे सत्यर्थभिन्नानां वर्णानां पुनः श्रुतिः यमकालङ्कारः। लाटाऽनुप्रासे वर्णसमुदायस्या आवृतिर्भवति। अतः तत्राव्याप्तिवारणाय अर्थभिन्नानामिति पदं दत्तम्। समरसमरसोऽयं इत्यत्रातिव्याप्तिवारणाय अर्थे सतीति पदम्। अत्र समरस इति सार्थकशब्दस्य समर इत्यंशः निरर्थकः। सरो रसः इत्यत्रातिव्याप्तिवारणाय वर्णानां पुनः श्रुतिरित्युक्तम्। अयमलङ्कारः पद्यस्य चतुर्थांशे आवृत्तिसम्भवात् पादवृत्तिः तथा पादांशस्य आवृत्त्या पदभागवृत्ति इति यमकभेदः। स च मुखं, सन्दंशः, आवृत्तिः, गर्भः सन्दष्टकः, पुच्छम्, पंक्तिः, युग्मकम्, परिवृत्तिः, समुद्गः, महायमकः इति भेदात् एकादशविधः।

---

३. काव्य प्रकाश सूत्र-१०४

४. काव्य प्रकाश सूत्र-१११

५. काव्य प्रकाश सूत्र-११७

६. काव्य प्रकाश सूत्र-११९

'सन्नारी भरणोमायमाराध्यविधुशेखरम्' इत्यत्र तृतीयपादावृत्त्या सन्दंशनामालङ्कारः। विना यं येनो नयता सुखादिना विना यमेनोनयता सुखादिना इत्यत्र प्रथमपादस्य द्वितीये तथा तृतीयपादस्य चतुर्थे आवृत्त्या युग्मकयमकालङ्कारः। "सत्वरारम्भर्तोऽवश्यमबलम् वितताख तथा सत्वारम्भतोऽवश्यमवलम्बिततारवम्॥" इत्यत्र पूर्णस्य श्लोकस्य आवृत्त्या महायमकालङ्कारः। 'अनन्तमहिमव्याप्तवेधा नवेदयाम्' इत्यत्र अन्तभागस्य चतुर्थपादखण्डे आवृत्तिः। अत्र सन्दष्टकालङ्कारः। 'यदा यदा नतोनयात्ययं' इत्यत्र आद्य भागे अन्तभागावृत्त्या आद्यन्तिकयमकालङ्कारः। "सरस्वति प्रसादं मे स्थितिं चित्त सरस्वति" इत्यत्र भागवृत्तिः आद्यन्तिकः तथा अन्तादिकस्य समुच्चयः। "ससार शाकं दर्पेण कन्दर्पेण ससारसा" इत्यत्र भागवृत्तिराद्यन्तिकस्यः तथा अनुतादिकपादे समुच्चयः। 'मधुपराजित पराजित मानिनीजनमनः सुमनः सुरभिश्रियम्।' अत्र अनियतस्थानावृत्तिः यमकालङ्कारः। एवं संक्षेपेण यमकालङ्कारो निरुपितः।

श्लेषालङ्कारः[६]- अर्थभेदेन भेदादपि यत्र एकस्यैव शब्दस्योच्चारणं भवति तत्र श्लेषालङ्कारः। स चाष्टविधः- वर्णभेदात्, पदभेदात्, लिङ्गभेदात्, भाषाभेदात्, प्रकृतिभेदात्, प्रत्ययभेदात्, विभक्तिभेदात्, वचनभेदाच्च। 'अलङ्कारः शङ्काकरनरकपालं परिजनो' इत्यत्र वर्णश्लेषः। "पृथुकार्तस्वरपात्रम्" इत्यत्र पदश्लेषः। 'भक्तिप्रह्वविलोकनप्रणयिनी' इत्यत्र लिङ्गश्लेषः, वचनश्लेषश्च। 'महदेसुरशद्धम्मे' इत्यत्र वचनश्लेषः। अयं सर्वाणि शास्त्राणि हृदि गेषु च वक्षति इत्यत्र प्रकृतिश्लेषः। रजनी रमणमौलेः पादपद्मावलोक इत्यत्र प्रत्ययश्लेषः। 'सर्वस्वं हर सर्वस्य त्वं भवच्छेद तत्परः' इत्यत्र विभक्तिश्लेषः। 'योऽसकृत परगोत्राणां पक्षच्छेदक्षणकक्षमं' इत्यत्र अभङ्गश्लेषः। यद्यपि श्लेषभेदे नास्यपरिगणनं विद्यते तथापि प्रयोगेऽयमपि दृश्यते। शब्दश्लेषालङ्कारोऽर्थश्लेषालङ्कारश्चेति भेदद्वयमपि दृश्यते। तेषामत्र चर्चा न क्रियते विस्तरभयात्।

चित्रालङ्कारः- यत्र रचना खड्गाद्याकारा कारिता भवति तत्र चित्रालङ्कारः। स च खड्ग, मूरज, पद्म सर्वतोभद्रादि भेदेनानेकविधः। तेषाञ्चोदाहरणानि नात्र प्रस्तुयन्ते।

अर्थालङ्कारनिरुपणम्- शब्दालङ्कारनिरुपणानन्तरमवसरप्राप्तत्वात् अर्थालङ्काराः निरुप्यन्ते। उपमारुपक दीपकयमकानां चतुर्णामऽलङ्काराणां निरुपणं नाट्यशास्त्रे भरतमुनिनाकृतम्। तदनन्तरं काव्यालङ्कारसूत्रे वामनेन त्रयस्त्रिंशत अलङ्काराः निरुपिताः। दण्डिना च पंचत्रिंशत्, भामहेन एकोनचत्वारिंशत्, उद्भटेन चत्वारिंशत्। तदनन्तरं रूद्रटेन द्वापञ्चाशत् अलङ्काराः निरुपिताः। मम्मटेन च सप्तषष्ठी अलङ्काराः स्वीकृतिः। विश्वनाथः सप्तसप्ततिसंख्याकान् अलङ्कारान् स्वीकरोति। जयदेवेन च शतं अलङ्काराः स्वीकृताः। कुवलयानन्दे अप्पय्यदीक्षितः चतुर्विंशत्यधिकशतालङ्कारं स्वीकरोति। रूय्यकः भिन्नमेव वर्गीकरणं अलङ्काराणां प्रदर्शयति। सादृश्यमूलकः, विरोधमूलकः, श्रृङ्खलाबन्धमूलकः,

तर्कन्यायमूलकः, वाक्यन्यायमूलकः, लोकन्यायमूलकः, गुढार्थप्रतीतिमूलकश्च। परन्तु मम्मटेन नास्य वर्गीकरणस्य स्वग्रन्थे काव्यप्रकाशे स्थानं दत्तमिति। तत्र किं कारणमिति वक्तुं न शक्यते।

उपमालङ्कारः- यत्रोपमानोपमेययोः भेदेऽपि उभयोः गुणक्रियादिना समानता दृश्यते तत्रोपमालङ्कारः। स च द्विविधः- पूर्णोपमा, लुप्तोपमा च। पूर्णोपमा पूर्णाभवति अर्थात् उपमानोपमेय साधारणधर्मोपमावाचकैरवयवैः परिपूर्णा भवति। एष्वयवयेषु केषाञ्चित् यत्र लोपः सा लुप्तोपमा। पूर्णोपमा द्विविधा- श्रौती आर्थीभेदात्। एतयोरपि वाक्यसमासतद्धित-भेदेन भेदत्रयम्। यत्र यथा इव वा इत्यादि शब्दानां दृश्यते प्रयोगः तत्र तत्सदृशोपमानस्य भवति प्रतीतिः। तत्र श्रौती उपमा। यत्र च 'तेन तुल्यं मुखं' इत्यादौ उपमेय एव तथा तत्कमलं मुखसदृशः इत्यादौ उपमान एव तथा इदं मुखं तत्तुल्यम् इत्यादौ उपमेयोपमानयोः सादृश्यबोधनेनैव तुल्यादिशब्दानां व्यापारविश्रान्तिः। यत्र तुल्यादिशब्दानां भवति प्रयोगः तत्र आर्थी उपमा। उदाहरणं यथा-''स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति'' इत्यत्र स्वाधीनपतिका उपमानं विजयश्रीः उपमेयः न मुञ्चतीति साधारण धर्मः यथेति पदं उपमावाचकम्। अतः चतुर्णामवयवानां विद्यमानत्वात् वाक्यगा श्रौतीपूर्णोपमा। ''चकितहरिणलोललोचनायाः क्रुधि'' इत्यत्र सरसिजमुपमानं आननमुपमेयः अरुण सदृशकान्तिसाधारणधर्म, समशब्दौ उपमावाचकः, समशब्देन सह समासाभावात् वाक्यगा उपमा। अत एवात्र वाक्यगा आर्थी उपमा। अत्यायतैर्नियमकारिभिरूद्धताना इत्यत्र भुजपदमुपमानम्। उपमोपमेयः आयतत्वादिकं साधारणधर्मः इव शब्दोपमावाचकः। अत्र भुजैरिव इत्यत्र समासत्वात् समासगा श्रौती पूर्णोपमा। 'अवितथमनोरथपथप्रथनेषु' इत्यत्र सुरतरुरुपमानम्, भवान् उपमेयः, प्रगुण गरिमगीतश्रृत्वं साधारणधर्मः, सदृशशब्दोपमावाचकः। 'सुरतसदृश' इत्यत्रोपमानोपमावाचकशब्दस्यो समासत्वात् समासगा आर्थी पूर्णोपमा।

''गाम्भीर्यगरिमा तस्य सत्यं गङ्गा भुजङ्गवत् दूरालोकः सः समरे निदाघाऽम्बर रत्नवत्'' इत्यत्र पूर्वार्द्धे गङ्गाभुजङ्गोपमानं तस्येति उपमेयः, गाम्भीर्यगरिमासाधारणधर्मः, भुजङ्गवत् इत्यत्र इवार्थे वतिप्रत्ययः। अतोऽत्र तद्धितगा श्रौती पूर्णोपमा। उत्तरार्द्धे च निदाघाऽम्बररत्नं उपमानम्, स इति उपमेयः, दूरालोकत्वं साधारणधर्मः, अम्बररत्नवत् इत्यत्र तुल्यार्थे वतिप्रत्ययः। अतोऽत्र तद्धितगा आर्थीपूर्णोपमा। लुप्तोपमाऽलङ्कारः एकोनविंशतिभेदभिन्नः। तथा पूर्णोपमा षट्प्रकारः- संकलनया पञ्चविंशतिभेदभिन्नोऽयम-लङ्कारः। सर्वेषां भेदोपभेदानामुदाहरणं नात्र प्रस्तूयते विस्तरभयात्।

अनन्वयालङ्कारनिरुपणम्- यत्र एकस्यैव वस्तुनः एकस्मिन्नेव वाक्ये उपमानोपमेयरूपेण प्रयुज्यते, तत्रानन्वयालङ्कारः। न केवलं भातिनितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव। अत्र नितम्बिनी इति पदं स्वयमेव उपमानोपमेयरूपम्।

उत्प्रेक्षा अलङ्कारः- यत्र वर्णनीयवस्तुनः उपमानेन सह सम्भावना व्यक्तीभवति

तत्रोत्प्रेक्षालङ्कार:। सा च द्विविधा- हेतूत्प्रेक्षा, क्रियास्वरुपोत्प्रेक्षा च। यथा-

"उन्मेषं योगमनसहते" इत्यत्र उन्मेषमित्यादि स्वाभाविकीचरणशोभा उपमेय:। कमलशोभाया: उपमानत्वेन सम्भावना क्रियते। अतोऽत्रोत्प्रेक्षालङ्कार:।

सन्देहालङ्कार:- यत्र सादृश्येनोपमेयस्य उपमानेन सह संशयात्मकं ज्ञानं प्रकटीभवति तत्र सन्देहालङ्कार:। यथा- अयं मार्तण्ड: किं स खलु तुरगै: सप्तभिरीरित:। अत्र किं शब्देन संशयोदेति।

रूपकालङ्कार:- विभिन्नानां उपमानोपमेयानां यत्राभेदप्रतीति:, तत्र रूपकालङ्कार:। स चानेक विध:। यथा-

रूपक

साङ्ग	निरङ्ग	परम्परित
समस्त एकदेश	शुद्धमाला	श्लिष्टअश्लिष्ट
वस्तुविषयविवर्ती		शुद्धमाला शुद्धमाला

"ज्योत्स्नाभस्मक्षुरणधवला विभ्रतितारकास्थिन्या" इत्यादिन्युदाहरणानि सन्ति।

अपह्नुत्यलङ्कार:- उपमेयं असत्यं प्रतिपाद्य उपमानस्य सत्यत्वं स्थापयति य: सो अपह्नुत्यलङ्कार:। यथा- अवाप्त: प्रागल्भ्यं परिणतरूच: शैलतने अथवा बत सखि कियदेतत् पश्य वैरं स्मरस्य इति। अयमपि शाब्दी आर्थी भेदेन द्विविध:।

श्लेषालङ्कार:- एकस्यैवार्थस्य प्रतिपादिका शब्दा: अनेके भवन्ति अथवा एकस्मिन्नेव वाक्ये अनेकार्थप्रकटनक्षमता भवति तत्र श्लेषालङ्कार:। अयमपि शब्दश्लेषाऽर्थश्लेषश्चेति भेदात् द्विविध:। उदाहरणं यथा-

'उदयमयते लिङ्गमालिन्यं निराकुरूते तराम्' इत्यादि।

समासोक्तलङ्कार:- यत्र श्लिष्टविशेषणै: अप्रकृतार्थबोधनं भवति, तत्र समासोक्त्यलङ्कार:। यथा- "लब्ध्वा तव बाहुस्पर्शं यस्या स कुप्युल्लास:" इत्यादि। अत्र जयलक्ष्मीशब्दस्य न केवलं कान्ता वाचकत्वम्।

निदर्शनालङ्कार:- यत्र पदार्थानां वाक्यार्थानां वा अनुपपद्यमान: सम्बन्ध: उपमाया: कल्पनां करोति तत्र निदर्शनालङ्कार: । अयमपि वाक्यार्थनिदर्शनापदार्थनिदर्शनाभेदात् द्विविध:- यथा-"क्व सूर्यप्रभवो वंश: क्व चाल्पविषयामति:" तथा उदयति विततोर्ध्व रस्मिरज्जावहिमरूचौ हिमधाम्नि याति चास्तमित्यादि।

अप्रस्तुतप्रशंसालङ्कार:- अप्राकरणिककथनेन प्रस्तुतविषयस्य प्रतीतिसम्पादनं यत्र भवति। सा अप्रस्तुतप्रशंसा। अयं च पञ्चविध:- कार्ये प्रस्तुते तदन्यस्य वच:। कारणे प्रस्तुते तद्भिन्नस्य वर्णनम्। सामान्ये प्रस्तुते विशेषस्य वर्णनम्, विशेषे प्रस्तुते सामान्यस्य वर्णनम्। तुल्ये प्रस्तुते अप्रस्तुततुल्य वर्णनम्। उदाहरणं यथा-

याता किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृतेत्यादि।

अतिशयोक्त्यलङ्कारः- अतिशयिता प्रसिद्धिं अतिक्रान्ता लोकातीता उक्तिरतिशयोक्ति। अयमपि चतुर्विधः-भेदे अभेदः, अभेदेभेदः, असम्बन्धे सम्बन्धः, उभयनिष्ठा वा। यत्र उपमानेन उपमेयस्य निगणरागं कृत्वा तेन सह कल्पिताभेदनिश्चयः अथवा वर्णनीयस्य अन्येन रूपेण वर्णनं अथवा यदिशब्दार्थप्रतिपादकशब्दानां कथनं कृत्वा कल्पनं अथवा कार्यकारणयोः पूर्वापरीभावस्य वैपरीत्यम्। राकायामकलङ्कं चेदमृतान्शोर्भवेत वपुः। तस्या मुखं तदासाम्य पराभव मवाप्नुयादित्यादि।

प्रतिवस्तूपमालङ्कारः- यत्र उपमेयोपमानवाक्ये एक एव साधारणधर्मः तथा पुनरुक्त्या विभिन्नैः शब्दैरर्थग्रहणं भवति तत्र प्रतिवस्तूपमा। यथा- देवि भावं गमिता परिवार पदं कथं भवत्वेषा इत्यादि।

दृष्टान्तालङ्कारः- यत्र साधारणधर्मादीनां विम्बप्रतिबिम्बभावप्रतीतिः सञ्जायते तत्र दृष्टान्तालङ्कारः। यथा- त्वयि दृष्ट एव तस्या निर्वाति मनोमनोभवज्वलितमित्यादि।

दीपकालङ्कारः- यत्र उपमेयोपमानरूपवस्तूनां क्रियादिरूपधर्मस्य एकबारमेव ग्रहणं भवति अथवा क्रियापदानामनेकविधत्वेऽपि कस्याप्येकस्य कारकस्य ग्रहणं भवति तत्र दीपकालङ्कारः। यथा- कृपणानां धनं नागानां फणमणिः केसरासिम्भानां इत्यत्र दीपकालङ्कारः।

तुल्ययोगितालङ्कारः- यत्र प्रकृताप्रकृतवस्तूनां नियतानां साधारणधर्मः एक बारमेव गृह्यते तत्र तुल्योगितालङ्कारः। पाण्डुक्षामं वदनं हृदयमित्यादि।

व्यतिरेकालङ्कारः- यत्र उपमानापेक्षया उपमेयस्य गुणविशेषाद्युत्कर्ष द्वारा वर्णनं भवति तत्र व्यतिरेकालङ्कारः। यथा- क्षीणः क्षीणोऽपि शशीभूयोभिर्वर्धते सत्यम्। विरम प्रसीद सुन्दरि यौवनं अनिवति यातन्तु इत्यादि। अस्य च चतुर्विंशति भेदाः भवन्ति। यथा-

व्यतिरेक

अश्लेषनिबन्धनः	श्लेषनिबन्धनः =२	
अश्लेषनिबन्धनः	श्लेषनिबन्धनः २×३=६	
शब्देसाम्ये	आर्थेसाम्ये	आक्षिप्ते साम्ये
हेतुद्वयोक्तौ एकहेत्वनुक्तौ	अपरहेत्वनुक्तौ हेतुद्वयानुक्तौ ६×४-२४	

आक्षेपालङ्कारः- यत्र विशेषकथनमिच्छया वक्ष्यमाणस्य भवति निषेधः तत्राक्षेपालङ्कारः। अयं द्विविध.- वक्ष्यमाणविषयकः उक्तविषयकश्च। यथा- ए एहि किमपि कस्याऽपि अथवा ज्योत्स्नामौक्तिकदां चन्दन रसः शीतांशुकान्त द्रवः इत्यादि।

विभावनालङ्कारः- यत्र हेतुरूपक्रियायाः निषेधेऽपि फलरूपस्य कार्यस्य प्रकाशनं भवति तत्र विभावनालङ्कारः। यथा- कुसुमितलताभिः रहताप्यधत्त इत्यादि।

विशेषोक्त्यलङ्कारः- यत्र अखण्डेषु कारणेष्वपि कार्योत्पत्ति कथनं न क्रियते तत्र विशेषोक्त्यलङ्कारः। स च त्रिविधः-अनुक्तनिमित्ता, उक्तनिमित्ता तथा अचिन्त्यनिमित्ता।

निद्रानिवृत्तावुदिते द्विरत्ने इत्यादिन्युदाहरणानि।

यथासंख्यालङ्कारः- यत्र केनापि क्रमेणोक्तानां पदार्थानां तेनैव क्रमेणान्वयः तत्र यथा संख्यालङ्कारः। यथा- एकस्त्रिधा वससि चेतसि चित्रमत्रेत्यादि।

अर्थान्तरन्यासालङ्कारः- यत्र साधर्म्येण वैधर्म्येण वा सामान्यस्य विशेषस्य वा वस्तुनः तद्भिन्नेन समर्थनं क्रियते तत्रार्थान्तरन्यासः। अयमपि चतुर्विधः। उदाहरणं यथा- निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतमित्यादि।

विरोधालङ्कारः- यत्र यथार्थरूपेण विरोधाभावेऽपि परस्परविरुद्धयोः द्वयोः वस्तुनोः वर्णनं भवति तत्र विरोधालङ्कारः। अयं च दशविधः। उदाहरणं यथा- अभिनवनलिनी किसलयमृणालबलयादिदवदहनराशिरित्याद्युदाहरणानि सन्ति।

स्वभावोक्त्यलङ्कारः- यत्र बालकादि पदार्थानां स्वाश्रितक्रियारूपादिना वर्णनं क्रियते तत्र स्वभावोक्त्यलङ्कारः।

व्याजस्तुत्यलङ्कारः- यत्र यत्रापाततः निन्दास्तुतिर्वा प्रकटीभवति तथा तात्पर्यतः तदविपरीतास्तुतिर्निन्दा वा प्रतीयते। तत्र व्याजस्तुतिः। यथा- हित्वा त्वामुपरोध बन्ध्यमनसामन्येन मौलिकपरो इत्यादि।

सहोक्त्यलङ्कारः- यत्र सहार्थबलात् एकमेव पदं अर्थद्वयवाचकं भवति तत्र सहोक्त्यलङ्कारः। यथा- सहदिवसनिशाभिर्दीर्घाःश्वास दण्डाः इत्यादि।

विनोक्त्यलङ्कारः- यत्र एकं विना अपरः न शोभनः न वा अशोभनः तत् विनोक्त्यलङ्कारः। यथा- अरूचिर्निशया विना शशि शशिनासापि विना महत्तमः इत्यादि।

परिवृत्त्यलङ्कारः- यत्र समानेनासमानेन वस्तुना पदार्थानां विनिमयः तत्र परिवृत्त्यलङ्कारः। यथा- लतानामेतासामुदितकुसुमानां मरूद्वयं अथवा नानाविधप्रहरणैर्नृप सम्प्रहारे स्वीकृत्य दारूणनिनादवतः प्रहारानित्यादि।

काव्यलिङ्गमलङ्कारः- यत्र वाक्यार्थरूपे पदार्थरूपे वा कस्याप्यनुपपन्नार्थस्योप-पादक हेतुः प्रतिपाद्यते तत्र काव्यलिङ्गम्। यथा-वपुः प्रादुर्भावादनुमितमिदं यन्मनि पुरा इत्यादि।

पर्यायोक्त्यलङ्कारः- यत्र वाच्यवाचकभाव सम्बन्धविनैव वाक्यार्थप्रतिपादनं भवति तत्र पर्यायोक्तम्। यथा- यं प्रेक्ष्य चिररूढाऽपि निवासप्रीति उज्झिता इत्यादि।

समुच्चयालङ्कारः- यत्र प्रस्तुतकार्यस्य सिद्धेः साधकस्य विद्यमानत्वेऽपि साधकान्तराण्यपि कथ्यन्ते तत्र समुच्चयालङ्कारः। यथा- दुर्वाराः समरमार्गणाः प्रियतमो दूरोमनोऽत्युत्सुकमित्यादि।

पर्यायालङ्कारः- यत्रैकस्यैव वस्तुनः क्रमशः अनेकाधारेषु प्रयोगो भवति तत्रायमलङ्कारः। यथा- विम्बोष्ठ एव रागस्ते तन्वी पूर्वमदृष्यत इत्यादि।

अनुमानालङ्कारः- यत्र साध्यसाधनभावस्य कथनं भवति तत्रानुमानालङ्कारः।

यथा- यत्रैता लहरिचलाचलदृशो व्यापारयन्ति भ्रुवमित्यादि।

परिकरालङ्कारः- यत्र यत्राभिप्राययुक्तविशेषणैः विशेष्यं परिपुष्णाति तत्र परिकरालङ्कारः। यथा- महौजसो मानधनाधनार्चिता धनुर्भृतः सञ्जति लब्धकीर्तयः इत्यादि।

व्याजोक्त्यलङ्कारः- यत्र स्पष्टरूपेण प्रकटितं वस्तुस्वरूपं कपटेन गोपनं भवति तत्र व्याजोक्त्यलङ्कारः। यथा- शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तुपगूढोलसत इत्यादि।

परिसंख्यालङ्कारः- अन्यप्रमाणैरवगतवस्तुरपिशब्दैः प्रतिपादयन् अन्यप्रयोजनाभावेन स्वसमानान्यवस्तुव्यावृतिरूपा परिणतिर्भवति तत्र परिसंख्यालङ्कारः। यथा- किमासेव्यं पुंसां सविधमन्वघं द्विसरितः इत्यादि।

असंगत्यलङ्कारः- यत्र कार्यकारणरूपयोः धर्मयोः अत्यन्तभिन्नस्थानेस्वेकत्रस्थिति-कथनमसंगत्यलङ्कारः। यथा- यस्यैव व्रणं तस्यैव वेदना भणति तज्जनोलीकम्। दन्तक्षतं कपोले वध्वा वदेना सपत्नीनामित्यादि।

स्मरणालङ्कारः- यत्र अनुभूतसमानवस्तूपलब्ध्या पूर्वानूभूतवस्तुस्मृतेः तत्र स्मरणालङ्कारः। यथा- निम्ननाभिकुहरेषु यदम्भः प्लावितं चरदृशां लहरिभिः। तद्भवैः कुहरूतैः सुरनार्यः स्मारिताः सुरतकण्ठयुतानामित्यादि।

भ्रान्तिमानलङ्कारः- यत्र तुल्यपदार्थयोः दर्शनेन अप्रस्तुतस्य पदार्थस्य प्रतीतिर्भवति तत्र भ्रान्तिमानलङ्कारः। यथा- कपालेमार्यारः पय इति करां लेढि शशिनः इत्यादि।

प्रतीपालङ्कारः- यत्रोपमानाक्षेपेण निन्दा निषेधो वा क्रियते अथवा उपमानतिरस्कार-सम्पादनाय तस्योपमेयरूपेण कल्पना क्रियते। तत्राक्षेपालङ्कारः। यथा- लावण्यौकसि सप्रतापगमण्यग्रेसरे त्यागिनामित्यादि।

अतद्गुणालङ्कारः- यत्र अप्रस्तुतरूपेण रूपग्रहसम्भावनायामपि न्यूनगुणयुक्ताप्रस्तुत वस्तुग्रहणं न करोति तत्र अतद्गुणालङ्कारः। यथा- धवलोऽसि यद्यपि सुन्दर तथापि त्वाया मम रञ्जितं हृदयमित्यादि।

सङ्करालङ्कारः- यत्र स्वस्वरूपे निरपेक्षभावेन अपर्यसित उपर्युक्तालङ्काराणां अङ्गाङ्गिरूपेण विद्यमानत्वात् सङ्करालङ्कारः। यथा-आत्ते सीमन्तरत्ने मरकतिनी हृते हेमताटङ्कपत्रे इत्यादौ अङ्गाङ्गिभावसङ्करालङ्कारः। एवं संक्षेपेण अलङ्काराणां प्रतिपादनं कृतं मयेति शम्।

उपसंहारः- शोधप्रबन्धेऽस्मिन् प्रथमेऽध्याये मम्मटं काव्यलक्षणं प्रस्तुत्य तस्य विवेचनं कृतम्। तत्रैव चान्येषामाचार्याणां काव्यलक्षणानि समुपस्थाप्य आलोचनं कृतम्। पण्डितराजजगन्नाथस्य रमणीयार्थप्रतिपादकः शब्दः काव्यमिति लक्षणेन सह मम्मटकृतस्य लक्षणस्य तोलनमपि कृतम्। रसगङ्गाधरे प्राञ्च इति शब्देन येषां मतानि सन्ति तेषामपि सम्यक् विवेचनं प्रस्तुतम्। अनन्तरञ्च रीतिवादिनां मतं तथा विश्वनाथकृतं वाक्यं रसात्मकं काव्यमिति लक्षणमपि समीक्षितम्। तथा अग्निपुराणीयं लक्षणं प्रारभ्य अधुनातनसमुपस्था-

पितानां लक्षणानां विचारः कृतो वर्तते। तदनन्तरं काव्यभेदस्य प्रतिपादनं कृतं मम्मटमतेन पण्डितराजोक्तं उत्तमोत्तमं काव्यं अत्र न विचार्य मम्मटस्य पन्था आश्रितः। तदनन्तर च काव्यप्रकाशे समुपस्थापितानि काव्यप्रयोजनानि सम्यक् विचारितानि सन्ति। यतोहि प्रयोजनज्ञानं विना न मन्दोऽपि पुरुषः कस्मिंश्चिदऽपि कार्ये न प्रवर्तते। ततश्च कारणं विना न प्रवर्तते कार्यमिति न्यायेन कविकर्मकाव्यं प्रत्यपि कारणानि अवश्यमेव भविष्यन्तीति कृत्वा कारणानां मम्मटप्रतिपादितानां विचारः कृतः। तत्रेदमपि विचारितं यत् शक्तिरेव मुख्यं कारणमिति। अन्यानि च कारणानि तस्या एव बीजभूतायाः शक्तेः समुद्बोधकानि सन्ति इति। द्वितीये चाध्याये वृत्तीनां विचारः प्रस्तुतः। वृत्ति च शक्तिर्लक्षणाव्यञ्जनारूपा। साहित्यशास्त्रेऽस्मिन् व्यञ्जनायाः अत्यन्तमधिकं महत्त्वं वर्त्तते। तत्रापि सर्वस्याः वृत्तेः मूलं अभिधैव वर्त्तते। अभिधा तु शक्तिरूपा अनादियोग्यतारूपा वा वर्त्तते। तत्रैव नैयायिकानां मीमांसकानां च मतमपि समीक्षितम्। वैयाकरणमतमपि तत्रैव निरूपितम्। नवीनवैयाकरणाः लक्षणां नाङ्गीकुर्वन्ति अपितु शक्तिरेव द्विविधा वर्त्तते इति वदन्ति। प्रसिद्धा शक्तिः, अप्रसिद्धा शक्तिरिति भेदेन द्वैविध्यं शक्तेः प्रतिपादयन्ति। आपामरप्रसिद्धा प्रसिद्धाशक्ति, विदुषां समवाये एव व्यवहृता अप्रसिद्धा शक्तिः। परन्तु न रोचते मह्यम्। केवलं शब्दपरिवर्तनमेवात्र प्रतिभाति। वृत्तयश्च गणनया तिस्र एव तिष्ठन्ति। मीमांसकाः व्यञ्जनां न विवेचयन्ति। न व्यञ्जनायाः कुत्रचित् खण्डनं दृश्यते नाऽपि मण्डनम्। विषयेऽस्मिन् तुष्णीमेवावतिष्ठन्ते। साहित्यशास्त्रस्य जीवातुरूपेयं व्यञ्जनेति। तस्मात् विशेषेण विवेचयन्ति। तृतीयेऽध्याये रसनिष्पत्तिप्रक्रियायाः समीक्षणं वर्त्तते। यद्यपि रसनिष्पत्तौ एकमेव सूत्रं नाट्याचार्यस्य भगवतः भरतस्य वर्त्तते। तस्यैव सूत्रस्य व्याख्यातृभेदात् व्याख्यानीभेदेन प्रकारचतुष्टयं सञ्जातम्। रस एव आत्मा काव्यस्य। स च ब्रह्मस्वरूपः। अतएवोक्तमू- 'रसो वै स' इति। सर्वेषु विवेचनेषु श्रीमतां अभिनवगुप्तपादानां व्याख्यानं सर्वश्रेष्ठमिति सर्वे समामनन्ति। अत एव तस्य विस्तृतं व्याख्यानं वर्त्तते। भट्टलोल्लट प्रभृतिषु व्याख्यातृषु काचिद् त्रुटिः दृश्यते। अत एव रसनिष्पतौ अभिनवगुप्तपादानां मतं श्रेष्ठमिति कृत्वा सर्वेषां शिरोधार्यम्। चतुर्थे चाध्याये दोषाणां समीक्षणं कृतम्। तत्र रसापकर्षकाः दोषाः इति विश्वनाथीयं दोषलक्षणं सम्यक तोलितम्। मुख्यार्थ हतिर्दोषः इति मम्मटकृतं दोष लक्षणं वर्त्तते। अत्र प्रयुक्तहतिशब्दः अपकर्षार्थकः। अतः मुख्यार्थापकर्षकाः दोषाः इत्येव वक्तव्यम्। रसशब्देन रसभावतदाभासादीनामपि ग्रहणं भवति। अतो यत्र यस्य मुख्यार्थस्य येनापहतिः स एव दोषः। इति विचार्य श्रुतिकटुत्वादीनां सम्यक् विवेचनं कृतं वर्त्तते। पञ्चमे चाध्याये काव्यगुणानां विचारः। यथा दोषाः रसाद्यऽपकर्षकाः भवन्ति तथैव गुणाः रसादीनामुत्कर्षकाः भवन्ति। यथा मानवस्य आत्मनि शौर्यादयो गुणाः भवन्ति तथैव काव्यशरीरेऽपि उत्कर्षाधायकाः गुणाः भवन्ति। एतेषां गुणानां विचारः कृतः। तथा कस्यामवस्थायां तेषां वर्णानां कीदृशः प्रयोगः कस्मिन् च रसे केषां वर्णानां दोषावहत्वं भवतीति सम्यक् विचारितम्।

षष्ठे चाध्याये अलङ्काराणां समीक्षणं वर्त्तते। तत्र पूर्वं शब्दालङ्काराणां वर्णनं विद्यते। तेषां च भेदा अपि निरूपिताः सन्ति। ततश्च अर्थालङ्काराणां उपमाप्रभृतीनां विवेचनं कृतमस्ति। येन अलङ्कारेण शब्द अलंक्रियते ते शब्दालङ्काराः भवन्ति। येन च अर्थ अलंक्रियते ते अर्थालङ्काराः सञ्जायन्ते। भरतमुनिमते चत्वारोऽलङ्काराः स्वीकृताः। ततश्च वामनमारभ्य दीक्षितपर्यन्तं अलङ्काराणां यो विकासक्रमः सोऽपि समुपस्थापितः। परन्त्वत्र मम्मटपन्थानमाश्रित्यैव प्रवृत्तः विचारः। तेष्वपि मुख्यानामलङ्काराणामेवात्र विवेचनं वर्त्तते। तेषां भेदोपभेदाऽपि सुविचारिताः सन्ति। तेषामुदाहरणानि संक्षेपेण समुपस्थापितानि सन्ति। एवं शोधप्रबन्धोऽयं सम्पूर्णतां प्राप्नोतीति शिवम्।

॥ अन्यग्रन्थेभ्य उदाहृतवाक्यानां सूची ॥

१. अङ्कपाली परिरम्भ इति मेदिनीकार:।
२. अन्यदेहचिकित्सार्हासाध्यरोगे च चायत इति विश्वः।
३. अनेडमूक उद्दिष्ट शठे वाक्श्रुतिवर्जित इति मेदिनी।
४. अभिप्रायवशौ छन्दावित्यमरः। ३/२/२०
५. अज्ञानेन पटुनिर्भाग्य मरा इत्यमरः। ३/३/६५
६. अरं शीघ्रे च चक्राङ्गे इति विश्वः।
७. अस्मदो द्वयोश्च। पा.सू. १/२/५९
८. अपरस्यार्धे पश्चभावो वक्तव्यः। कात्यायनवार्त्तिकम्। ३२/५३
९. आत्मत्वे व्यवसाये च चित्ते प्राणिषु जन्तुषु इति विश्वः।
१०. ओत्तोष्ठयो: समासे वा। कात्यायनवार्त्तिकम्-३६/३४
११. अदेङ् गुणः। पा.सू.- १/१/२।
१२. उल्लाघो निर्गतो गदादित्यमरः। २/६/५७।
१३. उपदिष्टे च काव्यबन्धे प्रवर्त्तत इति महेशः।
१४. उपमानानि सामान्यवचनैः। पा.सू-२/१/५५।
१५. उपमानादाचारे। पा.सू.- ३/१/१०
१६. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। पा.सू.- २/१/५६।
१७. उपायाः श्रद्धादयोः मृदुमध्यादिमात्राः इत्यारभ्यपराग्भवीयवासनादृष्टवसा-देवेत्यन्तम्। पा.मभा - १/२०।
१८. एडमूकः स्मृतो धीरैः शठे वाक् श्रुतिवर्जित इति विश्वकोशात्।
१९. कपोतपालिकायां तु विटकः पुन्नपुंसकमित्यमरः। २/३/१५
२०. कृतान्तो यमसिद्धान्तदवा कुशलकर्मस्थिति कोशः।
२१. कोशो ऽस्त्री कुड्मले खखड्गपिधाने ऽर्थौघदिव्ययोरित्यमरः। २/५/३७ टीकायां उद्धृतम्।
२२. कर्तुः क्यङ्शलोपश्च। पा.सू.-३/१/११।
२३. क्ङिति च। पा.सू.-१/१/५।
२४. कृत्यल्युटो बहुलम्। पा.सू.-३/३/११३।
२५. गात्रेण गात्रस्पर्शणं स्पष्टकम्। कामसूत्र-
२६. घर्घरस्तु चलद्वारिध्वान इति विश्वः।
२७. चित्रमेघच्छन्नः सन्ध्यातुल्यकाल इति महेशः।
२८. जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः। २/१०/१६।
२९. टङ्कः पाषाणदारण इति कोशः।

३०. ढ्रलोपे पूर्वस्य दीर्घोऽणः । पा.सू.- ६/३/१११
३१. तातो ऽनुकम्प्ये जनक इति विश्वः।
३२. तत्र तस्येव। पा.सू.- ५/१/११६
३३. तेन तुल्यं क्रियाचेद्वती। पा.सू.- २/१/५५
३४. तेन वित्तश्चञ्चुपूचणपौ। पा.सू - ५/२/२६।
३५. तीव्रसम्वेगानां आसन्नः। योगसूत्र-१/२१
३६. देवीकृताभिषिकायामित्यमरः। १/७/१३।
३७. दीधीवेवीटाम्। पा.सू.-१/१/६।
३८. द्वितीयाद् वै भयं भवति। उपनिषद्वाक्यम्-
३९. नामप्रकाश्यसम्भाव्यक्रोधोपगमकुत्सने इति अमरोक्तेः। ३/४/२५१
४०. निर्लोभे नृपतौ हंस इति विश्वः।
४१. "नित्यं पदार्थाभिनयो नृत्तंताललयाश्रितम्" इति संगीतरत्नाकरः।
४२. प्रदोषो रजनीमुखमित्यमरः। १/४/६।
४३. पृष्ठवंशाधरे त्रिकमित्यमरः। २/६७६।
४४. प्रोथो ऽध्वगे ऽश्वघोणायामिति विश्वः।
४५. प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च। पा.सू.-१/४/१०६।
४६. बतायन्त्रणसन्तोषखेदानुक्रोश विस्मय इति कोशात्।
४७. वृद्धिरादैच। पा.सू.- १/१/१।
४८. भवेदनुशयो द्वेष इति विश्वः।
४९. भागोरुपार्द्धके प्रोक्तौ भागधेयैकदेशयोरिति विश्वः।
५०. भद्रो मन्द्रो मृगश्चैव एतेऽष्टौ गजयोनयः।
५१. मदो रेतसिकस्तूर्यां गर्वे हर्षे मदानयोरिति विश्वः।
५२. मुग्धानां सुन्दरीणां विदग्धसमानान्तरे रत्नभूतेत्यर्थः इति महेशः।
५३. मिथोऽन्योन्यरहस्यमपीत्यमरः। ३/४/२५६।
५४. मूढास्यापटुनिर्भाग्यामन्दा इत्यमरः। ३/३/९५।
५५. मोहमिच्छन्ति मूर्छायामविद्यायाञ्च सूरय इति विश्वः।
५६. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। पा.सू.-१/४/१०५।
५७. यमनियमासनप्राणायामप्रत्याहारधारणाभ्यां समाधिरित्यादि। योगसूत्र-२/२०।
५८. रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः। ३/३/१२६।
५९. रभसो हर्षवेगयोरिति विश्वः।
६०. विद्वत्सु प्रगल्भौ विशारदावित्यमरः। ३/३/९५।
६१. लज्जामर्थान्मदीया दधति पुष्णन्तीत्यर्थ इति दीपिका।

६२. विभ्रमाललितं तथेत्यमर इति। १/७/३१।

६३. वितर्क विचारा। योगसूत्र-१/१७।

६४. षष्ठी चानादरे। पा.सू.-२/३/३८।

६५. स्मृतं तामरसं पद्मकाञ्चनयोरपीति विश्वः।

६६. सप्तम्यर्थे पञ्चमी दूरस्थ इत्यर्थ इति महेशः।

६७. सायकः शरखड्गयोरिति विश्वः।

६८. सर्वप्रातिपादिकेभ्यः क्विप् वा वक्तव्यम्। का. वार्तिक- १७/२२।

६९. सूर्यः आत्मा जगतस्तस्थुश्च। उपनिषद् वाक्यम्।

७०. स्वरः सम्मूर्च्छितो यत्र रागतः प्रतिपद्यते।
मूर्च्छनामिति तां प्रादुर्गीततत्वविदो जनाः॥

७१. श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्। योगसूत्रम्-१/२०।

७२. हारोमुक्तावताविति विश्वः।

७३. हेलालीलेत्यमी हावाः क्रियाः शृङ्गारभावजा इति कोशवाक्यस्य विलासादिषु हावपदशक्तिप्रतिपादनार्थत्वादिति।

सहायकग्रन्थानां सूची

ग्रन्थाः	लेखकाः	सम्पादकाः
अग्निपुराणम्	श्रीमन्महर्षिकृष्णद्वैपायन-व्यासः	आचार्य बलदेव उपाध्यायः, वाराणसी, १९६६
अभिधावृत्तिमातृका	मुकुलभट्टः	बम्बई, १९१६
अभिनव भारती	अभिनवगुप्तः	डॉ. नगेन्द्र, दिल्ली, १९६०
अलंकारसर्वस्वम्-'संजीवनी' टीका सहित	रुय्यकः श्री विद्याचक्रवर्ती	डॉ. रामचन्द्र द्विवेदी दिल्ली, १९६५
अष्टाध्यायी (भाष्यम्)	पाणिनिः	अमृतसरः, १९६८
आनन्दवर्धनः		डॉ. रेवाप्रसाद द्विवेदी, भोपाल, १९७२
औचित्यविचार चर्चा	क्षेमेन्द्रः	इलाहाबाद, संवत् २०२१
काव्यप्रकाशः	मम्मटः	आचार्य विश्वेश्वरः, डॉ. नगेन्द्र ,वाराणसी, संवत् २०१७ वि.।
काव्यप्रकाशः	मम्मटः	डॉ. सत्यव्रत सिंह, वाराणसी, १९६० ई.
काव्यप्रकाशः	मम्मटः	वाराणसी सं. २०२९ वि.
काव्यप्रकाशः -बालबोधिनी टीका	वामनाचार्यझलकीकरः	पूना१९५०
काव्यप्रकाशः -दीपिका टीका	चण्डीदासः	शिवप्रसाद भट्टाचार्य, भाग त्रयम् वाराणसी, १९६३-६५।
काव्यप्रकाश टीका	श्रीयशोविजयजी महाराजः	डॉ. रुद्रदेवत्रिपाठी, बम्बई प्रथम संस्करणम्,१९७६
काव्यप्रकाशः 'संकेत' टीका	माणिक्यचन्द्रः	डॉ. अभ्यंकरः, पूना, १९२१
काव्यप्रकाशः 'संकेत'-टीका	माणिक्यचन्द्रः	डॉ. आर.शर्मा शास्त्री,मैसूर, १९२२ ई.
काव्यप्रकाशः 'विवेक' टीका	श्रीधरः	प. शिवप्रसाद भट्टाचार्य, कलकत्ता भागः (१-४ उल्लासः) १९५६ भागः २ (५-१० उल्लासः) १९५१ तमेशकवतसरे।
काव्यप्रकाशः- काव्यादर्श		

अथवा 'संकेत' टीका	सोमेश्वरः	आर.सी. पारीखः, जोधपुरम् १९५९ ई.।
काव्यप्रकाशः- बालचिन्तानुरंजनी	श्री नरहरि सरस्वती तीर्थ विश्वनाथ	डा. गोपराजुरामा, जगन्नाथ पाठक, प्रयाग
काव्यदर्पणः-सारबोधिनी टीका सहितः	श्रीवत्सलांछनभट्टाचार्यश्च	१९७६
काव्यप्रकाशः सम्प्रदायप्रकाशिनी टीका	श्री विद्या चक्रवर्ती	श्री एच. हरिहरशास्त्री, त्रिवेन्द्रम् संस्कृत सीरिजः, १९२६, १९३० (दो भागों में)
काव्यप्रकाशः	लोहित्यभट्टः	
साहित्यचूणामणिः टीका	गोपालः	
काव्यप्रकाशः-'सुधासागर' टीका सहितः	आचार्य भीमसेन दीक्षितः	श्री नारायण शास्त्री खिस्ते, वाराणसी, १९२७
काव्यप्रकाश खण्डनम्	सिद्धिचन्द्रगणिः	प्रो. रसिक लालः, छोटेलालः पारिख, बम्बई २००९ सं.
काव्यपरीक्षा	श्रीवत्सलांछनभट्टाचार्य	श्रीपरशुराम शर्मा, १९५६
काव्यप्रकाशः 'रसप्रकाश' टीका	श्रीकृष्ण शर्मा	डॉ. एस.एन. घोषालः, वाराणसी, १९७३
काव्यप्रकाशः 'नागेश्वरी' टीका	श्री हरिशंकर शर्मा	बनारस
काव्यप्रकाशः 'सारदीपिका' टीका	गुणरत्नगणिः	टी.एस. नन्दी अहमदाबाद, १९७६
Kavyaprakasa of Mammata	A.B. Gajendra Gadkar,	
Kavyaprakasa of Mammata (Ullasa x)	H. Dutt sharma, poona, 2nd. Ed., 1951.	
Kavyaprakasa of Mammata	Dr. Ganga Nath Jha, 1aranasi, 1967	
Kavyaprakasa(Ullasa 1,2,3) (The politic Leght)	S.S. Sukthankar, Bomba4 Ed.1933	
Kavyaprakasa of Mammata (Vol. 1Ullasa i-vi)	R.c. D2i1edi, Delhi 1977.	
काव्यप्रदीपः	गोविन्द ठक्कुरः	पं. दुर्गादासः, बम्बई, १९३३

काव्यप्रकाशः-'विवरण' टीका	गोकुलनाथोपाध्यायः	कविशेखर श्री बदरीनाथ झाः, वाराणसी, १९२२।
काव्यालंकारः	भामहः	देवेन्द्रनाथ शर्मा, पटना, १९६२
काव्यालंकारः टिप्पणी सहितः	रूद्रटः	डॉ. सत्यदेव चौधरी, दिल्ली १९६५
काव्यादर्शः	दण्डी	श्रीरामचन्द्र मिश्रः, वाराणसी १९५८
काव्यलक्षणम्	दण्डी	
काव्यानुशासनम्	हेमचन्द्रः	बम्बई, १९६४
काव्यानुशासनम्	वाग्भटद्वितीयः	बम्बई, १९१५
काव्यमीमांसा	राजशेखरः	पटना संवत् २०२१
काव्यालंकार सारसंग्रहः	उद्भटः	डॉ. राममूर्ति त्रिपाठी, प्रयागः, १९६६।
काव्यालंकारसूत्रवृत्तिः 'कामधेनू' टीका सहिता	वामनः	कृष्णसूरि, १९०९
कुवलयानन्दः	अप्पय्यदीक्षितः	डॉ. भोलाशंकरोव्यासः, बनारस, १९५६।
चन्द्रालोकः	जयदेवः	१.-पं. बदरीनाथ शुक्लः, दिल्ली, १९६६।
चन्द्रालोकः	जयदेवः	२- बनारस, १९५०
चित्रमीमांसा-'सुधा' संस्कृत व्याख्या सहिता	अप्पय्यदीक्षितः श्रीधरानन्दः	श्रीजगदीशचन्द्रमिश्रः वाराणसी, वि.सं. २०२८
दशरूपकम् 'अवलोक' टीका सहितम्	धनञ्जयः	डॉ. भोलाशंकरोव्यासः, वाराणसी, १९६७।
ध्वन्यालोकः	आनन्दवर्धनः	डॉ. नगेन्द्रः, वाराणसी, सम्वत् २०१९
ध्वन्यालोकः 'लोचन' सहितः	अभिनवगुप्तः	डॉ. रामसागरत्रिपाठी, दिल्ली, १९३३
नाट्यशास्त्रम्	भरतः	श्रीबाबूलालशुक्लः शास्त्री, वाराणसी, १९७२।
नाट्यशास्त्रम्	भरतः	डॉ. रविशंकरनागरः, दिल्ली, १९८१।

परमलघुमञ्जूषा	नागेशभट्टः	पण्डितोऽलखदेव शर्मा, वाराणसी, १९७४।
मम्मटः	पो. धुण्डितराजगोपाल सप्रे	मध्यप्रदेश-हिन्दी -ग्रन्थ-अकादमी, १९७१।
महिमभट्टः	डॉ. ब्रजमोहनचतुर्वेदी	प्रथम संस्करणम्, दिल्ली, १९६८
नाट्यदर्पणः	रामचन्द्रगुणचन्द्रः	आचार्य विश्वेश्वरः, दिल्ली १९६८
रसगंगाधरः-'चन्द्रिका' संस्कृतव्याख्यासहितः	पण्डितराजो जगन्नाथः	१. पं. श्रीमदनमोहनझाः, वाराणसी २. साहित्याचार्यः श्री मधुसूदन शास्त्री वाराणसी।
वक्रोक्तिजीवितम्	कुन्तकः	श्री राधेश्याममिश्रः वाराणसी, १९६७।
व्यक्तिविवेकः	महिमभट्टः	श्री मधुसूदनशास्त्री, बनारस,१९३६।
व्यञ्जनाविमर्शः	डॉ. रविशंकरनागरः	दिल्ली, १९७७
वाक्यपदीयम्	भर्तृहरिः	के.वी. अभ्यंकरः, पूना, १९६५।
वाग्भटालंकारः	वाग्भटप्रथमः	डॉ. सत्यव्रत सिंहः, वाराणसी, १९५७।
शृंगारप्रकाशः	भोजः	जी.आर. ज्योशेर मैसूरम्, १९५५।
सांख्यकारिका	ईश्वरकृष्णः	दिल्ली, १९६६।
साहित्यदर्पणः	विश्वनाथः	१. डॉ. सत्यव्रतसिंहः वाराणसी, १९५७। २. श्री शालिग्रामशास्त्री, दिल्ली, १९६१।
सरस्वतीकण्ठाभरणम्	भोजः	डॉ. कामेश्वरनाथ मिश्रः, वाराणसी, १९७६।

श्लोकानुक्रमणिका

